अभिनन्द्य तमायीभिराजगाम पुनर्महीम् ॥
अथात्रेयो मुनिश्रेष्ठो भगवान् करुणाकरः ।
स्वनाम्ना संहितां चक्रे नरचक्रानुकम्पया ॥
ततोऽग्निवेशं भेडञ्च जातूकर्णं पराशरम् ।
हारपाणिञ्च हारीतमायुर्वेदमपाठयत् ॥
तन्त्रस्य कर्त्ता प्रथममग्निवेशोऽभवत् पुरा ।
ततो भेड़ादयश्चक्रुः स्वं स्वं तन्त्रं कृतानि च ॥
श्रावयामासुरात्रेयं मुनिवृन्देन वन्दितम् ।
श्रुत्वा च तानि तन्त्राणि हृष्टोऽभूदत्रिनन्दनः ॥
यथावत् सूत्रितन्तस्मात् प्रहृष्टा मुनयोऽभवन् ।
दिवि देवर्षयो देवाः श्रुत्वा साध्विति तेऽब्रुवन् ॥

भरद्वाजप्रादुर्भावः ।

विघ्नभूता यदा रोगाः प्रादुर्भूताः शरीरिणाम् ।
तपःस्वाध्यायधर्म्माणां ब्रह्मचर्य्यव्रतायुषाम् ॥
तदा भूतेष्वनुक्रोशं पुरस्कृत्य महर्षयः ।
समेता पुण्यकर्म्माणः पार्श्वे हिमवतः शुभे ॥
भरद्वाजोऽङ्गिरा गर्गो मरीचिर्भृगुभार्गवौ ।
पुलस्त्योऽगस्तिरसितो वशिष्ठः सपराशरः ॥
हारीतो गौतम साङ्ख्यो मैत्रेयश्चवनोऽपिच ।
जमदग्निश्च गार्गश्च कश्यपः काश्यपोऽपि च ॥
नारदो वामदेवश्च मार्कण्डेयः कपिञ्जलः ।
शाण्डिल्यः सङ्कृतिर्गार्ग्यः शाकुनेयश्च गौनकः ॥
आश्वलायनसाङ्कृत्यौ विश्वामित्रः मरीचकः ।

देवलो गालवो धौम्यः काम्यकात्यायनावुभौ ॥
काङ्कायनो वैजपायः कुशिको वादरायणः ।
हिरण्याक्षश्च लौगाक्षिः शरलोमा च गोभिलः ॥
वैखानसा बालखिल्यास्तथैवान्ये महर्षयः ।
ब्रह्मज्ञानस्य निधयो यमस्य नियमस्य च ॥
तपस्तेजसा दीप्ता ह्यमाना इवाग्नयः ।
सुखोपविष्टास्ते तत्र पुण्याश्चक्रुः कथामिमाम् ॥
धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम् ।
रोगास्तस्यापहर्त्तारः श्रेयसो जीवितस्य च ॥
प्रादुर्भूतो मनुष्याणामन्तरायो महानयम् ।
कः स्वात्तेषां शमोपाय इत्युक्ता ध्यानमास्थिताः ॥
अथ ते शरणं शक्रं ददृशुर्ज्ञानचक्षुषा ।
स वक्ष्यति शमोपायं यथावदमरप्रभुः ॥
कः सहस्राक्षभवनं प्रष्टुं गच्छेत् शचीपतिम् ।
अहमर्थे नियुज्येयमत्रेति प्रथमं वचः ॥
भरद्वाजोऽब्रवीत्तस्मादृषिभिः स नियोजितः ।
इत्थं स मुनिभिर्योग्यैः प्रार्थितो विनयान्वितैः ॥
भरद्वाजो मुनिश्रेष्ठो जगाम त्रिदशालयम् ।
तत्रेन्द्रभवनं गत्वा सुरर्षिगणमध्यगम् ॥
दृष्टवान् हवहन्तारं दीप्यमानमिवानलम् ।
दृष्ट्वैव स मुनिं प्राह भगवान् मघवा मुदा ॥
धन्वन्तरे ! स्वागतं तेऽस्य मुनिं तं समपूजयत् ।
सोऽभिगम्य जयाशीर्भिरभिनन्द्य सुरेश्वरम् ॥
ऋषीणां वचनं सम्यक् श्रावयन् मुनिसत्तमः ।

व्याधयो हि समुत्पन्ना: सर्वप्राणिभयङ्करा: ॥
तेषां प्रशमनोपायं यथावद्वक्तुमर्हसि ।
तमुवाच मुनिं साङ्गमायुर्वेदं व्रतक्रतु: ॥
जीवेद्वर्षसहस्राणि देही नीरुङ् निग्रस्य यम् ।
सोऽनन्तपारं त्रिस्कन्धमायुर्वेदं महामुनि: ॥
यथावदचिरात् सर्वं बुबुधे तपसा मुनि: ।
तेनायु: सुचिरं लेभे भरद्वाजो निरामयम् ॥
अन्यानपि मुनींश्चक्रे नीरुज: सुचिरायुष: ।
तत्तज्जनिततज्ज्ञानचक्षुषा ऋषयोऽखिला: ॥
गुणान् द्रव्याणि कर्माणि दृष्ट्वा तद्विधिमाश्रिता: ।
आरोग्यं लेभिरे दीर्घमायुश्च सुखसंयुतम् ॥
आयुर्वेदोक्तविधिनान्येऽपि सुमनसस्तथा ॥

चरकप्रादुर्भाव: ।

यदा मत्स्यावतारेण हरिणा वेद उद्धृत: ।
तदा शेषश्च तत्रैव वेदं साङ्गमवाप्तवान् ॥
अथर्वान्तर्गतं सम्यगायुर्वेदञ्च लब्धवान् ।
एकदा स महीवृत्तं द्रष्टुं चर इवागत: ॥
तत्र लोकान् गदैर्ग्रस्तान् व्यथया परिपीडितान् ।
स्खलेषु बहुषु व्यग्रान् म्रियमाणांश्च दृष्टवान् ॥
तान् दृष्ट्वातिदयायुक्तस्तेषां दु:खेन दु:खित: ।
अनन्तश्चिन्तयामास रोगोपशमकारणम् ॥
सञ्चिन्त्य स स्वयं तत्र मुने: पुत्रो बभूव ह ।
प्रसिद्धस्य विशुद्धस्य वेदवेदाङ्गवेदिन: ॥
यतश्चर इवायातो न ज्ञात: केनचिद् यत: ।

तस्माच्चरकनाम्नासौ विख्यातः क्षितिमण्डले ॥
स भाति चरकाचार्यो वेदाचार्यो यथा दिवि ।
सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः ॥
आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन् ।
मुनयो बहवस्तैश्च कृतं तन्त्रं स्वकं स्वकम् ॥
तेषां तन्त्राणि संस्कृत्य समाहृत्य विपश्चिता ।
चरकेणाग्निनो नाम्ना ग्रन्थोऽयं चरकः कृतः ॥

धन्वन्तरिप्रादुर्भावः ।

एकदा देवराजस्य दृष्टिर्निपतिता भुवि ।
तत्र तेन नरा दृष्टा व्याधिभिर्भृशपीडिताः ॥
तान् दृष्ट्वा हृदयं तस्य दयया परिपीडितम् ।
दयार्द्रहृदयः शक्रो धन्वन्तरिमुवाच ह ॥
धन्वन्तरे ! सुरश्रेष्ठ ! भगवन् ! किञ्चिदुच्यते ।
योग्यो भवसि भूतानामुपकारपरो भव ॥
उपकाराय लोकानां केन किं न कृतं पुरा ।
त्रैलोक्याधिपतिर्विष्णुरभून्मत्स्यादिरूपवान् ॥
तस्मात् त्वं पृथिवीं याहि काशीमध्ये नृपो भव ।
प्रतीकाराय रोगाणामायुर्वेदं प्रकाशय ॥
इत्युक्त्वा सुरशार्दूलः सर्वभूतहितेप्सया ।
समस्तमायुषो वेदं धन्वन्तरिमुपादिशत् ॥
अधीत्य चायुषो वेदमिन्द्राद् धन्वन्तरिः पुरा ।
आगत्य पृथिवीं काश्यां जातो बाहुजवेश्मनि ।
नाम्ना तु सोऽभवत् ख्यातो दिवोदास इति क्षितौ ।
बाल एव विरक्तोऽभूच्चचार सुमहत्तपः ॥

यत्नेन महता ब्रह्मा तं काश्यामकरोन्नृपम् ।
ततो धन्वन्तरिर्लोकैः काशीराजोऽभिधीयते ॥
हिताय देहिना स्वीया संहिता विहितामुना ।
अयं विद्यार्थिनो लोकान् संहितां तामपाठयत् ॥

सुश्रुतप्रादुर्भावः ।

अथ ज्ञानदृशा विश्वामित्रप्रभृतयोऽविदन् ।
अथ धन्वन्तरिः काश्यां काशीराजोऽयमुच्यते ॥
विश्वामित्रो मुनिस्तेषु पुत्रं सुश्रुतमुक्तवान् ।
वत्स । वाराणसीं गच्छ त्वं विश्वे खरवल्लभाम् ॥
तत्र नाम्ना दिवोदासः काशीराजोऽस्ति बाहुजः ।
स हि धन्वन्तरिः साक्षादायुर्वेदविदां वरः ॥
आयुर्वेदं ततोऽधीत्य लोकोपकृतिहेतवे ।
रुर्वप्राणिदयातीर्थमुपकारी महामखः ॥
पितुर्वचनमाकर्ण्य सुश्रुतः काशिकां गतः ।
तेन सार्द्धं समध्येतुं मुनिसूनुशतं ययौ ॥
अथ धन्वन्तरिं सर्वे वानप्रस्थाश्रमे स्थितम् ।
भगवन्त सुरश्रेष्ठं मुनिभिर्बहुभिः स्तुतम् ॥
काशीराजं दिवोदासं तेऽपश्यन् विनयान्विताः ।
स्वागतञ्च इतिस्माह दिवोदासो यशोधनः ॥
कुशलं परिपप्रच्छ तथागमनकारणम् ।
ततस्ते सुश्रुतद्वारा कथयामासुरुत्तरम् ॥
भगवन् । मानवान् दृष्ट्वा व्याधिभिः परिपीड़ितान् ।
क्रन्दतो म्रियमाणांश्च जातास्माकं हृदिव्यथा ॥
आमयानां शमोपायं विज्ञातुं वयमागताः ।

आयुर्वेदं भवानस्मानध्यापयतु यत्नतः ॥
अङ्गीकृत्य वचस्तेषां नृपतिस्तानुवाचिमत् ।
व्याख्यात तेन ते यत्नाज्जगृहुर्मुनयो मुदा ॥
काशीराजं जयाशीर्भिरभिनन्द्य मुदान्विता ।
सुश्रुताद्या सुसिद्धार्था जग्मुर्गेह स्वकं स्वकम् ॥
प्रथम सुश्रुतस्तेषु स्वतन्त्रं कृतवान् स्फुटम् ।
सुश्रुतस्य सखायोऽपि पृथक् तन्त्राणि तेनिरे ॥
सुश्रुतेन कृत तन्त्रं सुश्रुत बहुभिर्मतः ।
तस्मात् तत सुश्रुत नाम्ना विख्यात क्षितिमण्डले ॥
ततः काले व्यतीते तु वाभटो भिषजां वरः ।
प्रादुर्बभूव धरणौ धन्वन्तरिरिवापरः ॥
आसीद्राजाधिराजस्य सत्यसन्धस्य धीमतः ।
ज्ञानिनः पाण्डवाग्रस्य सभाया सुचिकित्सकः ॥
प्रबन्धा बहवस्तेन प्रणीता हितकाम्यया ।
तेषामष्टाङ्गहृदयसहिता प्रथिता भुवि ॥
सा वाभटाभिधानेन ख्याता धरणिमण्डले ।
चरकात् सुश्रुताच्चैव तन्त्रेभ्योऽन्येभ्य एवच ॥
संगृहीता प्रयत्नेन लोकानुग्रहहेतवे ।
विचित्रं कौशलञ्चास्यां चिकित्सासु प्रदर्शितम् ॥
अनयोपकृत सर्वं जगदेतन्न संशयः ।
भूतानुकम्पाप्रवणो महेशः
श्मशानवासी जगदादिनाथः ।
स्वयोषियुक्तागदयोगरत्नैः
कीर्णानि तन्त्राणि बहूनि चक्रे ॥

रसग्रबन्धास्त्वधुनातना ये
तन्मूलका एव कृता: सुधीभि: ।
सृष्टिस्थितिध्वंसकृतोऽखिलाना-
मनादिनाथस्य महाप्रसादात् ॥
रसग्रन्थेषु तन्त्रेषु धातुशोधनमारणे ।
विहते च विशेषेण रसराजस्य संस्कृति: ॥
चरकादौ रसादीनां प्रयोगो नच दृश्यते ।
अत: प्रचार एतेषां हिताय जगतां मत: ॥
अथ सिद्धो नित्यनाथ: पार्वतीतनय: सुधी: ।
रसरत्नाकराख्यञ्च रसग्रन्थं प्रणीतवान् ॥
रसेन्द्रचिन्तामणिनामधेयं
टुण्टूनिनाथो भिषगग्रगण्य: ।
रसेन्द्रयुक्तैर्विविधैश्चकार
सुभेषजै: कीर्णमतीव चित्रम् ॥
अन्येऽपि बहवो धीरा रसग्रन्थान् प्रतेनिरे ।
सर्व एव हि ते ग्रन्था आश्चर्यफलदायिन: ॥
श्रीमाधवकरश्चेन्द्रसूनु: सूरितमो भिषक् ।
नानाशास्त्रोद्धृतं चक्रे संग्रहं रुग्विनिश्चयम् ॥
भ्रमद्भ्यो व्याधिचक्रेभ्यो रक्षितुं क्षणलान् नरान् ।
नानातन्त्रप्रसूनेभ्यो मधून्याहृत्य यत्नत: ॥
शास्त्रचक्राणि संघूर्ण्य दृष्ट्वा सम्यक् फलाफलम् ।
चक्रपाणिश्चिकित्साख्यमधुचक्रं प्रणीतवान् ॥
अन्ये चक्रुकृते रीतिवैशद्यं परिदर्शितम् ।
चिकित्साया विशेषेण स्नेहादिपचने तथा ॥

नान्यस्मिन् दृश्यते चेदृग् ग्रन्थे कोशलबन्धनम् ।
चिरं विद्योतता सूरिहृदयेऽयं सुसंग्रहः ॥

नाम्ना श्रीनरसिंहपण्डितवर काश्मीरटेशोद्भवो
नानाकोषमहाब्धिमन्थनगत रत्नोच्चयं यत्नतः ।
एकीकृत्य निबन्धबन्धनमहो निर्घण्टुराजाभिधं
चक्रे लोकहितेषया हितकरं द्रव्याभिधानार्थकम् ॥
कोषात्तस्मात् तथान्येभ्यो द्रव्याणि तद्गुणान् गुणात् ।
सामग्र्येण समालोच्य क्रियास्माभिर्विधीयते ॥

आसीन्मद्रे जनपदे विप्रो विद्वत्कुलोत्तमः ।
शिरोमणिः सङ्गिषजां धन्वन्तरिरिव क्षितौ ॥
शास्त्राणां पारदृक् सम्यक् श्रीभावमिश्रनामकः ।
वाराणस्यामवस्थाय भूमिपानां महात्मनाम् ॥
बहूनां बहुधा सम्यग् रुजां कृत्वा प्रतिक्रियाम् ।
प्रतिष्ठां महतीं भूमौ लब्धवान् साधुपूजितः ॥
शिष्यानध्यापयन्तेस्म यो वेदशतसंख्यकान् ।
महारत्नानि चोद्धृत्य आयुर्वेदमहाम्बुधेः ॥
ग्रन्थं भावप्रकाशाख्यं जगतां हितकाम्यया ।
प्रणीतवान् प्रयत्नेन वैद्यानामुपकारकम् ॥
आयुर्वेदप्रबन्धानां ग्रन्थः स चरमः स्मृतः ।
पूर्वाचार्यैः प्रणीतेषु पूजनीयैर्महर्षिभिः ॥
तन्त्रेषु यानि रत्नानि तान्यत्रापि प्रधानतः ।
लभ्यन्तेऽन्यदपि बहु यत् क्वापि नच दृश्यते ॥
पारस्यादिप्रदेशेषु जाता ओषधयश्च याः ।
आचार्येण गृहीतास्ताः पूर्वाचार्येर्न तद् हुतम् ॥

व्याधेः शिरङ्काख्यस्य लिखितत्वाच्च लक्षणम् ।
तस्य प्रतिक्रिया चापि तन्त्रेऽन्यस्मिन् न दृश्यते ॥
अतः प्रतीयते चायुःशास्त्राणां चरमोन्नतिः ।
जाता यौभावमित्यस्य समये कुशलप्रदे ॥
तदिदं चरमं शास्त्रं प्रधानमबलम्बनम् ।
कृत्वा मूर्ध्ना प्रणेतारं कौटिल्यं प्रणम्य च ॥
चरकात् सुश्रुताच्चापि ग्रन्थेभ्योऽन्येभ्य एव च ।
समाकृष्य विशेषेण योगरत्नानि यत्नतः ॥
यथाबुद्धि यथाज्ञानमस्माभिः क्रियते श्रमः ।
तन्त्रोक्तव्यतिरिक्तानि निबन्धेऽत्र बह्वन्यपि ॥
सततं परिदृश्यानि रुजा रूपाणि यानि च ।
भेषजानि निबद्धानि तथा दृष्टफलानि च ॥

आयुर्वेदस्याष्टौ विभागाः ।

इह खल्वायुर्वेदो नाम यदुपाङ्गमथर्ववेदस्यानुत्पाद्यैव प्रजाः श्लोकशतसहस्रमध्यायसहस्रञ्च कृतवान् स्वयम्भूः । ततोऽस्यायुष्टमलमनेधस्त्वञ्चावलोक्य नराणां भूयोऽष्टधा प्रणीतवान् । तद् यथा—शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्यमगदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रमिति ।

तत्र शल्यं नाम विविधतृणकाष्ठपाषाणपांशुलोहलोष्टास्थिबालनखपूयास्रावान्तर्गर्भशल्योद्धरणार्थं यन्त्रशस्त्रक्षाराग्निप्रणिधानव्रणविनिश्चयार्थञ्च । १ ।

शालाक्यं नाम ऊर्ध्वजत्रुगतानां रोगाणां श्रवणनयनवदनघ्राणादिसंश्रितानां व्याधीनामुपशमनार्थम् । २ ।

कायचिकित्सा नाम सर्वाङ्गसंश्रितानां व्याधीनां ज्वरातीसाररक्तपित्तशोषोन्मादापस्मारकुष्ठमेहादीनामुपशमनार्थम्। ३।

भूतविद्या नाम देवासुरगन्धर्वयक्षरक्षःपितृपिशाचनागग्रहाद्युपसृष्टचेतसां शान्तिकर्मबलिहरणादिग्रहोपशमनार्थम्। ४।

कौमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानाञ्च व्याधीनामुपशमनार्थम्। ५।

अगदतन्त्रं नाम सर्पकीटलूताद्याखिकमूषिकादिविषव्यञ्जनार्थं विविधविषसंयोगविषोपहतोपशमनार्थम्। ६।

रसायनतन्त्रं नाम वयःस्थापनमायुर्मेधाबलकरं रोगापहरणसमर्थञ्च। ७।

वाजीकरणतन्त्रं नाम अल्पदुष्टविशुष्कक्षीणरेतसामाप्यायनप्रसादोपबृंहणजननसमर्थञ्च। एवमयमायुर्वेदोऽष्टाङ्ग उपदिश्यते।

इहायुर्वेदविज्ञाने प्रबन्धेऽस्मत्कृते शुभे।
दोषान्त्यक्त्वा गुणान् धीरा गृह्णन्तु करुणापराः॥

द्वितीयोऽध्यायः ।

अथ परिभाषाध्यायः ।

अव्यक्तानुक्तलेशोक्तसन्दिग्धार्थप्रकाशिका ।
परिभाषाः प्रकथ्यन्ते दीपभूताः सुनिश्चिताः ॥

तत्र प्रथमतो मानसूत्रं लिख्यते ।

न मानेन विना युक्तिर्व्याणां जायते क्वचित् ।
अतः प्रयोगकार्य्यार्थं मानमत्रोच्यते मया ॥

तत्तु मतभेदान्नानाविधं भवति ।

कालिङ्गपरिभाषा ।

जालान्तरगतैः सूर्य्यकरैर्ध्वंसो विलोक्यते ।
षड्ध्वंसीभिर्मरीचिः स्यात्ताभिः षड्भिश्च राजिका ॥
तिसृभी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः ।
यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम् ॥
षड्भिश्च रक्तिकाभिः स्याद्माषको हेमधान्यकौ ।
माषैश्चतुर्भिः शाणः स्यादरणं तन्निगद्यते ॥
टङ्कः स एव कथितस्तद्वयं कोल उच्यते ।
क्षुद्रनोटरकश्चापि द्रङ्क्षणः स निगद्यते ॥
कोलद्वयन्तु कर्षः स्यात्स प्रोक्तः पाणिमानिकः ।
अक्षः पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकम् ॥
विड़ालपदकश्चैव तथा कोड़म्बिका मता ।
करमध्यौ हंसपदं सुवर्णं कवड़ग्रहः ॥

उदुम्बरश्च पर्य्यायैः कर्ष एव निगद्यते।
स्याकर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा॥
शुक्तिभ्याञ्च पलं ज्ञेयं मुष्टिमात्रञ्चतुर्थिका।
प्रकुञ्चः षोड़शी विल्वं पलमेवात्र कीर्त्यते॥
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतञ्च निगद्यते।
प्रसृतिभ्यामञ्जलिः स्यात् कुड़वोऽर्द्धशरावकः॥
अष्टमानञ्च स ज्ञेयः कुड़वाभ्याञ्च माणिका।
शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः॥
शरावाभ्यां भवेत् प्रस्थं चतुःप्रस्थैस्तथाढ़कम्।
भाजनं कंसपात्रे च चतुःषष्टिपलञ्च तत्॥
चतुर्भिराढ़कैर्द्रोणः कलसो नल्वणोऽभिधः।
उन्मानञ्च घटो राशिर्द्रोणपर्य्यायसंज्ञितः॥
द्रोणाभ्यां सूर्पकुम्भौ च चतुःषष्टिशरावकः।
सूर्पाभ्याञ्च भवेद्रोणी बृहद्रोणी च सा स्मृता॥
द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः।
चतुःसहस्रपलिका षण्णवत्यधिका च सा॥
पलानां हिमसहस्रञ्च भार एक प्रकीर्त्तितः।
तुला पलशतं ज्ञेयं सर्वत्रैष विनिश्चयः॥
माषटङ्काक्षविल्वानि कुड़व प्रस्थ आढ़कः।
राशिर्द्रोणी खारी चेति यथोत्तरचतुर्गुणाः॥
शुष्कादिमानमारभ्य यावत् स्यात् कुड़वस्थितिः।
द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतम्॥
प्रस्थादिमानमारभ्य द्विगुणन्तु द्रवार्द्रयोः।
मानं तथा तुलायाञ्च द्विगुणं न क्वचित् स्मृतम्॥

मृदूचवेणुलोहाटैर्भाण्ड यच्चतुरङ्गुलम ।
विस्तीर्णञ्च तथोर्द्ध च तन्मानं कुडवं वदेत् ॥

मागधपरिभाषा ।

त्रसरेणुस्तु विज्ञेयस्त्रिंशता परमाणुभि' ।
त्रसरेणुस्तु पर्य्यायनाम्ना ध्वंसो निगद्यते ॥
षड्ध्वंसश्च मरीचि स्यात षण्मरीच्यस्तु सर्षप' ।
षट्सर्षपैर्यवस्त्वेको गुञ्जैका तु यवैस्त्रिभि: ॥
गुञ्जाभिर्दशभि: प्रोक्तो माषको ब्रह्मणा पुरा ।
स्वेमश्च धामकश्चैव पर्य्यायस्तस्य कीर्त्तित' ॥
चतुर्भिर्माषकै: प्राण: स निष्काष्टकमेव च ।
प्राणौ द्वौ द्रङ्क्षणं विद्यात्कोलं वटकमेव च ॥
कर्षार्द्ध द्विगुणं कर्षं सुवर्णञ्चाक्षमेव च ।
किञ्चिद्विडालपदकं पिचु' पारिभद्रकं तथा ॥
उडम्बरं तिन्दुकञ्च कवडग्रहमेव च ।
द्वे सुवर्णे पलार्द्धं स्यात् शुक्तिरष्टमिका तथा ॥
द्वे पलार्द्धे पलं मुष्टि: प्रकुञ्चश्च चतुर्थिका ।
बिल्वं षोडशिकाम्रञ्च द्वे पले प्रसृत विदु' ॥
कुडव: प्रसृताभ्यां स्यादञ्जलि: स निगद्यते ।
अष्टमानं शरावार्द्धं तस्य पर्य्याय एव च ॥
कुडवाभ्यां भाणिका स्यात् शरावोऽष्टपलं तथा ।
भाणिकाभ्यां भवेत्प्रस्थो ज्ञेय: षोडशभि: पले: ॥
चतु'प्रस्थैराढक: स्यात्पात्र कमस्य भाजनम् ।
अथ भिषग्भिराख्यातश्चतु षष्टिपलैरिह ॥
चतुर्भिराढकैर्द्रोण' कथित: पूर्वसूरिभि: ।

घटः कलस उन्मानो नल्वणोऽर्म्मण एव च ॥
द्रोणपर्य्यायनामानि कीर्त्तितानि भिषग्वरैः।
अयञ्च पलसंख्यातः षट्पञ्चाशत् शतद्वयम् ॥
द्रोणाभ्यां सूर्पकुम्भौ च चतुःषष्टिश्चरावकः।
सूर्पाभ्याञ्च भवेद्रोणी बृहद्रोणी च सा स्मृता ॥
द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः।
चतुःसहस्रपलिका प्रस्थवत्यधिका च सा ॥
तुला पलशतं प्रोक्तं भारः स्याद्विंशतिस्तुला।
पलानां द्विसहस्राणि भारः परिमितो बुधैः ॥
माषकः शाणतिन्दूके पलं कुडवप्रस्थकौ ॥
दाभ्यिद्रोणी खारी चेति यथोत्तरचतुर्गुणाः।
शुष्कद्रव्येष्विदं मानं द्विगुणन्तु द्रवार्द्रयोः ॥
ज्ञातव्यं कुडवादूर्द्धं प्रस्थादिश्रुतिमानतः।
कुडवेऽपि क्वचिद्धित्व यया दन्तौष्ठते स्मृतम् ॥
अनित्या परिभाषेयं यथादर्शनमुच्यते।
अष्टौ पलानि कुडवो नारिकेले तथैव च ॥
अन्यच्च। कुड़वे माषिकायाञ्च तुलामाने तथैव च।
पलोल्लेखागते माने न द्वे गुण्यमिहेष्यते ॥
शुष्कद्रव्ये तु या मात्रा चार्द्रस्य द्विगुणा हि सा।
शुष्कस्य गुरुतोष्णत्वात् तस्मादर्द्धं प्रकीर्त्तितम् ॥

अस्यापवादः।

वासानिम्बपटोलकेतकिबलाकुष्माण्डकेन्दीवरो-
वर्षाभूकुटजाम्बुगन्धसहितास्ताः पूतिगन्धान्विताः।
मांसं नागबला सहाचरपुरो द्विद्वार्द्रके नित्यशो

ग्राह्यास्तत्क्षणमेव न द्विगुणिता ये चेतुजाता वना: ॥

अन्यच्च । गुडूची कुटजो वासा कुष्माण्डश्च शतावरी ।

अश्वगन्धासहचरी शतपुष्पा प्रसारणी ॥

प्रयोक्तव्या: सदैवार्द्रा द्विगुणानैव कारयेत् ।

अन्यत्र । वासाकुटजकुष्माण्डशतपुष्पा: सहास्ता: ।

प्रसारण्यश्वगन्धा च नागाख्यातिबला वला ॥

नित्यमार्द्रा: प्रयोक्तव्या न तासां द्विगुणं भवेत् ॥

तत्रालिङ्गं द्वादशभीरक्तिभिर्माषक: स्मृत: ।

द्रव्याणामुपयुक्तानुपयुक्तत्वमाह ।

शुष्कं नवीनं यद्द्रव्यं योज्यं सकलकर्मसु ।

आर्द्रन्तु द्विगुणं द्रव्यादेष सर्वत्र निश्चय: ॥

द्रव्याण्यभिनवान्येव प्रशस्तानि भिषग्विधौ ।

ऋते गुडूहृतच्छीदधात्र्यक्षाविड्भृत: ॥

व्याधेरयुक्तं यद्द्रव्यं गणोक्तमपि तत् त्यजेत् ।

अनुक्तमपि युक्तं यद्योजयेत्तत्र तद्भिष: ॥

अथ पञ्चकषाया: ।

स्वरसश्च तथा कल्क: क्वाथश्च हिमफाण्टकौ ।

ज्ञेया: कषाया: पञ्चैते लघव: स्युर्यथोत्तरम् ॥

तत्रादौ स्वरसविधि: ।

आहतात्तत्क्षणाज्जुष्टाद्द्रव्यात् क्षुण्णात्सुखेन यत् ।

स्वस्त्रिष्पीड़ितो यश्च रस: स्वरस उच्यते ॥

आहतात् शीताग्निकीटादिभिरनुपहतात् । क्षुण्णात् रूपिष्टात् ।

कुड़वं चूर्णितं द्रव्यं क्षिप्त्वा द्विगुणे जले ।

अहोरात्रं स्थितं तस्माद्भवेद्रस उत्तमः ॥
आदाय शुष्कद्रव्यं वा स्वरसानामसम्भवे ।
जलेऽष्टगुणिते साध्यं यादशिष्टञ्च यच्छति ॥
स्वरसस्य गुरुत्वाच्च पलमर्द्धं प्रयोजयेत् ॥

कल्कविधिः ।

द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत् ।
प्रक्षिप्य भावयेद्यत्ने तत्कल्कं कोलसम्मितम् ॥

क्वाथविधिः ।

पानीय षोड़शगुणं क्षुण्णे द्रव्यपले क्षिपेत् ।
मृत्पात्रे क्वाथयेद्याद्धा-ष्टमांशावशेषितम् ॥
कर्षादौ तु पले पादात् शीर्णमेकं जलम् ।
ततस्तु कुड़वं यावन्नीत्वाऽष्टमुर्थं क्षिपेत् ॥
चतुर्गुणजलक्वाथे यावत् प्रस्थादिकं जलम् ।
तज्जलं पाचयेद्धीमान् पादे चाष्टांशसाधितम् ॥
मृतः क्वाथः कषायश्च भिषग्भिः स निगद्यते ।
मात्रोत्तमा पलेन स्यात्त्रिभिरर्द्धैस्तु मध्यमा ॥
जघन्या तु पलार्द्धेन स्वेहलेहौषधेषु च ॥

पाने क्वाथादिद्रव्यव्यवस्था ।

दयरत्तिकमानेन गृहीत्वा तोलकद्वयम् ।
दत्त्वाम्भः षोड़शगुणं साध्यं पादावशेषितम् ॥

हिमविधिः ।

क्षुण्णं द्रव्यपलं सम्यक् षड्भिर्नीरपलैः प्लुतम् ।
निशोषितं हिमः स स्यात्तया शीतकषायकः ॥
तस्य मानं मतं पाने पलद्वयमितं बुधैः ॥

मन्थविधिः । जले चतुःपले शीते क्षुण्णं द्रव्यपलं क्षिपेत् ।
मृत्वाचे मन्थयेत्सम्यक् तस्माच्च द्विपलं पिबेत् ॥

अवान्तरभेदात्तण्डुलोदकमाह ।

तण्डुलं कणशः कृत्वा पलं ग्राह्यं हि तण्डुलात् ।
चतुर्गुणं जलं देयं तण्डुलोदककर्मणि ॥
शीतकषायमानेन तण्डुलोदककल्पना ॥

फाण्टविधिः ।

क्षुण्णे द्रव्यपले सम्यग् जलमुष्णं विनिःक्षिपेत् ।
मृत्पात्रे कुडवोन्मानं ततस्तु स्रावयेत्पटात् ॥
स स्याच्चूर्णद्रवः फाण्टस्तन्मानं द्विपलोन्मितम् ॥

चूर्णविधिः ।

अत्यन्तशुष्कं द्रव्यं सुपिष्टं वस्त्रगालितम् ।
तत्स्याच्चूर्णं रजः खोदस्तस्य पर्य्याय उच्यते ॥

भावनाविधिः ।

द्रवेण यावता सम्यक् चूर्णं सर्वं प्लुतं भवेत् ।
भावनायाः प्रमाणन्तु चूर्णे प्रोक्तं भिषग्वरैः ॥
भाव्यद्रव्यसमं काथ्यं काथ्यादष्टगुणं जलम् ।
अष्टांशशेषितः काथो भाव्यानां तेन भावना ॥
दिवा दिवातपे शुष्कं रात्रौ रात्रौ निवासयेत् ।
शुष्कं चूर्णीकृतं द्रव्यं सप्ताहं भावनाविधिः ॥

पुटपाकविधिः ।

पुटपक्वस्य कल्कस्य स्वरसो गृह्यते यतः ।
अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया ॥
द्रव्यनार्पोथितं जम्बूवटपत्रादिसम्पुटे ।

वेष्टयित्वा ततो बद्ध्वा दृढं रज्ज्वादिना तथा ॥
मृल्लेपं द्व्यङ्गुलं कुर्य्यादथवाङ्गुलिमात्रकम् ।
दहेत्पुटान्तराद्वह्नौ यावल्लेपस्य रक्तता ॥

उष्णोदकविधिः ।

अष्टमेनाम्भसेषेण चतुर्थेनार्द्धकेन वा ।
अथवा क्वथनेनैव सिद्धमुष्णोदकं भवेत् ॥
श्लेष्मामवातमेदोघ्नं वस्तिशोधनदीपनम् ।
कासश्वासज्वरान् हन्ति पीतमुष्णोदकं निशि ॥

अवलेहविधिः ।

क्वाथादेर्यत्पुनः पाकाद्घनत्वं सा रसक्रिया ।
सोऽवलेहश्च लेहश्च प्राश इत्युच्यते बुधैः ॥
सिता चतुर्गुणा कार्य्या चूर्णाच्च द्विगुणो गुडः ।
द्रवं चतुर्गुणं दध्यादिति सर्वत्र निश्चय ॥
सुपक्के तन्तुमत्त्वं स्यादवलेहेऽम्बु मज्जनम् ।
स्थिरत्वं पीड़िते मुद्रा गन्धवर्णरसोद्भवः ॥

वटकाविधिः ।

वटका अथ कथ्यन्ते तन्नाम वटिका वटी ।
मोदको गुड़िका पिण्डी गुडो वर्त्तिस्त्र्यथोच्यते ॥
लेहवल्लाध्यते वह्नौ गुड़ो वा शर्करापि वा ।
गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्म्मिता वटी ॥

तत्र वह्निसिद्धे गुडादौ ।

कुर्य्यादवह्निसिद्धेन क्वचिद्गुग्गुलुना वटीम् ।
द्रवेण मधुना वापि गुटिकां कारयेद्बुधः ॥
सिता चतुर्गुणा देया वटीषु द्विगुणो गुडः ।

चूर्णे चूर्णसमः कार्य्यो गुग्गुलुर्मधु तत्समम् ॥
द्रवन्तु द्विगुणं देयं मोदकेषु भिषग्वरैः ॥

चूर्णस्य पाकनिषेधमाह ।

प्रायो न पाकचूर्णानां भूरिचूर्णस्य तेन हि ।
आसन्नपाके प्रक्षेपः स्वल्पस्य पाकमागते ॥

आसन्नपाके उपस्थितपाके न तु पाकमापन्ने तथा सति प्रचुरचूर्णानां प्रवेशो न स्यादित्यर्थः। स्वल्पस्य चूर्णस्य पाकान्ते कटुष्णदव्यायां प्रक्षेप इति ।

अथाणुवटिकाविधिः ।

धात्र्यादीनामुद्भिदां वा चूर्णमुक्तैर्द्रवैः प्लुतम् ।
अनुक्ते तोययोगेन विमर्द्य विदधीत च ॥
यवसर्षपगुञ्जादिप्रमाणां वटिकां भिषक् ।
अनिर्दिष्टवटीसिद्धौ प्रायो गुञ्जात्मिका मितिः ॥
तल्लेवनं यथादोषमनुपानेन चेष्यते ॥

रसचूर्णम् ।

रसराजयुतं बलिड्डिमसुखं
विधिना पुटितमनु शैत्यगतम् ।
उपनीय ततः परिमर्दयतां
रसचूर्णमिदं कथितं मुनिभिः ॥

तृतीयोऽध्यायः ।

स्नेहपाकस्य साधारणो विधिः ।
तत्र तैलमूर्च्छाविधिः ।
तत्रादौ तिलतैलमूर्च्छा ।

क्वथ्वा तैलं कटाहे दृढतरविमले मन्दमन्दानलैस्तत्
तैलं निष्फेनभावं गतमिह यदा शैत्ययुक्तं तदेव ।
मञ्जिष्ठारावितोयैर्जलधरनलिकैः सामलैः साज्यपथ्यैः
सूचीपत्राङ्घ्रिनीरैरुपहितमधितैर्गन्धयोगं जहाति ॥
तैलस्येन्दुकलाग्निकैकविकसाभागोऽपि मूर्च्छाविधौ
ये चान्ये विफलापयोदरजनीक्षीवीरलोध्रान्विताः ।
सूचीपुष्पवटावरोहनलिकास्तस्याश्च पादाग्निका ।
दुर्गन्धं विनिहन्ति तैलमरुणं सौरभ्यमाकुर्वते ॥

कटुतैलमूर्च्छा ।

वयःस्थारजनीमुस्तविल्वदार्व्यग्निकैश्वरैः ।
कृष्णजीरकक्षीवीरनलिकैः सौरभोत्तरैः ॥
एतैः समांशैः प्रस्थे च कर्षमात्रं प्रयोजयेत् ।
अरुणाद्विपलं तत्र तोयद्वाढकसम्मितम् ॥
कटुतैलं पचेत्तेन आमदोषोपशान्तये ॥

एरण्डतैलमूर्च्छा ।

विकसा मुस्तकं धान्यं विफला वैजयन्तिका ।
क्षीवीरवनखर्ज्जूरवटशुङ्गानिशायुगम् ॥
नलिका मेषजं देयं केतकी च समं समम् ।

प्रस्थे देयं शुक्तिमित मूर्च्छने दधिकाञ्जिकम् ॥

घृतमूर्च्छा ।

पथ्याधात्रीविभीतैर्जलधररजनीमातुलुङ्गद्रवैश्च
द्रव्यैरेतैः समस्तैः पलकपरिमितैर्मन्दमन्दानलेन ।
आज्यप्रस्थं विपक्वं परिचपलगतं मूर्च्छयेद्वैद्यराज-
स्तत्स्यादाशोपदोष हरति च सकल वीर्यवत्सौख्यदायि ॥

वातहरतैलाना विशेषमूर्च्छाविधि ।

आम्रजम्बूकपित्थानां बीजपूरकबिल्वयोः ।
गन्धकर्मणि सर्वत्र पत्राणि पञ्चपल्लवम् ॥
पञ्चपल्लवतोयेन गन्धानां चालन मतम् ॥

स्नेहपाकस्य कालनियमः ।

मूर्च्छा स्यात्सप्तभिः सिद्धा रात्रिभिर्बुधसम्मता ।
व्रीहिप्राग्वङ्गयो पाक सद्यः सिध्यति नान्यथा ॥
स्यात्पाकः पयसो द्राभ्यां स्वरसादेषु तिसृभिः ।
दधिकाञ्जिकतक्राणां सिद्धो भवति पञ्चभिः ॥
मूत्रादीनामेकया स्यात्तन्त्र. कल्कस्य सप्तभि ।
गन्धानां पञ्चभिर्ज्ञेयः स्नेहपाके क्रमोऽप्ययम् ॥

स्नेहसाधने क्वाथजलादेः

परिमाणमाह ।

निक्षिप्य क्वाथयेत्तोयं क्वाथ्यद्रव्याच्चतुर्गुणम् ।
पादशिष्टं गृहीत्वा तु स्नेहस्तेनैव साधयेत् ॥
चतुर्गुणं मृदुद्रव्ये कठिनेऽष्टगुण जलम् ।
गुडादिक्वाथसंघाते द्रव्यादष्टगुण पय. ॥
अत्यन्तकठिने द्रव्ये नीर षोडशिकं मतम् ॥

अन्यच्च । कर्षादितः पलं यावत् क्षिपेत् षोड़शिकं जलम् ।
तदूर्द्धं कुड़व यावद्वेदष्टगुणं पयः ॥
प्रस्थादितः क्षिपेन्नीर खारीं यावच्चतुर्गुणम् ॥
तुलाद्रव्ये जलद्रोणो द्रोणेर्द्रव्यतुला मता ।
अनिर्दिष्टप्रमाणानां स्नेहानां प्रस्थ इष्यते ।
जलस्नेहौषधानाञ्च प्रमाणं यत्र नेरितम् ।
तत्र स्यादौषधात् स्नेहः स्नेहात्तोयं चतुर्गुणम् ॥
स्नेहसिद्धौ द्रव्येऽनुक्ते सर्वत्राप्यष्टगुणम् ।
गन्धद्रव्याणि चेच्छन्ति कल्कस्यार्द्धांशिकानि च ॥
स्नेहपाकविधौ यत्र क्षीरमेकन्तु कथ्यते ।
तोयादीनामनिर्देशे क्षीरमेव चतुर्गुणम् ॥
द्रवान्तरेण योगे तु क्षीरं स्नेहसमं विदुः ॥
इन्दुस्त्वाह । खरसक्षीरमाङ्क्ष्यैः पाको यत्रेरितः क्वचित् ।
जल चतुर्गुण तत्र वीर्य्याधानार्थमावपेत् ॥
न मुञ्चति रस द्रव्यं क्षीरादिभिरुपस्कृतम् ।
सम्यक् पाको न जायेत तत्र स्यात्तोयं चतुर्गुणम् ॥
पञ्चप्रभृति यत्र स्युर्द्रवाणि स्नेहसविधौ ।
तत्र स्नेहसमान्याहुरर्वाक् च स्याच्चतुर्गुणम् ॥
अम्बुक्षाररसैर्यत्र पृथक् स्नेहस्य साधनम् ।
कल्कस्यांशं तत्र दद्याच्चतुर्थं षष्ठमष्टमम् ॥
दुग्धे दधि रसे तक्रे कल्को देयोऽष्टमांशिकः ।
कल्काच्च सम्यक् पाकार्थं तोयमत्र चतुर्गुणम् ॥
कल्कात् कल्कद्रव्यात् चतुर्गुणं तोयं पेषणाद्यम् ।
क्वाथेन केवलेनैव पाको यत्रोदितः क्वचित् ।

क्वाथद्रव्यस्य कल्कोऽपि तत्र स्नेहे प्रयुज्यते ॥
कल्कहीनस्तु यः स्नेहः स साध्यः केवले द्रवे ॥
केवले द्रवे क्वाथेतरस्मिन् स्वरसादिरूपे ।
पुष्पकल्कस्तु यः स्नेहस्तत्र तोयं चतुर्गुणम् ।
स्नेहात् स्नेहाष्टमांशश्च पुष्पकल्कः प्रयुज्यते ॥
आदौ कल्कः प्रदातव्यो गन्धद्रव्यं ततः परम् ।
तैलसुत्तार्थं दातव्यं शिग्रुकं कुङ्कुमं नखम् ॥
गन्धचन्दनकर्पूरमेलावीजं लवङ्गकम् ॥

गन्धद्रव्याणि ।

एलाचन्दनकुङ्कुमागुरुसुराकक्कोलमांसीशटी-
श्रीवासच्छदगन्धिपर्णशशभृत्क्षौणीभ्रजोशीरकम् ।
कस्तूरीनखपूतितैलजलमुस्तेथीलवङ्गादिकं
गन्धद्रव्यमिदं प्रदेयमखिलं श्रीविष्णुतैलादिषु ॥

स्नेहपाकपरिज्ञानम् ।

वर्त्तिवत् स्नेहकल्कः स्याद्यदाङ्गुल्या विवर्त्तितः ।
अङ्गहीनोऽग्निनिच्छिन्नः स्नेहः सिद्धो भवेत्तदा ॥
यदा फेनोद्गमस्तैले फेनशान्तिश्च सर्पिषि ।
वर्णगन्धरसोत्पत्तिः स्नेहः सिद्धो भवेत्तदा ॥
स्नेहपाकस्त्रिधा प्रोक्तो मृदुर्मध्यः खरस्तथा ।
ईषत्खरसकल्कस्तु स्नेहपाको मृदुर्भवेत् ॥
मध्यपाकस्य सिद्धिश्च कल्के नीरसकोमले ।
ईषत्कठिनकल्कश्च स्नेहपाको भवेत् खरः ॥
तद्दूर्द्धं दग्धपाकः स्याद्दाहक्लमविप्रयोजनः ।
आमपक्वश्च निर्वीर्य्यो वह्निमान्द्यकरो गुरुः ॥

नस्यार्थं स्यान्मृदुः पाको मध्यमः सर्वकर्मसु ।
अभ्यङ्गार्थं खरः प्रोक्तो युक्त्यादेवं यथोचितम् ॥
घृततैलगुडादींश्च साधयेन्नैकवासरे ।
प्रकुर्वन्त्युषितास्त्वेते विशेषाद्गुणसञ्चयम् ॥

चतुर्थोऽध्यायः ।

अथ द्रव्याणां मात्राविधिर्लिख्यते ।
स्थितिर्नास्त्येव मात्रायाः कालमग्निं बलं वयः ।
प्रकृतिं देशदोषौ च दृष्ट्वा मात्रां प्रकल्पयेत् ॥
नात्यं हन्त्यौषधं व्याधिं यथाल्पाम्बु महानलम् ।
दोषवच्चातिमात्रं स्यात् प्रस्थमल्पोदकं यथा ॥
मात्रया हीनया द्रव्यं विकारं न निवर्त्तयेत् ।
द्रव्याणामतियोगाच्च व्यापत्तं जायते ध्रुवम् ॥

द्रव्यप्रतिनिधिः ।

कदाचिद्द्रव्यमेकं वा योगे यत्र न लभ्यते ।
तत्तद्गुणयुतं द्रव्यं परिवर्त्तेन गृह्यते ॥
मधु यत्र न विद्येत तत्र जीर्णो गुडो मतः ।
पुरातनगुडाभावे रौद्रे यामचतुष्टयम् ॥
संशोष्य नूतनं ग्राह्यं पुरातनगुडैषिणा ।
क्षीराभावे भवेन्मौद्गो यूषो माषूर एव वा ॥
सिताभावे च खण्डः स्यात् खाल्यभावे च षष्टिकः ।

असम्भवे च द्राक्षाया गाम्भारीफलमिष्यते ॥
न भवेद्दाडिमी यत्र त्वचास्तं तत्र दापयेत् ।
सौराष्ट्रमृदभावे च ग्राह्या पङ्क्त्या पर्पटी ॥
नत तगरमूल स्यादभावे सिंहलीजटा ।
प्रयोगे यत्र लौह स्यादभावे तन्मलं क्षिपेत् ॥
सर्षप शुक्लवर्णो य स हि सिद्धार्थ उच्यते ।
तत्र सिद्धार्थकाभावे सामान्य सर्षपो मतः ॥
चविकागजपिप्पल्यौ पिप्पलीमूलवत् स्मृते ।
अभावे पृश्निपर्ण्याश्च सिंहपुच्छी विधीयते ॥
नित्यं मुञ्जतिकाभावे तालसस्तकमिष्यते ।
कुङ्कुमस्याप्यभावे तु निशा ग्राह्या भिषग्वरैः ॥
मुक्ताभावे शुक्तिचूर्णं वज्रे वैक्रान्तमिष्यते ।
धान्यकाभावतो दद्यात् शतपुष्पां भिषग्वरः ॥
वाराहीकन्दकाभावे चर्मकारालुको मतः ।
सुवर्णमथवा रौप्यं योगे यत्र न लभ्यते ।
तत्र लौहेन कर्माणि भिषक्कुर्याद्विचक्षणः ॥
अभावात्क्षीरे मूले कुष्ठं सर्वत्र गृह्यते ॥
सामुद्रं सैन्धवाभावे विडं वा गृह्यते बुधैः ।
पुष्पाभावे फलञ्चामं विल्वमेदे बिल्वतः फलम् ॥
भल्लातकासहत्वे तु रक्तचन्दनमिष्यते ।
राज्ञाभावे च वन्द्राकौ जीराभावे च धान्यकम् ॥
कर्पूरस्याप्यभावेऽपि सुगन्धं मुस्तमिष्यते ।
रसाञ्जनस्य चाप्राप्तौ दार्वीक्वाथं प्रयोजयेत् ॥
मेदाभावेऽश्वगन्धा स्याच्छतावरीमेदे तु सारिवा ।

जीवकर्षभकाभावे गुडूची च विदारिका॥
ऋद्धभावे बला ग्राह्या वृद्धभावे महाबला ।
काकोलीयुगलाभावे निचिपेच्च शतावरीम् ॥
देया मृगमदाभावे पूतिका तरुणा बुधैः ।
रोहीतकत्वचोऽभावे पिचुमर्दस्य गृह्यते ॥
कापोतं सर्वमांसानां तुल्यं गुणकरं स्मृतम् ।
मांसक्वाथापरिप्राप्तौ दूषो मौद्गः प्रदीयते ॥
धेन्वाः प्ररूढवत्साया: क्षीरं क्षत्क्षयेगुणम् ।
यत्र यद्द्रव्यमप्राप्तं भेषजे परपूर्वतः ।
ग्राह्यं तरुणसाम्यात्तु न तत्र क्वापि दूषणम् ॥

भेषजग्रहणसङ्केतः ।

लवणं सैन्धवं प्रोक्तं चन्दनं रक्तचन्दनम् ।
चूर्णलेहासवक्षेत्रा: साध्या धवलचन्दनैः ॥
कषायलेप्यो' प्रायो गृह्यते रक्तचन्दनम् ।
पयःसर्पिःप्रयोगेषु गव्यमेव हि गृह्यते ॥
अक्षुद्रसो गोमयकं मूत्रं गोमूत्रमुच्यते ॥
अन्यच्च । पाक्षौद्रौ चापि घृत्वात्रसुत्पले नीलसुत्पलम् ।
अक्षुद्रसे गोमयरसचन्दने रक्तचन्दनम् ॥
सिद्धार्थः सर्षपे ग्राह्यो लवणे सैन्धवं मतम् ।
मूत्रे गोमूत्रमादेयं विशेषो यत्र नेरितः ॥
पयःसर्पिःप्रयोगेषु गव्यमेव प्रशस्यते ।
स्त्रियश्चतुष्पदे ग्राह्या' मृगांसो विहगेषु च ॥
जाङ्गलानां वयस्थानां चर्मरोमनखादिकम् ।
हित्वा ग्राह्यं पूतमांसं साक्षिकं खण्डशः कृतम् ॥

पक्तव्यमाजमांसञ्च विधिना घृततैलयोः ।
हित्वा स्त्रीं पुरुषञ्चापि क्लीवं तत्रापि दापयेत् ॥
मृगालवर्हिणोः पाके पुमांसं तत्र दापयेत् ।
मयूरी जम्बुकी छागी वीर्यहीना स्वभावतः ॥
काश्मीराजमतैनैव छाग एव नपुंसकः ।
अभावाद्प्रतीचाद्या इडवैद्योपदेशतः ॥
वन्ध्या छागी विपक्षव्या न तु शास्त्रमतं चरेत् ।
स्त्रीणां तीक्ष्णं गवां मूत्रं न तु पुंसां विधीयते ॥
पित्तात्मिकाः स्त्रियो यस्मात्तीक्ष्यास्तु पुरुषा मताः ।
क्षीरमूत्रपुरीषाणि जीर्णाहारे तु संहरेत् ॥

द्रव्येऽप्यनुक्ते जलमेव देयं
भागेऽप्यनुक्ते समता विधेया ।
अङ्गेऽप्यनुक्ते विहितन्तु मूलं
कालेऽप्यनुक्ते दिवसस्य पूर्वम् ॥

सारः स्यात् खदिरादीनां निम्बादीनान्तु वल्कलम् ।
फलञ्च दाडिमादीनां पटोलादेस्त्वदस्तथा ॥
न्यग्रोधादेस्त्वचो ग्राह्या सारः स्याद्बीजकादितः ।
तालीयादेश्च पत्राणि फलं स्याच्चिफलादितः ॥
महान्ति यानि मूलानि काष्ठगर्भाणि यानि च ।
तेषाञ्च वल्कलं ग्राह्यं क्षुद्रमूलानि कृत्स्नशः ॥

मूलानि शिशिरे ग्रीष्मे पत्रं वर्षावसन्तयोः ।
त्वक्कन्दौ शरदि क्षीरं शस्यते कुसुमं फलम् ॥
हेमन्ते सारमोषध्या गृह्णीयात्कुशलो भिषक् ॥

शरद्यखिलकर्म्मार्थं ग्राह्यं सरसमौषधम् ।
विरेकवमनार्थञ्च वसन्तान्ते समाहरेत् ॥

पञ्चमोऽध्यायः ।

भैषज्यसेवनकालः ।

अभक्तं पूर्वभक्तञ्च मध्यभक्तं सभक्तकम् ।
भक्तोपरिष्टात्सामुद्गं भक्तस्यैवान्तरेऽपि च ॥
ग्रासे ग्रासान्तरे चैव मुहुर्मुहुरिति स्मृताः ।
कालाः दृश्यन्ते धीमद्भिरौषधस्य समासतः ॥
बलिनो महतो व्याधेरभुक्ते भेषजं हितम् ।
सर्वव्याधिहरं पथ्यं पूर्वभक्तं महौषधम् ॥
मध्यकायगतान् रोगान्मध्यभक्तं निहन्ति च ।
सभक्तं सुकुमाराणां बालानामौषधद्विषाम् ॥
भक्तोपरिष्टात् प्रस्तञ्च ऊर्द्ध्वजत्रुविकारिणाम् ।
सम्बन्धे वर्चसां मुद्गं दीप्ताग्निबलिनां हितम् ॥
भक्तयोरन्तरे ज्ञेयं भोजनद्वयमध्यतः ।
तच्च नित्यं प्रयुञ्जीत मध्यदेहविकारिणाम् ॥
ग्रासे ग्रासे क्षयाग्नीनां बाह्यासक्तक्रियामपि ।
ग्रासान्तरे हितं विद्यात्कुष्ठमेहविकारिणाम् ॥
मुहुर्मुहुः श्वासकासतृष्णार्त्तिच्छर्द्दिरोगिणाम् ॥
सामुद्गं भेषजं विद्यादन्नस्यादावसानयोः ।

अन्यच्च। ज्ञेयः पञ्चविध कालो भैषज्यग्रहणे नृणाम्।
किञ्चित्सूर्योदये जाते तथा दिवसभोजने॥
सायन्तने भोजने च मुहुश्चापि तथा निशि॥

तत्र प्रथमः कालः।

व्याधिपित्तकफोद्रेके विरेकवमनार्थयोः।
क्षुधार्थं च भैषज्यं प्रभातेऽन्नमाहरेत्॥

द्वितीयः कालः।

भैषज्यं विगुणेऽपाने भोजनाग्रे प्रशस्यते।
अरुचौ चित्तभोज्येषु मिश्रं रुचिरमाहरेत्॥
समानवाते विगुणे मन्देऽग्नावतिदीपनम्।
दद्याद्भोजनमध्ये च भैषज्यं कुशलो भिषक्॥
व्यानकोपे तु भैषज्यं भोजनान्ते समाहरेत्।
हिक्काक्षेपकवक्त्रेषु पूर्वजन्ते च भोजनात्॥

तृतीयः कालः।

उदाने कुपिते वाते स्वरसङ्गादिकारिणि।
ग्रासग्रासान्तरे देयं भैषज्यं सान्यभोजने॥
प्राणे प्रदुष्टे सान्यस्य भुक्तस्यान्ते प्रदीयते।
औषधं प्रायशो धीरैः कालोऽयं स्यात्तृतीयकः॥

चतुर्थः कालः।

मुहुर्मुहुश्च हृट्कण्ठहिक्काश्वासगरेषु च।
सान्नञ्च भेषजं दद्यादिति कालश्चतुर्थकः॥

पञ्चमः कालः।

ऊर्ध्वजत्रुविकारेषु लेखने बृंहणे तथा।
पाचने शमने देयमन्नञ्च भेषजं निशि॥

वीर्य्याधानम् ।

स्नेहः सिद्धो गुडादिश्च गुणहीनोऽव्दतो भवेत् ।
स्नेहाद्याः पूर्णवीर्य्याः स्युराचतुर्म्मासतः परम् ॥
अब्दादूर्द्धं घृतं पक्वं हीनवीर्य्यत्वमाप्नुयात् ।
तैले विपर्य्ययं विद्यात्पक्वेऽपक्वे विशेषतः ॥
ऊर्द्धं मासद्वयाच्चूर्णं हीनवीर्य्यत्वमाप्नुयात् ।
हीनत्वं गुडिकालेही भजेते वत्सरात्परम् ॥
ओषध्यो लघुपाकाः स्युर्निर्वीर्य्या वत्सरात्परम् ।
पुराणाः स्युर्गुणैर्युक्ता आसवा धातवो रसाः ॥

प्रक्षेपविधिः ।

प्रक्षेपः पादिकः क्वाथात् स्नेहे कल्कसमो मतः ।
परिभाषामिमामन्ये प्रक्षेपेऽप्यूचिरे परम् ॥
माषिकं हिङ्गुसिन्धूत्थं जरणाद्यासु शाणिकाः ।
षोडशाष्टचतुर्भागं वातपित्तकफे तथा ।
क्षौद्रं कषाये दातव्यं विपरीता तु शर्करा ॥

क्षीरादिपाकमाह ।

द्रव्यादष्टगुणं क्षीरं क्षीरात्क्षीरं चतुर्गुणम् ।
क्षीरावशेषः कर्त्तव्यः क्षीरपाके त्वयं विधिः ॥
क्षीरमस्वारनालानां पाका नास्ति विनाग्निना ।
सम्यक् पाकं न गच्छन्ति तस्मात्क्षीरं चतुर्गुणम् ॥

एतत्तु वचनं केवलक्षीरादिपक्वपाचनादौ क्षीरपञ्चमूल्यादौ, नान्यत्र तैलघृतादिपाके तत्र द्रवान्तरमस्त्येव तैलादिपाके यत्र चतुर्गुणं क्षीरमेवास्ति न द्रवान्तरमस्ति तत्र कण्ठोक्तत्वात्परिभाषा न प्रवर्त्तते यथा अभ्यक्तानुल्ल-

लेयोक्तसन्दिग्धार्थप्रकाशिकाः इत्यभिप्रेत्य व्याख्येयमिति गुरवः ।

घृततैलादियोगे च यद्द्रव्यं पुनरुच्यते ।
ज्ञातव्यं तद्दिहाचार्यैर्भागतो द्विगुणेन हि ॥

षष्ठोऽध्यायः ।

अथ सन्धानविधिः ।

द्रवेषु चिरकालस्थं द्रव्यं यत्सञ्चितं भवेत् ।
आसवारिष्टभेदैस्तु प्रोच्यते भेषजोचितम् ॥

आसवारिष्टयोर्लक्षणम् ।

यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः ।
अरिष्टः क्वाथसाध्यः स्यात्तयोर्मानं पलोन्मितम् ॥
आप्लाव्य सुरया सम्यग् द्रव्याणि विविधानि च ।
समाहान्ते परिस्राव्य रसं वस्त्रेण गालयेत् ॥
एषोऽरिष्टाभिधानेन भिषग्भिः परिकीर्त्तितः ।
अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ॥

सामान्यतोऽरिष्टविधिः ।

अनुक्तमानारिष्टेषु द्रवद्रोणे गुडात्तुलाम् ।
क्षौद्रं विपेक्षुडादर्द्धं प्रक्षेपं दशमांशिकम् ॥

द्विविधं सीधुमाह ।

ज्ञेयः शीतरसः सीधुरपक्वमधुरद्रवैः ।
सिद्ध. पक्वरसः सीधुः सम्यक्कमधुरद्रवैः ॥

मधुरद्रवैरिक्षुरसादिभिः ।

सुरादिलक्षणमाह ।

दिनानि कतिचल्लिख्य गुडादौ स्थापयेद्भिषक् ।
ततो विक्लित्तिमापन्नं यन्त्रैश्च नाडिकादिभिः ॥
विधिवत् स्रावयेद्यस्मादन्यपात्रे सुत रसम् ।
गल्लीयस्सा सुरा ख्याता तीक्ष्णाण्वोर्व्यग्रालिनी ॥

परिपक्वान्नसम्भानाल्लमुत्पन्नां सुरा जगुः ।
सुरामण्डः प्रसन्ना स्यात्ततः कादम्बरी घना ॥
तद्धो जगलो ज्ञेयो मेदको जगलाह्वयः ।
वक्कसो हृतसारः स्यात् सुराबीजञ्च किण्वकम् ॥

यत्तालखर्ज्जूररसैः सन्धिता सा हि वारुणी ।
कन्दमूलफलादीनि सक्षेहलवणानि च ।
यत्र द्रवेऽभिषूयन्ते तच्छुक्तमभिधीयते ॥

अभिषूयन्ते द्रवेणाप्लाव्य सन्धीयन्ते ।
विनष्टमम्लतां यातं मद्यं वा मधुरद्रवः ।
विनष्टः सन्धितो यस्तु तच्छुक्तमभिधीयते ॥

गुडाम्बुना सतैलेन कन्दशाकफलैस्तथा ।
सन्धितञ्चाम्लतां यातं गुडशुक्तं प्रचक्षते ॥

एवमेव हि शुक्तं स्याद्गृहीकासम्भवं तथा ।
तुषाम्बु सन्धितं ज्ञेयमामैर्विदलितैर्यवैः ।
यवैस्तु निस्तुषैः पक्वैः सौवीरं साधितं भवेत् ॥

अपरञ्च । सौवीरन्तु यवैरामैः पक्वैर्वा निसुषीकृतैः ।
गोधूमैरपि सौवीरमाचार्याः केचिदूचिरे ॥
आरनालन्तु गोधूमैरामैः स्यान्निसुषीकृतैः ।
पक्वैर्वा सहितैस्तत्तु सौवीरसदृशं गुणैः ॥
सन्धितं धान्यमण्डादि काञ्जिकं कथ्यते जनैः ।
साण्डाकी सन्धिता ज्ञेया मूलकैः सर्षपादिभिः ।

धान्याम्लम् ।

प्रस्थं षष्टिकधान्यस्य नीरप्रस्थद्वये क्षिपेत् ।
आधारभाण्ड सदृश्य भूमेर्गर्भे निधापयेत् ॥
पक्षादथ समुद्धृत्य वस्त्रपूतञ्च कारयेत् ।
ततो जातरसं योज्यं धान्याम्लं सर्वकर्मसु ॥
धान्याम्लं शालिचूर्णाच्च कोद्रवादिकृतं भवेत् ॥

काञ्जिकसाधनम् ।

तुलामितं षष्टिकतण्डुलञ्च
प्रगृह्य चात्रं विधिवद्विधाय ।
द्रोणेऽम्भसि क्षिप्तमथ क्रियामा-
स्तत्तप्त रक्तेत्पिहितं प्रयत्नात् ॥
ततस्तु कल्कं सकलं निरस्येत्
तत्काञ्जिकं कथ्यत आरनालम् ।
तद्वेदि तीक्ष्णं लघु पाचनञ्च
दाहज्वरघ्नं कफवातनाशि ॥

———

सप्तमोऽध्यायः ।

स्नेहविधिः ।

गुरुशीतमरस्निग्धमन्दसूक्ष्ममृदुद्रवम् ।
औषधं स्नेहनं प्रायो विपरीत विरुक्षणम् ॥
सर्पिर्मज्जवसातैलं स्नेहेषु प्रवरं मतम् ।
तत्रापि चोत्तमं सर्पिः संस्कारस्यानुवर्त्तनात् ॥
पित्तघ्नास्ते यथा पूर्वमितरघ्ना यथोत्तरम् ।
घृतात्तैलं गुरु वसा तैलान्मज्जा ततोऽपि च ॥
द्वाभ्यां त्रिभिश्चतुर्भिस्तैर्यमकस्निग्धतो महान् ।
स्नेद्यस्नेह्यमध्यस्नीव्यायामासक्तचिन्तकाः ॥
बृद्धबालाबलक्लीबा रूक्षक्षीणाग्निमेहसः ।
वातार्त्तमन्यितिमिरदारुणप्रतिबोधिनः ॥
स्नेह्या न त्वतिमन्दाग्नितीक्ष्णाग्निश्लीपदुर्बलाः ।
जरूस्तब्धातिसारामगलरोगगरोदरैः ॥
मूर्च्छाच्छर्द्यरुचिश्लेष्मतृष्णामद्येश्च पीडिताः ।
अपपक्वता युक्ते च नस्ये वस्तौ विरेचने ॥
तत्र धीस्मृतिमेधाग्निकाङ्क्षिणां शस्यते घृतम् ।
ग्रन्थिनाडीक्लिमिश्लेष्ममेदोमारुतरोगिषु ॥
तैलं लाघवदार्ढ्यार्थं क्रूरकोष्ठेषु देहिषु ।
वातातपाध्वशस्त्रीव्यायामक्षीणधातुषु ॥
रूक्षक्लेशक्षमात्यग्निवाताढ्यतनुषु च ।
शेषौ वसा तु मज्जास्थिमर्मसन्धिरुजासु च ॥

तया दग्धाहतस्रष्टयोनिकर्णशिरोरुजि ।
तैलं प्रावृषि वर्षान्ते सर्पिरब्दौ तु साधवे ॥
ऋतौ साधारणे स्नेहः शस्तोऽङ्गे विमले रवौ ।
तैलं वसायां शीतेऽपि घर्मेऽपि च घृतं निशि ॥
निश्येव पित्ते पवने संसर्गे पित्तजेऽपि ।
निश्यन्यथा वातकफाद्रोगाः स्युः पित्तगे दिवा ॥
युक्त्यावचारयेत् स्नेहं भक्ष्याद्यन्ने न वस्तिभिः ।
नस्याभ्यञ्जनगण्डूषमूर्धकर्णाक्षितर्पणे ॥
रसमेदैकलाभ्यां चतुष्टिर्विचारणा ।
स्नेहस्यान्नाभिभूतत्वादल्पत्वाच्च क्रमात् स्मृता ॥
यथोक्तहेत्वभावाच्च नाच्छपेयो विचारणा ।
स्नेहस्य कल्पः स श्रेष्ठ स्नेहकर्माणु साधनात् ॥
इत्था चतुर्भिरष्टाभिर्द्वाभ्यां वा क्रमात् ।
क्रूरमध्योत्तमा मात्रास्तास्त्र्यह्रश्च गरीयसीम् ॥
कल्पयेद्दोष्य दोषादीन प्रागेव तु क्रमीयसीम् ।
भ्रमने जीर्ण एवान्ने स्नेहोऽच्छः पुटये बहुः ॥
श्रमनः क्षुदतोऽन्नो मध्यमात्रश्च शस्यते ।
स्नेहणो रसमद्याद्यैः सभक्तोऽल्पो हितः स च ॥
बालवृद्धविषार्तस्नेहिक्षयणोलिषु ।
स्नेहनियतस्तन्द्रिक्षुधितक्लेशभीरुषु ॥
मृदुकोष्ठाल्पदोषेषु काले चोष्णे क्षणेषु च ।
स्नेहान्तरभक्तोपावधोमध्योर्ध्वहेतुजान् ॥
स्नेहान् जयेद्बलं कुर्यादज्ञानाच्च यथाक्रमम् ।
स्नेहनच्छर्दिवेत् स्नेहे तत्सखपक्तये ॥

आस्थापनेषु शुद्धौ च तीक्ष्णैरुष्णैर्न तु।
जीर्णाजीर्णविशङ्कायां पुनरुष्णोदकं पिबेत्॥
तेनोद्गारविशुद्धिः स्यात्ततश्च लघुता रुचिः।
भोज्यान्नं मात्रया प्राश्नन् श्वः पिबेत्पीतवानपि॥
द्रवीष्णमनभिष्यन्दि नातिस्निग्धमसङ्करम्॥

उष्णोदकोपचारी स्याद्ब्रह्मचारी चपाश्रयः।
न वेगरोधी व्यायामक्रोधशोकहिमातपान्॥
प्रवातयानपानाध्वभाष्यात्यासनसंस्थितीः।
नीचात्युच्चोपधानाङ्गं वह्निधूमरजांसि च॥
यान्यहानि पिबेत्तानि तावन्त्यन्यान्यपि त्यजेत्।
सर्वकर्मस्वयं प्रायो व्याधिचीर्णेषु च क्रमः॥
उपचारस्तु शमने कार्यः स्नेहे विरिक्तवत्।
चतुर्थमक्षं सदृशे क्षीरे सप्ताहिनं पिबेत्॥
सम्यक् स्निग्धाऽथवा यावदतः सालीभवेत्यरम्।
वातानुलोम्यं दीप्तोऽग्निर्वर्चः स्निग्धमसंहतम्॥
स्नेहोद्वेगः क्लमः सम्यक् स्निग्धे रूक्षे विपर्ययः।
अतिस्निग्धे तु पाण्डुत्वं प्राणवह्नगुदस्रवाः॥
अमात्रयाहितोऽकाले मिथ्याहारविहारतः।
स्नेहः करोति शोफार्शस्तन्द्रास्रभ्रमसंज्ञताः॥
कण्डूकुष्ठज्वरोत्क्लेशशूलालाङ्गभ्रमादिकान्।
क्षुत्तृष्णालेखनस्वेदरूक्षपानान्नमेषजम्॥
तक्रारिष्टखडोद्दालयवश्यामाककोद्रवम्।
पिप्पलीत्रिफलाचीव्रपथ्यागोमूत्रगुग्गुलु॥
यथास्वं प्रतिरोगञ्च स्नेहव्यापदि साधनम्॥

स्निग्धो दुर्बोष्णधन्वौत्थरसभुक् स्वेदमाचरेत् ।
स्विन्नस्त्यहं स्थितः कुर्याद्विरेकं वमनं पुनः ॥
एकाह दिनमन्यच्च कफमुत्क्लेश्य तत्करैः ।
मांसला मेदुरा भूरिश्लेष्माणो विषमाग्नयः ॥
स्नेहोचिताश्च येऽस्नेह्यास्तान् पूर्वं रूक्षयेत्ततः ।
संस्नेह्य शोधयेदेवं स्नेहव्यापन्न जायते ॥
अलं मलानीरयितुं सेहसासात्मतां गतः ॥

बालवृद्धादिषु स्नेहपरिहारासहिष्णुषु ।
योगानिमाननुद्वेगान् सद्यः स्नेहान् प्रयोजयेत् ॥
प्राज्यमांसरसास्वेषु पेया वा स्नेहभर्जिताः ।
तिलचूर्णश्च सस्नेहफाणितः क्षीरसास्तथा ॥
क्षीरपेया घृताढ्योष्णा दध्नो वा सगुडः सरः ।
पेया वा पञ्चप्रसृता स्नेहैस्तण्डुलपञ्चमैः ॥
सप्तैते स्नेहनाः सद्यः स्नेहाश्च लवणोल्बणाः ।
तद्विध्यविरुद्धाश्च सूक्ष्ममुष्णं व्यवायि च ॥
गुडानूपामिषक्षीरतिलमाषसुरादधि ।
कुष्ठशोफप्रमेहेषु स्नेहार्थं न प्रकल्पयेत् ॥
त्रिफलापिप्पलीपथ्यागुग्गुल्वादिविपाचितान् ।
स्नेहान् यथास्वमेतेषां योजयेदविकारिणः ।
क्षीणानां त्वामयैरग्निदेहसन्धुक्षणक्षमान् ॥

दीप्ताग्निः परिशुद्धकोष्ठ.
प्रत्यग्रधातुर्बलवर्णयुक्तः ।
दृढेन्द्रियो मन्दजरः शतायुः
स्नेहोपसेवी पुरुषः प्रदिष्टः ॥

मूर्द्धतैलविधिः ।

अभ्यङ्गः परिषेकश्च पिचुर्बस्तिरितिक्रमात् ।
मूर्द्धतैलं चतुर्थं स्याद्बलवत्त्वयथोत्तरम् ॥
त्रयोऽभ्यङ्गादयः पूर्वं प्रसिद्धा सर्वतः स्मृताः ।
शिरोबस्तिविधिस्त्वत्र प्रोच्यते सुश्रुसम्मतः ।
शिरोबस्तिस्त्वङ्माण स्यादिमुखो द्वादशाङ्गुलः ॥
शिरःप्रमाणस्तं बद्ध्वा मस्तके माषपिष्टकैः ।
सन्धिरोधं विधायाशु स्नेहै कोष्ठे प्रपूरयेत् ॥
तावद्यावत्तु यावत्स्याच्छासाकर्णसुखस्मृतिः ।
वेदनोपशमो वापि मात्राणां वा सहस्रकम् ॥
विना भोजनमेवात्र शिरोबस्तिः प्रशस्यते ।
प्रयोज्यस्तु शिरोबस्ति पञ्च सप्त दिनानि वा ॥
शिरोबस्तिं विमोक्षाणनीरे स्नानञ्च कारयेत् ।
अनेन दुर्जया रोगा वातजा यान्ति संक्षयम् ॥
शिरःकम्पादयस्तेन सर्वकालेषु युज्यते ॥

अष्टमोऽध्यायः ॥

अथ पञ्च कर्माणि ।
प्रथमं वमनं पश्चाद्विरेकश्चानुवासनम् ।
एतानि पञ्च कर्माणि निरूहो लावणं तथा ॥

तत्र वमनविधि ।

शरत्काले वसन्ते च प्रावृट्काले च देहिनाम् ।
वमनं रेचनञ्चैव कारयेत् कुशलो भिषक् ॥
बलवन्तं कफव्याप्तं हृल्लासादिनिपीडितम् ।
तथा वमनसात्म्यञ्च धीरचित्तञ्च वामयेत् ॥
विषदोषे स्नन्यरोगे मन्देऽग्नौ श्लीपदेऽर्बुदे ।
हृद्रोगे कुष्ठवीसर्पे मेहाजीर्णभ्रमेषु च ॥
विदारिकापचीकासश्वासपीनसहृद्विषु ॥
अपस्मारे ज्वरोन्मादे तथा रक्तास्रिसारिषु ।
नासातालोष्ठपाकेषु कर्णस्रावेऽधिजिह्वके ।
गलशुण्डीगलौसारे पित्तश्लेष्मगदे तथा ॥
मेदोगदेऽरुचौ चैव वमनं कारयेद्भिषक् ॥
स्नन्यरोगे दुष्टदुग्धजनिते बालस्य रोगे ।
न वामनीयस्तिमिरी न गुल्मी नोदरी क्षयी ।
नातिवृद्धो गर्भिणी च न शूलो न क्षतातुरः ॥
मदार्त्तो बालको वृद्धः क्षुधितश्च निरूहितः ।
उदावर्त्तोर्द्ध्वरक्तौ च दुर्बलो केवलानिलौ ॥
पाण्डुरोगी क्रिमिव्याप्तः पाठनात् खरघातवान् ।
एतेऽप्यजीर्णव्यथिता वाम्या ये विषपीडिताः ॥
कफव्याप्ताश्च ते वाम्या मधुकक्षीरपायनैः ॥
भुक्तेऽन्नकालेऽद्रव्यो दुर्बलः ।
सुकुमारं क्षीणं बालं वृद्धं भीरुञ्च वामयेत् ।
पाययित्वा यवागूं वा क्षीरतक्रदधीनि च ॥
अन्नालैः श्लेष्मलैर्भोज्यैर्दोषानुत्क्लेश्य देहिनाम् ।

स्निग्धस्विन्नाय वमनं दत्तं सम्यक् प्रवर्त्तते ॥
वमनेषु च सर्वेषु सैन्धवं मधुना हितम् ।
बीभत्सं वमनं दृष्ट्वाद्विपरीतं विरेचनम् ॥

क्वाथद्रव्यस्य कुडवं स्रावयित्वा जलाढके ।
अर्द्धभागावशिष्टञ्च वमनेष्ववचारयेत् ॥
क्वाथपाने नव प्रस्था ज्येष्ठा मात्रा प्रकीर्त्तिता ।
मध्यमा षण्मिता प्रोक्ता त्रिप्रस्था च कनीयसी ॥
वमने च विरेके च तथा शोणितमोक्षणे ।
अर्द्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः ॥

अर्द्धत्रयोदशपलं सार्द्धषट्कम् ॥

कल्कचूर्णावलेहानां त्रिपल मात्रयोत्तमम् ।
मध्यमं द्विपलं विद्यात्कनीयस्तु पल भवेत् ॥

वमने चाष्टवेगाः स्युः पित्तान्ता उत्तमास्तु ते ।
षड्वेगा मध्यमा वेगाश्चत्वारस्त्ववरे मताः ॥

कफं कटुकतीक्ष्णोष्णैः पित्तं स्वादुहिमैर्जयेत् ।
सस्वादुलवणाक्लोष्णैः संसृष्टं वायुना कफम् ॥
क्षणा कटफलस्निग्धञ्च कफे कोष्णजलैः पिबेत् ॥
पटोलवासा निम्बाश्च पित्ते शीतजलैः पिबेत् ॥
सश्लेष्मवातपीड़ायां सक्षीरं मदनं पिबेत् ।
अर्कमूलत्वचश्चूर्णं पिबेत् कफविषार्दितः ॥
अजीर्णे कोष्णपानीयं स्निग्धं पीत्वा वमेत् सुधीः ।

कट्फलमत्र मदनफलम् ।

प्रसेको हृद्ग्रहः कोठः कण्डूर्दुश्छर्दिते भवेत् ।
अतिवान्ते भवेत्तृष्णा हिक्कोत्तारो विसंज्ञता ॥

जिह्वानिःसरणं चाक्ष्णोर्व्यावृत्तिर्हनुसंहतिः ।
रक्तच्छर्दिः क्षीवनञ्च कण्ठपीडा च जायते ॥

हनुसंहतिः हन्वोरमिलनम् ।

वमनस्यातियोगे तु मृदु कुर्याद्विरेचनम् ।
वमनेन प्रविष्टायां जिह्वायां कवलग्रहः ॥
स्निग्धाम्ललवणैर्युक्तैर्घृतक्षीररसैर्हितैः ।
फलाम्लखानि खादेयुस्तस्य चान्येऽयतो नराः ॥
निःसृतान्तु तिलद्राक्षाकल्कलिप्तां प्रवेशयेत् ।
व्यावृत्ते ऽक्षिणी घृताभ्यक्ते पीडनञ्च शनैः शनैः ॥
हनुमोक्षे स्मृतः खेदो नस्यञ्च स्नेहवातहृत् ।
रक्तपित्तविधानेन रक्तष्ठीवमुपाचरेत् ॥
धात्रीरसाम्बुनीरलाजाचन्दनवारिभिः ।
मन्थं कृत्वा पाययेच्च सघृतक्षौद्रशर्करम् ॥
शाम्यत्यनेन तृष्णाद्या रोगाश्छर्दिसमुद्भवाः ।
हृत्कण्ठाग्निरसां शुद्धिर्दीप्ताग्नित्वञ्च लाघवम् ॥
कफपित्तविनाशश्च सम्यग्वान्तस्य लक्षणम् ।
ततोऽपराह्णे दीप्ताग्निं सुद्रयष्टिकशालिभिः ॥
हृद्यैश्च जाङ्गलरसैः कृत्वा यूषञ्च भोजयेत् ।
तन्द्रा निद्रास्यदौर्गन्ध्यं कण्डूश्च ग्रहणी विषम् ।
सुवान्तस्य न पीडायै भवन्त्येते कदाचन ॥
अजीर्णं शीतपानीयं व्यायामं मैथुनं तथा ।
स्नेहाभ्यङ्गञ्च रोषञ्च दिनमेकं सुधीस्त्यजेत् ॥

नवमोऽध्यायः ।

विरेचनविधि ।

स्निग्धस्विन्नाय वान्ताय दद्यात्सम्यग् विरेचनम् ।
अवान्तस्य लघ्वन्नस्तो ग्रहणीं क्लादयेत्कफः ॥
मन्दाग्निं गौरवं कुर्य्याज्जनयेद्वा प्रवाहिकाम् ।
अथवा पाचनैरामं बलासं परिपाचयेत् ॥
ऋतौ वसन्ते शरदि देहशुद्ध्यै विरेचयेत् ।
अन्यदात्ययिके कार्य्ये शोधनं शीलयेद्बुधः ॥
पित्ते विरेचन युञ्ज्यादामोद्भूते गदे तथा ।
उदरे च तथाध्माने कोष्ठशुद्ध्यै विशेषतः ॥
दोषाः कदाचित् कुप्यन्ति जिता लङ्घनपाचनैः ।
शोधनैः शोधिता ये तु न तेषां पुनरुद्भवः ॥
बालो वृद्धो भृशं स्निग्धः क्षतक्षीणो भयान्वितः ।
श्रान्तस्तृषार्त्तः स्थूलश्च गर्भिणी च नवज्वरी ॥
नवप्रसूता नारी च मन्दाग्निश्च मदात्ययी ।
अत्यर्हितश्च रूक्षश्च न विरेच्या विजानता ।
जीर्णज्वरी गरव्याप्तो वातरक्ती भगन्दरी ॥
अर्शःपाण्डूदरग्रन्थिकुष्ठोदरारुचिपीडिताः ।
योनिरोगप्रमेहार्त्ता गुल्मप्लीहव्रणार्दिताः ॥
विद्रधिच्छर्दिविस्फोटविसूचीकुष्ठसंयुताः ।
कर्णनासाशिरोवक्त्रगुदमेढ्रामयान्विताः ॥

प्लीहगोदाग्निरोगार्त्तो क्रिमिमन्दानलार्दितः ।
शूलिनो मूत्रघातार्त्तो विरेकार्हा नरा मताः ॥

बहुपित्तो मृदुः प्रोक्तो बहुश्लेष्मा च मध्यमः ।
बहुवातः क्रूरकोष्ठो दुर्विरेच्यः स कथ्यते ॥
मृद्वी माद्वी मृदौ कोष्ठे मध्यकोष्ठे च मध्यमा ।
क्रूरे तीक्ष्णा मता द्रव्यैर्मृदुमध्यमतीक्ष्णकैः ॥
मृदुर्द्राक्षा पयश्चेक्षुतैलैरपि विरिच्यते ।
मध्यमस्त्रिवृतातिक्तारास्नदन्तीवरैर्विरिच्यते ।
क्रूरः स्नुक्पयसा हेमक्षीरीदन्तीफलादिभिः ॥

मात्रोत्तमा विरेकस्य त्रिंशद्वेगैः कफान्तिका ।
वेगैर्विंशतिभिर्मध्या हीनोक्ता दशवेगिका ॥
द्विपल श्रेष्ठमाख्यात मध्यमञ्च पलं भवेत् ।
पलार्द्धञ्च कषायाणां कनीयस्तु विरेचनम् ॥
कल्कक्षोदकचूर्णानां कर्षं भक्षाज्यलेहतः ।
कर्षद्वयं पलं वापि वयोरोगाद्यपेक्षया ।
पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षाक्वाथादिभिः पिबेत ॥
त्रिफलाक्वाथगोमूत्रैः पिबेद्व्योष कफार्दितः ॥
त्रिवृत्त्रैभवशुण्ठीना चूर्णमक्षं पिबेन्नरः ।
वातार्दितो विरेकाय जाङ्गलानां रसेन वा ॥
एरण्डतैलं त्रिफलाक्वाथेन द्विगुणेन वा ।
युक्त पीतं पयोभिर्वा न चिरेण विरिच्यते ॥
सचीरा सेवतो पेया विरेकार्थं सितायुता ।
नारिकेलजतोयेन पेया वा स्वर्णपत्रिका ॥
त्रिवृता कोटजं बीजं पिप्पली विश्वभेषजम् ।

सगुडौकारसं चौद्रं वर्षाकाले विरेचनम् ॥
त्रिवृद्दुरालभामुस्तशर्करोदीच्यचन्दनम् ।
द्राक्षाम्बुना सयष्ट्याह्व शीतलञ्च घनात्यये ॥
त्रिवृतां चित्रक पाठामजाजो सरलां वचाम् ।
हैमन्तीरी च हैमन्ते चूर्णमुष्णाम्बुना पिबेत् ॥
पिप्पलीं नागरं सिन्धु श्यामां त्रिवृतया सह ।
लिह्यात् क्षौद्रेण शिशिरे वसन्ते च विरेचनम् ॥
त्रिवृता शर्करा तुल्या ग्रीष्मकाले विरेचनम् ॥

अभयामोदकः ।

अभया मरिचं शुण्ठी विरङ्गामलकानि च ।
पिप्पली पिप्पलीमूलं त्वक् पत्रं मुस्तमेव च ॥
एतानि समभागानि दन्ती तु त्रिगुणा भवेत् ।
त्रिवृताष्टगुणा ज्ञेया षड्गुणा चात्र शर्करा ।
मधुना मोदकान् कृत्वा कर्षमात्रान् प्रमाणतः ।
एकैक भक्षयेत्प्रातः शीतक्षीरानुपिबेज्जलम् ॥
तावद्विरिच्यते जन्तुर्यावदुष्णं न सेवते ।
पानाहारविहारेषु भवेन्नियन्त्रण सदा ॥
विषमज्वरमन्दाग्निपाण्डुकासभगन्दरान् ।
दुर्नामकुष्ठयक्ष्मार्शोगलगण्डभ्रमोदरान् ॥
विद्राधप्लीहमेहाश्च यक्ष्माणं नयनामयान् ।
वातरोगास्तथाध्मानं सूचकच्छाणि चाश्मरीम् ॥
पृष्ठपार्श्वोरुजघनजङ्घोदररुजं जयेत् ।
सततं शीलनादेषां पलितानि प्रणाशयेत् ॥
अभयामोदका ह्येते रसायनवराः स्मृताः ॥

पीत्वा विरेचनं शीतजले सक्तिञ्च चक्षुषी ।
सुगन्धि किञ्चिदाघ्राय ताम्बूलं शोधयेद्बुधः ॥
निर्वातस्थो न वेगांश्च धारयेन्न प्रयोजयेत् ।
शीताम्बु न स्पृशेत् क्वापि कोष्णनीरं पिबेन्मुहुः ॥
दुर्विरिक्तस्य नाभेस्तु स्तब्धता कुक्षिशूलरुक् ।
पुरीषवातसङ्गश्च कण्डूमण्डलगौरवम् ॥
जिह्वोष्ठरुचिराध्मान श्रमश्छर्दिश्च जायते ।
तं पुनः पाचनैः स्नेहैः पक्वा स्निग्धन्तु रेचयेत् ॥
तेनास्योपद्रवा यान्ति दोषोऽग्निर्लघुता भवेत् ।
विरेकस्यातियोगेन मूर्च्छाभ्रमो गुदस्य च ॥
शूलं कफातियोगः स्यान्मांसधावनसन्निभम् ।
मेदोनिभं जलाभासं रक्तं वापि विरिच्यते ॥
तस्य शीताम्बुभिः सिक्ता शरीरं तण्डुलाम्बुभिः ।
मधुमिश्रैस्तथा शीतैः कारयेद्वमनं मृदु ॥
सहकारत्वचं कल्कीं दध्ना सौवीरकेण वा ।
पिष्टो नाभिप्रलेपेन हन्त्यतीसारमुल्बणम् ॥
अजाक्षीरं रसं वापि वैष्किरं हारिणं तथा ।
शालिभिः यष्टिकैः स्वल्पं मसूरैर्वापि भोजयेत् ॥
शीतैः संग्राहिभिर्द्रव्यैः कुर्यात्तु ग्रहणं भिषक् ॥

लाघवे मनसस्तुष्टावनुलोमं गतेऽनिले ।
सुविरिक्तं नरं ज्ञात्वा पाचनं पाययेन्निशि ॥
इन्द्रियाणां बलं बुद्धेः प्रसादं वह्निदीपनम् ।
धातुस्थैर्यं वयःस्थैर्यं भवेद्रेचनसेवनात् ॥
प्रभातेवा शीताम्बु स्नेहाभ्यङ्गमजीर्णताम् ।

व्यायामं मैथुनं चैव न सेवेत विरेचितः॥
शालिषष्टिकमुद्गाद्यैर्यवागूं भोजयेत् क्रताम्।
जङ्गालविष्किराणां वा रसैः शाल्योदनं हितम्॥
विरेकादौषधे पीते सम्यग् यो न विरिच्यते।
पिबेदुष्णाम्बु ना तत्र सैन्धवं दोषशान्तये॥

दशमोऽध्यायः।

वस्तिकर्म्म।

अथातो नेत्रवस्तिप्रमाणपरिभाग
चिकित्सितं व्याख्यास्यामः।

तत्र स्नेहादीनां कर्म्मणां वस्तिकर्म्म प्रधानतममाहुराचार्य्याः। कस्मादनेककर्म्मकरत्वाद्वस्तेरिह वस्तिर्नानाविधद्रव्यसंयोगाद्दोषाणां संशोधनसंशमनसंग्रहणानि करोति। क्षीणशुक्रं वाजीकरोति क्रमं दृंहयति स्थूलं कर्षयति चक्षुः प्रीणयति वलीपलितमुपहन्ति वयः स्थापयति। शरीरोपचयं वर्णवलमारोग्यमायुषः परिग्रहञ्च करोति वस्तिः सम्यगुपासितः। तथा ज्वरातीसारतिमिरप्रतिश्यायशिरोरोगाधिमन्याहिताचेपकपक्षाघातैकाङ्गसर्वाङ्गरोगाध्मानोदरशर्कराशूलहृद्ग्रहपर्वभानाहमूत्रकृच्छ्रशुक्रवातशोणितवातमूत्रपुरीषोदावर्त्तशुक्रार्त्तवदुष्ट्य-

नाशयद्वनुमन्यायग्रहार्योऽश्मरीमूढगर्भप्रभृतिषु चाल्पर्थमुपयुज्यते ।

वस्तिर्वाते च पित्ते च कफे रक्ते च शस्यते ।
संसर्गे सन्निपाते च वस्तिरेव हितः सदा ॥

तत्र सांवत्सरिकाष्टहिरण्यवर्षाणां षडष्टद्यङ्गुलप्रमाणानि कनिष्ठिकानामिकामध्यमाङ्गुलिपरीणाहान्यग्रेऽध्यर्धाद्यङ्गुलनर्जुतीयाङ्गुलसन्निविष्टकर्णिकानि कङ्क्ष्येनवर्हिपत्रनाड़ीतुल्यप्रवेशानि मुद्गमाषकलायस्रोतांसि विद्ध्यान्नेत्राणि तेषु स्नाय्वापनद्रव्यप्रमाणमातुरहस्तसम्मितेन प्रसृतेन सम्मितौ प्रसृतौ द्वौ चत्वारोऽष्टौ विधेयाः ।

वर्षोत्तरेषु नेत्राणां वस्तिमानस्य चैव हि ।
वयोबलशरीराणि समीक्ष्य वर्द्धयेद्विधिम् ॥

पञ्चविंशतेरूर्द्धं द्वादशाङ्गुलं मूलेऽङ्गुष्ठोदरपरीणाहमग्रे कनिष्ठिकोदरपरीणाहमग्रे त्र्याङ्गुलसन्निविशिष्टकर्णिकं राजपत्रनाड़ीतुल्यप्रवेशं कोलास्थिमात्रच्छिद्रं क्लिन्नकलायमात्रच्छिद्रमित्येके ।

सर्वाणि मूले वस्तिनिबन्धनार्थं द्विकर्णिकानि ।
आस्थापनद्रव्यप्रमाणन्तु विहिता द्वादश प्रसृताः ।

सप्ततेस्तूर्द्धं नेत्रप्रमाणमेतदेव द्रव्यप्रमाणन्तु द्विरष्टवर्षवत् ।

तत्र नेत्राणि सुवर्णरजतताम्रायोरीतिदन्तशृङ्गमणितरुसारमयानि श्लक्ष्णानि दृढ़ानि गोपुच्छाकृतीन्यृजूनि शुटिकामुखानि । वस्तयश्चाव्रणाना मृदवो नातिबहला दृढ़ाः प्रमाणवन्तो गोमहिषवराहाजोरभ्राणाम् ।

मूत्रकोषस्य वस्तिस्तु तदलाभे तु चर्मणः ॥
कषायरक्त स मृदुर्वस्तिः स्निग्धो दृढ़ो हितः ।
नेत्रालाभे हिता नाड़ी नलवंशास्थिसम्भवा: ॥

तत्र द्विविधो वस्तिः नैरूहिकः स्नैहिकश्च । आस्थापनं निरूह इत्यनर्थान्तरम् । स दोषनिर्हरणाच्छरीररोगहरणाद्वा निरूहः वयःस्थापनादायुःस्थापनाद्वास्थापनम् । तत्र यथाप्रमाणगुणविहितः स्नेहवस्तिविकल्पोऽनुवासनः पादावक्लृप्तः । अनुवसन्नपि न दुष्यत्यनुदिवं वा दीयत इत्यनुवासनः । तस्यापि विकल्पेऽर्धाङ्गमात्रावक्लृप्तोऽपरिहार्यो मात्रावस्तिरिति ।

निरूहः शोधनो लेखी स्नेहनो ह्लंहणो मतः ।
निरूहशोधिताम्मार्गान् सम्यक् स्नेहोऽनुगच्छति ॥
अपेतसर्वदोषासु नाड़ीष्विव वहज्जलम् ।
सर्वदोषहरश्चासौ शरीरस्य च जीवनः ॥
तस्मादिशुद्धदेहस्य स्नेहवस्तिर्विधीयते ॥

तत्रोन्मादभयशोकपिपासारोचकाजीर्णार्शःपाण्डुरोगभ्रममदमूर्च्छोच्छर्दिकुष्ठमेहोदरस्त्रीत्वश्वासकासकण्ठशोषशोफोपसृष्टक्षतक्षीणचतुस्त्रिमासगर्भिणीदुर्बलाग्न्यसहा बालवृद्धौ च वातरोगार्ते क्षीणा नानुवास्या नास्थापयितव्याः ।

उदरी च प्रमेही च कुष्ठी स्थूलश्च मानवः ।
अवश्यं स्थापनीयाश्च नानुवास्याः कथञ्चन ॥
असाध्यता विकाराणां स्यादेषामनुवासनात् ।
असाध्यत्वेऽपि भूयिष्ठं गात्राणां सदनं भवेत् ॥

पक्वाशये तथा ओष्णां नाभ्यधस्ताच्च सर्वतः ।
सम्यक् प्रणिहितो वस्तिः स्थानेष्वेतेषु तिष्ठति ॥
पक्वाशयाद्बस्तिवीर्य्यं स्वेदैर्देहमुपसर्पति ।
वृक्षमूले निषिक्तानामपां वीर्य्यमिव द्रुमम् ॥
स चापि सहसा वस्तिः केवलः समलोऽपिवा ।
प्रत्येति स्वनिलैर्वीर्य्यमपानाद्यैर्विनीयते ॥
वीर्य्येण वस्तिरादत्ते दोषानापादमस्तकात् ।
पक्वाशयस्थोऽम्बरगो भूमेरर्को रसानिव ॥
सकटीपृष्ठकोष्ठस्थान् वीर्य्येणालोड्य सञ्चयान् ।
उत्खातमूलान् हरति दोषाणां साधु योजितः ॥
दोषत्रयस्य यस्माच्च प्रकोपे वायुरीश्वरः ।
तस्मात्तस्यातिवृद्धस्य शरीरमभिनिघ्नतः ॥
वायोर्विषहते वेगं नान्या वस्तेर्ऋते क्रिया ।
पवनाविद्धतोयस्य वेलावेगमिवोदधेः ॥
शरीरोपचयं वर्णं बलमारोग्यमायुषः ।
कुरुते परिवृद्धश्च वस्तिः सम्यगुपासितः ॥

अत ऊर्द्धं व्यापदो वक्ष्यामः ।

तत्र नेत्रं चलितं विवर्त्तितं पार्श्वावपीड़ितमत्युत्क्षिप्तमवसन्नं तिर्य्यक्क्षिप्तमिति षट् प्रणिधानदोषाः । अतिस्थूलं कर्कशमवनतमग्रे भिन्नं सच्छिद्रविप्रकृष्टकर्णिकं सूच्यातिच्छिद्रमतिदीर्घमतिह्रस्वमित्येकादश नेत्रदोषाः । बहलताल्पता सच्छिद्रता प्रस्रीर्णता दुर्बद्धतेति पञ्च वस्तिदोषाः । अतिपीड़ितता शिथिलपीड़ितता भूयोभूयोऽवपीड़नं कालातिक्रम इति चत्वारः पीड़नदोषाः । भ्रामता

हीनतातिमात्रतातिशीततात्युष्णतातितीक्ष्णतातिमृदुतातिस्निग्धतातिरूक्षतातिसान्द्रतातिद्रवता इत्येकादश द्रव्यदोषाः। आवाक्शीर्षीच्छीर्षन्नुज्जोत्तानसङ्कुचितदेहस्थितताद्दक्षिणपार्श्वशायिनः प्रदानमिति सप्त शय्यादोषाः। क्रोध आयासः शोको मैथुनं दिवास्वप्न उच्चैःसम्भाषणं यानयानं चिरासनं स्नानमतिचंक्रमणं शीतसम्भोगस्त्रीयवातातपानां सेवनमविहिताशनमिति पञ्चदशातुरनिमित्ताः। ये हस्वष्टाभिः कारणैः प्रतिहतो न प्रत्यागच्छति त्रिभिर्दोषैरशनाभिभूतो मलव्याभिश्रो दूरानुप्रविष्टोऽग्निरस्यानुष्णोऽल्पोऽल्पाशनस्य चेति वैद्यातुरनिमित्ता भवन्ति। अयोगस्तूभयोराधानं परिकर्त्तिका परिस्रावः प्रवाहिका हृदयोपसरणनङ्गप्रग्रहोऽतियोगो जीवादानमिति नव व्यापदो वैद्यनिमित्ता भवन्ति।

षट्सप्तति समासेन व्यापदः परिकीर्त्तिताः।
तासां वक्ष्यामि विज्ञानं सिद्धिञ्च तदनन्तरम्॥

एकादशोऽध्यायः।

अथातोऽनुवासनोत्तरवस्तिचिकित्सितं व्याख्यास्यामः।

विरेचनात्सम्यराचे गते जातबलाय च।
कृताम्नायानुवास्याय सम्यग् देयोऽनुवासनः॥

यथा वयोनिरूहाणां या मात्राः परिकीर्त्तिताः ।
पादावशिष्टास्ताः कार्या स्नेहवस्तिषु देहिनाम् ॥
अत ऊर्द्धं प्रवक्ष्यामि तैलानीह यथाक्रमम् ।
पानान्वासननस्येषु यानि हन्युर्गदान् बहून् ॥

शल्यादितैलम् ।

शटिपुष्करकृष्णाह्वामदनामरदारुभिः ।
शताह्वाकुष्ठयष्ट्याह्ववचाविल्वहृताग्निभिः ॥
सुपिष्टैर्द्विगुणं क्षीरं तैलं तोयं चतुर्गुणम् ।
पक्त्वा वस्तौ विधातव्यं मूढ़वातानुलोमनम् ॥
अर्शांसि ग्रहणीदोषमानाहं विषमज्वरम् ।
कण्डूरुपृष्ठकोष्ठस्थान् वातरोगांश्च नाशयेत् ॥

वचादितैलम्

वचापुष्करकुष्ठैलामदनामरसिन्धुजैः ।
काकोलीद्वययष्ट्याह्वमेदायुग्मनराधिपैः ॥
पाठाजीवकजीवन्तीभार्गीचन्दनकट्फलैः ।
सरलागुरुविल्वास्फुवाजिगन्धाग्निवह्निभिः ॥
विड्वराङ्गवधश्यामात्रिवृन्मागधिकर्द्धिभिः ।
पिष्टैस्तैलं पचेत् क्षीरं पञ्चमूलरसान्वितम् ॥
युञ्जानाहाग्निषड्ग्रार्शोग्रहणीमूत्रसङ्गिनाम् ।
अन्वासनविधौ युक्तं प्रस्थतेऽनिलरोगिणाम् ॥

चित्रकादितैलम् ।

चित्रकातिविषापाठादन्तीविल्ववचामिषैः ।
सरलांशुमतीराम्रानीलिनीचतुरङ्गुलैः ॥
चव्याजमोदकाकोलीमेदायुग्मसुरद्रुमैः ।

जीवकर्षभवर्षाभूवस्तगन्धशताह्वयैः ॥
रेणुश्वगन्धामञ्जिष्ठाशटीपुष्करतस्करैः।
सक्षीरं विपचेत्तैलं मारुतामयनाशनम् ॥
गृध्रसीखञ्जकुब्जाढ्यमूरुस्तम्भोदावर्त्तरोगिणाम्।
अस्यतेऽल्पबलाग्नीनां वस्तावाशु नियोजितम् ॥

भूतिकादितैलम्।

भूतिकैरण्डवर्षाभूरास्नाह्वयकरोहिषैः।
दशमूलमहाभागीषड्ग्रन्थामरदारुभिः ॥
बलानागबलामूर्वाजिगन्धामृताह्वयैः।
सहाचरवरीविश्वाकाकनासाविदारिभिः ॥
यवमाषातसीकोलकुलत्थैः क्वथितैः शृतम्।
जीवनीयप्रतीवापं तैलं क्षीरचतुर्गुणम् ॥
जङ्घोरुचिकपार्श्वांसबाहुमन्याशिरःस्थितान्।
हन्यादातविकारांस्तु वस्तियोगैर्निषेवितम् ॥

जीवन्त्यादितैलम्।

जीवन्त्यतिबलामेदाकाकोलीद्वयजीवकैः।
ऋषभातिविषाकृष्णाकाकनासावचामरैः ॥
राम्नामदनयष्ट्याह्वसरलाभीरुचन्दनैः।
स्वयंगुप्ताशटीशृङ्गीकलसीसारिवाह्वयैः ॥
पिष्टैस्तैलघृतं पक्वं क्षीरेणाष्टगुणेन तु।
तच्चानुवासने देयं शुक्राग्निबलवर्द्धनम् ॥
हृंहणं वातपित्तघ्नं गुल्मानाहहरं परम्।
मस्ये पाने च संयुक्तमूर्द्धजत्रुगदापहम् ॥

मधूकादितैलम् ।

मधुकोशीरकाश्मर्य्यकटुकोत्पलचन्दनैः ।
श्यामापद्मकजीमूतयष्ट्याह्वातिविषाम्बुभिः ॥
तैलप्रादं पचेत्क्षीरैः पयसाष्टगुणेन च ।
न्यग्रोधादिगणक्काथयुक्तं वस्तिषु योजितम् ॥
दाहाष्टग्रहरक्तार्शःपवातश्रोणितविद्रधीन् ।
पित्तरक्तज्वरादांश्च हन्यात्पित्तकृतान् गदान् ॥

मृणालादितैलम् ।

मृणालोत्पलशालूकसारिवाद्वयकेशरैः ।
चन्दनद्वयभूनिम्बपद्मबीजकसेरुकैः ॥
पटोलकटुकारक्तागुन्द्रापर्पटवासकैः ।
पिष्टैस्तैलमिदं पक्वं क्षीरमूलरसेन च ॥
क्षीरद्विगुणसंयुक्तं वस्तिकर्म्मणि योजितम् ।
नस्येऽभ्यञ्जनपाने वा हन्यात्पित्तगदान् बहून् ॥

त्रिफलाद्यं तैलम् ।

त्रिफलातिविषामूर्वात्रिवृच्चित्रकवासकैः ।
निम्बारग्वधषड्ग्रन्थासप्तपर्णनिशाद्वयैः ॥
गुडूचीन्द्रसुराक्षाक्रुष्टसर्षपनागरैः ।
तैलसमैः समैः पक्वं सुरसादिरसाप्लुतम् ॥
पानाभ्यञ्जनगण्डूषनस्यवस्तिषु योजितम् ।
स्थूलतालस्यकण्ड्वादीन् जयेत्कफकृतान् गदान् ॥

पाठाद्यं तैलम् ।

पाठाजमोदाशाङ्कष्ठापिप्पलीद्वयनागरैः ।
सरलागुरुकालीयभार्गीचव्यामरद्रुमैः ॥

मरिचैलाभयाकट्वीग्रटीग्रन्थिककट्फलैः ।
तैलमेरण्डतैलं वा पक्वमेभिः समायुतम् ॥
वल्लीकण्टकमूलाभ्यां क्वाथेन द्विगुणेन च ।
हन्यादन्वासनैर्दत्तं सर्वान् कफकृतान् गदान् ॥

विडङ्गाद्यं तैलम् ।

विडङ्गोदीच्यसिन्धूत्थग्रटीपुष्करचित्रकैः ।
कट्फलातिविषाभार्गीवचाकुष्ठसुराह्वयैः ॥
मेदामदनयष्ट्याह्वश्यामानिचुलनागरैः ।
घृताक्तानीलिनीरास्नाकदलीव्रश्चनैरपि ॥
विल्वाजमोदकृष्णाह्वादन्तीचव्यनराधिपैः ।
तैलमेरण्डतैलं वा मुष्ककादिरसाप्लुतम् ॥
प्लीहोदावर्त्तवातास्रगुल्मानाहकफामयान् ।
प्रमेहशर्करार्शांसि हन्यादास्थनुवासनात् ॥

द्वादशोऽध्यायः ।

अशुद्धमपि वातेन केवलेनातिपीड़ितम् ।
अहोरात्रस्य कालेन सर्वेष्वे वानुवासयेत् ॥
रूक्षस्य बहुवातस्य द्वौ त्रीनप्यनुवासनान् ।
दत्त्वा स्निग्धतनुं ज्ञात्वा ततः पश्चाद्विरूहयेत् ॥
अस्निग्धमपि वातेन केवलेनातिपीड़ितम् ।
स्नेहप्रगाढ़ैर्मतिमान्विरूहैः समुपाचरेत् ॥

रात्रौ वस्तिं न दद्यात्तु दोषोत्क्लेशो हि रात्रिजः ।
स्नेहो वीर्य्ययुतः कुर्य्यादाध्मानं गौरवं ज्वरम् ॥
अङ्गे स्थानस्थिते दोषे वङ्क्षौ वातरसान्विते ।
स्फुटस्रोतोमुखे टेढे स्नेहौजः परिसर्पति ॥
पित्तेऽधिके कफे क्षीणे रूक्षे वातरुगर्दिते ।
नरे रात्रौ च दातव्यं काले चोष्णेऽनुवासनम् ॥
उष्णे पित्ताधिके वापि दिवा दाहादयो गदाः ।
सम्भवन्ति यतस्तस्मात्प्रदोषे योजयेद्भिषक् ॥
शीते वसन्ते च दिवा ग्रीष्मे प्रावृड्घनात्यये ।
स्नेहो दिनान्ते पानोक्तान् दोषान् परिजिहीर्षति ॥
अहोरात्रेषु कालेषु सर्व्वेष्वेवानिलाधिकम् ।
तीव्रायां रुजि जीर्णान्नं भोजयित्वानुवासयेत् ॥
न वा भुक्तवतः स्नेहः प्रणिधेयः कथञ्चन ।
शुद्धत्वाच्छून्यकोष्ठस्य स्नेहः शङ्कुमथोत्पतेत् ॥
सदानुवासयेच्चापि भोजयित्वार्द्रपाणिनम् ।
ज्वरं विदग्धभुक्तस्य कुर्य्यात् स्नेहः प्रयोजितः ॥
न चातिस्निग्धशमनं भोजयित्वानुवासयेत् ।
मदं मूर्च्छां च जनयेद्विधा स्नेहः प्रयोजितः ॥
रूक्षं भुक्तवतो ह्यन्नं बलं वर्णं च हापयेत् ।
युक्तस्नेहमतो जन्तुं भोजयित्वानुवासयेत् ॥
यूषक्षीररसैस्तस्माद्यथा व्याधिमवेक्ष्य वा ।
यथोचितात्पादहीनं भोजयित्वानुवासयेत् ॥

अथानुवास्यं सभ्यक्तमुष्णाम्बुस्नेदितं शनैः ।
भोजयित्वा यथाशास्त्रं कृतचंक्रमणं ततः ॥

विसर्ज्य च शकृन्मूत्रं योजयेत् स्नेहवस्तिना ।
प्रणिधानविधानन्तु निरूहे च प्रवक्ष्यते ॥
ततः प्रणिहिते स्नेहे उत्तानो वाक्शतं भवेत् ।
प्रसारितैः सवेगावैस्तथा वीर्यं विसर्पति ॥
ताड़येत्तलयोरेनं चींस्त्रीन् वारान् शनैः शनैः ।
श्लिजोर्यैनं ततः शय्यां त्रीन् वारानुत्क्षिपेत्ततः ॥
एवं प्रणिहिते वस्तौ मन्दाय सोऽथ मन्दवाक् ।
स्वास्तीर्णे शयने काममासीताचारिके रतः ॥
स तु सैन्धवचूर्णेन शताह्वेन च योजितः ।
देयः सुखोष्णश्च तथा निरेति सहसा सुखम् ॥
तस्मात्तोत्तममध्यान्त्या षट्चतुर्थमाषकैः ।
हीनमात्रावुभौ वस्तौ नातिकार्य्यकरौ स्मृतौ ॥
अतिमात्रौ तथानाहशुक्रमातीसारकारकौ ।
उत्तमा स्यात्पलैः षड्भिर्मध्यमा स्यात्पलैस्त्रिभिः ॥
पलैकार्द्धेन हीना स्यादुक्ता मात्रानुवासने ।
यस्यानुवासनो दत्तः सकृदन्नमात्रजेत् ॥
अत्यौष्ण्यादतितैक्ष्ण्याद्वा वायुना वा प्रपीडितः ।
सवातोऽधिकमात्रो वा गुरुत्वाद्वा स भेषजः ॥
तस्यान्योऽल्पतरो देयो न हि स्निग्धत्यतिष्ठति ।
विष्टब्धानिलविण्मूत्रः स्नेहहीनोऽनुवासनः ॥
दाहशुक्रमरुग्वाहार्त्तिकरत्वात्तनुवासनः ।
सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु ।
उपद्रवं विना शीघ्रं स सम्यगनुवासितः ॥
जीर्णोत्तमश्च सायाह्ने स्नेहे प्रत्यागते पुनः ।

लघून्नं भोजयेत्कामं दीप्ताग्निस्तु नरो यदि ॥
प्रातरुष्णोदकं देयं धान्यनागरसाधितम् ।
तेनास्य दीप्यते वह्निर्भक्ताकाङ्क्षा च जायते ॥
स्नेहवस्तिक्रमेष्वेव विधिमाहुर्मनीषिणः ।
अनेन विधिना षड् वा सप्त वाष्टौ नवैव वा ॥
विधेया वस्तयस्तेषामन्ते चैव निरूहणम् ।
दत्तस्तु प्रथमो वस्तिः स्नेहयेद्धस्तिवद्बली ॥
सम्यग् दत्तो द्वितीयस्तु मूर्द्धस्थमखिलं जयेत् ।
जनयेद्बलवर्णौ च तृतीयस्तु प्रयोजितः ॥
रस चतुर्थो रक्तन्तु पञ्चमः स्नेहयेत्तथा ।
षष्ठस्तु स्नेहयेन्मांसं मेदः सप्तम एव च ।
अष्टमो नवमश्चास्थि मज्जानञ्च यथाक्रमम् ।
एवं शुक्रगतान् दोषान् द्विगुणः साधु साधयेत् ॥
अष्टाद्यात्यष्टद्यकाद्दिनाद्यो ना निषेवते ।
यथोक्तेन विधानेन परिहारक्रमेण तु ॥
स कुञ्जरबलोऽश्वस्य जवैस्तुल्योऽमरप्रभः ।
वीतपाप्मा द्युतिधरः सहस्रायुर्नरो भवेत् ॥
स्नेहवस्तिं निरूहं वा नैकमेवातिशीलयेत् ।
स्नेहादग्निर्बलोत्क्लेशौ निरूहात्पवनाद्भयम् ॥
तस्मान्निरूढोऽनुवासो निरूह्यश्चानुवासितः ।
नैवं पित्तकफोत्क्लेशौ स्यातां न पवनाद्भयम् ॥
रुक्षाय बद्धवाताय स्नेहवस्तिं दिने दिने ।
दद्यादेवंस्वतोऽन्येषामन्यावाधभयाच्छ्रुतात् ।
स्नेहोऽल्पमात्रो रुक्षाणां सर्वकालमनत्ययः ।

तथा निरूहः स्निग्धानां स्वल्पमात्रः प्रशस्यते ॥

स्नेहवस्तिजाव्यापदः ।

अत ऊर्द्धं प्रवक्ष्यामि व्यापदः स्नेहवस्तिजाः ।
बलवन्तो यदा दोषाः कोष्ठे स्युरनिलादयः ॥
अल्पवीर्य्यं तदा स्नेहमभिभूय पृथग्विधान् ।
कुर्वन्त्युपद्रवान् स्नेहः स चापि न निवर्त्तते ॥
तत्र वाताभिभूते तु स्नेहे मुखकषायता ।
जृम्भा वातरुजस्तास्ता वेपथुर्विषमज्वरः ॥
पित्ताभिभूते स्नेहे तु मुखस्य कटुता भवेत् ।
दाहस्तृष्णा ज्वरः स्वेदो नेत्रमूत्राङ्गपीतता ॥
श्लेष्माभिभूते स्नेहे तु प्रसेको मधुरास्यता ।
गौरवं कर्हिरुच्छ्वासः छर्च्छिः शीतज्वरोऽरुचिः ॥
तत्र दोषाभिभूते तु स्नेहे वस्तिं निधापयेत् ।
यथास्वं दीपनमनान्युपयोज्यानि यानि च ॥
अत्याग्नितेऽग्निभिभवात् स्नेहो नैति यदा तदा ।
गुरुरामाशयः शूलं वायोश्चाप्रतिसञ्चरः ॥
हृत्पीडा मुखवैरस्यं श्वासो मूर्च्छा भ्रमोऽरुचिः ।
तत्रापतर्पणस्यान्ते दीपनो विधिरिष्यते ॥
अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः ।
तदाङ्गसदनाध्मानौ श्वासः शूलश्च जायते ॥
पक्वाशयगुरुत्वञ्च तत्र दृष्ट्वानिरूहणम् ।
अतितीक्ष्णौषधैरेवं सिद्धं चाप्यनुवासनम् ॥
शुद्धस्य दूरानस्ते स्नेहे स्नेहस्य दर्शनम् ।
गात्रेषु सर्वेन्द्रियाणामुपलेपोऽवसादनम् ॥

स्नेहगन्धि सुखं तत्र कासश्वासावरोचकः ।
अतिपीड़ितवस्तत्र विधिरास्थापनं तथा ॥
अस्निग्धस्याविशुद्धस्य स्नेहोऽल्पः सम्प्रयोजितः ।
शीतो मृदुश्च नाभ्येति ततो मन्दं प्रवाहयेत् ॥
विबन्धगौरवाध्मानशूलाः पक्वाशयं प्रति ।
तत्रास्थापनमेवाग्र्यं प्रयोज्यं सानुवासनम् ॥
अल्पं भुक्तवतोऽल्पो हि स्नेहो मन्दगुणस्तथा ।
दत्तो नैति क्लमोत्क्लेशौ भृशं वारयतिमारुतम् ॥
तत्र वास्थापनं कार्य्यं शोधनोयेन वस्तिना ।
अन्वासनञ्च स्नेहेन शोधनीयेन शस्यते ॥
अहोरात्रादपि स्नेहः प्रत्यागच्छेन्न दुष्यति ।
कुर्य्यादस्तिगुणांश्चापि जीर्णेस्वल्पगुणो भवेत् ॥
यस्य नोपद्रवं कुर्य्यात् स्नेहवस्तिरनिःसृतः ।
सर्वोऽल्पो वाहतो रौक्ष्यादुपेक्ष्यः स विजानता ॥
अनायातं त्वहोरात्रात् स्नेहं संशोधनैर्जयेत् ।
स्नेहवस्त्यावनायाते नान्यः स्नेहो विधीयते ॥

त्रयोदशोऽध्यायः ।

अथोत्तरवस्तिविधिः ।

वक्ष्ये रुक्षरसंस्नस्य विधिं वक्ष्याम्यतःपरम् ।
चतुर्भागाङ्गुलं नेत्रमातुराङ्गुलसम्मितम् ॥

मालतीपुष्पसङ्काशं छिद्रं सर्षपनिर्गमम् ।
मेढ्रायामसमं केचिदिच्छन्ति खलु तद्विदः ॥
पञ्चविंशतिवर्षाणामधो मात्रा द्विकार्षिकी ।
तदूर्ध्वं पलमात्रा च स्नेहस्योक्ता भिषग्वरैः ॥
निविष्टकर्णिकं मध्ये नारीणां चतुरङ्गुले ।
मूत्रस्रोतः परीणाहं सुश्लक्ष्णाहिदशाङ्गुलम् ॥
तासामपत्यमार्गे तु निदध्याच्चतुरङ्गुलम् ।
द्व्यङ्गुलं मूत्रमार्गे तु कन्यानान्त्वेकमङ्गुलम् ॥
औरभ्रः शौकरो वापि वस्तिराजश्च पूजितः ।
तदलाभे प्रयुञ्जीत गलचर्म्म तु पक्षिणाम् ॥
योनिमार्गेषु नारीणां स्नेहमात्रा द्विपालिकी ।
मूत्रमार्गे पलोन्मानं बालानाञ्च द्विकार्षिकी ॥
अथातुरमुपस्निग्धं सुस्विन्नं प्रथिताशयम् ।
यवागूं सघृतक्षीरां पीतवन्तं यथाबलम् ॥
निषण्णमाजानुसमे पीठे स्थानाशये समे ।
स्नेहाक्तवस्तिमूर्द्धानं तैलेनोष्णेन मानवम् ॥
ततः समं स्थापयित्वा नाभिमस्य प्रहर्षितम् ।
पूर्वं श्लोकयान्वित्य ततो नेत्रमनन्तरम् ॥
अनैरनैर्दृताभ्यक्तं विदध्यादङ्गुलानि षट् ।
ततोऽवपीड्येद्वस्तिं अनैर्नेत्रञ्च निर्हरेत् ॥
ततः प्रत्यागतस्नेहमपराह्णे विचक्षणः ।
भोजयेत्पयसा मात्रां यूषेणाथ रसेन वा ॥
अनेन विधिना दद्याद्वस्तीन्त्रींश्चतुरोऽपिवा ।
ऊर्द्धजान्वै स्त्रियै दद्यादुत्तानायै विचक्षणः ॥

अप्रत्यागच्छति भिषग्वस्तावुत्तरसंज्ञिते ।
भूयो वस्तिं निदध्यात्तु संयुक्तं शोधनैर्गणे. ॥
फलवर्त्तिं निदध्याद्वा शोधनद्रव्यसंभृताम् ।
प्रवेशयेद्वा मतिमान् वस्तिद्वारमथैषिणीम् ॥
पीडयेद्वाप्यधोनाभेर्बलेनोत्तरमुष्टिना ।
आरग्वधस्य पत्रेषु निर्गुण्डाः स्वरसेषु च ॥
कुर्य्याद्गोमूत्रपिष्टेषु वर्त्तीर्वापि ससैन्धवा' ।
मुद्गैलासर्षपसमाः प्रविभज्य वयांसि तु ॥
वस्तेरागमनार्थाय ता निदध्याच्छलाकया ।
अगारधूमवृहतीपिप्पलीफलसैन्धवैः ॥
कृता वा शुक्तगोमूत्रसुरापिष्टैः सनागरैः ।
अनुवासनसिद्धिञ्च वीक्ष्य कर्म्म प्रयोजयेत् ॥
शर्करामधुमिश्रेण शीतेन मधुकाम्बुना ।
दह्यमाने तथा वस्तौ दद्याद्वस्तिं विचक्षणः ।
क्षीरवृक्षकषायेण पयसा शीतलेन च ॥

शुक्रं दुष्टं शोणितं चाङ्गनानां
प्लुष्योद्रेकं तस्य नाशञ्च कृत्स्नम् ।
मूत्राघातान्मूत्रदोषान् प्रवृद्धान्
योनिव्याधिं सन्थितिं चापराधाः ॥
शुक्रोल्लेकं शर्करामश्मरीञ्च
शूलं वस्तौ वङ्क्षणे मेहने च ।
घोरानन्यान् वस्तिजांश्चापि रोगान्
हित्वा मेहानुत्तरो हन्ति वस्तिः ॥

सम्यग्दत्तस्य लिङ्गानि व्यापदः क्रम एव च ।

वस्तेरुत्तरसङ्गस्य समानं स्नेहवस्तिना ॥

फलवर्त्तिविधिः ।

घृताभ्यक्ते गुदे क्षिप्ता श्लक्ष्णा खाङ्गुष्ठसन्निभा ।
मलप्रवर्त्तिनी वर्त्तिः फलवर्त्तिश्च सा स्मृता ॥

चतुर्थोऽध्यायः

अथातो निरूढोपक्रमचिकित्सितं व्याख्यास्यामः ।

अथानुवासितमाश्वापयेत् स्वभ्यक्तस्विन्नशरीरमुत्सृष्टवर्चिर्वेगमप्रवाते शुचौ वेश्मनि मध्याह्ने प्रततायां शय्यायामधः सुपरिग्रहायां श्रोणिप्रदेशव्यूढायामनुपधानायां वामपार्श्वशायिनमाकुञ्चितदक्षिणसक्थिमितरप्रसारितसक्थिं सुमनसं जीर्णान्नं वाग्यतं सुनिषण्णदेहं विदित्वा ततो वामपादस्योपरिनेतं कृत्वेतरपादाङ्गुष्ठाङ्गुलिभ्यां कर्णिकामुपरि निष्पीड्य सव्यपार्ष्णिकनिष्ठिकानामिकाभ्यां वस्तेर्मुखार्द्धं सङ्कोच्य मध्यमप्रदेशिन्यङ्गुष्ठैर्वर्त्मन्तु विवृताक्षं कृत्वा वस्तावौषधं प्रक्षिप्य दक्षिणहस्ताङ्गुष्ठप्रदेशिनीभ्यां चानुसिक्तमनायतमबुद्बुदमसङ्कुचितमवातमौषधासन्नमुपसंगृह्य पुनरितरेण गृहीत्वा दक्षिणेनावसिञ्चेत्ततः सूत्रे णैवौषधान्ते द्विस्त्रिर्वावेष्य बध्नीयात् । अथ दक्षिणेनोत्तानेन पाणिना वस्तिं गृहीत्वा

वामहस्तमध्यमाङ्गुलिप्रदेशिनीभ्यां नेत्रमुपसंगृह्याङ्गुष्ठेन नेत्रद्वारं पिधाय घृताभ्यक्ताग्रनेत्रं घृताक्तगुदाय प्रयच्छेदनुपृष्ठवंशं समसुन्मुखमाकर्षिकं नेत्रं प्रक्षिपत्स्नेहि ब्रूयात्।

वस्तिं मध्ये करे कृत्वा दक्षिणेनावपीडयेत्।
एकेनैवावपीडेन न द्रुत न विलम्बितम्॥

ततो नेत्रमपनीय क्षिप्रमाचाः पीड़नकालादुपेक्ष्योत्तिष्ठेत्यातुरं ब्रूयात्। आतुरमुपवेशयेदुत्कटुकं वस्त्यागमनार्थं निरूहप्रत्यागमनकालस्तु मुहूर्त्तो भवति॥

निरूहस्य प्रमाणन्तु प्रस्थं पादोत्तरं परम्।
मध्यमं प्रस्थमुद्दिष्टं हीनञ्च कुडवास्त्रयः॥

अनेन विधिना वस्तिं दद्याद्वस्तिविशारदः।
द्वितीय वा तृतीयं वा चतुर्थं वा यथार्हतः॥
व्यङ्निरूढलिङ्गे तु प्राप्ते वस्तिं निवारयेत्।
अपि हीनक्रमं कुर्य्यान्न तु कुर्य्यादतिक्रमम्॥
विशेषात्कुमाराणां हीन एव क्रमो हितः।
यस्य स्याद्वस्तिरत्यल्पवेगो हीनमलानिलः॥
दुर्निरूढः स विज्ञेयो मूर्च्छार्त्यरुचिजाड्यवान्।
यान्ये व प्राक् प्रयुक्तानि लिङ्गान्यतिविरेचिते॥
तान्ये वातिनिरूढेऽपि विज्ञेयानि विपश्चिता।
यस्य क्रमेण गच्छन्ति विट्पित्तकफवायवः॥
लाघवं चोपजायते सुनिरूढं तमादिशेत्॥

सुनिरूढं ततो जन्तुं स्नानवन्तं तु भोजयेत्।
पित्तश्लेष्मानिलाविष्टं क्षीरयूषरसैः क्रमात्॥

स्वैं वा जाङ्गलरसैर्भोजयेद्विकारिभिः ।
त्रिभागहीनमर्द्धं वा हीनमात्रमथापिवा ॥
यथाग्निदोष मार्चेयं भोजनस्य विधीयते ।
अनन्तर ततो युञ्ज्यात्स्थाप्यं स्नेहवस्तिना ॥
विविक्तता मनस्तुष्टिः स्निग्धता व्याधिनिग्रहः ।
आस्थापनस्नेहवस्त्योः सम्यग्दाने तु लक्षणम् ॥
तदहस्तस्य पवनाङ्गयं बलवदिष्यते ।
रसौदनस्तेन शस्तस्तदहश्चानुवासनम् ॥
यश्चाग्निबलं मत्वा पवनस्य च चेष्टितम् ।
अन्नोपस्तम्भिते कोष्ठे स्नेहवस्तिर्विधीयते ॥
अनागतं मुहूर्त्तात्तु निरूहं शोधनैर्हरेत् ।
तीक्ष्णैर्निरूहैर्मतिमान् क्षारमूत्राम्लसंयुतैः ॥
विगुणानिलविष्टब्धं चिरं तिष्ठविरूहणम् ।
शूलार्तिज्वरानाहं मरणं वा प्रवर्त्तयेत् ॥
न तु भुक्तवते देयमास्थापनमिति स्थितिः ।
विसूचिकां वा जनयेच्छर्द्दिं वापि सुदारुणाम् ॥
कोपयेत्सर्वदोषान् वा तस्माद्यादभोजिते ।
जीर्णान्नस्याशये दोषाः पुंसः प्रत्यक्तिमागताः ॥
निःशेषाः सुखमायान्ति भोजनेनाप्रपीडिताः ।
न वास्थापनविच्छिन्नमन्नमग्निः प्रधावति ॥
तस्मादास्थापनं देयं निराहाराय जानता ।
आवस्थिकं क्रमञ्चापि मत्वा कार्य्यं निरूहणम् ॥
मलेऽपक्वे दोषाणां बलवत्त्वं न विद्यते ॥
क्षारक्षीराणि मूत्राणि स्नेहाः क्वाथा रसास्तथा ।

लवणानि फलक्षौद्रं शताह्वा सर्षपं वचा ॥
कला त्रिकटुकं राम्ना सरलं देवदारु च।
रजनी मधुकं हिङ्गु कुष्ठं संशोधनानि च ॥
कटुका शर्करा मुस्तमुशीरं चन्दनं शटी।
मञ्जिष्ठा मदनं चण्डा त्रायमाणा रसाञ्जनम् ॥
बिल्वमध्यं यमानी च फलिनी शतुजा यवाः।
काकोली क्षीरकाकोली जीवकर्षभकावुभौ ॥
तथा मेदा महामेदा ऋद्धिर्वृद्धिर्मधूलिका।
निरूहेषु यथालाभमेष वर्गो विधीयते ॥

पञ्चदशोऽध्यायः।

अत ऊर्द्धं द्वादशप्रसृतान् वक्ष्यामः।
दध्यादौ सैन्धवस्याहं मधुनः प्रसृतिद्वयम्।
विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रसृतित्रयम् ॥
एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत्।
संमूर्च्छिते कषायन्तु चतुःप्रसृतिसम्मितम् ॥
वितरेच्च तदावापमन्ते द्विप्रसृतोन्मितम्।
एवं प्रकल्पितो वस्तिर्द्वादशप्रसृतो भवेत् ॥
ज्येष्ठायाः खलु मात्रायाः प्रमाणमिदमीरितम्।
अपकर्षे भिषक्कुर्य्यात्तदर्द्धप्रसृतिह्रापनम् ॥
यथावयो निरूहाणां कल्पनेयमुदाहृता।

सैन्धवादिद्रवाक्तानां सिद्धिकामैर्भिषग्वरैः ॥
वाते चतुष्पलं क्षौद्रं दद्यात् स्नेहस्य षट्पलम् ।
पित्ते चतुष्पलं क्षौद्रं स्नेहं दद्यात्पलत्रयम् ॥
कफे तु षट्पलं क्षौद्रं क्षिपेत् स्नेहं चतुष्पलम् ॥

अत ऊर्द्धं प्रवक्ष्यन्ते वस्तयोऽत्र विभागशः ।
यथादोष प्रयुक्ता ये हन्युर्नानाविधान् गदान् ॥
शम्याकोरुवुर्वाभू वाजिगन्धा निशाच्छदैः ।
पञ्चमूलो बला रास्ना गुडूची सुरदारुभिः ॥
क्वथितै. पलिकैरिभर्मदनाष्टकसंयुतैः ।
कल्कैर्भागधिकाभोदहवुषामिसिसैन्धवैः ॥
वत्साक्षयप्रियङ्गूग्रायष्याह्वयरसाञ्जनैः ।
दद्यादास्थापनं कौणं क्षौद्राद्यैरभिसंस्कृतम् ॥
पृष्ठोरुविकशूलाश्मविण्मूत्रानिलसङ्गिनाम् ।
ग्रहणीमारुतार्शोघ्न रक्तमांसबलप्रदम् ॥

गुडूचीत्रिफलारास्नादशमूलबलापलैः ।
क्वथितैः श्लक्ष्णपिष्टैस्तु प्रियङ्गुक्षनसैन्धवैः ॥
शतपुष्पावचाकृष्णायवानीकुष्ठविल्वजैः ।
सगुडैरक्षमात्रैस्तु मदनार्द्धपलान्वितैः ॥
क्षौद्रतैलघृतक्षीरशुक्तकाञ्जिकमस्तुभिः ।
समालोड्य च मूत्रैस्तु दद्यादास्थापनं परम् ॥
तेजोवर्णबलोत्साहवीर्य्याग्निप्राणवर्द्धनम् ।
सर्वमारुतरोगघ्नं वयःस्थापनमुत्तमम् ॥

कुशादिपञ्चमूलाब्दत्रिफलोत्पलवासकैः ।
शारिवोशीरमञ्जिष्ठारास्नारेणुपरूषकैः ॥

पलिकैः क्षौद्रितैः सम्यग् द्रव्यैरभिस पेषितैः ।
शृङ्गाटकात्मगुप्ते भक्केसरागुरुचन्दनैः ॥
विदारीमिसिमञ्जिष्ठाश्यामेन्द्रयवसिन्धुजैः ।
फलपद्मकयष्ट्याह्वैः क्षौद्रक्षीरघृताप्लुतैः ॥
दत्तमाक्षापनं शीतमक्षहीनैस्तथा द्रवैः ।
दाहासृग्दरपित्तासृक्पित्तगुल्मज्वरान् जयेत् ॥
रोध्रचन्दनमञ्जिष्ठारास्नानन्तावलर्द्धिभिः ।
सारिवाद्वयकाश्मर्य्यमेदामधुकपद्मकैः ॥
स्थिरादिदृणमूलैश्च क्वाथ्यैः क्वथ्यैर्योन्यिते ।
पिष्टैर्जीवकर्षभकाकोलीयुगर्द्धिमधुकोत्पलैः ॥
प्रपौण्डरीकजीवन्तीमेदारेणुपरूषकैः ।
अभीरुमिसिसिन्धूत्थवल्लकोशीरपद्मकैः ॥
कसेरुशर्करायुक्तैः सर्पिर्मधुपयप्लुतैः ।
द्रवैस्तीक्ष्णास्रवर्ज्यैश्च दत्तो वस्तिः सुशीतलः ॥
गुल्मासृग्दरहृत्पाण्डुरोगान् सविषमज्वरान् ।
असृक्पित्तातिसारौ च हन्यात्पित्तकृतान् गदान् ॥
भद्रानिम्बकुलत्थार्कक्षीरातिबलासुतामरैः ।
सारिवाद्वहतीपाठामूर्वारग्वधवल्लकैः ॥
क्वाथः कल्कस्तु कर्त्तव्यो बलामदनसर्षपैः ।
सैन्धवामरकुष्ठैलापिप्पलीविल्वनागरैः ॥
कटुतैलमधुक्षारमूत्रतैलाम्बुसंयुतैः ।
क्वाथ्यैर्माक्षापनं तूर्णं कामलापाण्डुमेहिनाम् ॥
मेदस्विनामनग्नीनां कफरोगाग्निदूषिणाम् ।
गलगण्डार्बुदग्लानिश्लीपदोदररोगिणाम् ॥

दशमूलीनिशाबिल्वपटोलत्रिफलामवैः ।
क्वथितैः कल्कपिष्टैस्तु मुस्तसैन्धवदारुभिः ॥
पाठामागधिकेन्द्राह्वैस्तैलक्षारमधुप्लुतैः ।
कुर्य्यादास्थापनं सम्यग्मुत्राम्लफलयोजितम् ॥
कफपाण्डुमदालस्यमूत्रमारुतसङ्गिनाम् ।
आमाटोपापचीश्लेष्मगुल्मक्रिमिविकारिणाम् ॥
हयाश्मभेदवर्षाभूधान्यगन्धर्वहस्तकैः ।
दशमूलबलामूर्वायवकोलनिशाच्छदैः ॥
कुलत्थबिल्वभूनिम्बैः क्वथितैः पलसम्मितैः ।
कल्कैर्मदनयष्ट्याह्वषड्ग्रन्थामरसर्षपैः ॥
पिप्पलीमूलसिन्धूत्थयमानीमिसिवत्सकैः ।
क्षौद्रेक्षुक्षीरगोमूत्रसर्पिस्तैलरसप्लुतैः ॥
तूर्णमास्थापनं कार्य्यं संस्रष्टबहुरोगिणाम् ।
गृध्रसीग्रहकाष्ठोलातूणागुल्मगदापहम् ॥
रास्नारग्वधवर्षाभूकटुकोष्णीरवारिदैः ।
त्रायमाणामृतारक्ता पञ्चमूल विभीतकैः ॥
सबलैः पालिकैः क्वाथः कल्कस्तु मदनान्वितैः ।
यष्ट्याह्वमिसिसिन्धूत्थफलिनीन्द्रयवाह्वयैः ॥
रसाञ्जनरसक्षौद्रद्राक्षासौवीरसंयुतैः ।
युक्तो वस्तिः सुखोष्णोऽयं मांसशुक्रबलौजसाम् ॥
आयुषोऽग्नेश्च संस्कर्त्ता हन्ति चाशु गदानिमान् ।
गुल्मास्रग्दरवीसर्पमूत्रकृच्छ्रव्रणव्रजान् ॥
विषमज्वरमर्शांसि ग्रहणीं वातकुण्डलीम् ।
जानुजङ्घाशिरोवस्तिपार्श्वोदावर्त्तमारुतान् ॥

वातासृक्क्यर्कराष्ठीलाकुक्षिशूलोदरारुचीः ।
रक्तपित्तकफोन्मादप्रमेहाधानहृद्ग्रहान् ॥

वाताघ्नौषधनिःक्वाथाः सैन्धवक्षितायुताः ।
स्नास्नाः सुखोष्णा योज्याः स्युर्वस्तयः कुपितेऽनिले ॥
न्यग्रोधादिगणक्वाथाः काकोल्यादिसमायुताः ।
विधेया वस्तयः पित्ते मधुपिप्पलीसशर्कराः ॥
आरग्वधादिनिःक्वाथाः पिप्पल्यादिसमायुताः ।
सक्षौद्रमूत्रा देयाः स्युर्वस्तयः कुपिते कफे ॥
शर्करेक्षुरसक्षीरघृतयुक्ताः सुशीतलाः ।
क्षीरवृक्षकषायाढ्या वस्तयः शोणिते हिताः ॥

शोधनद्रव्यनिःक्वाथास्तत्कल्कक्षैद्रसैन्धवैः ।
युक्ताः खजेन मथिता वस्तयः शोधनाः स्मृताः ॥

त्रिफलाक्वाथगोमूत्रक्षौद्रक्षारसमायुताः ।
यवकादिप्रतीवापावस्तयो लेखनाः स्मृताः ॥

बृंहणद्रव्यनिःक्वाथाः कल्कैर्मधुरकैर्युताः ।
सर्पिर्मांसरसोपेता वस्तयो बृंहणाः स्मृताः ॥

वटकाण्डोवटाक्वाथाः सक्षीरघृतशर्कराः ।
आम्रगुप्ताफलावापाः स्मृता वालोकरा नृणाम् ॥

विदार्यैरावतीशेलुशाल्मलीधन्वनाङ्कुराः ।
क्षीरसिद्धाः क्षौद्रयुताः स्नास्ताः पिच्छिलसंज्ञिताः ॥
वाराहमाहिषीरभ्रवेडालैणेयकौकुटम् ।
सद्यस्कमसृगण्डं वा देयं पिच्छिलवस्तिषु ॥

प्रियङ्ग्वादिगणक्वाथा मज्जकाद्येन संयुताः ।
सक्षौद्राः सघृताश्चैव ग्राहिण्यो वस्तयः स्मृताः ॥

एतेष्वेव च योगेषु स्नेहाः सिद्धाः पृथक् पृथक् ।
समस्तेष्वथवा सम्यग्विधेया स्नेहवस्तयः ॥
नरस्योत्तमसत्त्वस्य तीक्ष्णं वस्तिं निषापयेत् ।
मध्यमं मध्यसत्त्वस्य विपरीतस्य वै मृदुम् ॥
एवं काल बलं दोषं विकारञ्च विकारवित् ।
वस्तिद्रव्यबलं चैव वीक्ष्य वस्तीन् प्रयोजयेत् ॥
दद्यादुत्क्लेशनं पूर्वं मध्ये दोषहरं पुनः ।
पश्चात्समनीयञ्च दद्याद्वस्तिं विचक्षणः ॥
एरण्डबीजं मधुकं पिप्पली सैन्धवं वचा ।
स्नुषाफलकल्कश्च वस्तिरुत्क्लेशनः स्मृतः ॥
शताह्वा मधुकं बिल्वं कोटजं फलमेव च ।
सक्षाद्धिकः सगोमूत्रो वस्तिर्दोषहरः स्मृतः ॥
प्रियङ्गु मधुकं मुस्ता तथैव च रसाञ्जनम् ।
सक्षीरः शस्यते वस्तिर्दोषाणां शमनः परः ॥

षोड़शोऽध्यायः ।

कृपाणां तक्ष्णमानानां तथा सुमहतामपि ।
नारीणां सुकुमाराणा शिशुस्थविरयोरपि ॥
दोषनिर्हरणार्थाय बलवर्णोदयाय च ।
समासेनोपदेक्ष्यामि विधान माधुतैलिकम् ॥
यानस्त्रीभोज्यपानेषु नियमस्त्रात्र नोच्यते ।
फलञ्च विपुलं दृष्टं व्यापदाञ्चाप्यसम्भवः ॥
योज्यस्त्वतः सुखेनैव निरूहक्रममिच्छता ।
यदेच्छति तदेवैष प्रयोक्तव्यो विपश्चिता ॥
एरण्डक्वाथतुल्यांशं मधु तैलं पलाष्टकम् ।
शतपुष्पापलार्द्धेन सैन्धवार्द्धेन संयुतम् ॥
माधुतैलिकसंज्ञोऽय वस्तिर्दोषविलोडितः ।
मेदोगुल्मक्रिमिप्लीहमलोदावर्त्तनाशनः ॥
एरण्डमूलनिःक्वाथो मधु तैल ससैन्धवम् ।
एष युक्तरथो वस्तिः सवचापिप्पलीफलः ॥
पञ्चमूलस्य नि क्वाथैस्तैलं मागधिका मधु ।
ससैन्धवः सयष्ट्याह्वः सिद्धवस्तिरिति स्मृतः ॥
क्षौद्राज्यक्षीरतैलानां प्रस्थं प्रस्थं भवेत् ।
वृषासैन्धवाच्चांशो वस्तिः स्याद्दीपनः परः ॥
मुस्तापाठामृतातिक्तावलारास्नापुनर्नवाः ।
मञ्जिष्ठारग्वधोशीरत्रायमाणाख्यगोक्षुरान् ॥
पालिकान् पञ्चमूलाख्यसहितान् मदनाष्टकम् ।
जलाढ़के पचेत् क्वाथं पादशेषं पुनः पचेत् ॥

क्षीरप्रस्थेन संयुक्तं क्षीरशेषं परिस्रुतम् ।
पादेन जाङ्गलरसस्तया मधु घृतं समम् ॥
शताह्वाफलिनीयष्टीवल्लकैः सरसाञ्जनैः ।
कार्षिकैः सैन्धवयुतैः कल्कैर्वस्तिः प्रयोजितः ॥
वाताष्ठग्मेढ्रगोफार्शोगुल्ममूत्रविबन्धनुत् ।
विसर्पज्वरविड्भङ्गरक्तपित्तविनाशनः ॥
बल्यः सञ्जीवनो हृद्यश्चक्षुष्यः शूलनाशनः ।
स्थापनानामयं राजा वस्तिर्मेस्तादिको मतः ॥
अवेक्ष्य भेषजं बुद्ध्या विकारञ्च विकारवित् ।
वीजेनानेन मतिमान् कुर्य्याद्वस्तिशतान्यपि ॥
स्नानमुष्णोदकैः कुर्य्यादिवास्वप्नमजीर्णताम् ।
वर्जयेदपरं सर्वमाचरेत् स्नेहवस्तिवत् ॥
यस्माच्चधु च तैलञ्च प्राधान्येन प्रदीयते ।
माधुतैलिक इत्येवं भिषग्भिर्वस्तिरुच्यते ॥
बलोपचयवर्णानां यस्माद्व्याधिशतस्य च ।
भवत्येतेन सिद्धिस्तु सिद्धवस्तिरतो मतः ॥
सुखिनामल्पदोषाणां नित्यं स्निग्धाश्च ये नराः ।
मृदुकोष्ठाश्च ये तेषां विधेया माधुतैलिकाः ॥
मृदुत्वात्पादहीनत्वादक्लृप्तस्नेहविधिसेवनात् ।
एकवस्तिप्रदानाच्च सिद्धवस्तिष्वयत्नणा ॥
यस्यौषधस्य या मात्रा सेवने परिकीर्त्तिता ।
ततः पञ्चगुणं मानं वस्तिकर्म्मणि मन्यतम् ॥
सेवितं यान् गुणान् कुर्य्यान्मुखमार्गेण भेषजम् ।
वस्तिप्रयोजितञ्चात: कुर्य्यादीनतरान् यतः ॥

धुस्तूरमहिफेनञ्च यदन्यच्चदकारि च ।
सक्तद्विर्वाप्यविहितो बहुशो न प्रयोजयेत् ॥
यः सम्यग्हीनशक्तित्वात्तं ज्ञात्वोपादधापिवा
भोक्तुं किञ्चिन्न शक्नोति गुटमार्गेण योजयेत् ॥
वस्तियोगात्यलरसं क्षीरं यूषादिकं तथा ।
यतो जीवत्यनेनापि प्राप्याहारगुणं नरः ॥

सप्तदशोऽध्यायः ।

अथातो नेत्रवर्त्मव्यापच्चिकित्सितं
व्याख्यास्यामः ।

अथ नेत्रे विचलिते तथा चैव विवर्त्तिते ।
गुदे क्षतं रुजा वा स्यात्तत्र सद्यः क्षतक्रिया ॥
अत्युत्क्लिष्टेऽवसन्ने च नेत्रे पायौ भवेद्रुजा ।
विधिरत्रापि पित्तघ्न कार्यः स्नेहैश्च सेचनम् ॥
तिर्य्यक् प्रणिहिते नेत्रे तथा पार्श्वावपीड़िते ।
सुखस्यावरणाद्दस्तिर्न सम्यक् प्रतिपद्यते ॥
ऋजु नेत्रं विधेय स्यात्तत्र सम्यग्विजानता ।
अतिस्थूले कर्कशे च नेत्रे चावनते तथा ॥
गुदे भवेत् क्षत रुक् च साधनं पूर्ववत् स्मृतम् ॥
आसन्नकर्णिके नेत्रे भिन्नेऽक्ष्णो वाप्यपार्श्वकः ।
अवसेकी भवेद्दस्ते रूक्षाद्दीषान् विवर्जयेत् ॥

प्रकृष्टकर्णिके रक्तं गुदमर्म्मप्रपीड़नात् ।
करत्वचापि पित्तघ्नो विधिर्वस्तिश्च पिच्छिलः ॥
श्लेष्मे त्वणुस्रोतसि च क्लेशो वस्तिश्च पूर्ववत् ।
प्रत्यागच्छन्तमुर्य्याद्रोगान् वस्तिविघातजान् ॥
दीर्घे महास्रोतसि च क्षेयमल्पवपीड़वत् ॥
प्रकीर्णे बहले चापि वस्तौ दुर्बद्धदोषवत् ।
बस्तावल्पे ऽल्पता वापि द्रव्यस्याल्पगुणा मताः ॥
दुर्बद्धे चाणुभिद्धे च विड्डेयं भिन्ननेत्रवत् ॥
अतिप्रपीड़ितो वस्तिः प्रयात्यामाशयं ततः ।
वातेरितो नासिकाभ्यां मुखतो वा प्रपद्यते ॥
तच्च तूर्णं प्रक्षापीउं कुर्य्याच्चाप्यवधूननम् ।
शिरःकायविरेकौ च तीक्ष्णौ सेकांश्च शीतलान् ॥
अनैः प्रपीड़ितो वस्तिः पक्वाधानं न गच्छति ।
न च सम्यगवयवांस्तस्माद्भृशं प्रपीड़येत् ॥
भूयोभूयोऽवपीउेन वायुरन्तः प्रपीड़्यते ।
तेनाध्मानं रुजस्तीव्रा यथास्वं तत्र वस्तयः ॥
कालातिक्रमणात् क्लेशो व्याधिश्चापि प्रवर्द्धते ।
तत्र व्याधिबलज्ञस्तु भूयो वस्तिं निधापयेत् ॥
गुदोपदेहशोफौ तु स्नेहोऽपक्वः करोति हि ।
तत्र संशोधनो वस्तिर्हितं चापि विरेचनम् ॥
हीनमात्रावुभौ वस्ती नातिकार्य्यकरौ मतौ ।
अतिमात्रौ तथानाहरुक्मातीसारकारकौ ॥
मूर्च्छां दाहमतीसारं पित्तं चात्युष्णतीक्ष्णकौ ।
मृदुशीतावुभौ वातविबन्धाध्मानकारकौ ॥

तत्र हीनादिषु हितः प्रत्यनीक क्रियाविधिः ॥
तत्र मान्द्रे तनुं वस्तिं तनौ मान्द्रञ्च दापयेत् ।
स्निग्धोऽतिजाड्यक्लदूच' स्तम्भाध्मानक्लदुच्यते ॥
वस्तिं रूक्षमतिस्निग्धे स्निग्धं रूक्षे च दापयेत् ॥
अतिपीडितदोषान् विधिं चाप्यवमीर्षके ॥
उच्छीर्षके ससुन्नाहं वस्तिः कुर्य्याच्च मेहनम् ।
तत्रोत्तरो हितो वस्तिः सुस्निग्धस्य सुखावहः ॥
न्यूनस्य वस्तिर्नाप्नोति पक्वाधानं विमार्गगः ।
हृद्दद् बाधते चाच वायुः कोष्ठमथापि च ॥
उत्तानस्याहृते मार्गे वस्तिर्नाभिः प्रपद्यते ।
नेत्रसम्बेजनस्थान्तो वायुस्थान्तः प्रकुप्यति ॥
देहे सङ्कुचिते दत्तः सक्थ्नोरप्यभयोस्तथा ।
न सम्यगनिलाविष्टो वस्तिः प्रत्येति देहिन' ॥
स्थितस्य वस्तिर्दत्तस्तु क्षिप्रमायात्यवाङ्मुखः ।
न चाशयं तर्पयति तस्मान्नार्थकरो हि स' ॥
नाप्नोति वस्तिर्दत्तस्तु क्षतस्थं पक्वाशयं पुन' ।
दक्षिणाश्रितपार्श्वस्य वामपार्श्वानगो हित' ॥
न्यूनादीनां प्रदानञ्च वस्तेर्नैव प्रशस्यते ।
पश्चान्निलकोपीऽच यथास्वं तत्र कारयेत् ॥
व्यापदः स्नेहवस्तीसु प्रोक्तास्तच चिकित्सिते ।
अयोगाद्यास्तु वक्ष्यामि व्यापदः सचिकित्सिता' ॥
अनुष्णोऽल्पौषधो हीनो वस्तिर्नैति प्रयोजितः ।
विष्टब्धाध्मानशूलैस्च तमयोगं प्रचक्षते ॥
तत्र तीक्ष्णो हितो वस्तिस्तीक्ष्णं चापि विरेचनम् ॥

सर्वेषावे तथा भुक्ते बहुदोषे च योजितः ।
अत्याग्नितस्यातिबहुर्वस्तिर्मन्दोष्ण एव च ॥
अनुष्णलवणस्नेहो ह्यतिमात्रोऽथवा पुनः ।
तथा बहुपुरीषञ्च क्षिप्रमाधापयेन्नरम् ॥
श्रोणिकटीपार्श्वपृष्ठेषु शूलं तत्रातिदारुणम् ।
तत्र तीक्ष्णतरो वस्तिर्हितं चाप्यनुवासनम् ॥

अतितीक्ष्णोष्णलवणो रूक्षो वस्तिः प्रयोजितः ।
सपित्तं कोपयेद्वायुं कुर्याच्च परिकर्त्तिकाम् ॥
नाभिवस्तिगुदं तत्र क्लिनत्तीवाति देहिनः ।
पिच्छावस्तिर्हितस्तत्र स्नेहश्च मधुरैः कृतः ॥

अत्यम्ललवणस्तीक्ष्णः परिस्रावाय कल्पते ।
दौर्ब्बल्यमङ्गसादश्च जायते तत्र देहिनः ॥
परिस्रवेत्ततः पित्तं दाहं सञ्जनयेद्भृशम् ।
पिच्छावस्तिर्हितस्तत्र वस्तिः क्षीरघृतस्य च ॥

प्रवाहिका भवेत्तीक्ष्णान्निरूहात्तानुवासनात् ।
सदाहशूलं कृच्छ्रेण वातक्लेषोपवेश्यते ॥
पिच्छावस्तिर्हितस्तत्र पयसा चापि भोजनम् ।
सर्पिर्मधुरकैः सिद्धं तैलं चाप्यनुवासनम् ॥

अतितीक्ष्णो निरूहो वा सवाते चानुवासनः ।
हृदयस्योपसरणं कुरुते पार्श्वपीड़नम् ॥
दोषैस्तत्र रजस्तास्य मदो मूर्च्छाङ्गगौरवम् ।
सर्वदोषहरं वस्तिं शोधनञ्च दापयेत् ॥

रूक्षस्य बहुवातस्य तथा दुःखयितस्य च ।
वस्तिरग्र्यहं कुर्याद्रूक्षो मृदुरनेषजः ॥

तत्राङ्गसदः प्रस्तब्धो जृम्भोद्वेष्टनवेपकाः ।
पर्वभेदश्च तत्रेष्टाः स्वेदाभ्यञ्जनवस्तयः ॥

अत्युष्णतीक्ष्णोऽतिबहुर्दत्तोऽतिस्नेहितस्य च ।
अल्पदोषस्य वा वस्तिरतियोगाय कल्पते ॥
विरेचनातियोगेन समानं तच्चिकित्सितम् ।
पिच्छावस्तिप्रयोगश्च तत्र शीतः सुखावहः ॥
अतियोगात्परं यत्र जीवादानं विरिक्तवत् ।
देयस्तत्र हितश्चापि पिच्छावस्तिः सयोगितः ॥

नवैता व्यापदो यासु निरूहं प्रत्युदाहृताः ।
स्नेहवस्तिष्वपि हि ता विज्ञेया कुशलैरिह ॥
इत्युक्ता व्यापदः सर्वाः सलक्षणचिकित्सिताः ।
भिषजा च तथा कार्यं यथैता न भवन्ति हि ॥

अष्टादशोऽध्यायः ।

नस्यग्रहणविधिः ।

नस्यं तत्कथ्यते धीरैर्नासाग्राह्यं यदौषधम् ।
नावनं नस्यकर्मेति तस्य नामद्वयं मतम् ॥
नस्यभेदो द्विधा प्रोक्तो रेचनं स्नेहनं तथा ।
रेचनं कर्षणं प्रोक्तं स्नेहनं बृंहणं मतम् ।
कफपित्तानिलघ्नं स्यात् पूर्वमध्यापराह्णके ॥
दिनस्य यच्छते नस्यं रात्रावप्युत्कटे गदे ॥

नस्यं त्यजेद्भोजनान्ते दुर्दिने चोपतर्पितः ।
तथा नवप्रतिश्यायी गर्भिणी ज्वरदूषितः ॥
अजीर्णी दत्तबस्तिश्च पीतस्नेहोदकासवः ।
क्रुद्धः शोकाभिभूतश्च क्षुधार्त्तो बृहबालकौ ॥
वेगावरोधो श्रान्तश्च स्नातुकामश्च वर्ज्जयेत् ॥
अष्टवर्षस्य बालस्य नस्यकर्म्म समाचरेत् ।
अशीतिवर्षादूर्द्ध्वञ्च नावनं नैव दीयते ॥

अथ वैरेचनं नस्यं ग्राह्यं तैले सुतीक्ष्णकैः ।
तीक्ष्णभेषजसिद्धेर्वा स्नेहै क्षाद्यैरसैस्तथा ॥
नासिकारन्ध्रयोरष्टौ षट् चत्वारश्च बिन्दवः ।
प्रत्येकं रेचनं योग्यं मुख्यमध्याल्पमात्रया ॥
नस्यकर्म्मणि दातव्यं शाणैकं तीक्ष्णमौषधम् ।
हिङ्गु स्याद्यवमात्रन्तु माषैक सैन्धव मतम् ॥
चोरकैवाष्टगाण स्यात्यानीयञ्च विकार्षिकम् ।
कार्षिक मधुरद्रव्यं नस्यकर्म्मणि योजयेत् ॥
अवपीडः प्रधमनं द्वौ भेदावपरौ स्मृतौ ।
शिरोविरेचनस्यार्थे तौ तु देयौ यथायथम् ॥
कल्कीकृतादौषधाद्यः पीडितो निःसृतो रसः ।
सोऽवपीडः समुद्दिष्टस्तीक्ष्णद्रव्यसमुद्भवः ॥
षडङ्गुला द्विवक्त्रा या नाडी चूर्णं तया धमेत् ।
तीक्ष्णं कोलमितं वक्त्रवाते. प्रधमनं हितम् ।
ऊर्द्ध्वजत्रुगते रोगे कफजे स्वरसक्षये ।
अरोचके प्रतिश्याये शिर शूले च पीनसे ॥
शोफापस्मारकुष्ठेषु नस्यं वैरेचनं हितम् ।

भीरुस्त्रीक्षयबालानां नस्यं स्नेहेन शस्यते ॥
गलरोगे सन्निपाते निद्रायां विषमज्वरे ।
मनोविकारे कृमिषु पूज्यते चावपीडनम् ॥
अत्यन्तोत्कटदोषेषु विसंज्ञेषु च दीयते ।
चूर्णं प्रधमनं धीरैस्तद्धि तीक्ष्णतरं यतः ॥
नस्यं स्याद्वृश्चिकालीभ्यां पिप्पलीसैन्धवेन वा ।
जलपिष्टेन कर्णाक्षिनासामूर्द्धभवा गदाः ॥
मन्याहनुगलोद्भूता नश्यन्ति भुजपृष्ठजाः ।
मधूकसारकृष्णाभ्यां वचामरिचसैन्धवैः ॥
नस्यं कोष्णाम्बुना पिष्टं दद्यात्संज्ञाप्रबोधनम् ।
अपस्मारे तथोन्मादे सन्निपातेऽपतन्त्रके ॥
सैन्धवं श्वेतमरिचं सर्षपाः कुष्ठमेव च ।
वस्तमूत्रेण संपिष्टं नस्यं तन्द्रानिवारणम् ॥
रोहितस्य च पित्तेन भावितं मरिचं वचा ।
कट्फलं चेति तच्चूर्णं देयं प्रधमनं बुधैः ॥
अथ तृंहणनस्यस्य कल्पना कथ्यतेऽधुना ।
मर्शश्च प्रतिमर्शश्च द्वौ भेदौ स्नेहने मतौ ॥
मर्शस्य तर्पणी मात्रा मुख्या प्राणैः स्मृताष्टभिः ।
मध्यमा तु चतुःप्राणैर्हीना प्राणमिता मता ॥
एकैकस्मिंस्तु मात्रेयं देया नासापुटे बुधैः ।
मर्शस्य द्विस्त्रिवेलं वा वीक्ष्य दोषबलाबलम् ॥
एकान्तरं द्व्यन्तरं वा नस्यं दद्यादिचक्षणः ।
त्र्यहं पञ्चाहमथवा सप्ताहं वा सुयन्त्रितः ॥
मर्शे शिरोविरेके च व्यापदो विविधाः स्मृताः ।

दोषोत्क्लेशात् क्षयाच्चैव विज्ञेयास्तां यथाक्रमम् ॥
दोषोत्क्लेशनिमित्तासु युञ्जीताद्यमनशोधनम् ।
अथ क्षयनिमित्तासु यथास्वं हृंहणं हितम् ॥
शिरोनासाक्षिरोगेषु सूर्यावर्त्तार्द्धभेदके ।
दन्तरोगे बले हीने मन्यावाङ्मंजे गदे ॥
मुखशोषे कर्णनादे वातपित्तगदे तथा ।
अकालपलिते चैव केशश्मश्रुप्रपातने ॥
पूज्यते हृंहणं नस्यं स्नेहैर्वा मधुरद्रवैः ॥
सशर्करं पयःपिष्टं भृष्टमाज्येन कुङ्कुमम् ।
नस्यप्रयोगतो हन्याद्दातरक्तभवा रुजः ॥
भ्रूशङ्काक्षिशिरःकर्णसूर्यावर्त्तार्द्धभेदकान् ।
नस्यं स्यादणुतैलेन तथा नारायणेन वा ॥
भार्गादिना वा सर्पिर्भिस्तत्तद्दोषबलासाधितैः ॥

अणुतैलमुक्तं सुश्रुतेन । तद्यथा, तिलपरिपीड़नोपकरणकाष्ठान्याहृत्य यैरनल्पकालं तिलाः परिपीड़िताः स्तान्यणूनि खण्डशः कल्पयित्वा तदूखले संकुट्य कटाहे पानीयेनाप्लाव्य क्वाथयेत्ततस्तैलं निःसरति तत्तैलं हस्तेन जलान्नि सार्य्य वातघ्नौषधकल्केन पचेत् । तदणुतैलमिति तद्वातरोगहरम् ।

तैलं कफे स्याद्घृतं च केवले पवने तथा ।
दद्यान्नस्यं सदा पित्ते सर्पिर्मज्जानमेव च ॥
माषाल्गुप्तराास्नार्भिर्बलारुवुकरोहिषैः ।
कृतोऽश्वगन्धया क्वाथो हिङ्गुसैन्धवसंयुतः ॥
क्षीणो नस्यप्रयोगेण पञ्चाघातं सकर्म्मनम् ।

जयेद्दिवातवाच्च मन्यास्तम्भावबाहुकौ ॥

प्रतिमर्शस्य मात्रा तु द्विविन्दुमिता मता ।
प्रत्येकमयो नासिक्या स्नेहनेऽतिविनिश्चितम् ॥
स्नेहे ह्यन्यिहयं यावन्निमग्ना चोद्धृता ततः ।
तर्जनी य स्त्रवेद्विन्दुं सा मात्रा विन्दुसंज्ञिता ॥
एवंविधैर्विन्दुसंज्ञैरष्टाभिः शाण उच्यते ।
स देयो मर्शनस्येषु प्रतिमर्शो द्विविन्दुकः ॥
समयाः प्रतिमर्शस्य बुधैः प्रोक्ताश्चतुर्दश ।
प्रभाते दन्तकाष्ठान्ते गृहाद्विर्गमने तथा ॥
व्यायामाध्वव्यवायान्ते विरमूत्रान्ेऽशने कृते ।
कवलान्ते भोजनान्ते दिवास्वप्नोत्थिते तथा ॥
वमनान्ते तदा सायं प्रतिमर्शः प्रयुज्यते ।
ईषदुच्छिङ्कनात् स्नेहो यथा वक्त्रं प्रपद्यते ॥
नस्ये निषिक्तं त विद्यात्प्रतिमर्शप्रमाणतः ।
उच्छिष्टं न पिबेच्चैतन्निष्ठीवेन्मुखमागतम् ॥
क्षीणे तृष्णास्यशोषार्त्ते बाले वृद्धे च युज्यते ।
प्रतिमर्शान्न जायन्ते रोगाश्चैवोर्ध्वजत्रुजाः ॥
बलीपलितनाशश्च बलमिन्द्रियजं भवेत् ।
विभीतं निम्बगाभारी शिवा शेलुश्च काकिनी ॥
एकैकतैलनस्येन पलित नश्यति ध्रुवम् ॥

अथ नस्यविधिं वक्ष्ये नस्यग्रहणहेतवे ।
देशे वातरजोमुक्ते कृतदन्तनिघर्षणम् ॥
विशुद्धं धूमपानेन स्निग्धभालगलं तथा ।
उत्तानशायिनं किञ्चित्प्रलम्बशिरसं नरम् ॥

आस्तीर्णहस्तपादञ्च वस्त्राच्छादितलोचनम् ।
समुन्नामितनासाग्रं वैद्यो नस्येन योजयेत् ॥
कोणेनाच्छिन्नधारेण हेमतारादिशुक्तिभिः ।
शुक्त्या वा यत्र युक्त्या वा प्रोतैर्वा नस्यमाचरेत् ॥
नस्येष्वासिच्यमानेषु शिरो नैव प्रकम्पयेत् ।
न कुप्येच्च प्रभाषेत नोच्छिकेच्च हसेत्तथा ॥
एतैर्हि विहितः स्नेहो नैवान्तः सम्प्रपद्यते ।
ततः कासप्रतिश्यायशिरोऽक्षिगदसम्भवः ।
शृङ्गाटकमभिव्याप्य स्थापयेत्र गिलेद्भवम् ॥
पञ्चसप्तदशैव स्युर्मात्राः स्नेहस्य धारणे ।
उपविश्याथ निष्ठीवेन्नासावक्त्रागतं द्रवम् ॥
वामदक्षिणपार्श्वाभ्यां निष्ठीवेत्सम्मुखं न हि ।
नीते नस्ये मनस्तापं रजः क्रोधञ्च सन्त्यजेत् ॥
शयीत निद्रां लब्ध्वा च प्रोत्तानो वाक्यतं नरः ।
तथा शिरोविरिकान्ते धूमो वा कवलो हितः ॥

नस्ये त्रीण्युपदिष्टानि लक्षणानि प्रयोगतः ।
शुद्धिहीनातियोगा हि विज्ञेयाः शास्त्रचिन्तकैः ॥
लाघवं मलसंशुद्धिः स्रोतसां व्याधिसक्षयः ।
चित्तेन्द्रियप्रसादश्च शिरसः शुद्धिलक्षणम् ॥
कण्ठप्रदेहो गुरुता स्रोतसां कफसंस्रवः ।
मूर्द्धि हीनविशुद्धे तु लक्षणं परिकीर्त्तितम् ॥
मस्तुलुङ्गागमो वातहृद्विरिन्द्रियविभ्रमः ।
शून्यता शिरसश्चापि मूर्द्धि गाढ़े विरेचिते ॥
हीनातिशुद्धे शिरसि कफवातघ्नमाचरेत् ।

तत्र हीनेन नस्येन शुद्धे वातघ्नमाचरेत् ॥
सम्यग्विशुद्धे शिरसि सर्पिर्नस्येन दीयते ।
कफप्रसेकः शिरसो गुरुतेन्द्रियविभ्रमः ॥
लक्षणं तद्घृतस्निग्धे तत्र रूक्षं प्रदापयेत् ।
भोजयेच्चानभिष्यन्दि नस्ये वातिकमादिशेत् ॥

जनविंशोऽध्यायः ।

अथ धूमपानविधिः ।

धूमस्तु षड्विधः प्रोक्तः शमनो हृंहणस्तथा ।
रेचनः कासहा चैव वामनो व्रणधूपनः ॥
शमनस्य तु पर्य्यायो मध्यः प्रायोगिकस्तथा ।
हृंहणस्य च पर्य्यायो स्नेहनो मृदुरेव च ॥
रेचनस्यापि पर्य्यायो शोधनस्तीक्ष्ण एव च ।
अधूमार्हांश्च खल्वेते श्रान्तो भीतश्च दुःखितः ॥
दत्तबस्तिर्विरिक्तश्च रात्रौ जागरितस्तथा ।
पिपासितश्च दाहार्त्तस्तालुशोषी तथोदरी ॥
शिरोऽभितापी तिमिरी छर्द्यायासप्रपीड़ितः ।
क्षतोरस्कः प्रमेहार्त्तः पाण्डुरोगी च गर्भिणी ॥
रूक्षः क्षीणोऽभ्यवहृतक्षीरक्षौद्रघृतासवः ।
भुक्तान्नदधिमद्यश्च बालो वृद्धः क्लमस्तथा ॥
अकाले चातिपीतश्च धूमः कुर्य्यादुपद्रवान् ।
तत्रेष्टं सर्पिषः पानं नावनाञ्जनतर्पणम् ॥
सर्पिरिक्षुरसं द्राक्षां पयो वा शर्करान्वितम् ।
मधुराम्लौ रसौ वापि वमनाय प्रदापयेत् ॥
धूमस्तु द्वादशाद्वर्षाद्धृतेऽशीतकात्र च ।
कासश्वासप्रतिश्यायान्मन्याहनुशिरोरुजः ॥

वातघ्नैश्चाधिकारांश्च हन्याद्धूमः सुयोजितः ।
धूमोपयोगात्पुरुषः प्रसन्नेन्द्रियवाङ्मनाः ॥
दृढ़केशश्चिरजश्मश्रुः सुगन्धिवदनो भवेत् ॥

धूमनाड़ी भवेत्तत्र त्रिखण्डा च त्रिपर्विका ।
कनिष्ठिका परीणाहा राजमाषागमान्तरा ॥
धूमनाडी भवेद्दीर्घा शमने रोगिणोऽङ्गुलैः ।
चत्वारिंशन्मितैस्तद्वद्वात्रिंशद्भिर्मृदौ मता ॥
तीक्ष्णे चतुर्विंशतिभिः कासघ्ने षोडशोन्मितैः ।
दशाङ्गुलैर्वामनीये तथा स्याद्व्रणनाड़िका ॥
कलायमण्डलस्थूला कुलत्थागमरन्ध्रिका ॥

अथैषिकां प्रतिम्ले च सुश्लक्ष्णां द्वादशाङ्गुलाम्
धूमद्रव्यस्य कल्केन लेपयेदष्टाङ्गुलः स्मृतः ॥
कल्कं कर्षमितं लिप्ता छायाशुष्कञ्च कारयेत् ।
इषिकामपनीयाथ स्नेहाक्तां वर्त्तिमादरात् ॥
अङ्गारैर्दीपितां कृत्वा धृत्वा नेत्रस्य रन्ध्रके ।
वदनेन पिबेद्धूमं वदनेनैव संत्यजेत् ॥
नासिकाभ्यां ततः पीत्वा मुखेनैव वमेत्सुधीः ।
शरावसंपुटे क्षिप्ता कल्कमङ्गारदीपितम् ॥
छिद्रे नेत्रं निवेश्याथ व्रणं तेनैव धूपयेत् ।
एलादिकल्कं शमने स्निग्धं सर्ज्जरसं मृदौ ॥
रेचने तीक्ष्णकल्कञ्च स्नासघ्ने त्रुटिकोषणम् ।
वामने स्नायुचर्म्माख्यं दद्याद्धूमस्य पानकम् ॥
व्रणे निम्बवचादयश्च धूपनं संप्रशस्यते ।
अन्येऽपि धूमा गेहेषु कर्त्तव्या रोगशान्तये ॥

तथया । मयूरपिच्छं निम्बस्य पत्राणि वृहतीफलम् ।
मरिचं हिङ्गु मांसी च बीजं कार्पाससम्भवम् ॥
छागरोमाहिनिर्म्मोको विष्ठा वैड़ालिकी तथा ।
गजदन्तश्च तच्चूर्णं किञ्चिद्घृतविमिश्रितम् ॥
गेहेषु धूपनं दत्तं सर्वान् बालग्रहान् जयेत् ।
पिशाचान् राक्षसान्हत्वा सर्वज्वरहरं भवेत् ॥

इत्यपराजितो धूमः ।

अनस्तार्पं रजः क्रोधं धूमपाने निवारयेत् ।
नेत्राणि धातुजान्याशु दुर्बलत्वमादिजान्यपि ॥

विंशोऽध्यायः।

अथ गण्डूषकवलप्रतिसारणविधिः।

तत्र गण्डूषकवलप्रतिसारणानां भेदकानि लक्षणान्याह। तत्रादौ गण्डूष उच्यते।

स्नेहक्षीरकषायाद्यैः संपूर्णमाननम्।
आपूर्य्य क्षीयते तावद्विधिर्गण्डूषधारणे॥
कफपूर्णास्यता यावच्छेदो दोषस्य वामयेत्।
नेत्रघ्राणश्रुतिर्यावत्तावद्गण्डूषधारणम्॥
गण्डूषान् सुस्थितः कुर्य्यात् स्निग्धभालगलादिकः।
मनुष्यस्त्रींस्तथा पञ्च सप्त वा दोषनाशनात्॥
चतुर्विधः स्याद्गण्डूषः स्नेहनः शमनस्तथा।
शोधनो रोपणश्चैव कवलेऽपि तादृशः॥
स्निग्धोष्णैः स्नैहिको वाते स्वादुशीतैः प्रसादनः।
पित्ते कट्वम्ललवणैः क्षारैः संशोधनं कफे।
कषायतिक्तमधुरैः कटूष्णो रोपणो व्रणे॥
दद्याद्द्रवेषु चूर्णञ्च गण्डूषे कोलमात्रकम्।
कर्षप्रमाणः कल्कस्य कवले दीयते बुधैः॥
धार्य्यन्ते पञ्चमाद्यर्द्धाद्गण्डूषाः कवलादयः।
व्याधेरपचयस्तुष्टिर्वैशद्यं वक्त्रलाघवम्॥
इन्द्रियाणां प्रसादश्च गण्डूषे क्लिष्टते भवेत्।

हरेदास्यस्य वैरस्यं शोषपाकं व्रणं तृषाम् ॥
दन्तचालञ्च गण्डूषो दैन्यं तु करोति हि ॥

अथ कवलः ।

वातपित्तकफघ्नस्य द्रवस्य कवलं मुखे ।
अर्द्धं निक्षिप्य रुंचव्यं निष्ठीवेत्कवले विधिः ॥
कवलः कुरुते काङ्क्षां भक्ष्येषु हरते कफम् ।
तृष्णा शोषञ्च वैरस्यं दन्तचालञ्च नाशयेत् ॥

अथ प्रतिसारणम् ।

दन्तजिह्वामुखानां यच्चूर्णकल्कावलेहकैः ।
अनैर्घर्षणमङ्गुल्या तदुक्तं प्रतिसारणम् ॥
वैरस्यं मुखदौर्गन्ध्यं मुखशोषं तथा तृषाम् ।
अरुचिं दन्तपीडाञ्च निहन्ति प्रतिसारणम् ॥
हीने जाड्यकफोत्क्लेशावरसज्ञानमेव च ।
अतियोगान्मुखे पाकः शोषस्तृष्णा वमिः क्लमः ॥

——

एकविंशतितमोऽध्यायः ।

स्वेदविधिः ।

स्वेदस्तापोपनाहोऽद्रवमेदाश्चतुर्विधः ।
तापोऽग्नितप्तवसनफालहस्ततलादिभिः ॥
उपनाहो वचाकिण्वशताह्वादेवदारुभिः ।
धान्यैः समस्तैर्गन्धैश्च रास्नैरण्डजटामिषैः ॥
उद्दिग्धलवणैः स्निग्धचुल्लतक्रपयःप्लुतैः ।
केवले पवने स्विन्ने संसृष्टे सुरसादिभिः ॥
पित्तेन पद्मकाद्यैश्च शाल्वनाख्यैः पुनः पुनः ।
स्निग्धोष्णवीर्यैर्मृदुभिश्चर्मपट्टैरपूतिभिः ॥
अलाभे वातजित्पत्रकौशेयाविकशाटकैः ॥
बध्नं रात्रौ दिवा मुञ्चेन्मुञ्चेद्रात्रौ दिवाकृतम् ॥
उष्णा तूत्कारिकालोष्ट्रकपालोपलपांशुभिः ।
पत्रभङ्गेन धान्येन करीषसिकतातुषैः ॥
अनेकोपायसन्तप्तैः प्रयोज्या देशकालतः ॥
अथवा वातनिर्नाशि द्रव्यक्वाथरसादिभिः ।
लवणैर्घटं पूरयित्वा पार्श्वे छिद्रं विधाय च ॥
विमुख्यास्यं त्रिखण्डाच्च धातुजां काष्ठजामुत ।
षड्ङ्गुलास्यां गोपुच्छां नाडीं युञ्जाद्विहस्तिकाम् ॥
सुखोपविष्टं स्नेह्यङ्गं गुरुप्रावरणावृतम्

हस्तिशुण्डिकया नाड्या स्वेदयेद्वातरोगिणम् ॥
द्रवस्वेदस्तु वातघ्नद्रव्यक्वाथेन पूरिते ।
कटाहे कोष्ठके वापि सूपविष्टोऽवगाहयेत् ॥
सौवर्णे राजते वापि ताम्रे लौहे च दारुजे ।
कोष्ठकं तच्च कुर्वीतोच्छ्राये षड्विंशदङ्गुलम् ॥
आयामे वा तदेव स्याच्चतुष्कोणन्तु चिक्कणम् ॥

पक्षान्तरमाह ।

नाभेः षड्ङ्गुलं यावन्मग्नं क्वाथस्य धारया ।
कोष्णया स्कन्धयोः सिक्तस्तिष्ठेत् स्निग्धतनुर्नरः ॥

अयमर्थः । प्रथमतो वातघ्नद्रव्यक्वाथेन कण्ठपूरिते कोष्ठके कटाहे वा सूपविष्टस्तिष्ठेत् । अथवा नाभेः षड्ङ्गुलमूर्द्धं यावत् क्वाथे मग्न उपविष्टः । पश्चात् क्वाथस्य धारया स्कन्धयोः सिच्यमानस्तिष्ठेत् । यावत् कोष्ठकं परिपूर्णं भवतीत्यर्थः ।

तैरेव वा द्रवैः पूर्णं कुण्डं सर्वाङ्गगेऽनिले ।
अवगाह्यातुरस्तिष्ठेद्दर्भैः कुक्षादिकेषु च ॥
मुञ्चत्तैकं समारभ्य यावत् स्यात्तच्चतुष्टयम् ।
तावत्तदवगाहेत यावदारोग्यनिश्चयः ॥

द्रवस्वेदमेदं परीषेकमाह । यथा—

शिग्रुवारुणकैरण्डकरञ्जसुरसार्ज्जकात् ।
शिरीषवासावंशार्कमालतीदीर्घवृन्ततः ॥
पत्रसर्षैर्वचाद्यैश्च मासैश्चानूपवारिजैः ।
दशमूलेन च पृथक्सङ्घितैर्वा यथामलम् ॥

स्नेहवद्भिः सुराशुक्तवारिचीरादिसाधितैः ।
कुम्भीर्गलन्तीर्नाड़ीर्वा पूरयित्वा तज्ज्ञार्हितम् ॥
वस्त्रावच्छादितं गात्रं स्निग्धं स्विद्येद्यथासुखम् ॥
चौरमौर्णं वा कार्पासं तीव्रोष्णे सलिले क्षिपेत् ।
निष्काश्य सलिलं रोगभुवं संस्वेदयेद्भिषक् ॥
आध्माने चामवाते च स्वेद एष प्रशस्यते ॥
निर्वातेऽन्तर्वहिःस्निग्धो जीर्णान्नः स्वेदमाचरेत् ।
व्याधिव्याधितदेशर्तुवयोऽग्न्यवरावरम् ॥
कफार्त्तौ रूक्षणं रूक्षौ रूक्षस्निग्धं कफानिले ।
आमाशयगते वायौ कफे पक्वाशयाश्रिते ॥
रूक्षपूर्वं तथा स्नेहपूर्वं स्थानानुरोधतः ।
अल्पं बहुगुणो स्वल्पं दृङ्मूर्धहृदये न वा ॥
पित्तास्रकोपतृण्मूर्च्छाज्वराङ्गसदनभ्रमाः ।
सन्निपीड़ा ज्वरः श्यावरक्तमण्डलदर्शनम् ॥
स्वेदातियोगाच्छर्दिश्च तत्र स्तम्भनमौषधम् ।
स्वेदनं गुरुतीक्ष्णोष्णं प्रायः स्तम्भनमन्यथा ॥
प्रायस्तिक्तं कषायञ्च मधुरञ्च समासतः ॥
न स्वेदयेदतिस्थूलरूक्षदुर्बलमूर्च्छितान् ।
स्तम्भनीयक्षतक्षीणक्षाममद्यविकारिणः ॥
तिमिरोदरवीसर्पकुष्ठशोषाक्ष्यरोगिणः ।
पीतदुग्धदधिस्नेहमधून् कृतविरेचनान् ॥
भ्रष्टदग्धगुदग्लानिक्रोधशोकभयार्दितान् ।
क्षुत्तृष्णाकामलापाण्डुमेहिनः पित्तपीड़ितान् ॥
गर्भिणीं पुष्पितां सूतां मृदुरात्ययिके गदे ॥

श्वासकासप्रतिश्यायहिक्माध्मानविबन्धिषु ।
स्वरभेदानिलव्याधिस्रोतोमार्गगौरवे ॥
महत्त्वे मुष्कयोः खल्लीमाढ्यामे वातकण्टके ।
मूत्रकृच्छ्रार्बुदग्रन्थिशुक्राघाताढ्यमारुते ॥
कर्णनासाशिरःकोष्ठजङ्घापादोरुरुक्षु च ।
स्वेदं यथायथं कुर्य्यात्तद्दोषधविभागतः ॥

स्वेदो हितस्त्वनाग्नेयो वाते मेदःकफावृते ।
निर्वातं गृहमायासो गुरु प्रावरणं भयम् ।
उपनाहाहवक्रोधभूरिपानं क्षुधातपः ॥

कृत्वा तूलमयं चक्रं चोदान् कर्पूरसम्भवान् ।
निक्षिप्य तूलचक्रेण चान्येन च्छादयेद्धि तत् ॥
बध्नीयाद्वेदनाभूमिं तच्चक्रयुगलेन च ।
आमवाते विशेषेण स्वेद एष सुखावहः ॥

शीतशूलव्युपरमे स्तम्भगौरवनिग्रहे ।
दीप्तेऽग्नौ मार्दवे जाते स्वेदनादिरतिर्मता ॥

स्वेदहेतवः कोष्ठगा धातुगा वा
स्रोतोलीना ये च शाखास्थिसंस्थाः ।
दोषाः स्वेदैस्ते द्रवीकृत्य कोष्ठं
नीताः सम्यक् शुद्धिभिर्निर्हरन्ते ॥

अथ कर्णविधिः ।

स्वेदयेत्कर्णदेशन्तु किञ्चिन्नु पार्श्वशायिनः ।
मूत्रैः स्नेहैः रसैरुष्णैः श्रोत्ररन्ध्रं प्रपूरयेत् ॥
कर्णञ्च पूरितं रचेच्छतं पञ्चशतानि वा ।

सहस्रं वापि मात्राणां श्रोत्रकण्ठशिरोगदे ॥
मूत्राद्यैः पूरणं कर्णे भोजनात्प्राक् प्रशस्यते ।
तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते ॥
कर्णे शूलाकुले कोष्णं वस्तमूत्रं ससैन्धवम् ।
निषिक्तेन शाम्यन्ति शूलपाकादिका रुजः ॥
शृङ्गवेरञ्च मधुकं सैन्धवं तैलमेव च ।
कटूष्णं कर्णयोर्देयमेतत्त्याद्दिनापहम् ॥
घोतार्कपत्रमाज्येन लिप्तं वह्नौ प्रतापयेत् ।
तद्रसः स्रवणे क्षिप्तः कर्णशूलहरः परः ॥

द्वाविंशोऽध्यायः ।

अथ लेपविधिः ।

आलेपस्य तु नामानि लेपो लेपनलिम्पको ।
दोषघ्ना विषहा वर्ण्यः स च लेपस्त्रिधा मतः ॥
त्रिभागशेषचतुर्भागश्लिष्टभागोऽर्द्धाङ्गुलोन्नतः ।
आर्द्रो व्याधिहरः स स्याच्छुष्को दूषयति क्षविम् ॥

दोषघ्नो लेपो यथा–

शोथघ्नीदारुसिद्धार्थशुण्ठीशोभाञ्जनत्वचाम् ।
आरनालेन पिष्टानां प्रलेपः सर्वशोथहा ॥
शिरीषमधुयष्टी च तगरं रक्तचन्दनम् ।
एलामांसी निशायुग्मं कुष्ठं बालकमेव च ॥
इति सवर्ण्यो लेपोऽयं पञ्चमांशघृतप्लुतः ।
जलेन क्रियते सूक्ष्मैर्गात्र इति संज्ञितः ॥
विसर्पञ्च विस्फोटान् शोथदुष्टव्रणान् जयेत् ॥

विषहा लेपो यथा–

अजादुग्धतिलैर्लेपो नवनीतेन संयुतः ।
शोथमारुष्करं हन्ति लेपो वा क्षणमार्तिकः ॥

वर्ण्यो लेपो यथा–

रक्तचन्दनमञ्जिष्ठालोध्रकुष्ठप्रियङ्गवः ।

वटाङ्कुरा मसूराश्च अङ्गना मुखकान्तिदाः ॥

अथ लेपविधिर्वैद्य प्रोच्यते सुश्रुतमतः ।

आलेपश्च प्रदेहश्च द्वौ भेदौ तस्य भाषितौ ॥

चर्मार्द्रं मांसिष यद्प्रोच्यते संमितस्तयोः ।

शीतस्तनुर्विशोषी च प्रलेपः पित्तहन्मतः ॥

आर्द्रो घनस्तथोष्णः स्यात्प्रदेहः श्लेष्मवातहा ।

न रात्रौ लेपनं कुर्याच्छुष्यमाणं न धारयेत् ॥

शुष्यमाणमुपेक्षेत प्रदेहं पोड़नं प्रति ।

तमसा पिहितो ह्युष्मा लोमकूपमुखे स्थितः ॥

विना लेपेन निर्याति न रात्रौ लेपयेदतः ।

रात्रावपि प्रलेपादिव्रणे देयो विचक्षणैः ॥

अपाकिन्यतिगम्भीरे रक्तस्रे असमुद्भवे ॥

लेपो यथा–

मधुकं चन्दनं सूर्वा नलमूलञ्च पर्पटम् ।

क्षीरं बालकं पद्मं प्रलेपः पित्तशोथहृत् ॥

प्रदेहो यथा–

बीजपूरजटाहिङ्गु देवदारु महौषधम् ।

रास्नारण्डः प्रदेहोऽयं वातशोथविनाशनः ॥

क्षणापुराणपिण्याकग्निमुल्वक्षिकताग्निवाः ।

गोमूत्रपिष्टः कोष्णोऽयं प्रदेहः श्लेष्मशोथहा ॥

त्रयोविंशोऽध्यायः ।

अथ नेत्रप्रसादनकर्माणि ।

सेक आश्योतनं पिण्डी विड़ालस्तर्पणं तथा ।
पुटपाकोऽञ्जनञ्चेति ज्ञात्वा नेत्रमुपाचरेत् ॥

तत्र सेकविधिः ।

सेकस्तु सूक्ष्मधाराभिः सर्वस्मिन्नयने हितः ।
मौलितात्तस्य मर्त्यस्य प्रदेयश्चतुरङ्गुलः ॥
स सस्नेहो भवेद्वाते पित्ते रक्ते च रोपणः ।
लेखनस्तु कफे कार्य्यस्तस्य मात्रा विधीयते ॥
षड़्भिर्वाचां शतैः स्नेहे चतुर्भिश्चैव रोपणे ।
तैस्त्रिभिर्लेखने कार्य्यः सेको नेत्रप्रसादने ॥
निमेषोन्मेषणं पुंसामङ्गुल्या कोटिकाथवा ।
गुर्वक्षरोच्चारणं वा वाङ्मात्रेयं स्मृता बुधैः ॥
सेकस्तु दिवसे कार्य्यो रात्रौ चाल्पान्तिके गदे ।
एरण्डस्य दलैः पिष्टैः पक्कमाजं पयो हितम् ॥
सुखोष्णं नेत्रयोरन्तः सिक्तं वातार्त्तिनाशनम् ॥

अथाश्योतनविधिः ।

क्वाथस्तोद्रासवस्नेहविन्दूनां यत्तु पातनम् ।
द्वाङ्गुलोन्मीलिते नेत्रे प्रोक्तमाश्योतनं हितम् ॥
विन्दवोऽष्टौ लेखनेषु रोपणे दशविन्दवः ।

स्नेहे ते द्वादश प्रोक्ता: शीतले कोष्णरूपिण: ॥
उष्णे तु शीतरूपा: स्यु: सर्वत्रैवैष निश्चय: ।
वाते स्निग्धं तथा स्निग्धं पित्ते मधुरशीतलम् ॥
कफे तीक्ष्णोष्णरूक्षञ्च क्रमादाश्योतनं हितम् ।
आश्योतनानां सर्वेषां मात्रा स्याद्दाक्ष्यतोन्मिता ॥
तत: परं लोचनाभ्यां भेषजानामयोगत: ।
आश्योतनं न कर्त्तव्यं निशायां केनचित् क्वचित् ॥
तद्यथा । विल्वादिपञ्चमूलेन द्वाभ्यामेरण्डशिग्रुभि: ।
क्वाथ आश्योतने कोष्णो वाताभिष्यन्दनाशन: ॥

अथ पिण्डीविधि: ।

युक्तभेषजकल्कस्य पिण्डी च कोलमात्रया ।
वस्त्रखण्डेन सम्बद्धा नेत्रेऽभिष्यन्दनाशिनी ॥
स्निग्धोष्णा पिण्डिका वाते पित्ते सा शीतला मता ।
रूक्षोष्णा श्लेष्मणि प्रोक्ता विधिरुक्तो बुधैरयम् ॥
सा यथा । धात्रीविरचिता पित्ते शिग्रुपत्रकृता कफे ।

अथ विडालकविधि: ।

विडालको बहिर्लेपो नेत्रे पक्ष्मविवर्जित: ।
तस्य मात्रा परिज्ञेया मुखालेपविधानवत् ॥
यष्टीगैरिकसिन्धूत्थदार्वीतार्क्ष्य. समांशकै: ।
जलपिष्टैर्बहिर्लेप सर्वनेत्रामयापह: ॥

अत्र मुखालेपविधिरुच्यते यथा—

अङ्गुलस्य चतुर्थांशो मुखालेपो विधीयते ।
मध्यमस्तु त्रिभाग: स्यादुत्तमोऽर्द्धाङ्गुलो भवेत् ॥
स्थितिकालो न शुष्कत्वं शुष्को दूषयति त्वचम् ।

अथ तर्पणविधिः ।

संशुद्धदेहशिरसो जीर्णान्नस्य शुभे दिने ।
पूर्वाह्णे चापराह्णे वा कार्यमक्ष्णोश्च तर्पणम् ॥
वातातपरजोहीने वेश्मन्युत्तानशायिनः ।
आधारौ माषचूर्णेन क्लिन्नेन परिमण्डलौ ॥
समौ दृढावसंबाधौ कर्त्तव्यौ नेत्रकोषयोः ।
पूरयेद्घृतमण्डेन विलीनेन सुखोदकैः ॥
निमग्नान्यक्षिपक्ष्माणि यावत् स्युस्तावदेव हि ।
पूरयेन्मीलिते नेत्रे तत उन्मीलयेच्छनैः ॥
भिषग्भिरेष विख्यातस्तर्पणस्योदितो विधिः ।
यद्रूक्षं परिशुष्कञ्च नेत्रं कुटिलमाविलम् ॥
शीर्णपक्ष्म शिरोत्पातक्लिष्टोन्मीलनसंयुतम् ।
तिमिरार्जुनशुक्राद्यैरभिष्यन्दाधिमन्थकैः ॥
शुष्काक्षिपाकशोथाभ्यां युतं वातविपर्य्ययैः ।
तन्नैवं तर्पयेत्सम्यङ्नेत्ररोगविशारदः ॥
तर्पणं धारयेद्वर्षं रोगी वाचां शतं बुधैः ।
स्वस्थे कफे सन्धिरोगे वाचां पञ्चशतानि च ॥
षट्शतानि कफे क्षीणारोगे सप्तशतानि हि ।
दृष्टिरोगे शतान्यष्टावधिमन्थे सहस्रकम् ॥
सहस्रं वातरोगेषु धार्य्यमेव हि तर्पणम् ।
पूर्णे चापाङ्गमार्गेण स्रावयित्वाक्षि शोधयेत् ॥
स्निग्धेन यवपिष्टेन स्नेहवीर्य्येरितं ततः ।
यथास्वं धूमपानेन कफमस्य विरेचयेत् ॥
एकाहं वा त्र्यहं वापि पञ्चाहं तर्पणञ्चरेत् ।

तर्पणे लक्षणिलङ्गानि नेत्रस्यैतानि लक्षयेत् ॥
सुखसुप्तावबोधत्वं वेद्यत्वं नेत्रपाटवम् ।
निवृत्तिर्व्याधिशान्तिश्च क्रियालाघवमेव च ॥
गुर्वाविलमतिस्निग्धमश्रुकण्डूपटेहवत् ।
घर्षतोदयुतं नेत्रमतितर्पितमादिशेत् ॥
रूक्षमाविलमस्राढ्यमसह्यरूपदर्शनम् ।
व्याधिवृद्धिश्च तज्ज्ञेयं हीनतर्पितमक्षि च ॥
अनयोर्दोषबाहुल्यात्प्रयतेत चिकित्सिते ।
रूक्षस्निग्धोपचाराभ्यामेतयोः स्याक्रियाक्रिया ॥
दुर्दिनात्युष्णशीतेषु चिन्तायां संभ्रमेषु च ।
अजीर्णोपद्रवे चाक्षितर्पणं न प्रशस्यते ॥

अथ पुटपाकविधिः ।

अत ऊर्ध्वं प्रवक्ष्यामि पुटपाकप्रसाधनम् ।
द्वे बिल्वे स्निग्धमांसस्य परद्रव्यपलं मतम् ॥
द्रव्यस्य कुडवोन्मानं सर्वमेकत्र पेषयेत् ।
तदेकत्र समालोड्य पत्रैः सुपरिवेष्टितम् ॥
काश्मरीकुमुदेरण्डपद्मिनीकदलीभवैः ।
मृदावलिप्तमङ्गारैः खादिरैरवकूलयेत् ॥
कृतकाश्मन्तकैरण्डपाटलाबृषवादरैः ।
सर्जारुष्करकाष्ठैर्वा गोमयैर्वापि युक्तितः ॥
स्विन्नमुद्धृत्य निष्पीड्य रसमादाय तं नृणाम् ।
तर्पणोक्तेन विधिना यथावदवचारयेत् ॥
कनीनके निषेक्तव्यः स्वाङ्गुलमुत्तानशायिनः ।
स्नेहनीले खनेत्रे वै रोपणेति स त्रिधा ॥

हितं हि स्निग्धोऽतिरूक्षस्य स्निग्धस्य स तु लेखनं।
दृष्टेर्बलार्थमितरः पित्तासृग्व्रणवातनुत्॥
सर्पिर्मांसवसामज्जमेदःस्वादौषधैः कृतं।
स्नेहनपुटपाकः स्याद्यो हि वाक्प्रसते दृशि॥
जाङ्गलानां पक्षिणामैर्लेखनद्रव्यसंयुतैः।
कृष्णलोहरजस्ताम्रशङ्खविद्रुमसिन्धुजैः॥
समुद्रफेनकामीससौवीरोत्तमदधिमस्तुभिः।
लेखनो वाक्प्रसादं तस्य परं धारणमिष्यते॥
स्तन्यजाङ्गलमज्ज्याद्यतिरूक्षद्रव्यविपाचितः।
लेखनाच्चिगुणो ज्ञेयः पुटपाकस्तु रोपणः॥

तिरूक्षद्रव्याण्याह यथा—

निम्बासृताबुषपटोलनिदिग्धिकाभिः।
स्यात्पञ्चतिरूक्ष इति प्रथितो गणोऽयम्॥

आचरेत्तर्पणोक्तान्तु क्रियां व्यापत्तिदर्शने।
नेत्रास्यनिलमाकाशमादर्शं भास्वराणि च॥
नेत्रेत तर्पिते नेत्रे यश्च वा पुटपाकवान्।

अथाञ्जनम्।

अथ संपक्वदोषस्य प्राप्तमञ्जनमाचरेत्॥
अञ्जनं क्रियते येन तद्द्रव्यञ्चाञ्जनं मतम्।
हेमन्ते शिशिरे चैव मध्याह्ने ऽञ्जनमिष्यते॥
पूर्वाह्णे चापराह्णे वा ग्रीष्मे शरदि चेष्यते।
वर्षास्वनभ्रे नात्युष्णे वसन्ते च सदैवहि॥
अथवा सर्वदा प्रातः सायं वाञ्जनमाचरेत्।
नातिशीतोष्णवाताभ्रवेलायां तत्प्रयुज्यते॥

आन्तेऽथ दृदिते भीते पीतमद्ये नवज्वरे ।
अजीर्णे वेगघाते च नाञ्जनं संप्रयुज्यते ॥
रागोपटेही तिमिरं शूल संरम्भमेव च ।
निद्राक्षयञ्च कुरुते निषिद्धे युक्तमञ्जनम् ॥

गुटिकारसचूर्णानि विविधान्यञ्जनानि च ।
कुर्य्याच्छलाकयाङ्गुल्या हीनानि च यथोत्तरम् ॥
तत् प्रत्येकं त्रिधा प्रोक्तं लेखनं रोपणं तथा ।
स्नेहनञ्चेति लिङ्गानि तेषां विस्तरतः शृणु ॥
लेखनं चारतीक्ष्णाम्लरसैरूर्ध्वमिष्यते ।
कषायतिक्तरसयुक्तञ्च रोपणं मतम् ॥
मधुरं स्नेहसम्पन्नमञ्जनन्तु प्रसादनम् ॥

अथ वटी लेखनी यथा—

शङ्खनाभिर्विभीतस्य मज्जा पथ्या मनःशिला ।
पिप्पली मरिचं कुष्ठं वचा चेति समांशकम् ॥
छागीक्षीरेण संपिष्य वर्त्तिं कुर्य्याद्यवोन्मिताम् ।
तिमिरं मांसदलिञ्च काचं पटलमर्ब्बुदम् ॥
रात्र्यान्ध्यं वार्षिकं पुष्पं वर्त्तिश्चन्द्रोदया हरेत् ॥

इति चन्द्रोदया वर्त्तिर्लेखनी ।

रोपणी वटी ।

अशीतितिलपुष्पाणि यष्टिः पिप्पलितण्डुलाः ।
यावत्पुष्पाणि पञ्चाशन्मरिचानि तु षोड़श ॥
सूक्ष्मपिष्टाम्बुना वर्त्तिः कृता कुसुमिकाभिधा ।
तिमिरार्ज्जुनशुक्लार्त्ति नाशिनी मांसदलिनुत् ॥

इति कुसुमिकावर्त्ती रोपणी ।

स्नेहनी वटी ।

धात्रयत्रपथ्यावीलानि एकद्वित्रिगुणानि च ।
पिष्ट्वा वर्त्तिं जले कुर्य्यादञ्जनं द्विहरेणुकम् ॥
नेत्रस्रावं हरत्याशु वातरक्तरुजं तथा ॥

अथ रसक्रियालेखनी यथा—

तुत्थमाक्षिकसिन्धूत्थसिताश्मञ्जन शिलाः ।
गैरिक सिन्धुफेनञ्च मरिचञ्चेति चूर्णयेत् ॥
संयोज्य मधुना कुर्य्यादञ्जनार्थं रसक्रियाम् ।
वर्त्मरोगार्म्मतिमिरकाचशुक्रहरीं पराम् ॥

रोपणी रसक्रिया ।

रसाञ्जनं सर्ज्जरसो जातीपुष्पं मनःशिला ।
समुद्रफेनो लवणं गैरिकं मरिचं तथा ॥
एतत्समांशं मधुना पिष्टं प्रक्लिन्नवर्त्मने ।
अञ्जनं क्लेदकण्डूघ्नं पक्ष्मणाञ्च प्ररोहणम् ॥

स्नेहनी रसक्रिया ।

कतकस्य फलं दृष्ट्वा मधुना नेत्रमञ्जयेत् ।
इषत्कर्पूरसहित स्मृत नेत्रप्रसादनम् ॥

अथ चूर्णाञ्जनं तल्लेखनं यथा—

टङ्गणत्वक्शिलाकाचशङ्खचन्दनसैन्धवैः ।
द्रव्य रञ्जनयोगोऽयं पुष्पार्म्मादिविलेखनः ॥

रोपणचूर्णम् ।

शिलायां रसकं पिष्ट्वा सम्यगाप्लाव्य वारिणा ।
गृह्णीयात्तज्जलं सर्वं त्यजेच्चूर्णमधोगतम् ॥
शुष्क तच्च जल सर्वं पर्पटीसदृशं भवेत् ।

विचूर्ण्य भावयेत्सम्यक् त्रिवेलं त्रिफलारसैः ॥
कर्पूरस्य रजस्तत्र दशमांशेन निक्षिपेत् ।
अञ्जयेन्नयन तेन सर्वदोषप्रशान्तये ॥
समस्तनेत्ररोगघ्न चूर्णमेतत्र संशय: ॥

स्नेहनं चूर्णम् ।

अग्नितप्तं हि सौवीर निक्षिप्तत्रिफलारसै· ।
सप्तवेलं तथा स्तन्यै: स्त्रीणां सिक्तं विचूर्णितम् ॥
अञ्जयेत्तेन नयने प्रत्यहं चक्षुषोर्हितम् ।
सर्वानक्षिविकारांस्तु हन्यादेतन्न संशय. ॥

अथ प्रत्यञ्जनविधि· ।

गतदोषमपेताक्षु प्रपश्यत्सम्यगग्रसि ।
प्रक्षाल्याक्षि यथादोषं कार्य्य प्रत्यञ्जनं तत: ॥
नचानिवृत्तदोषेऽक्षिण धावन सम्प्रयोजयेत् ॥

प्रत्यञ्जनं यथा—

शुद्धे नागे द्रुते शुद्धं तुल्य सूतं विनिक्षिपेत् ।
क्षणाच्चन तयोस्तुल्य सर्वमेकत्र चूर्णयेत् ॥
दशमाशेन कर्पूरं तस्मिंश्चूर्णे प्रदापयेत् ।
एतत्प्रत्यञ्जनं नेत्रगदजिन्नयनामृतम् ॥

इति नयनामृतं प्रसादनं चूर्णाञ्जनम् ।

विषहरी वर्त्ति: ।

जयपालभवां मज्जां भावयेत्त्रिष्वुकद्रवै· ।
एकविंशतिवेलं तु ततो वर्त्तिं प्रकल्पयेत् ॥
मनुष्यलालया घृष्ट्वा ततो नेत्रे तयाञ्जयेत् ।
सर्पदष्टविष जित्वा सञ्जीवयति मानवम् ॥

अथ दृष्टिप्रसादनी शलाका।

त्रिफलाभृङ्गशुण्ठीनां रसैस्तद्वच्च सर्पिषा।
गोमूत्रमध्यजाक्षीरैः सिक्तो नागः प्रतापितः॥
तच्छलाका हरत्येव सर्वान् नेत्रभवान् गदान्॥

चतुर्विंशोऽध्यायः।

क्षारपाकविधिः।

शस्त्रानुशस्त्रेभ्यः क्षारः प्रधानतमश्छेद्यभेद्यलेख्यकरणात्क्लिदोषघ्नत्वादिग्धेषक्रियावचारणाच्च। तत्र क्षरणात् क्षणनाद्वा क्षारः। नानौषधिसमवायात्क्लिदोषघ्नः शुक्लत्वात्सौम्यस्तस्य सौम्यस्यापि सतो दहनपचनदारणादिशक्तिरविरुद्धा। स खल्वाग्नेयौषधिगणभूयिष्ठत्वात्कटुक उष्णस्तीक्ष्णः पाचनो विलयनः शोधनो रोपणः शोषणः स्तम्भनो लेखनः क्ष्म्यामकफकुष्ठविषमेदसामुपहन्ता पुंस्त्वस्य चातिसेवितः स द्विविधः प्रतिसारणीयः पानीयश्च। तत्र प्रतिसारणीयः कुष्ठकिटिमदद्रुकिलासमक्षलभगन्दरार्बुददुष्टव्रणनाड्यर्शःकीलतिलकालकन्यच्छव्यङ्गमशकवाङ्मषिद्रधिक्लमिविषार्शःसूपदिश्यते सप्तसु च मुखरोगेषूपजिह्वाधिजिह्वोपकुशदन्तवैदर्भेषु तिसृषु च रोहिणीष्वेतेषु चैवानुशस्त्रप्रणिधानमुक्तम्। पानीयस्तु गरगुल्मोदराग्निशूलाजीर्णारोचकानाह्यश्मकर्याश्मर्यामन्तरविद्रधि-

क्रमिविषार्त्ते सूपयुज्यते । अहितेषु रक्तपित्तज्वरितपित्त-प्रकृतिबालवृद्धदुर्बलभ्रमभ्रमदमूर्च्छातिमिरपरीतेभ्योऽन्येभ्य --श्चैवंविधेभ्यः ।

तच्चेतरक्षारवद्ध्वा परिस्रावयेत्स च त्रिविधो मृदुर्मध्यस्तीक्ष्णश्च । तं चिकीर्षुः शरदि गिरिसानुजं प्रशस्तदेशजातमनुपहतं मध्यमवयस्कं महान्तमसितसुष्कं पाटयित्वा खण्डशः प्रकल्पयावपाल्य निर्वाते देशे निचितं कृत्वा सुधाशर्कराश्च प्रक्षिप्य तिलनालैरादीपयेदथोपशान्तेऽग्नौ तद्रक्षं पृथगाहरेद्यावच्छर्कराश्च । अथानेनैव विधानेन कुटजपलाशाश्वकर्णपारिभद्रकविभीतकारग्वधतिल्वकार्कस्नुहापामार्गपाटलानक्तमालहपुषकदलोचित्तकपूतीकेन्द्रवारुस्फोताश्वमारकपत्रच्छदाग्निनस्यानु क्षारार्थतस्य क्षीपातकीः समूलपत्रशाखा दहेत् । ततः क्षारद्रोणमुदकद्रोणैः षड्भिरालोड्य मृद्वग्निना यथोक्तैरेकविंशतिवारान् विस्राव्य महति कटाहे शनैर्दर्व्या विघट्टयन् विपचेत् । स यदा भवत्यच्छो रक्तस्तीक्ष्णः पिच्छिलश्च तमादाय महति वस्त्रे परिस्राव्येतरं विसृज्य च पुनरग्नावधिश्रयेत् । तत एव च क्षारोदकात् कुडवमध्यर्धं वापनयेत् । ततः कटशर्कराशुक्तिशङ्खनाभीरग्निवर्णाः कृत्वा सुधाशर्कराभिः सह आयसे पात्रे तस्मिन्नेव क्षारोदके निषिच्य पिष्ट्वा तेनैव हिङ्गुणेऽष्टपलसंमिते शङ्खनाभ्यादीनां प्रमाणं प्रतिवाप्य सततमप्रमत्तश्चैलमवघट्टयन् विपचेत् । स यथा नातिसान्द्रो नातिद्रवश्च भवति तथा प्रयतेत । अथैनमागतपाकमवतार्यानुगुप्तमायसे कुम्भे सुतमुखे निदध्यादेष मध्यमः ।

एष एवाप्रतीवाप पक्वः संव्यूहिमो मृदुः । प्रतिवापे यथालाभं दन्तीद्रवन्तीचित्रकलाङ्गलकीपूतिकप्रवालतालपत्रीविड्सुवर्चिकाकनकक्षीरीहिङ्गुवचाविषाः समाः श्लक्ष्णचूर्णाः शुक्तिप्रमाणाः प्रतिवापः । स एव सप्रतीवाप पक्वः पाक्यस्तीक्ष्णश्लेष्मा यथाव्याधिबलमुपयोगः । क्षीणबले तु क्षारोदकमात्रपेक्षलकरणार्थम् ।

नैवातितीक्ष्णो न मृदु शुक्लः श्लक्ष्णोऽत्र पिच्छिलः ।
अभिष्यन्दी शिवः शीघ्र क्षारो ह्यष्टगुणः स्मृतः ॥
अतिमार्दवशैत्योष्णातैक्ष्ण्यापेक्ष्यल्पसर्पिता ।
सान्द्रतापक्वता हीनद्रव्यता दोष उच्यते ॥

तत्र क्षारमाध्यव्याधिव्याधितमुपवेश्य निर्वातातपे देशेऽसम्बाधेऽस्य पीड़ितमवकाशं निरीक्ष्यावष्टब्धालिख्य प्रच्छयित्वा शलाकया क्षारं पातयित्वा वाक्शतमात्रमुपेक्षेत ।

तस्मिन् निपतिते व्याधौ क्षणता दग्धलक्षणम् ।
तत्राम्लवर्गैः शमनं सर्पिर्मधुकसंयुतैः ॥
अथ चेत स्थिरमूलत्वात् क्षारदग्धं न शीर्यते ।
इदमालेपनं तत्र समयमवचारयेत् ॥
अम्लकाश्चिकबीजानि तिलान् मधुकमेव च ।
प्रपेष्य समभागानि तैनैवमनुलेपयेत् ॥
तिलकल्कः समधुको घृताक्तो व्रणरोपणः ।
रसेनाम्लेन तीक्ष्णेन वीर्य्योष्णेन च योजितः ॥
अग्नेर्येनाग्निना तुल्यं कथं क्षारः प्रशाम्यति ।
एवं चेन्मन्यसे वत्स प्रोच्यमानं निबोध मे ॥

अम्लवर्ज्यान् रसान् चारे सर्वानेव विभावयेत् ।
कटुकस्तत्र भूयिष्ठो लवणानुरसस्तथा ।
अम्लेन सह संयुक्तः स तीक्ष्णलवणो रसः ॥
माधुर्यं भजतेऽत्यर्थं तीक्ष्णभावं विमुञ्चति ।
माधुर्याच्छममाप्नोति वह्निरद्भिरिवाप्लुतः ॥

तत्र सम्यग्दग्धे विकारोपशमो लाघवमनास्रावश्च । हीनदग्धे तोदकण्डूजाड्यानि व्याधिवृद्धिश्च । अतिदग्धे दाहपाकरागस्रावाङ्गमर्दक्लमपिपासामूर्च्छाः स्युर्मरणं वा । क्षारदग्धव्रणान्तु यथादोषं यथाव्याधि चोपक्रमेत् ।

अथ नैते क्षाराः । तद्यथा, दुर्बलबालस्थविरभीरु-सर्वाङ्गशूलोदरिरक्तपित्तिगर्भिण्यृतुमतीप्रवृद्धज्वरिप्रमेहोर-क्षतक्षीणतृष्णामूर्च्छोपद्रुतक्लीबापवृत्तोद्वृत्तफलवीजयोः । तथा मर्म्मशिरास्नायुधमनीसन्धितरुणास्थिसेवनीगलनाभिनखा-न्तरशोफस्रोतःस्वल्पमांसेषु च प्रदेशेष्वक्षीणे च न दद्या-दन्यत्र वर्त्मरोगात् । तत्र क्षारसाध्येष्वपि व्याधिषु शूल-गौरवमस्थिशूलिनमन्नद्वेषिणं हृदयसन्धिपीड़ोपद्रुतं क्षारो न साधयति ।

विषाग्निशस्त्राशनिसन्निकल्पः
क्षारो भवत्यल्पमतिप्रयुक्तः ।
स धीमता सम्यगनुप्रयुक्तो
रोगान् निहन्यादचिरेण घोरान् ॥

पञ्चविंशोऽध्यायः ।

अग्निकर्मविधिः ।

चारादग्निर्गरीयान् क्रियासु व्याख्यातस्तद्दग्धानां रोगाणामपुनर्भावाद्विषजश्चशस्त्रचारैरसाध्यानां तत्साध्यत्वाच्च ।

अथेमानि दहनोपकरणानि । तद्यथा, पिप्पल्यजाशक्तनोदन्तशरशलाकाजाम्बवौष्ठतरलौहाः क्षौद्रगुडस्नेहाश्च । तत्र पिप्पल्यजाशक्तनोदन्तशरशलाकास्त्वग्गतानाम् । जाम्बवौष्ठतरलौहानि मांसगतानाम् । क्षौद्रगुडस्नेहाः शिरःस्नायुसन्धिगतानाम् । तत्राग्निकर्म सर्वेष्वेषु कुर्यादन्यत्र शरक्षीराभ्यां तत्राप्यात्ययिकेऽग्निकर्मसाध्ये व्याधौ तत्प्रत्यनीकं विधिं कृत्वा सर्वव्याधिष्वेतेषु च पिच्छिलमन्नं भुक्तवतः कर्म कुर्वीत मूढ़गर्भाश्मरीभगन्दरार्शोमुखरोगेष्वभुक्तवतः । तच्च द्विविधमग्निकर्माहुरेके त्वग्दग्धं मांसदग्धं च । दग्धे तु शिरास्नायुसन्ध्यस्थिष्वपि न प्रतिषिद्धोऽग्निः । तत्र 'शूल्यप्रादुर्भावो दुर्गन्धता त्वक्सङ्कोचश्च त्वग्दग्धे । कपोतवर्णताल्पशूयथुवेदना शुष्कसङ्कुचितव्रणता च मांसदग्धे । क्षणोच्च तत्रणतास्रावसन्निरोधश्च शिरास्नायुदग्धे । रूक्षारुणता कर्कशास्थिव्रणता च सन्ध्यस्थिदग्धे । तत्र शिरोरोगाधिमन्थयोर्भ्रूललाटशङ्खप्रदेशेषु दहेत् । वर्त्मरोगेष्वार्द्रलक्तकप्रतिच्छन्नां दृष्टिं

क्षत्वा वर्त्मरोमकूपान् दहेत्। त्वङ्मांसशिरास्नायुसन्धि-स्थिस्थितेऽत्युग्ररुजे वायावुच्छ्रितकठिनसुप्तमांसे व्रणे ग्रन्थ्यर्शोऽर्बुदभगन्दरापचीस्रोपदंशकीलतिलकालकान्य-ष्ठीलसन्धिशिराच्छेदनादिषु नाडीशोणितातिप्रवृत्तिषु चाग्निकर्म कुर्य्यात्। तत्र रोगाधिष्ठानभेदादग्नि-कर्म चतुर्धा भिद्यते। तद्यथा, वलयबिन्दुविलेखाप्रति-सारणानीति दहनविशेषाः।

रोगस्य संस्थानमतो विदित्वा
नरस्य मर्म्माणि बलाबलञ्च।
व्याधिं तत्कर्त्तुञ्च समीक्ष्य सम्यक्
ततो व्यवस्येद्भिषगग्निकर्म्म॥

तत्र सम्यग्दग्धे मधुसर्पिर्भ्यामभ्यङ्ग। अदह्यमानमग्निना परिहरेत् पित्तप्रकृतिमन्तं शोणितपित्तिनं भिन्नकोष्ठ-मनुद्भृतग्रन्थिं दुर्बलं बालं वृद्धं भीरुमनेकव्रणपीडित-मन्येद्युश्चेति।

अथ जुष्टमितरथा दग्धलक्षणं वक्ष्यामः। तत्र स्निग्धं रूक्षं वाग्निस्थं द्रव्यमग्निर्दहति। अग्निमन्तो हि स्नेहाः सूक्ष्मशिरानुसारित्वात्त्वगादीनतुप्रविश्याशु दहन्ति। त-स्मात् स्नेहदग्धेऽधिका रुजो भवन्ति। तत्र प्लुष्टं दुर्दग्धं सम्यग्दग्धमतिदग्धञ्चेति चतुर्विधमग्निदग्धम्। तत्र यद्विवर्णं प्लुष्यतेऽतिमात्रं तत् प्लुष्टम्। यत्रोत्तिष्ठन्ति स्फोटास्तीव्रा-स्रोषदाहरागपाकवेदनाशिराचोपशाम्यन्ति तद्दुर्दग्धम्। सम्यग्दग्धमनवगाढं तालफलवर्णं सुसंस्थितं पूर्वं लक्षण-युक्तञ्च। अतिदग्धे मांसावलम्बनगात्रं विश्लेषं शिरा-

स्रायुसन्ध्यस्थिव्यापादनमतिमात्रं ज्वरदाहपिपासा-मूर्च्छाश्चोपद्रवा भवन्ति, व्रणश्चास्य चिरेण रोहति रूढश्च विवर्णो भवति। तदेतच्चतुर्विधमग्निदग्धलक्षणमात्मकर्म-प्रसाधकं भवति।

अग्निना कोपित रक्तं शृङ्ग जन्तोः प्रकुप्यति।
ततस्तेनैव वेगेन पित्तमस्याभ्युदीर्य्यते॥
तुल्यवीर्य्यौ उभौ ह्येतौ रसतो द्रव्यतस्तथा।
तेनास्य वेदनास्तीव्रा प्रकृत्या च विदह्यते॥
स्फोटाः शीघ्रं प्रजायन्ते ज्वरस्तृष्णा च वर्द्धते।
दग्धस्योपशमार्थाय चिकित्सा संप्रचक्ष्यते॥
प्रदृष्टस्याग्निदग्धस्य कार्य्यमुष्णं तथौषधम्।
शरीरे स्विन्नभूयिष्ठे स्विन्नं भवति शोणितम्॥
प्रकृत्या ह्युदकं शीतं स्कन्दयत्यतिशोणितम्।
तस्मात्स्रवति ह्युष्णं न तु शीतं कथञ्चन॥
शीतासृग्दाश्च दुर्दग्धे क्रियां कुर्य्याद्विषक् पुनः।
घृतालेपनसेकास्तु शीतानेवास्य कारयेत्॥
सम्यग्दग्धे तुगाद्यैरीषल्लवन्दनगैरिकैः।
साम्भसैः सर्पिषा स्निग्धैरालेपं कारयेद्भिषक्॥
श्यामान्यूषोदकैश्चैनं स्निग्धैर्भोजैः प्रलेपयेत्।
पित्तविद्रधिवच्चैनं सन्ततीराणमाचरेत्॥
अतिदग्धे विशीर्णानि मांसान्युद्धृत्य शीतलाम्।
क्रियां कुर्य्याद्भिषक् पश्चाच्छालितण्डुलकल्कनैः॥
तिन्दुकीत्वक्कषायैर्वा घृतमिश्रैः प्रलेपयेत्।
व्रणं गुडूचीपत्रैर्वा क्वाथयेदथवोदकैः॥

क्रियाश्च निखिलां कुर्याच्छिष्यक् पित्तविसर्पवत् ।
मधूच्छिष्टं समधुकं रोध्रं मञ्जरसं तथा ॥
मञ्जिष्ठां चन्दनं मूर्वां पिष्ट्वा सर्पिर्विपाचयेत् ।
सर्वेषामग्निदग्धानामेतद्रोपणमुत्तमम् ॥
स्नेहदग्धे क्रियां रूक्षां विशेषेणावचारयेत् ॥

अत ऊर्द्धं प्रवक्ष्यामि धूमोपहतलक्षणम् ।
श्वसिति क्ष्वेति चात्यर्थमत्याधमति कासते ॥
चक्षुषोः परिदाहश्च रागश्चैवोपजायते ।
सधूमकं नि श्वसिति श्रेयमन्यत्र वेत्ति च ॥
तथैव च रसान् सर्वान् श्रुतिश्चास्योपहन्यते ।
तृष्णादाहज्वरयुतः सीदत्यथ च मूर्च्छति ॥
धूमोपहत इत्येवं शृणु तस्य चिकित्सितम् ।
सर्पिरिक्षुरसं द्राक्षा पयो वा शर्करास्तु वा ॥
मधुरास्त्री रसो वापि वमनाय प्रदापयेत् ।
वमतः कोष्ठशुद्धिः स्याद्धूमश्चाशु नश्यति ॥
विधिनानेन नश्यन्ति सद्यस्तत्क्षणजा गदाः ।
दाहमूर्च्छातृड्ज्वानश्वासकासाश्च दारुणाः ॥
मधुरैर्लवणाम्लैश्च कटुकैः कवलग्रहैः ।
सम्यग्गृह्णन्तीन्द्रियार्थान्मनश्चास्य प्रसीदति ॥
शिरोविरेचनं तस्मै दद्याद्योगेन शास्त्रवित् ।
दृष्टिर्विशुध्यते चास्य शिरोग्रीवञ्च देहिनः ॥
अविदाहि लघु स्निग्धमाहारं चास्य कल्पयेत् ।
उष्णवातातपैर्दग्धे शीतः कार्यो विधिः सदा ॥
शीतवर्षानिरूहत उष्णः स्निग्धश्च शस्यते ।

तथातितेजसा दग्धे सिद्धिर्नास्ति कथञ्चन ॥
इन्द्रवज्राग्निदग्धेऽपि जीवति प्रतिकारयेत् ।
स्नेहाभ्यङ्गपरीषेकैः प्रदेहैश्च तथा भिषक् ॥

——

षड्विंशोऽध्यायः ।

——

जलौकावचारणविधिः ।

नृपाद्यबालस्थविरभीरुदुर्बलनारीसुकुमाराणामनुग्रहार्थं परमसुकुमारोऽयं शोणितावसेचनोपायोऽभितो जलौकसः । तत्र वातपित्तकफदुष्टशोणितं यथासंख्यं शृङ्गजलौकालाबुभिरवसेचयेत् स्निग्धशीतरूक्षलाक्षर्वाणि रुदैर्वा ।

उष्णं समधुरं स्निग्धं गवां शृङ्गं प्रकीर्त्तितम् ।
तस्मादातोपसृष्टे तु हितं तदवसेचने ॥
शीताधिवासा मधुरा जलौका वारिसम्भवा ।
तस्मात्पित्तोपसृष्टे तु हिता सा त्वसेचने ॥
अलाबु कटुकं रूक्षं तीक्ष्णञ्च परिकीर्त्तितम् ।
तस्माच्छ्लेष्मोपसृष्टे तु हितं तदवसेचने ॥

तत्र प्रच्छिते तनुवस्त्रपटलावनद्धेन शृङ्गेण शोणितमवसेचयेदाचूषणात् । सान्तर्दोषयालाब्वा ।

अथ जलायुका वक्ष्यन्ते । जलमासामायुरिति जलायुका जलमासामोक इति जलौकसः । ता द्वादश तासां सविषाः षट् तावत्य एव निर्विषाः ।

तत्र सविषाः कृष्णाः कर्बुरा अलगर्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति । तासञ्जनचूर्णवर्णा पृथुशिरा कृष्णा । वर्ष्मभल्लवदायता छिन्नोन्नतकुक्षिः कर्बुरा । रोमशा महापार्श्वा कृष्णमुखी अलगर्दा । इन्द्रायुधवद्दूर्वाराजिभिश्चित्रिता इन्द्रायुधा । ईषदसितपीतिका विचित्रपुष्पाकृतिचित्रा सामुद्रिका । गोवृषणवदधोभागे द्विधाभूताकृतिरक्तमुखी गोचन्दनेति । ताभिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्रं कण्डूर्मूर्च्छा ज्वरो दाहस्तृष्णा मदः सदनमिति लिङ्गानि भवन्ति । तत्र महागदं पानालेपनस्य कर्मादिषूपदेक्ष्यामः । इन्द्रायुधादष्टमसाध्यमित्येताः सविषाः सचिकित्सिता व्याख्याताः ।

अथ निर्विषाः कपिला पिङ्गला शङ्खमुखी मूषिका पुण्डरीकमुखी सावरिका चेति । तत्र मनःशिलारञ्जिता भ्यामिव पार्श्वाभ्यां पृष्ठे स्निग्धसदृवर्णा कपिला । किञ्चिद्रक्ता दृप्तकाया पिङ्गाशुगा च पिङ्गला । यकृद्वर्णा शीघ्रयायिनी दीर्घतीक्ष्णमुखी शङ्खमुखी । मूषिकाकृतिवर्णानिष्टगन्धा च मूषिका । मुद्गवर्णा पुण्डरीकतुल्यवक्त्रा पुण्डरीकमुखी । स्निग्धा पद्मपत्रवर्णाष्टादशाङ्गुलप्रमाणा सावरिका सा च पश्चैते । इत्येता अविषा व्याख्याताः । तासां यवनपाण्ड्यसह्यपीतनादीनि क्षेत्राणि । तेषु महाशरीरा बलवत्यः शीघ्रयायिन्यो महाशना निर्विषाश्च विशेषेण

भवन्ति। तत्र सविषमस्रकोटदूरमूत्रपुरीषकोथजाताः कलुषेष्वम्भःसु च सविषाः। पद्मोत्पलनलिनकुमुदसौगन्धिककुवलयपुण्डरीकशैवालकथोजाता विमलेष्वम्भःसु च निर्विषाः।

क्षेत्रेषु विचरन्त्येताः सलिलेषु सुगन्धिषु।
न च सङ्कीर्णचारिण्यो न च पङ्केशयाः सुखाः॥

तासां ग्रहणमार्द्रचर्मणान्यैर्वा प्रयोगैर्गृह्णीयात्। अथैनां नवे मृति घटे सरस्तडागोदकपङ्कमावाप्य निदध्यात्। भक्ष्यार्थं चासामुपहरेच्छैवलं वल्लूरमौदकांश्च कन्दांश्चूर्णीकृत्य श्रद्धार्थं तृणमौदकानि च पत्राणि। द्व्यहात् द्व्यहाच्चान्यज्जलं भक्ष्यञ्च दद्यात्। सप्तरात्रात्सप्तरात्राच्च घटमन्यं संक्रामयेत्।

स्थूलमध्याः परिक्लिष्टाः पृथ्व्यो मन्दविचेष्टिताः।
अग्राहिण्योऽल्पपायिन्यः सविषाश्च न पूजिताः॥

अथ जलौकोऽवसेकसाध्यव्याधितमुपवेश्य संवेश्य वा विरूक्ष्य चास्य तमवकाशं शृङ्गोभयचूर्णैर्घर्षरुजः स्यात् गृहीताश्च ताः सर्षपरजनीकल्कोदकप्रदिग्धगात्रीः सलिलसरकमध्ये मुहूर्त्तस्थिता विगतक्लमा ज्ञात्वा तासां रोगं ग्राहयेत्। सूक्ष्मशुष्कार्द्रपिचुप्रीतावच्छन्नां कृत्वा मुखमपाहरणयात् अगृह्णन्त्यै चीरविन्दुं शोणितविन्दुं वा दद्याच्छस्त्रपदानि वा कुर्वीत यद्येवमपि न गृह्णीयात्तदान्यां ग्राहयेत्। यदा च निर्विशतेऽस्रखरवदाननं कृत्वोन्नम्य च स्कन्धं तदा जानीयाद्गृह्णातीति गृह्णन्तीं चार्द्रवस्त्रावच्छन्नां धारयेत् सेचयेच्च। दग्धे तोदकण्डूप्रादुर्भावैर्जानीयाच्छु-

इमियदादत्त इति शुद्धमाददानामपनयेत् । अथ शोणित-गन्धेन न मुह्येन्मुखमस्याः सैन्धवचूर्णेनावकिरेत् । अथ पतितां तण्डुलकाण्डनप्रदिग्धगात्रीं तैललवणाभ्यक्त-मुखीं वामहस्ताङ्गुलीभ्यां गृहीतपुच्छां दक्षिणहस्ताङ्गुष्ठा-ङ्गुलीभ्यां शनैः शनैरलोममनुमार्जयेदामुखादामयेत्ता-वद्यावत्सम्यग्वान्तलिङ्गानीति । सम्यग्वान्ता सलिलसरक-न्यस्ता भोक्तुकामा सती चरेत् । या नोदेति न चेष्टते वा दुर्वान्ता ता पुनः सम्यग्वामयेत् । दुर्वान्तायां व्याधिरसाध्य इन्द्रमदो नाम भवति । अथ सुवान्ता पूर्ववत्स्निग्धाद्यात् शोणितस्य च योगायोगानवेक्ष्य जलौकोव्रणान्मधुनावघ-ट्येच्छीताभिरद्भिश्च परिषेचयेद्घृतं वा व्रणं कषायमधुर-स्निग्धशीतैश्च प्रदेहैः प्रदिह्यादिति ।

वेचारिणं ग्रहणं जातीः शोणितं सावचारणम् ।
जलौकसाश्च यो वेत्ति तत्साध्यान् स जयेद्गदान् ॥

सप्तविंशोऽध्यायः ।

शोणितस्रावस्य साधारणो विधिः ।

फेनिलमकृष्णं क्षीणं पक्वं तनु शीघ्रमस्रन्ति च शोणितं वातेन दुष्टम् । नीलं पीतं हरितं श्यावं विस्रम-स्रन्तिं पिपीलिकामक्षिकाणामस्रन्ति च पित्तदुष्टम् ।

गैरिकोदकप्रतीकाशं स्निग्धं शीतलं बहलं पिच्छिलं चिरस्रावि मांसपेशीप्रभं श्लेष्मदुष्टञ्च। सर्वलक्षणसंयुक्तं काङ्क्षिकाभ विशेषतो दुर्गन्धि च सन्निपातदुष्टम्। पित्तसृक्तेनातिलक्षणञ्च। द्विदोषलिङ्गं संसृष्टम्। इन्द्रगोपप्रतीकाशमसंहतनविवर्णञ्च प्रकृतिस्थं जानीयात्।

अथाविस्राव्या सर्वाङ्गशोफः शोणस्य चाम्लभोजननिमित्ता पाण्डुरोग्यर्शोदरिशोषिगर्भिणीनाञ्च क्षयश्वयथवः।

तत्र शस्त्रनिपातजं द्विविधं प्रच्छानं शिराव्यधनञ्च। तत्र ऋज्वनङ्गुलीं सूक्ष्मे शस्त्रमवगाढमनुत्तानमाशु च शस्त्रं पातयेद्यतश्शिरास्नायुसन्धीनां चानुपघाति। तत्र दुर्दिने दुर्विद्धे शीतव्रतयोस्निग्धे ऽभुक्तवतः स्रवत्वाच्छोणितं न स्रवत्यं वा स्रवति।

मदमूर्च्छाश्रमार्त्तानां वातविभूतसङ्गिनाम्।
निद्राभिभूतशीतानां नृणां नासृक् प्रवर्त्तते॥

तद्दुष्टं शोणितमनिर्हियमाणं कण्डूशोफरागदाहपाकवेदना जनयेत्। अत्युष्णातिस्निग्धातिविस्रैर्विस्रावितमतिप्रवर्त्तते। तदतिप्रवृत्तं शिरोऽभितापमान्यमधिमन्थं तिमिरप्रादुर्भावं धातुक्षयमाक्षेपकं प्रचाषातमेकाङ्गविकारं हृत्पादाहौ हिक्कां कासं श्वासं पाण्डुरोगं मरणञ्चापादयति।

तस्मान्न शीते नात्युष्णे नास्निग्धे नातितापिते।
यवागूं प्रतिपीतस्य शोणितं मोक्षयेद्भिषक्॥
सम्यग्गत्वा यदा रक्तं स्वयमेवावतिष्ठते।
शुद्धं तदा विजानीयात्सम्यग्विस्रावितञ्च तत्॥

लाघवं वेदनाशान्तिर्व्याधेरुपरिलक्षयं ।
सम्यग्विस्रावितं लिङ्गं प्रसादो मनसस्तथा ॥
क्षुद्दोषा ग्रन्थयः कीफा रोगाः शोणितजाश्च ये ।
रक्तमोक्षणशीलानां न भवन्ति कदाचन ॥

अथ खल्वप्रवर्त्तमाने रक्ते एलाशीतशिवकुष्ठतगरपाठा-भद्रदारुविडङ्गत्रिवृत्कटुकागारधूमहरिद्रार्कक्षीरनक्त-मालफलैर्यवागूलाभ त्रिभिश्चतुर्भिः समस्तैर्वा चूर्णीकृतैः सर्षपतैललवणप्रगाढैर्व्रणमुखमवघर्षयेदेव सम्यक् प्रव-र्त्तते । अथातिप्रवृत्ते रोध्रमधुकप्रियङ्गुपद्मकेशरिक-सर्ज्जरसरसाञ्जनशाल्मलीपुष्पयष्टिमधुकशुक्तिमाषयवगोधूमचूर्णैः शनैर्व्रणमुखमवचूर्ण्याङ्गुल्यग्रेणावपीडयेत् । सालसर्ज्जा-र्जुनारिमेदमेषशृङ्गधवधन्वनत्वग्भिर्वा चूर्णिताभिः क्षौमेण बाध्यापितेन समुद्रफेनलाक्षाचूर्णैर्वा यथोक्तैर्व्रणबन्धन-द्रव्यैर्गाढं बध्नीयात् । शीताच्छादनभोजनागारैः-शीतैः परिषेकप्रदेहैश्चोपाचरेत् क्षारेणाग्निना वा दग्धेष्वयोक्तव्यधनादनन्तरं वा तामेवातिप्रवृत्तां शिरां विध्येत् । काकोल्यादिक्वाथं वा शर्करामधुमधुरं पाय-येत् । एणहरिणोरभ्रगवयमहिषवराहाणां वा रुधिर क्षीरयूषरसैः सुस्निग्धैश्चाश्नीयाद्रुपद्रवांश्च यथास्वमुपाचरेत् ।

धातुक्षयात् स्रुते रक्ते मन्दः सञ्जायतेऽनलः ।
पवनश्च परं कोपं याति तस्मात्प्रयत्नतः ॥
तस्मात्तिक्तैर्लघुभिः स्निग्धैः शोणितवर्द्धनैः ।
हृद्यैश्चरनक्तैर्वा भोजनैः समुपाचरेत् ॥
चतुर्विधं यदेतद्धि रुधिरस्य निवारणम् ।

सन्धानं स्कन्दनञ्चैव पाचनं दहनं तथा ॥
त्रयं कषायः सन्धत्ते रक्तं स्कन्दयते हिमम् ।
तथा सम्पाचयेद्दाहः सङ्कोचयेच्छिराः ॥
अस्कन्दमाने रुधिरे सन्धानानि प्रयोजयेत् ।
सन्धाने भ्रश्यमाने पाचनैः समुपाचरेत् ॥
कल्पैरेतैस्त्रिभिर्वैद्यः प्रयतेत यथाविधि ।
असिद्धिमत्सु चैतेषु दाहः परम इष्यते ॥
सशेषदोषे रुधिरे न व्याधिरतिवर्त्तते ।
सावशेषे ततः स्थेयं न तु कुर्य्यादतिक्रमम् ॥
देहस्य रुधिर मूलं रुधिरेणैव धार्य्यते ।
तस्माद्यत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः ॥
शुतरक्तस्य सेकाद्यैः शीतैः प्रकुपितेऽनिले ।
शोकं सतोदं कोष्णेन सर्पिषा परिषेचयेत् ॥

अष्टाविंशोऽध्यायः ।

दोषधातुमलक्षयवृद्धिविज्ञानम् ।

दोषधातुमलमूलं हि शरीरं तस्मादेतेषां लक्षणमुच्यमानमुपधारय । तत्र प्रस्यन्दनोद्धनपूरणविवेकधारणलक्षणो वायुः पञ्चधा प्रविभक्तः शरीरं धारयति । रागप-

क्त्योजस्तेजोमेधोवाक्कृत् पित्तं पञ्चधा प्रविभक्तमग्निकर्म्मणानुग्रहं करोति। सन्धिसंश्लेषणस्नेहनरोपणपूरणबलस्थैर्यकृत् श्लेष्मा पञ्चधा प्रविभक्त उदककर्म्मणानुग्रहं करोति। रसः प्रीणयति रक्तपुष्टिञ्च करोति। रक्तं वर्णप्रसादं मांसपुष्टिं जीवयति च। मांसं शरीरपुष्टिं मेदसञ्च। मेदः स्नेहस्वेददृढत्वं पुष्टिमस्थ्नाञ्च। अस्थि देहधारणं मज्जपुष्टिञ्च। मज्जा प्रीतिं स्नेहं बलं शुक्रपुष्टिं पूरणमस्थ्नाञ्च करोति। शुक्रं धैर्य्यं च्यवनं प्रीतिं देहबलं हर्षं वौजार्थञ्च। पुरीषमुपस्तम्भं वायुग्निधारणञ्च। वस्तिपूरणक्लेदकन्मूत्रम्। स्वेदः क्लेदत्वक्सौकुमार्य्यकृत्। रक्तलक्षणमार्त्तवं गर्भकृच्च। गर्भो गर्भलक्षणम्। स्तन्यं स्तनयोरापीनत्वजनन जीवनञ्चेति। तेषां विधिवत्परिरक्षणं कुर्वीत।

अथ जर्ज्जेषां क्षीणलक्षणं वक्ष्यामः। क्षयः पुनरेषामतिसंशोधनातिसञ्चमनवेगविधारणासात्म्यान्नमनस्तापव्यायामानशनातिमैथुनैर्भवति। तत्र वातक्षये मन्दचेष्टा ल्पवाक्त्वमल्पहर्षो मूढ़संज्ञता च पित्तक्षये मन्दोष्माग्नितां निष्प्रभत्वञ्च। श्लेष्मक्षये रूक्षतान्तर्दाह आमाशयेतराशयशिरसां शून्यता सन्धिशैथिल्यं तृष्णा दौर्ब्बल्यं प्रजागरणञ्च। तत्र स्वयोनिवर्द्धनद्रव्याण्येव प्रतीकारः। रसक्षये हृत्पीडा कम्पः शून्यता तृष्णा च। शोणितक्षये त्वक्पारुष्यमम्लशीतप्रार्थना शिराशैथिल्यञ्च। मांसक्षये स्फिक्गण्डौष्ठोपस्थोरुवक्षःकक्षापिण्डिकोदरग्रीवाशुष्कता रौक्ष्यतोदौ गात्राणां सदनं धमनीशैथिल्यञ्च। मेदःक्षये

श्लीहाभिवृद्धिः सन्धिशून्यता रौक्ष्यं मेदुरमांसप्रार्थना च। अस्थिक्षयेऽस्थितोदो दन्तनखभङ्गो रौक्ष्यञ्च। मज्जक्षयेऽल्पशुक्रता पर्वभेदोऽस्थिनिस्तोदोऽस्थिशून्यता च। शुक्रक्षये मेढ्रवृषणवेदनाऽयङ्मैथुने चिराद्वा प्रसेकः, प्रसेके चाल्परक्तशुक्रदर्शनञ्च। तत्रापि स्वयोनिवर्द्धनद्रव्योपयोगप्रतीकारः। पुरीषक्षये हृदयपार्श्वपीड़ा सशब्दस्य च वायोरूर्द्ध्वगमनं कुक्षौ सञ्चरणञ्च। मूत्रक्षये वस्तितोदोऽल्पमूत्रता च। अत्रापि स्वयोनिवर्द्धनद्रव्याण्येव प्रतीकारः। स्वेदक्षये स्तब्धरोमकूपता त्वक्शोषः स्पर्शवैगुण्यं स्वेदनाशश्च। तत्राभ्यङ्गः स्वेदोपयोगश्च। आर्त्तवक्षये यथोचितकालादर्शनमल्पता वा योनिवेदना च तत्र संशोधनभाग्नेयानाञ्च द्रव्याणां विधिवदुपयोगः। स्तन्यक्षये स्तनयोर्ग्लानता स्तन्यासम्भवोऽल्पता वा तत्र श्लेष्मवर्द्धनद्रव्योपयोगः। गर्भक्षये गर्भास्यन्दनमनुन्नतकुक्षिता च तत्र प्राग्वस्तिकालायाः क्षीरवस्तिप्रयोगो मेध्यान्नोपयोगश्चेति।

अत ऊर्द्धमतिवृद्धानां दोषधातुमलानां लक्षणं वक्ष्यामः। वृद्धिः पुनरेषा स्वयोनिवर्द्धनाभ्युपसेवनाद्भवति। तत्र वातवृद्धौ त्वक्पारुष्यं कार्श्यं कार्ष्ण्यं गात्रस्फुरणमुष्णकामिता निद्रानाशोऽबलत्वं गाढ़त्वञ्च स्वस्य। पित्तवृद्धौ पीतावभासता सन्तापः शीतकामित्वमल्पनिद्रता मूर्च्छा बलहानिरिन्द्रियदौर्बल्यं पीतविण्मूत्रनेत्रत्वञ्च। श्लेष्मवृद्धौ शौक्ल्यं शैत्यं स्थैर्य्यं गौरवमवसादस्तन्द्रा निद्रा सन्ध्यस्थिविश्लेषश्च। रसोऽतिवृद्धो हृदयोत्क्लेशं प्रसेकञ्चापादयति। रक्तं रक्ताङ्गतां शिरापूर्णत्वञ्च। मांसं स्फिग्गण्डौष्ठो-

पक्वोरुबाहुजङ्घासु वृद्धिं गुरुगात्रताञ्च। मेदः स्निग्धाङ्गता-मुदरपार्श्ववृद्धिं कासश्वासादीन् दौर्गन्ध्यञ्च। अस्थि अध्यस्थ्यधिदन्तांश्च। मज्जा सर्वाङ्गनेत्रगौरवम्। शुक्रं शुक्राश्मरीमतिप्रादुर्भावञ्च। पुरीषमाटोपं कुक्षौ शूलञ्च। मूत्रं मुहुर्मुहुः प्रवृत्तिं बस्तितोदमाध्मानञ्च। स्वेदस्त्वचो दौर्गन्ध्यं कण्डूञ्च। आर्त्तवमकृच्छ्रमतिप्रवृत्तिं दौर्बल्यञ्च। स्तन्यं स्तनयोरापीनत्वं मुहुर्मुहुः प्रवृत्तिं तोदञ्च। गर्भो जठराभिवृद्धिं शोथञ्च। तेषां यथास्वं संशोधनं शमनञ्च क्षयादिविशेषैः क्रियाविशेषैः प्रतिकुर्वीत।

पूर्वैः पूर्वोऽतिवृद्धत्वाद्वर्द्धयेद्धि परं परम्।
तस्मादतिप्रवृद्धानां धातूनां ह्रासनं हितम्॥

बलक्षयं बलक्षयलक्षणमत ऊर्द्धं वक्ष्यामः। तत्र रसादीना शुक्रान्तानां धातूनां यत्परं तेजस्तत् खल्वोजस्त-देव बलमित्युच्यते सङ्ग्रहसिद्धान्तत्वात्। तत्र बलेन स्थिरोपचितमांसता सर्वचेष्टास्वप्रतिघातः स्वरवर्णप्रसादो बाह्यानामाभ्यन्तराणाञ्च करणानामात्मकार्य्यप्रतिपत्ति-र्भवति।

ओजः सोमात्मकं स्निग्धं शुक्लं शीतं स्थिरं रसम्।
विविक्तं मृदु मृत्स्नञ्च प्राणायतनमुत्तमम्॥
देहस्यावयवस्तेन व्याप्तो भवति देहिनाम्।
तदभावाच्च शीर्य्यन्ते शरीराणि शरीरिणाम्॥
अभिघातात् क्षयात्कोपाच्छोकात्क्षुधितस्य च।
ओजः संक्षीयते क्षिप्रं क्षयाद्धातुयक्ष्मणि:स्मृतम्॥

दोषधातुमलक्षीणो बलक्षीणोऽपि वा नरः।

स्वयोनिवर्द्धनं यत्तदन्नपानं प्रकाङ्क्षति ॥
यद्यदाहारजातं हि क्षीणः प्रार्थयते नरः।
तस्य तस्य सलाभे तु तं तं क्षयमपोहति ॥
यस्य धातुक्षयाद्वायुः संज्ञां कर्म्म च नाशयेत्।
क्षीणश्च बलं यस्य नासौ शक्यश्चिकित्सितुम् ॥

जनविंशोऽध्यायः।

अथातो हिताहितीयमध्यायं व्याख्यास्यामः।

यद्वायोः पथ्यं तत्पित्तस्यापथ्यमित्यनेन हेतुना न किञ्चिद्द्रव्यमेकान्तेन हितमहितं वास्तीति केचिदाचार्य्या ब्रुवते तत्तु न सम्यक्। इह खलु यस्माद्द्रव्याणि स्वभावतः संयोगतश्चैकान्तहितान्येकान्ताहितानि हिताहितानि च भवन्ति। तत्रैकान्तहितानि जातिसाम्यात्सलिलघृतदुग्धौदनप्रभृतीनि। एकान्ताहितानि दहनपचनमारणादिषु प्रवृत्तान्यग्निक्षारविषादीनि। संयोगादपराणि विषतुल्यानि भवन्ति। हिताहितानि तु यद्वायोः पथ्यं तत्पित्तस्यापथ्यमित्यतः सर्वप्राणिनामयमाहारार्थो वर्ग उपदिश्यते।

तद्यथा, रक्तशालिषष्टिकगङ्गुकमुकुन्दकपाण्डुकपीतकप्रमोदककालकाशनकपुष्पककर्दमकप्रकुनाहृतसुगन्धककलमनीवारकोद्रवोद्दालकश्यामाकगोधूमवेणुयवादयः। एणहरिणकुरङ्गसृगमातृकाश्वदंष्ट्राकरालऋक्षकपोतलावतित्तिरिकपिञ्जलवर्त्तिरवर्त्तिकादीनां मांसानि। मुद्गवनमुद्गमकुष्ठकलायमसूरमग्नल्यचणकहरेणुवाढकास्तीनाः। चिल्लिवास्तूकसुनिषण्णकजीवन्तीतण्डुलीयकमण्डूकपर्ण्यः। शस्यं घृत सैन्धवदाडिमामलकमित्येष वर्गः सर्वप्राणिनां सामान्यतः पथ्यतम। तथा ब्रह्मचर्य्यनिर्वातशयनोष्णोदकनिशास्नप्रच्छायामार्द्रैकान्ततः पथ्यतमाः। एकान्तहितान्येकान्ताहितानि प्रागुपदिष्टानि। हिताहितानि तु यद्दायोः पथ्यं तत्तिक्तस्यापथ्यमिति।

संयोगतस्त्वपराणि विषतुल्यानि भवन्ति। तद्यथा, वल्लीफलकवककरीरास्लफलल्वणकुलत्थपिण्याकदधितैलविरोहिपिष्टकशुष्कशाकाजाविकमामसमद्यजाम्बवचिलिचिममत्स्यगोधावराहांश्च नैकव्यमश्नीयात्यवसा।

रागं सात्म्यञ्च देशञ्च कालं देहञ्च बुद्धिमान्।
अवेक्ष्याम्बादिकान् भावान् रोगहर्त्तुः प्रयोजयेत्॥
अवस्थान्तरवाहुल्याद्रोगादीनां व्यवस्थितम्।
द्रव्यं नेच्छन्ति भिषज इच्छन्ति स्वस्थरक्षणे॥
द्वयोरन्यतरादानं वदन्ति विषदुग्धयोः।
दुग्धस्यैकान्तहितता विषमेकान्ततोऽहितम्॥
एवं युक्तरसेष्वेषु द्रव्येषु सलिलादिषु।
एकान्तहितता विद्धि वत्स सुश्रुत नान्यथा॥

अतोऽन्यान्यपि संयोगादहितानि वक्ष्यामः। नवविरूढधान्यैर्वसामधुघृतगुडमाषैर्वा ग्राम्यानूपौदकपिशितादीनि नाभ्यवहरेत्। न पयोमधुभ्यां रोहिणीशाकं जातुशाकं वाश्नीयात्। बलाकां वारुणीकुल्माषाभ्यां, काकमाचीं पिप्पलीमरिचाभ्यां, नाड़ीभङ्गशाककुक्कुटदधीनि च नैकध्यम्। मधु चोष्णोदकानुपानं, पित्तेन वा मांसानि, सुराक्षीरपयसाश्च नैकध्यम्। सौवीरकेण सह तिलशष्कुलीं, मद्यैः सक्षौद्रविकारान्, गुडेन काकमाचीं, मधुना मूलकं, गुड़ेन वाराहं, मधुना च सह विरुद्धम्। क्षौद्रेण मूलकम्। आम्रजाम्बवाम्बाविच्छूकरगोधाश्च सर्वाश्च मत्स्यान् विशेषेण चिलिचिमं पयसा। कदलीफलं तालफलेन पयसा दध्ना तक्रेण वा। लकुचफलं पयसा दध्ना माषसूपेन वा। मधुना घृतेन च। प्राक् पयसः पयसोऽन्ते वा।

अत ऊर्ध्वविरुद्धान् वक्ष्यामः। कपोतान् सर्षपतैलभृष्टान् नाद्यात्। कपिञ्जलमयूरलावतित्तिरिगोधाश्चैरण्डदार्वग्निसिद्धा एरण्डतैल सिद्धा वा नाद्यात्। काम्यभाजने दशरात्रपर्य्युषितं सर्पिर्मधु चोष्णेरुष्णे वा। मत्स्यपरिपचने शृङ्गवेरपरिपचने वा सिद्धां काकमाचीं, तिलकल्कसिद्धमुपोदिकाशाकम्। नारिकेलेन वराहवसापरिभृष्टां बलाकाम्। भासमङ्गारशूल्य नाश्नीयादिति।

अतो मानविरुद्धान् वक्ष्यामः। मध्वभ्वनो मधुसर्पिषी मानतस्तुल्ये नाश्नीयात्। स्नेहौ मधुक्षौद्रौ जलक्षौद्रौ वा विशेषादान्तरीक्षोदकानुपानौ।

अत ऊर्द्धं रसद्रव्याणि रसतो वीर्य्यतो विपाकतश्च विरुद्धानि वक्ष्यामः । तत्र मधुराम्लौ रसवीर्य्यविरुद्धौ मधुरलवणौ च मधुरकटुकौ सर्वतः । मधुरतिक्तौ रसविपाकाभ्यां मधुरकषायौ चाम्ललवणौ रसतः । अम्लकटुकौ रसविपाकाभ्यामम्लतिक्तावाम्लकषायौ च सर्वतः । लवणकटुकौ रसविपाकाभ्यां लवणतिक्तौ लवणकषायौ च सर्वतः । कटुतिक्तौ रसवीर्य्याभ्यां कटुकषायौ तिक्तकषायौ च रसतः । तरतमयोगयुक्तांश्च भावानतिरूक्षानतिस्निग्धानत्युष्णानतिशीतानित्येवमादीन् विवर्जयेत् ।

विरुद्धान्येवमादीनि रसवीर्य्यविपाकतः ।
तान्येकान्ताहितान्येव शेषं विद्याद्धिताहितम् ॥
व्याधिमिन्द्रियदौर्बल्यं मरणञ्चाधिगच्छति ।
विरुद्धरसवीर्य्यादीन् भुञ्जानोऽनात्मवान्नरः ॥
यत्किञ्चिद्दोषमुत्क्लेश्य भुक्तं कायान्न निर्हरेत् ।
रसादिष्वयथार्थं वा तद्विकाराय कल्पते ॥
विरुद्धाशनजान् रोगान् प्रतिहन्ति विरेचनम् ।
वमनं शमनं वापि पूर्वं वाहितसेवनम् ॥
सात्म्यतोऽल्पतया वापि दीप्ताग्नेस्तरुणस्य च ।
स्निग्धव्यायामबलिनां विरुद्धं वितथं भवेत् ॥

व्यायामशीलो बलवान् स्निग्धस्य
स्निग्धोऽग्निमांश्चापि महाशनश्च ।
आप्नोति रोगान् न विरुद्धजाता-
नभ्यासतो बाल्यतया च जन्तुः ॥

त्रिंशोऽध्यायः ।

अथ दोषवर्णनम् ।

वातपित्तश्लेष्माण एव देहसम्भवहेतवः । तैरव्याप-न्नैरधोमध्योर्ध्वसन्निविष्टैः शरीरमिदं धार्यतेऽगारमिव स्थूणाभिस्तिसृभिरतश्च त्रिस्थूणमाहुरेके । त एव च व्या-पन्नाः प्रलयहेतवस्तैरेभिरेव शोणितचतुर्थैः सम्भवस्थिति-प्रलयैश्च्यविरहितं शरीरं भवति ।

नत्तैं देहः कफादस्ति न पित्तान्न च मारुतात् ।
शोणितादपि वा नित्यं देह एतैस्तु धार्यते ॥

दोषस्थानान्यत ऊर्ध्वं वक्ष्यामः । तत्र समासेन वातः श्रोणिगुदसंश्रयः । श्रोणिगुदयोरुपर्यधो नाभेः पक्वाशयः पक्वामाशयमध्यं पित्तस्य । आमाशयः श्लेष्मणः ।

अतः परं पञ्चधा विभज्यन्ते
दोषाः । यथा

उदानस्तदनुप्राणः समानोऽपान एव च ।
व्यानश्चैतानि नामानि वायोः स्थानप्रभेदतः ॥
कण्ठे हृदि तथाधस्ताच्छ्रोत्रवक्त्रे मलाशये ।
सकलेऽपि शरीरेऽसौ क्रमेण पवनो वसेत् ॥

अन्यत्र । हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः ॥

पित्तस्य यकृत्प्लीहानौ हृदयं दृष्टिस्त्वक् पूर्वोक्तश्च ।

श्लेष्मणस्तूर शिरःकण्ठसन्धय इति पूर्वोक्तञ्च । एतानि खलु दोषाणां स्थानान्यव्यापन्नानाम् ।

विसर्गादानविक्षेपैः सोमसूर्यानिला यथा ।
धारयन्ति जगद्देहं कफपित्तानिलास्तथा ॥

तत्र वायोः स्वरूपमाह ।

दोषधातुमलादीनां नेता शीघ्र समीरणः ।
रजोगुणमयः सूक्ष्मः शीतो रूक्षो लघुश्चलः ॥

अन्यच्च । उत्साहोच्छ्वासनिश्वासचेष्टावेगप्रवर्त्तनैः ।
सम्यग्गत्या च धातूनामिन्द्रियाणाञ्च पाटवैः ॥
अनुग्रहात्स्वविकृतौ हृदयेन्द्रियचित्तधृक् ।
रजोगुणमयः सूक्ष्मः शीतो रूक्षो लघुश्चलः ॥
खरो मृदुर्योगवाही सयोगादुभयार्थकृत् ।
दाहकृत्तेजसा युक्त शीतकृत्सोमसंश्रयात् ॥
विभागकरणाद्वायुः प्रधानं दोषसंग्रहे ।
पक्वाशयकटीसक्थिस्रोतोऽस्थिस्पर्शनेन्द्रियम् ॥
स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः ।
उदानो नाम यस्तूर्ध्वमुपैति पवनोत्तमः ॥
तेन भाषितगीतादिप्रवृत्तिः कुपितस्तु सः ।
ऊर्ध्वजत्रुगतान् रोगान् विदधाति विशेषतः ॥
यो वायु प्राणनामासौ मुखं गच्छति देहधृक् ।
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते ॥
प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान् ।
आमपक्वाशयचरः समानो वह्निसंगतः ॥
सोऽग्न पचति तज्जांश्च विशेषान् विवेचयति हि ।

स दुष्टो वह्निमान्द्यातिसारगुल्मान् करोति हि ॥
पक्वाशयालयोऽपानः काले कर्षति चाध्ययम् ।
समीरणः शुक्रमूत्रशुक्रगर्भार्त्तवान्त्रधः ॥
कुद्धस्तु कुरुते रोगान् घोरान् बस्तिगुदाश्रयान् ।
शुक्रदोषप्रमेहांश्च व्यानापानप्रकोपजान् ॥
कृत्स्नदेहचरो व्यानो रससंवाहनोद्यतः ।
स्वेदासृक्स्रावणाद्यापि पञ्चधा चेष्टयत्यपि ॥
गत्युत्क्षेपणोत्क्षेपनिमेषोन्मेषणादिका ।
प्रायः सर्वाः क्रियास्तस्मिन् प्रतिबद्धाः शरीरिणाम् ॥
प्रस्यन्दनञ्चोद्वहनं पूरणञ्च विरेचनम् ।
धारणञ्चेति पञ्चैताश्चेष्टाः प्रोक्ता नभस्वतः ॥
कुद्धः स कुरुते रोगान् प्रायशः सर्वदेहगान् ।
युगपत् कुपिता एते देहं भिद्युरसंशयम् ॥

अथ पित्तस्य स्वरूपमाह ।

पित्तं तीक्ष्णं द्रवं पूति नीलं पीतं तथैव च ।
उष्णं कटुरसञ्चैव विदग्धञ्चाम्लमेव च ॥
पाचकं रञ्जकञ्चापि साधकालोचके तथा ।
भ्राजकञ्चेति पित्तस्य नामानि स्थानभेदतः ॥
अग्न्याशये यकृत्प्लीह्नोर्हृदये लोचनद्वये ॥
त्वचि सर्वशरीरेषु पित्तं निवसति क्रमात् ॥
पाचकं पचते भुक्तं शेषाग्निबलवर्द्धनम् ।
रसमूत्रपुरीषाणि विरेचयति नित्यशः ॥
रञ्जकं नाम यत्पित्तं तद्रसं शोणितं नयेत् ।
यत्तु साधकमंज्ञं तत् कुर्य्याद्बुद्धिं धृतिं स्मृतिम् ॥

यदालोचकसंज्ञं तद्रूपमग्रहणकारणम् ।
भ्राजकं कान्तिकारि स्यालेपाभ्यङ्गादिपाचकम् ॥

अथ श्लेष्मस्वरूपमाह ।

श्लेष्मा श्लेतो गुरुः स्निग्धः पिच्छिलः शीतलस्तथा ।
मधुरस्त्वविदग्धः स्याद्दिग्धो लवणः स्मृतः ॥
कफस्यैतानि नामानि क्लेदनश्चावलम्बनः ।
रसनः स्नेहनश्चापि श्लेष्मणः स्थानभेदतः ॥
आमाशयेऽथ हृदये कण्ठे शिरसि सन्धिषु ।
स्थानेष्वेषु मनुष्याणां श्लेष्मा तिष्ठत्यनुक्रमात् ॥
क्लेदनः क्लेदयत्यन्नमामाशयगतं तथा परानपि ।
अनुगृह्णाति च श्लेष्मस्थानान्युदककर्मणा ॥
विकसन्धारणश्चापि विदधात्यवलम्बनः ॥
उभावपि ततः सौम्यौ तिष्ठतश्चान्तिके यतः ।
यतो रसान् विजानीतो रसनारसनौ समौ ॥
स्नेहनः स्नेहदानेन समस्तेन्द्रियतर्पणः ।
श्लेष्मणः सर्वसन्धीनां संश्लेषं विदधात्यसौ ॥

अथ तेषां चयप्रकोपोपशम-
कारणम् ।

इह तु वर्षाशरद्धेमन्तवसन्तग्रीष्मप्रावृषः षड्ऋतवो भवन्ति दोषोपचयप्रकोपशमनिमित्तम् । ते तु भाद्रपदादिना द्विमासिकेन व्याख्याताः । तद्यथा, भाद्रपदाश्वयुजौ वर्षाः । कार्त्तिकमार्गशीर्षौ शरत् । पौषमाघौ हेमन्तः । फाल्गुनचैत्रौ वसन्तः । वैशाखज्यैष्ठौ ग्रीष्मः । आषाढ़श्रावणौ प्रावृडिति । तत्र वर्षासूपधयस्तरुणोऽल्पवीर्य्या आपद्या-

प्रसन्ना: क्षितिमलप्रायास्ता उपयुज्यमाना नभसि मेघावतते जलप्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातविष्टब्धाग्नीनां विदह्यन्ते विदाहात् पित्तसञ्चयमापादयन्ति स सञ्चय शरदि प्रविरलमेघे विमलसूपश्यति यङ्गेऽर्ककिरणप्रविलापित. पैत्तिकान् व्याधीन् जनयति । ता एवौषधय: कालपरिणामात्परिणतवीर्या बलवत्यो हैमन्ते भवन्त्यापश्च प्रसन्ना: स्निग्धा: अत्यर्थं गुर्व्यस्ता उपयुज्यमाना मन्दकिरणत्वाज्ञानो: सतुषारपवनोपस्तम्भितदेहानां देहिनामविदग्धा: स्नेहाच्छैत्याद्गौरवादुपलेपाच्च श्लेष्ण: सञ्चयमापादयन्ति स सञ्चयो वसन्तेऽर्करश्मिप्रविलापित ईषत्स्तब्धदेहानां देहिना श्लैष्मिकान् व्याधीन् जनयति । ता एवौषधयो निदाघे निःसारा रूक्षा अतिमात्रं लघ्वो भवन्त्यापश्च ता उपयुज्यमाना: सूर्य्यप्रतापोपशोषितदेहानां देहिनां रौक्ष्याल्लघुत्वाद्वैशद्याच्च वायो: सञ्चयमापादयन्ति स सञ्चय: प्रावृषि चात्यर्थं जलोपक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातवर्षैरितो वातिकान् व्याधीन् जनयति । एवमेष दोषाणां सञ्चयप्रकोपहेतुरुक्त: ।

तत्र वर्षाहैमन्तग्रीष्मेषु सञ्चितानां दोषाणां शरद्वसन्तप्रावृट्सु च प्रकुपितानां निर्हरणं कर्त्तव्यम् । तत्र पैत्तिकानां व्याधीनामुपशमो हैमन्ते श्लैष्मिकाणां निदाघे वातिकानां घनात्यये स्वभावत एव त एते सञ्चयप्रकोपोपशमा व्याख्याता: ।

तत्र पूर्वाह्णे वसन्तस्य लिङ्गं मध्याह्ने ग्रीष्मस्य अपराह्णे

प्रावृषः प्रदोषे वार्षिकं शारदमर्द्धरात्रे प्रत्यूषसि हैमन्तं वसन्तमुपलक्षयेत् । एवमहोरात्रमपि वर्षमिव शीतोष्णवर्षलक्षणं दोषोपचयप्रकोपोपशमैर्जानीयात् ।

सञ्चितानां दोषाणां स्रोतःपूर्णकोष्ठता पीतावभासता मन्दोष्मता चाङ्गानां गौरवमालस्यं चयकारणविद्वेषश्चेति लिङ्गानि भवन्ति । तत्र प्रथम क्रियाकालः ।

अत ऊर्द्धं प्रकोपणानि वक्ष्यामः । तत्र बलवद्विग्रहातिव्यायाम-व्यवायाध्ययन-प्रयतनप्रधावन-प्रपीडनाभिघात-लङ्घन-प्लवन-तरण-रात्रिजागरण-भारहरण-गजतुरङ्ग-रथपदातिचर्य्या-कटुकषायतिक्तरूक्षलघुशीतवीर्य्य-शुष्कशाक-वल्लूर-वरकोद्दालक-कोरदूषश्यामाक-नीवार-मुद्ग-मसूराढकी-हरेणु-कलाय-निष्पावनिष्पाव-विषमाशनाध्यशन-वात-मूत्रपुरीष-शुक्रच्छर्दि-क्षवथूद्गार-वाष्पवेग-विघातादिभिर्विशेषैर्वायुः प्रकोपमापद्यते ।

स शीतास्रप्रवातेषु वर्षास्वन्ते च विशेषतः ।
प्रत्यूषस्यपराह्णे च जीर्णेऽन्ने च प्रकुप्यति ॥

क्रोधशोकभयायासोपवासविदग्धमैथुनोपगमनकट्वम्ललवणतीक्ष्णोष्णलघुविदाहितिलतैलपिण्याककुलत्थसर्षपातसीहरितकशाकगोधामत्स्याजाविकमासदधितक्रकूर्चिकामसुरावीरकसुराविकाराम्लफलकट्वराक्षप्रभृतिभिः पित्तं प्रकोपमापद्यते ।

तदुष्णकाले च मेघान्ते च विशेषतः ।
मध्याह्ने चार्द्धरात्रे च जीर्य्यत्यन्ने च कुप्यति ॥

दिवास्वप्न-व्यायामालस्य-मधुराम्ललवण-शीतस्निग्धगुरु-

पिच्छिलाभिष्यन्दिहायनक-यवकनैषधकट-माषमहामाष-गोधूमतिलपिष्टविकृति-दधिदुग्धक्षीरा-पायसेक्षुविकारा-नूपोदकमांसवसा-बिसमृणाल-कशेरुकशृङ्गाटकमधुरवल्ली-फलसमश्नाध्यशनप्रभृतिभिः श्लेष्मा प्रकोपमापद्यते ।

स शीतैः शीतकाले च वसन्ते च विशेषतः ।

पूर्वाह्णे च प्रदोषे च भुक्तमात्रे प्रकुप्यति ॥

पित्तप्रकोपकैरेव चाभीक्ष्णं द्रवस्निग्धगुरुभिराहारै-र्दिवास्वप्न-क्रोधानलातपश्रमाभिघाताजीर्ण-विरुद्धाध्यशन-प्रभृतिभिरसृक् प्रकोपमापद्यते ।

यस्माद्रक्तं विना दोषैर्न कदाचित् प्रकुप्यति ।

तस्मात्तस्य यथादोषं कालं विद्यात् प्रकोपणे ॥

तेषां प्रकोपात् कोष्ठतोदसञ्चरणाग्निकापिपासा-परिदाहान्वितः षड्दयोत्क्लेदाश्च जायन्ते । तत्र द्वितीयः क्रियाकालः ।

अत ऊर्ध्वं प्रसरं वक्ष्यामः । तेषामेभिरातङ्कविशेषैः प्रकुपितानां पर्य्युषितकिण्वोदकपिष्टसमवाय इवोद्रिक्तानां प्रसरो भवति तेषां वायुर्गतिमत्त्वात् प्रसरणहेतुः सत्यप्य-चैतन्ये स हि रजोभूयिष्ठो रजश्च प्रवर्त्तकं सर्वभावानाम् । यथा, महानुदकसञ्चयोऽतिबद्धः सेतुमवदार्य्यापरेणोदकेन व्याप्तिमः सर्वतः प्रधावत्येवं दोषाः कदाचिदेकशो द्विशः समस्ताः शोणितसहिता वानेकधा प्रसरन्ति । तद्यथा, वातः पित्तं श्लेष्मा शोणितम् । वातपित्ते वातश्लेष्माणौ पित्तश्लेष्माणौ वातशोणितेपित्तशोणिते श्लेष्मशोणिते । वातपित्तशोणितानि वातश्लेष्मशोणितानि पित्तश्लेष्मशोणि-

स्थानि। वातपित्तकफा वातपित्तकफशोणितानीत्येवं पञ्चदशधा प्रसरन्ति।

कृत्स्नेऽर्देऽवयवे वापि यत्राङ्गे कुपितो भृशम्।
दोषो विकारं नभसि मेघवत् तत्र वर्षति॥
नात्यर्थं कुपितश्चापि लोनो मार्गेषु तिष्ठति।
निःप्रत्यनीकः कालेन हेतुमासाद्य कुप्यति॥

तत्र वायोः पित्तस्थानगतस्य च पित्तवत् प्रतीकारः पित्तस्य कफस्थानगतस्य कफवत् कफस्य च वातस्थानगतस्य वातवदेव क्रियाविभागः। एवं प्रकुपितानां प्रसरताञ्च वायोर्गमनाटोपौ। उषाचोषपरिदाहधूमायनानि पित्तस्य। अरोचकाविपाकाङ्गसादाञ्छर्दिश्चेति श्लेष्मणो लिङ्गानि भवन्ति। तत्र तृतीयः क्रियाकालः।

अत ऊर्द्धं स्थानसंश्रयं वक्ष्यामः। एवं कुपितास्तांस्तान् शरीरप्रदेशानागत्य तांस्तान् व्याधीन् जनयन्ति। ते यदोदरसन्निवेशं कुर्वन्ति तदा गुल्मविद्रध्युदराग्निसङ्गानाङ्गविसूचिकातिसारप्रभृतीन् जनयन्ति। वस्तिगताः प्रमेहाश्मरीमूत्राघातमूत्रदोषप्रभृतीन्। मेढ्रगता निरुद्धप्रकाशोपदंशशूकदोषप्रभृतीन्। गुदगता भगन्दरार्शःप्रभृतीन् वृषणगता वृद्धीः। ऊर्द्धजत्रुगतास्तूर्द्धजान्। त्वक्सांसशोणितस्थाः क्षुद्ररोगान् कुष्ठानि विसर्पांश्च। मेदोगता ग्रन्थ्यपच्यर्बुदगलगण्डालजीप्रभृतीन्। अस्थिगता विद्रध्यनुशयीप्रभृतीन्। पादगताः श्लीपदवातशोणितवातकण्टकप्रभृतीन्। सर्वाङ्गगता ज्वरसर्वाङ्गरोगप्रभृतीन्।

तेषामेवमभिनिविष्टानां पूर्वरूप प्रादुर्भावस्तत्प्रतिरोधं वक्ष्याम: । तत्र पूर्वरूपगतेषु चतुर्थ: क्रियाकाल: ।

अत ऊर्ध्वं व्याधिदर्शनं वक्ष्याम: । शोफार्बुदग्रन्थिविद्रधिविसर्पप्रभृतीनां प्रव्यक्तलक्षणता ज्वरातीसारप्रभृतीनाञ्च । तत्र पञ्चम क्रियाकाल: ।

अत ऊर्ध्वमेतेषामवदीर्णानां व्रणभावमापन्नानां षष्ठ: क्रियाकाल: ज्वरातिसारप्रभृतीनाञ्च दीर्घकालानुबन्ध: । तत्र प्रतिक्रियमाणोऽसाध्यतामुपयान्ति ।

सञ्चयञ्च प्रकोपञ्च प्रसरं स्थानसंश्रयम् ।
व्यक्तिं भेदञ्च यो वेत्ति दोषाणा स भवेद्भिषक् ॥
सञ्चयेऽपहता दोषा लभन्ते नोत्तरा गती: ।
ते तूत्तरासु गतिषु भवन्ति बलवत्तरा: ।
सर्वैर्भावैस्त्रिभिर्वापि द्वाभ्यामेकेन वा पुन: ॥
संसर्गे कुपित: क्रुद्धं दोषं दोषोऽनुधावति ।
संसर्गे यो गरीयान् स्यादुपक्रम्य: स वै भवेत् ॥
शेषदोषाविरोधेन सन्निपाते तथैव च ॥

एकत्रिंशोऽध्यायः।

अथातो व्याधिसमुद्देशीयमध्यायं

व्याख्यास्यामः।

द्विविधा व्याधयः शस्त्रसाध्याः स्नेहादिक्रियासाध्याश्च। तत्र शस्त्रसाध्येषु स्नेहादिक्रिया न प्रतिषिध्यते। स्नेहादिक्रियासाध्येषु शस्त्रकर्म्म न क्रियते। अस्मिन् पुनः शास्त्रे सर्वतन्त्रसामान्यात् सर्वेषां व्याधीनां यथास्थूलमवरोधः क्रियते। प्रागभिहितं तद्दुःखसंयोगो व्याधिरिति तच्च दुःखं त्रिविधमाध्यात्मिकमाधिभौतिकमाधिदैविकमिति। तत्तु सप्तविधे व्याधावुपनिपतति। ते पुनः सप्तविधा व्याधयः। तद्यथादिबलप्रवृत्ता जन्मबलप्रवृत्ता दोषबलप्रवृत्ताः सङ्घातबलप्रवृत्ताः कालबलप्रवृत्ता दैवबलप्रवृत्ताः स्वभावबलप्रवृत्ता इति। तत्रादिबलप्रवृत्ता ये शुक्रशोणितदोषान्वयाः कुष्ठार्शःप्रभृतयः तेऽपि द्विविधा मातृजाः पितृजाश्च। जन्मबलप्रवृत्ता ये मातुरपचारात् पङ्गुजात्यन्धबधिरमूकमिमिणवामनप्रभृतयो जायन्ते तेऽपि द्विविधा रसजता दौहृदापचारजताश्च। दोषबलप्रवृत्ता य आतङ्कसमुत्पन्ना मिथ्याहाराचारभवाश्च तेऽपि द्विविधाः आमाशयसमुत्थाः पक्वाशयसमुत्थाश्च पुनश्च द्विविधा शारीरा मानसाश्च त एव आध्यात्मिकाः। सङ्घातबलप्रवृत्ता य

आगन्तवो दुर्बलस्य बलवद्विग्रहात् तेऽपि द्विविधाः शस्त्रकृता व्यालादिकृताश्च। एत आधिभौतिकाः। कालबलप्रवृत्ता ये शीतोष्णवातवर्षाप्रभृतिनिमित्तास्तेऽपि द्विविधा व्यापन्नर्तुकृता अव्यापन्नर्तुकृताश्च। दैवबलप्रवृत्ता ये देवद्रोहादभिशस्तका अथर्वकृता उपसर्गकृताश्च तेऽपि द्विविधा विद्युदशनिकृताः पिशाचादिकृताश्च पुनश्च द्विविधाः संसर्गजा आकस्मिकाश्च। स्वभावबलप्रवृत्ताः क्षुत्पिपासाजराशत्युनिद्राप्रभृतयस्तेऽपि द्विविधाः कालकृता अकालकृताश्च तत्र परिरक्षणकृताः कालकृता अपरिरक्षणकृता अकालकृता एत आधिदैविका तत्र सर्वव्याध्यवरोधः।

सर्वेषाञ्च व्याधीनां वातपित्तश्लेष्माण एव मूलं तल्लिङ्गत्वाद्दृष्टफलत्वादागमाच्च यथाहि कृत्स्नं विकारजातं विश्वरूपेणावस्थितं सत्त्वरजस्तमांसि न व्यतिरिच्यन्ते। एवमेव कृत्स्नं विकारजातं विश्वरूपेणावस्थितमव्यतिरिच्य वातपित्तश्लेष्माणो वर्त्तन्ते। दोषधातुमलसंसर्गादायतनविशेषान्निमित्ततश्चैषां विकल्पा भवन्ति। दोषदूषितेष्वर्थेषु धातुषु संज्ञा क्रियते रसजोऽयं शोणितजोऽयं मांसजोऽयं मेदोजोऽयमस्थिजोऽयं मज्जजोऽयं शुक्रजोऽयं व्याधिरिति। तत्रान्नाश्रद्धारोचकाविपाकाङ्गमर्द्दज्वरहृल्लासलसिकौरवहृत्पाण्डुरोगमार्गोपरोधकार्श्यवैरस्याङ्गसादाकालवलिपलितदर्शनप्रभृतयो रसदोषजा विकाराः। कुष्ठविसर्पपिड़कामशकनीलिकातिलकालकव्यच्छव्यङ्गन्यसमस्नीहविद्रधिगुल्मवातशोणितार्शोऽर्बुदाङ्गमर्द्दोत्क्लेदरक्तपित्तप्रभृतयो रक्तदोषजा गुदमुख-

मेढ्पाकाश्च । अधिमांसार्बुदार्शोऽधिजिह्वोपकुशगलशुण्डि-कालजौमाससंघातौष्ठप्रकोप—गलगण्डगण्डमालाप्रभृतयो मांसदोषजाः । ग्रन्थिह्रडिगलगण्डार्बुदमेदोजौष्ठप्रकोप-मधुमेहातिस्थौल्यातिस्वेदप्रभृतयो मेदोदोषजाः । अस्थ्यधिदन्तास्थितोदशूलकुलत्थप्रभृतयोऽस्थिदोषजाः । तमो-दर्शनमूर्च्छाभ्रमपर्वशैरवस्थूलमूलीरुजहानिलाभिष्यन्दप्रभृ-तयो मज्जदोषजाः क्लैव्याप्रहर्षशुक्राश्मशर्करामेहशुक्र-दोषादयश्च तद्दोषजाः । स्वेदोषाः सङ्गोऽतिप्रवृत्तिर्वा मलायतनदोषाः । इन्द्रियाणामप्रवृत्तिरयथाप्रवृत्तिर्वेन्द्रियाय-तनदोषाः । इत्येवं समास उक्तो विस्तरनिमित्तानि चैषां प्रतिरोगं वक्ष्यामः ।

कुपितानां हि दोषाणां शरीरे परिधावताम् ।
यत्र सङ्गः खवैगुण्यात्तत्रोत्पद्यते ॥

ते व्याधयः पुनस्त्रिधा विभज्यन्ते । यथा—

साध्या याप्या असाध्याश्च व्याधयस्त्रिविधा स्मृताः ।
सुखसाध्यः कष्टसाध्यो द्विविध साध्य उच्यते ॥
याप्यनीयन्तु तं विद्यात् क्रिया धारयते हि यम् ।
क्रियायान्तु निवृत्तायां सद्यो यश्च विनश्यति ॥
प्रायो क्रिया धारयति सुखिनं याप्यमातुरम् ।
प्रयतिष्यदिवागारं स्तम्भो यत्नेन योजितः ॥
साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा ।
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम् ॥

रोगारम्भकदोषस्य प्रकोपादुपजायते ।
योऽन्यो विकारः स बुधैरुपद्रव इहोदितः ॥

द्वाविंशोऽध्यायः ।

लङ्घनबृंहणीयाध्यायः ।

तपःस्वाध्यायनिरतानात्रेयः शिष्यसत्तमान् ।
यडग्निवेशप्रमुखानुक्तवान् परिचोदयन् ॥
लङ्घनं बृंहणं काले रूक्षणं स्नेहनं तथा ।
स्वेदनं स्तम्भनञ्चैव जानीते यः स वै भिषक् ॥
इति तमेवमुक्तवन्तं भगवन्तमात्रेयमग्निवेश उवाच ।
भगवल्लङ्घणं किंस्विल्लङ्घनीयाश्च कीदृशाः ।
बृंहणं बृंहणीयाश्च रूक्षणीयाश्च रूक्षणम् ॥
स्नेहनं स्नेहनीयाश्च स्वेदाः स्वेद्याश्च के मताः ।
स्तम्भन स्तम्भनीयाश्च वक्तुमर्हसि तद्गुरो ॥
लङ्घनप्रभृतीनाञ्च षण्णामेषां समासतः ।
कृताकृतातिरिक्तानां लक्षणं वक्तुमर्हसि ॥

तदग्निवेशस्य वचो निशम्य गुरुरब्रवीत् ।
यत्किञ्चिल्लाघवकरं देहे तल्लङ्घनं स्मृतम् ॥
बृहत्त्वं यच्छरीरस्य जनयेत्तच्च बृंहणम् ।
रौक्ष्यं खरत्वं वैशद्यं यत् कुर्य्यात्तद्धि रूक्षणम् ॥
स्नेहनं स्नेहविष्यन्दमार्द्रवक्लेदकारकम् ।
स्तम्भगौरवशीतघ्नं स्वेदनं स्वेदकारकम् ॥
स्तम्भनं स्तम्भयति यद्गतिमन्तं चलं द्रवम् ॥
लघूष्णतीक्ष्णविशदं रूक्षं सूक्ष्मं खरं सरम् ।

कठिनञ्चैव यद्द्रव्यं प्रायस्तल्लङ्घनं स्मृतम् ॥
गुरुशीतमृदुस्निग्धं बहुलं स्थूलपिच्छिलम् ।
प्रायोमन्दं स्थिरं श्लक्ष्णं द्रव्यं बृंहणमुच्यते ॥
रूक्षं लघु खरं तीक्ष्णमुष्णं स्थिरमपिच्छिलम् ।
प्रायशः कठिनञ्चैव यद्द्रव्यं तद्धि रूक्षणम् ॥
द्रवं सूक्ष्मं सरं स्निग्धं पिच्छिलं गुरु शीतलम् ।
प्रायोमन्दं मृदु च यद्द्रव्यं तत् स्नेहनं मतम् ॥
उष्णं तीक्ष्णं सरं स्निग्धं रूक्षं सूक्ष्मं द्रवं स्थिरम् ।
द्रव्यं गुरु च यत् प्रायस्तद्धि स्वेदनमुच्यते ॥
शीतं मन्दं मृदु श्लक्ष्णं रूक्षं सूक्ष्मं द्रवं स्थिरम् ।
यद्द्रव्यं लघु चोद्दिष्टं प्रायस्तत् स्तम्भनं स्मृतम् ॥

चतुष्प्रकारा संशुद्धिः पिपासा मारुतातपौ ।
याचनान्युपवासश्च व्यायामश्चेति लङ्घनम् ॥
प्रभूतश्लेष्मपित्तास्रमलाः संदुष्टमारुताः ।
बृहच्छरीरा बलिनो लङ्घनीया विशुद्धिभिः ॥
येषां मध्यबला रोगाः कफपित्तसमुत्थिताः ।
वक्ष्यतीसारकद्रोगविसूच्यलसकज्वराः ॥
विबन्धगौरवोद्गारकृच्छ्रासारोचकादयः ।
पाचनैस्तान् भिषक् प्राज्ञः प्रायेणादावुपाचरेत् ॥
एत एव यथोद्दिष्टा येषामल्पबला गदाः ।
पिपासानियहैस्तेषामुपवासैश्च तान् जयेत् ॥
रोगान् जयेन्मध्यबलान् व्यायामातपमारुतैः ।
बलिनां किं पुनर्येषां रोगाणामवरं बलम् ॥
त्वग्दोषाणां प्रमूढानां स्निग्धाभिष्यन्दि बृंहिणाम् ।

शिशिरे लङ्घनं प्रस्तमपि वातविकारिणाम् ॥
अदिग्धविडमक्लिष्टवयस्थस्वास्थ्यचारिणाम् ।
सुगमल्पविहङ्गानां मांसं बृंहणमुच्यते ॥
क्षीणाः क्षताः क्षया वृद्धा दुर्बलाः नित्यमध्वगाः ।
स्त्रीमद्यनित्या ग्रीष्मे च बृंहणीया नराः स्मृताः ॥
शोषार्शोग्रहणीदोषैर्व्याधिभिः कर्शिताश्च ये ।
क्रव्यात्सरसास्तेषां बृंहणा लघवो मताः ॥
स्नानमुत्सादनं स्वप्नो मधुराः स्नेहबस्तयः ।
शर्कराक्षीरसर्पींषि सर्वदा विद्धि बृंहणम् ॥
कटूतिक्तकषायाणां सेवनं क्षीणसंयमः ।
खलीपिण्याकतक्राणां मद्यादीनाञ्च रूक्षणम् ॥
अभिष्यन्दो महादोषा मर्मस्था व्याधयश्चये ।
जरस्त्रस्रप्रभृतयो रूक्षणीया निदर्शिताः ॥
स्नेहाः स्नेहवितव्याश्च स्नेदाः स्नेद्याश्च ये मताः ।
स्नेहाध्याये मयोक्तास्ते स्नेदाख्ये च सविस्तरम् ॥
द्रवं तनु सरं यावच्छीतीकरणभेषजम् ।
स्वादु तिक्तं कषायञ्च स्तम्भनं सर्वमेव तत् ॥
पित्तस्यारम्भिदग्धा ये क्षुत्तोसारपीड़िताः ।
विषस्नेहातियोगार्त्ताः स्राग्भनीयास्तथाविधाः ॥
वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे ।
हृदयोद्गारकण्ठास्यशुद्धौ तन्द्रालमे गते ॥
स्नेहे जाते रुचौ चापि क्षुत्पिपासासमुद्भवे ।
क्षुत लङ्घनमादेश्य निर्व्यूढे चान्तराग्नि ॥
पर्वभेदोऽङ्गमर्दश्च कासः शीर्षो मुखस्य च ।

क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्बल्यं श्रोत्रनेत्रयोः ॥
मनसः सम्भ्रमोऽभीक्ष्णमूर्द्ध्ववातस्तमोहृदि ।
देहाग्निबलहानिश्च लङ्घनेऽतिकृते भवेत् ॥
बल पुष्ट्युपलम्भश्च कार्श्यदोषविवर्जनम् ।
लक्षणं बृंहिते स्थौल्यमति चात्यर्थबृंहिते ॥
कृतातिकृतचिह्नं यल्लङ्घिते तद्विरूक्षिते ।
स्निग्धितः स्याद्बले लब्धे यथोक्तैः स्नेहयेज्जितैः ।
श्यावता स्तब्धगात्रत्वमुद्गो हनुसंग्रहः ॥
हृद्ग्रहोनिग्रहश्च स्यादतिस्तब्धितलक्षणम् ॥
इति षट् सर्वरोगाणां प्रोक्ताः सम्यगुपक्रमाः ।
साध्यानां साधने सिद्धा मात्राकालानुरोधिन ॥
दोषाणां बहुसंसर्गाल्लक्ष्यैर्व्यस्तेऽप्युपक्रमाः ।
षट्त्वन्तु नातिवर्त्तन्ते चित्त वातादयो यथा ॥
इत्यस्मिन् लङ्घनाध्याये व्याख्याताः षडुपक्रमाः ।
यथाप्रश्न भगवता चिकित्सा यः प्रवर्त्तते ॥

———

त्रयस्त्रिंशोऽध्यायः।

अथ सन्तर्पणीयाध्यायः।

सन्तर्पयति यः स्निग्धैर्मधुरैर्गुरुपिच्छिलैः।
नवान्नैर्नवमद्यैश्च मांसैश्चानूपवारिजैः॥
गोरसैर्गौड़िकैश्चान्नैः पौष्टिकैश्चातिमात्रशः।
चेष्टाद्वेषी दिवास्वप्न-शय्यासन-सुखे रतः॥
रोगास्तस्योपजायन्ते सन्तर्पणनिमित्तजाः।
प्रमेहकण्डूपिड़काकोठपाण्ड्वामयज्वराः॥
कुष्ठान्यामप्रदोषाश्च मूत्रकृच्छ्रमरोचकः।
तन्द्रा क्लैब्यमतिस्थौल्यमालस्यं गुरुगात्रता॥
इन्द्रियस्रोतसां लेपो बुद्धेर्मोहः प्रमीलकः।
शोथाश्चैवंविधाश्चान्ये शोभ्रमप्रतिकुर्वतः॥
शस्तमुल्लेखनं तत्र विरेको रक्तमोक्षणम्।
व्यायामश्चोपवासश्च धूमाः संस्वेदनानि च॥
सक्षौद्रश्चाभयाप्राशः प्रायोरूक्षान्नसेवनम्।
चूर्णप्रदेहा ये चोक्ताः कण्डूकोठविनाशनाः॥
त्रिफलारम्बधं पाठां सप्तपर्णं सवत्सकम्।
मुस्तं निम्बं समदनं जलेनोत्क्वथितं पिबेत्॥
तेन मेहादयो यान्ति नाशमभ्यस्यतो ध्रुवम्।
मात्राकालप्रयुक्तेन सन्तर्पणसमुत्थिताः॥

मुस्तमारग्वधं पाठा विफला देवदारु च ।
खदंष्ट्रा खदिरो निम्बो हरिद्रा त्वक् च वत्सकात् ॥
रसमेषां यथादोषं प्रातः प्रातः पिबेन्नरः ।
सन्तर्पणकृतैः सर्वैर्व्याधिभिर्विप्रमुच्यते ॥
एभिश्चोद्वर्त्तनोद्वर्षस्नानयोगोपयोजितैः ।
त्वग्दोषाः प्रशमं यान्ति तथा स्नेहोपसंस्कृतैः ॥
कुष्ठं गोमेदको हिङ्गु क्षौद्वास्थि चृषणं वचा ।
त्रुवकैले खदंष्ट्रा च खराश्वा चाश्मभेदकः ॥
तक्रेण दधिमण्डेन वदराम्लरसेन वा ।
मूत्रकृच्छ्रं प्रमेहञ्च पीतमेतद्व्यपोहति ॥
तक्राभयाप्रयोगैश्च विफलायास्त्वगेव च ।
अरिष्टानां प्रयोगैश्च यान्ति मेहादयः क्षयम् ॥
उक्तं सन्तर्पणोत्थानामपतर्पणसौषधम् ॥
वक्ष्यन्ते सौषधाश्चोर्द्ध्वमपतर्पणजा गदाः ।
देहाग्निबलवर्णौजःशुक्रमांसपरिक्षयः ॥
ज्वरः कासानुबन्धश्च पार्श्वशूलमरोचकः ।
उन्मादः श्रोत्रदौर्बल्यं प्रलापो हृदयव्यथा ॥
विण्मूत्रसंग्रहः शूलं जङ्घोरुत्रिकसंक्षयम् ।
पर्वास्थिसन्धिभेदश्च ये चान्ये वातजा गदाः ॥
ऊर्द्ध्ववातादयः सर्वे जायन्ते तेऽपतर्पणात् ।
तेषां सन्तर्पणं तज्ज्ञैः पुनराख्यातमौषधम् ॥
सद्यः क्षीणो हि सद्यो वै तर्पणेनोपचीयते ।
नरस्तं सन्तर्पणाभ्यासाच्चिरक्षीणस्तु पुष्यति ॥
देहाग्निदोषभेषज्यमात्राकालानुवर्त्तिना ।

कार्यमत्वरमाणेन भेषजं चिरदुर्बले ॥
हिता मांसरसास्तस्मै पयांसि च घृतानि च ।
स्नानानि वस्तयोऽभ्यङ्गास्तर्पणास्तर्पणाश्च ये ॥
ज्वरकासप्रसक्तानां क्षयाणां मूत्रकृच्छ्रिणाम् ।
तृष्यतामूर्ध्ववातानां वक्ष्यन्ते तर्पणा हिता ॥
शर्करापिप्पलीमूलघृतक्षौद्रसमांशकः ।
शक्तुद्विगुणितो ह्यस्तेषां मन्थ प्रशस्यते ॥
शक्तवो मदिरा क्षौद्र शर्करा चेति तर्पणम् ।
पिबेन्मारुतविण्मूत्रकफपित्तानुलोमनम् ॥
फाणितं शक्तवः सर्पिर्दधिमण्डास्लकाञ्जिकम् ।
तर्पणं मूत्रकृच्छ्रघ्नमुदावर्त्तहरं पिबेत् ॥
मन्थः खर्जूरहरीकाद्राक्षास्लीकदाडिमैः ।
परूषकैः सामलकैर्युक्तो मद्यविकारनुत् ॥
खादुरम्लो जलकृतः सस्नेहो रूक्ष एव वा ।
सद्यः सन्तर्पणो मन्थः स्थैर्यवर्णबलप्रदः ॥
सन्तर्पणोत्था ये रोगा रोगा ये चापतर्पणात् ।
सन्तर्पणीयेऽध्याये ऽस्मिन् भैषधा. पर्किर्त्तिताः ॥

——

चतुस्त्रिंशोऽध्यायः ।

अथ द्रव्यादिविज्ञानीयोऽध्यायः ।

द्रव्यमेव रसादीनां श्रेष्ठं ते हि तदाश्रयाः ।
द्रव्ये रसो गुणो वीर्यं विपाकः शक्तिरेव च ॥
पदार्थाः पञ्च तिष्ठन्ति स्वं स्वं कुर्वन्ति कर्म च ॥

अथ रसाः ।

रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः ।
षड्द्रव्यमाश्रितास्ते च यथापूर्वं बलावहाः ॥
तत्राद्या मारुतं घ्नन्ति त्रयस्तिक्तादयः कफम् ।
कषायतिक्तमधुराः पित्तमन्ये तु कुर्वते ॥
ये रसाः वातशमना भवन्ति यदि तेषु वै ।
स्नैग्ध्यलाघवशैत्यानि न ते हन्युः समीरणम् ॥
ये रसाः पित्तशमना भवन्ति यदि तेषु वै ।
तीक्ष्णोष्णलघुता चैव न ते तत्कर्मकारिणः ॥
ये रसाः श्लेष्मशमना भवन्ति यदि तेषु वै ।
स्नेहगौरवशैत्यानि न ते हन्युः कफं तदा ॥

रसलक्षणमत ऊर्ध्वं वक्ष्यामः ।

तत्र यः परितोषमुत्पादयति प्रह्लादयति तर्पयति जीवयति मुखावलेपं जनयति श्लेष्माणं चाभिवर्द्धयति स मधुरः । यो दन्तहर्षमुत्पादयति मुखास्रावं जनयति अक्ष्णोरुत्पादयति सोऽम्लः । यो भक्तरुचिमुत्पादयति कफ-

प्रसेकं जनयति मार्दवं चापादयति स लवणः। यो गले चोषमुत्पादयति मुखवैशद्यं जनयति भक्तरुचिं चापादयति हर्षञ्च स तिक्तः। यो जिह्वाग्रं बाधते वैशद्यं जनयति शिरो गृह्णाति नासिकाञ्च स्रावयति स कटुकः। यो वर्त्मं परिशोषयति जिह्वां स्तम्भयति कण्ठं बध्नाति हृदयं कर्षति पीडयति च स कषायः।

रसगुणाः।

तत्र मधुररसस्य गुणः।

मधुरो रसो रसरक्तमांसमेदोऽस्थिमज्जौजःशुक्रस्तन्यवर्द्धनश्चक्षुष्यः केश्यो वर्ण्यो बलकृत्स्नायुः शोणितरसप्रसादनो बालवृद्धक्षतक्षीणहितः षट्पदपिपीलिकानामिष्टतमस्तृष्णामूर्च्छादाहप्रशमनः षड्इन्द्रियप्रसादनः कृमिकफकरश्चेति स एवंगुणोऽप्येक एवात्यर्थमासेव्यमानः कासश्वासालसकवमथुवदनमाधुर्य्यस्वरोपघात-कृमिगलगण्डानापादयति तथार्बुदग्रन्थ्युपदंशस्तिगुदोपलेपाभिष्यन्दप्रभृतीन् जनयति।

अम्लरसस्य गुणः।

अम्लो जरणः पाचनः पवननिग्रहणोऽनुलोमनः कोष्ठविदाही वह्निग्लपितः क्लेदनः प्रायशो हृद्यश्चेति स एवंगुणोऽप्येक एवात्यर्थमुपसेव्यमानो दन्तहर्षनयनसम्मीलनरोमसंवेजनकफविलयन-शरीरग्लैथिक्यान्यापादयति तथा क्षतानिहतदग्धदष्टभग्नशूलरुग्ण-प्रच्युतावमूत्रित-विसर्पितक्षिन्नभिन्नविद्रोत्पिष्टादीनि पाचयत्याग्नेयस्वभावात् परिदहति कण्ठमुरो हृदयञ्चेति।

लवणरसस्य गुणः ।

लवणः संशोधनः पाचनो विस्रंसनः क्लेदनः शैथिल्यकरुणः सर्वरसप्रत्यनीको मार्गविशोधनः सर्वशरीरावयवमार्दवकरश्चेति स एवंगुणोऽप्येक एवात्यर्थमासेव्यमानो गात्रकण्डूकोठशोफवैवर्ण्यपुंस्त्वोपघातेन्द्रियोपतापान् तथा मुखाक्षिपाकं रक्तपित्तवातशोणितास्रीकाप्रभृतीनापादयति ।

तिक्तरसस्य गुणः ।

तिक्तश्छेदनो रोचनो दीपनः शोधनः कण्डूकोठतृष्णामूर्च्छाज्वरप्रशमनः स्तन्यशोधनो विषमूत्रक्लेदमेदोवसापूयोपशोषणश्चेति स एवंगुणोऽप्येक एवात्यर्थमुपसेव्यमानो गात्रमन्यास्तम्भाक्षेपकार्दितशिरःशूलभ्रमतोदभेदच्छेदास्यवैरस्याद्यानुपादयति ।

कटुरसस्य गुणः ।

कटुको दीपनः पाचनो रोचन शोधनः स्थौल्यालस्यकफक्रिमिविषकुष्ठकण्डूप्रशमनः सन्धिबन्धविच्छेदनोऽवसादन स्तन्यशुक्रमेदसामुपहन्ता चेति स एवंगुणोऽप्येक एवात्यर्थमुपसेव्यमानो भ्रममदगलतालुओष्ठशोषगात्रसन्तापबलविघातकम्पतोदभेदक्लमरुचरणपार्श्वपृष्ठप्रभृतिषु च वातशूलानुपादयति ।

कषायरसस्य गुणः ।

कषायः संग्राहको रोपणः स्तम्भनः शोधनो लेखनः शोषणः पीडनः क्लेदोपशोषणश्चेति स एवंगुणोऽप्येक एवात्यर्थमुपसेव्यमानो हृत्पीडास्यशोषोदरानाहवाक्यग्रह-

मन्यास्तम्भ-गात्रस्फुरण-चुमुचुमायनाकुञ्चनाक्षेपण-प्रभृतीन् जनयति ।

अथ गुणाः ।

गुरुर्लघुः स्निग्धरूक्षौ तीक्ष्णः श्लक्ष्णः स्थिरः सरः ।
पिच्छिलो विशदः शीत उष्णश्च मृदुकर्कशौ ॥
स्थूलः सूक्ष्मो द्रवः शुष्क आशुर्मन्दः स्मृता गुणाः ॥
गुरु वातहरं पुष्टिश्लेष्मकृच्चिरपाकि च ।
लघु पथ्यं परं प्रोक्तं कफघ्नं शीघ्रपाकि च ॥
स्निग्धं वातहरं श्लेष्मकारि हृद्यं बलावहम् ।
रूक्षं समीरणकरं परं कफहरं मतम् ॥
तीक्ष्णं पित्तकरं प्रायो लेखनं कफवातहृत् ।
भूनभोवारिवातानां वह्नेरेते गुणाः स्मृताः ॥
श्लक्ष्णः स्नेहं विनापि स्यात् कठिनोऽपि हि चिक्कणः ।
स्थिरो वातमलस्तम्भी सरस्तेषां प्रवर्त्तकः ॥
पिच्छिलस्तन्तुलो बल्यः सन्धानः श्लेष्मलो गुरुः ।
क्लेदच्छेदकरः ख्यातो विशदो व्रणरोपणः ॥
शीतस्तु ह्लादनः स्तम्भी मूर्च्छाऽऽस्वेददाहनुत् ।
उष्णो भवति शीतस्य विपरीतश्च पाचनः ॥
प्रसिद्धौ द्वाविमौ लोके गुणौ च मृदुकर्कशौ ।
स्थूलः स्रोत्यकरो देहे स्रोतसामवरोधकृत् ।
देहस्य सूक्ष्मच्छिद्रेषु विशेषात् सूक्ष्ममुच्यते ।
द्रवः क्लेदकरो व्यापी शुष्कस्तद्विपरीतकः ॥
आशुराशुकरो देहे धावत्यम्भसि तैलवत् ।
मन्दः सकलकार्येषु शिथिलोऽल्पोऽपि कथ्यते ॥

अथ प्रस्तावादीपनादयो गुणाः
सलक्षणा लिख्यन्ते ।

पचेन्नामं वह्निकृद्यदीपनं तद्यथा मिषिः ।
पचत्यामं न वह्निञ्च कुर्य्याद्यत्तद्धि पाचनम् ॥
नागकेशरवद्विद्याद्विद्वो दीपनपाचनः ।
न शोधयति यद् दोषान समावोदीरयत्यपि ॥
समीकरोति विषमान् शमनं तद्यथामृता ।
कृत्वा पाकं मलानाञ्च भित्त्वा बन्धमधो नयेत् ॥
तच्चानुलोमनं ज्ञेयं यथा प्रोक्ता हरीतकी ।
पक्तव्यं यदपक्वैव श्लिष्टं कोष्ठे मलादिकम् ॥
नयत्यधः स्रंसनं तद्यथा स्यात् कृतमालकम ।
मलादिकमबद्धं यद्बद्धं वा पिण्डितं मलैः ॥
भित्त्वाधः पातयति यद्विदन कटुकी यथा ।
विपक्वं यदपक्वं वा मलादि द्रवतां नयेत् ॥
रेचयत्यपि तज्ज्ञेयं रेचन त्रिवृता यथा ।
अपक्वं पित्तश्लेष्मात्रचयमूर्द्धं नयेत्तु यत् ॥
वमनं तद्धि विज्ञेयं मदनस्य फलं यथा ।
स्थानदर्हिर्नयेदूर्द्धमधो वा मलसञ्चयम् ॥
देहसंशोधनं तत् स्याद्देवदालीफलं यथा ।
दीपनं पाचनं यत् स्यादुष्णत्वाद्रवशोषकम् ॥
याही तच्च यथा शुण्ठी जीरकं गजपिप्पली ।
रौक्ष्याच्छैत्यात्कषायत्वाल्लघुपाकाच्च यद्भवेत् ॥
वातकृत् स्तम्भनं तत् स्याद्यथा वल्लकटुरुटुकी ।
श्लिष्टान् कफादिकान् दोषानुन्मूलयति यद्बलात् ॥

छेदनं तद्यथा चारो मरिचानि शिलाजतु ।
धातून् मलान् वा देहस्य विशोष्योल्लेखयेच्च यत् ॥
लेखन तद्यथा चौद्रं नीरमुष्णं वचा यवाः ।
यस्माद्व्याद्रवेत् स्रोतो हर्षो वाजीकर हि तत् ॥
यथाखगन्धा मुसली शर्करा च शतावरी ।
यस्माच्छुक्रस्य वृद्धिः स्याच्छुक्रलं हि तदुच्यते ॥
यथा नागबलाद्याः स्युर्बीजञ्च कपिकच्छुजम् ।
दुग्ध माषाश्च भल्लातफलमज्जामलानि च ॥
एतानि जनकानि स्यूरेचकानि च रेतसः ।
प्रवर्त्तिनी स्त्री शुक्रस्य रेचनं वृहतीफलम् ॥
जातीफलं स्तम्भकं स्याल्लालिङ्गं क्षयकारि च ।
रसायनन्तु तज्ज्ञेयं यज्जराव्याधिनाशनम् ॥
यथामृता वदन्ती च गुग्गुलुश्च शिलाजतु ।
पूर्वं व्याप्याखिलं कायं ततः पाकञ्च गच्छति ॥
व्यवायि तद्यथा भङ्गा फेनञ्चाहिसमुद्भवम् ।
सन्धिबन्धांसु शिथिलान् यत्करोति विकाशि तत् ॥
विशोषौजश्च धातुभ्यो यथा क्रमुककोद्रवौ ।
बुद्धिं लुम्पति यद्द्रव्यं मदकारि तदुच्यते ॥
तमोगुणप्रधानञ्च यथा मद्यं सुरादिकम् ।
व्यवायि च विकाशि स्यात् श्लेष्मच्छेदि मदावहम् ॥
आग्नेयं जीवितहरं योगवाहि स्मृतं विषम् ।
निजवीर्य्येण यद्द्रव्यं स्रोतोभ्यो दोषसञ्चयम् ॥
निरस्यति प्रमाथि स्यात्तद्यथा मरिचं वचा ।
पैच्छिल्यान्नीरवाद्द्रव्यं रुद्ध्वा रसवहाः शिराः ॥

धत्ते यद्गौरव तत्स्यादभिष्यन्दि यथा दधि।
विदाहि द्रव्यसङ्कारमम्लं कुर्य्यात्तथा लघु॥
हृदि दाहञ्च जनयेत्याकं गच्छति तच्चिरात्।
गृह्णाति योगवाहि द्रव्यं संसर्गिवस्तुगुणान्॥
पच्यमानं यथैतन्मधुजलतैलाज्यसुतलोहादि॥

अथ वीर्य्यम्।

उष्णशीतगुणोत्कर्षाद्भुवैर्वीर्य्यं द्विधा स्मृतम्।
यत्सर्वमग्निसोमीयं दृश्यते भुवनत्रयम्॥
उष्णं वातकफौ हन्याच्छीघ्रन्तु तनुते जराम्।
शीतं वातकफातङ्कान् कुरुते पित्तहृत्त्वरम्॥
अन्यच्च। तत्रोष्णं भ्रमहृद्ग्लानिस्वेददाहाशुपाकताः।
शमञ्च वातकफयो. करोति शिशिरं पुनः॥
ह्लादनं जीवनं स्तम्भं प्रसादं रक्तपित्तयो.॥

अथ विपाकः।

जाठरेणाग्निना योगाद्यदुदेति रसान्तरम्।
रसानां परिणामान्ते स विपाक इति स्मृतः॥
मिष्टः पटुश्च मधुरमम्लोऽम्लं पच्यते रसः।
कटुतिक्तकषायाणां पाकः स्यात्प्रायशः कटुः॥
प्रायशदेन व्रीहिः स्यात् स्वादुरम्लो विपाकतः।
शिवा कषाया मधुरा शुण्ठी च कटुकापि च॥

विपाकानां गुणाः।

श्लेष्मलश्चमधुरः पाको वातपित्तहरो मतः।
अम्लस्तु कुरुते पित्तं वातश्लेष्मगदापहः॥
कटुः करोति पवनं कफ पित्तञ्च नाशयेत्।

विशेष एष रसतो विपाकानां निदर्शितः ॥

अथ प्रभावः ।

रसादिसाम्ये यत्कर्म विशिष्टं तत्प्रभावजम् ।
दन्ती रसाद्यैस्तुल्यापि चित्रकस्य विरेचनी ॥
मधुकस्य च सङ्गीका घृतं क्षीरस्य दीपनम् ।
प्रभावस्तु यथा धात्री लकुचस्य रसादिभिः ॥
समापि कुरुते दोषत्रितयस्य विनाशनम् ।
क्वचित्तु केवल द्रव्यं कर्म कुर्यात्प्रभावतः ॥
ज्वरं हन्ति शिरोबस्ति सहदेवोज्जटा यथा ॥

अमीमांस्यान्यचिन्त्यानि प्रसिद्धानि स्वभावतः ।
आगमेनोपयोज्यानि भेषजानि विचक्षणैः ॥
प्रत्यक्षलक्षणफलाः प्रसिद्धाश्च स्वभावतः ।
नौषधीर्हेतुभिर्विद्वान् परीक्षेत कथञ्चन ॥
सहस्रेणापि हेतूनां नाम्बष्ठादिर्विरेचयेत् ।
तस्मात्तिष्ठेत्तु मतिमानागमे न तु हेतुभिः ॥

पञ्चविंशोऽध्यायः ।

अथ दिनादिचर्य्या ।

मानवो येन विधिना स्वस्थस्तिष्ठति सर्वदा ।
तमेव कारयेद्वैद्यो यतः स्वास्थ्यं सदेप्सितम् ॥
दिनचर्य्यां निशाचर्य्यामृतुचर्य्यां यथोदिताम् ।
आचरन् पुरुषः स्वस्थः सदा तिष्ठति नान्यथा ॥
ब्राह्मे मुहूर्त्ते बुध्येत स्वस्थो रक्षार्थमायुषः ।
तच्च सर्वौघशान्त्यर्थं स्मरेद्विं मधुसूदनम् ॥
आयुष्यमुषसि प्रोक्तं मलादीनां विसर्जनम् ।
तदन्यकूजनाघ्राणोदरगौरववारणम् ॥
न वेगितोऽन्यकार्य्यः स्याच्च वेगानीरयेद्बलात् ।
कामशोकभयक्रोधमनोवेगान् विधारयेत् ॥
गुदादिमलमार्गाणां शौचं कान्तिबलप्रदम् ।
पवित्रीकरमाख्यातमलक्ष्मीकलिपापहृत् ॥
प्रक्षालनं मतं पाणेः पादयोः शुद्धिकारकम् ।
मलघ्नमहरं वृष्यं चक्षुष्यं राजसापहम् ॥
भक्षयेद्दन्तपवनं द्वादशाङ्गुलमायतम् ।
कनिष्ठिकाग्रवत् स्थूलमृज्वग्रन्थि तथाव्रणम् ॥
एकैकं धर्षयेद्दन्तं मृदुना कूर्चकेन तु ।
दन्तयोधनचूर्णेन दन्तमांसान्यवाधयन् ॥
क्षौद्रत्रिकटुकाक्षेन तैलसिन्धुभवेन वा ।

चूर्णेन तेजोवत्याश्च दन्तावित्यं विशोधयेत्॥
मधूको मधुरे श्रेष्ठः करञ्जः कटुके तथा।
निम्बः स्यात्तिक्तके श्रेष्ठः कषाये खदिरस्तथा॥
समयन्तु समालोक्य दोषञ्च प्रकृतिं तथा।
यथोचितै रसैर्वीर्य्यैर्युक्तं द्रव्यं प्रयोजयेत्॥
तेनास्य मुखवैरस्यदन्तजिह्वास्रजा गदाः।
रुचिवैशद्यलघुता न भवन्ति भवन्ति च॥
न खादेन्नलतास्योष्ठजिह्वादन्तगदेषु तत्।
मुखस्य पाके शोथे च श्वासकासवमीषु च॥
दुर्बलोऽजीर्णभुक्तश्च हिक्कामूर्च्छामदान्वितः।
शिरोरुजार्त्तः सृषितः श्रान्तः पानक्लमान्वितः॥
अर्हति कर्णशूली च नेत्ररोगी नवज्वरी।
वर्ज्ययेद्दन्तकाष्ठन्तु क्षुद्रामययुतोऽपि च॥
जिह्वानिर्लेखनं हैमं राजतं ताम्रजं तथा।
पाटितं मृदु तत्काष्ठं मृदुपत्रमयं तथा॥
दशाङ्गुलं मृदु स्निग्धं तेन जिह्वां लिखेत्सुखम्।
तज्जिह्वामलवैरस्यदुर्गन्धजड़ताहरम्॥
गण्डूषमपि कुर्वीत शीतेन पयसा मुहुः।
कफलश्यामलहरं मुखान्तःशुद्धिकारकम्॥
सुखोष्णोदकगण्डूषः कफारुचिमलापहः।
दन्तजाड्यहरश्चापि मुखलाघवकारकः॥

कटुतैलादिनस्यार्थं नित्याभ्यासेन योजयेत्।
प्रातः श्लेष्मणि मध्याह्ने पित्ते सायं समीरणे॥
सुगन्धवदनाः स्निग्धनिःस्वना विमलेन्द्रियाः।

निर्वलीपलितव्यङ्गा भवेयुर्नस्यशीलिनः ॥
यच्चरावाक्षश्मश्रुकेशरोमाणि कर्त्तयेत् ।
केशश्मश्रुनखादीनां कर्त्तनं संप्रसाधनम् ॥
उत्पाटयेत्तु लोमानि नासाया न कदाचन ।
तदुत्पाटनतो दृष्टे दौर्बल्यं खरया भवेत् ॥
केशयाग्रे प्रकुर्वीत प्रसाधन्या तु साधनम् ।
केशप्रसाधनं केश्यं रजोजन्तु मलापहम् ॥

लाघवं कर्मसामर्थ्यं विभक्तघनगात्रता ।
दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते ॥
व्यायामदृढगात्रस्य व्याधिर्नास्ति कदाचन ।
विरूक्षं वा विदग्धं वा भुक्तं शीघ्रं विपच्यते ॥
भवन्ति शीघ्रं नैतस्य देहे गिरिसमादयः ।
न चैनं सहसाक्रम्य जरा समधिरोहति ॥
न चास्ति सदृशं तेज किञ्चित् स्थौल्यापकर्षणम् ।
स सदा गुणमाधत्ते बलिनां स्निग्धभोजिनाम् ॥
वसन्ते शीतसमये सुतरां स हितो मतः ।
अन्यदापि च कर्त्तव्यो बलार्द्धेन यथा बलम् ॥
हृदयस्थो यदा वायुर्वक्त्रं शीघ्रं प्रपद्यते ।
मुखञ्च शोषं लभते तद्बलार्द्धस्य लक्षणम् ॥
किंवा ललाटे नासायां गात्रसन्धिषु कक्षयोः ।
यदा सञ्जायते स्वेदो बलार्द्धन्तु तदादिशेत् ॥
भुक्तवान् क्षतसम्भोगः कासी श्वासी क्षयी ।
रक्तपित्ती क्षती शोषी न तं कुर्य्यात् कदाचन ॥
अतिव्यायामतः कासो ज्वरश्छर्द्दिः श्रमः क्लमः ।

क्षणा क्षय' प्रतमको रक्तपित्तञ्च जायते ॥

अभ्यङ्ग कारयेन्नित्यं सर्वेष्वङ्गेषु पुष्टिदम् ।
शिर.श्रवणपादेषु तं विशेषेण शीलयेत् ॥
सार्षपं गन्धतैलञ्च यत्तैल पुष्पवासितम् ।
अभ्यङ्गयुत' तैलं न दुष्यति कदाचन ॥
अभ्यङ्गो वातकफहृच्छ्रमश्रान्तिबलं सुखम् ।
निद्रावर्णमृदुत्वायु: कुरुते देहपुष्टिकृत् ॥
अभ्यङ्ग: शीलितो मूर्ध्नि सकलेन्द्रियतर्पक: ।
दृष्टिपुष्टिकरो हन्ति शिरोभूमिगतान् गदान् ॥
केशानां बहुतां दार्ढ्यं मृदुतां दीर्घतां तथा ।
कृष्णतां कुरुते कुर्य्याच्छिरस: पूर्णतामपि ॥
न कर्णरोगा न मल न च मन्याहनुग्रह: ।
नोच्चैःश्रुतिर्न वाधिर्य्यं स्यान्नित्यं कर्णपूरणात् ॥
रसाद्यै: पूरणं कर्णे भोजनात् प्राक् प्रशस्यते ।
तैलाद्यै: पूरणं कर्णे भास्करेऽस्तमुपागते ॥
पादाभ्यङ्गश्च तत्स्थैर्य्यनिद्रादृष्टिप्रसादकृत् ।
पादसम्भ्रमस्तम्भसङ्कोचस्फुटनप्रणुत् ॥
व्यायामक्लमवर्षं पद्भ्यां संमर्दनं तथा ।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगा: ॥
लोमकूपशिराजालधमनीभि: कलेवरम् ।
तर्पयेद्बलमाधत्ते युक्त: स्नेहोऽनुवासने ॥
अद्भि: सम्सिक्तमूलानां तरूणां पल्लवादय: ।
वर्द्धन्ते हि तथा नृणां स्नेहसम्सिक्तधातव: ॥
नवज्वरी त्वजीर्णी च नाभ्यङ्क्तव्य: कथञ्चन ।

तथा विरिक्तो वान्तश्च निरूढो यश्च मानवः ॥
पूर्वयोः कृच्छ्रता व्याधेरसाध्यत्वमथापि वा ।
शेषाणां वा त्विह प्रोक्ता वह्निसादादयो गदाः ॥
उद्वर्तनं कफहरं मेदोघ्नं शुक्रदं परम् ।
बल्यं शोणितकृच्चापि त्वक्प्रसादमृदुत्वकृत् ॥
दीपनं हृद्यमायुष्यं स्नानमोजोबलप्रदम् ।
कण्डूमलश्रमस्वेदतन्द्राल्लड्दाहपाकनुत् ॥
वाह्नेश्च सेकैः शीतायैरुष्णान्तर्याति पौड़ितः ।
नरस्य स्नातमात्रस्य दीप्यते तेन पावकः ॥
शीतेन पयसा स्नानं रक्तपित्तप्रशान्तिकृत् ।
तदेवोष्णेन तोयेन बल्यं वातकफापहम् ॥
शिरःस्नानमचक्षुष्यमल्पोष्णाम्बुना सदा ।
वातश्लेष्मप्रकोपे तु हितं तच्च प्रकीर्त्तितम् ॥
स्नानं ज्वरेऽतिसारे च नेत्रकर्णानिलार्त्तिषु ।
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम् ॥
स्नानस्यानन्तरं सम्यग्वस्त्रेणाङ्गस्य मार्जनम् ।
कान्तिप्रदं शरीरस्य कण्डूत्वग्दोषनाशनम् ॥
कौषेयोर्णिकवस्त्रञ्च रक्तवस्त्रं तथैव च ।
शुक्लन्तु शुभदं वस्त्रं शीतातपनिवारणम् ॥
न कदापि जनैः सद्भिर्धार्य्यं मलिनमम्बरम् ।
तत्तु कण्डूक्रिमिकरं ग्लान्यलक्ष्मीकरं परम् ॥

ततो भोजनवेलायां कुर्य्यादाङ्गल्यदर्शनम्।
तस्य प्रदर्शनं चित्तस्थैर्य्यकृत्तुष्टिवर्द्धनम् ॥
शरीरे जायते नित्यं वाञ्छा नृणां चतुर्विधा ।

बुभुक्षा च पिपासा च सुषुप्सा च रतस्पृहा ॥
भोजनेच्छाविघातास्यादङ्गमर्दोऽरुचिः श्रमः।
तन्द्रा लोचनदौर्बल्यं धातुदाहो बलक्षयः ॥
विघातेन पिपासायाः शोषः कण्ठास्यजो भवेत्।
श्रवणस्यावरोधश्च रक्तशोषो हृदि व्यथा ॥
निद्राविघाततो जृम्भा शिरोलोचनगौरवम् ॥
अङ्गमर्दस्तथा तन्द्रा स्यादजीर्णाक एव च।
अव्यवायान्मेहमेदोवृद्धिः शिथिलता तनोः ॥
बुभुक्षितो न योऽश्नाति तस्याहारेन्धनक्षयात्।
मन्दीभवति कायाग्निर्यथा चाग्निर्निरिन्धनः ॥
आहारं पचति शिखी दोषानाहारवर्जितः।
दोषाणाञ्च क्षये धातून् प्राणान् धातुक्षये पचेत् ॥
आहारप्रीणनः सद्यो बलकृद्देहधारणः।
स्मृत्यायुःशुक्लिवर्णौजःसत्त्वशोभाविवर्द्धनः ॥
यथोक्तगुणसम्पन्नं नरः सेवेत भोजनम् ॥
विचार्य्य दोषकालादीन् कालयोरुभयोरपि।
याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत् ॥
याममध्ये रसोत्पत्तिर्यामयुग्मादलक्षयः।
तुल्यम्भवति पक्वेषु रसदोषमलेषु च ॥
काले वा यदि वाकाले सोऽन्नकाल उदाहृतः।
आहारन्तु नरः कुर्य्यान्निर्हारमपि सर्वदा ॥
उभाभ्यां लक्षणोपेतः स्यात्कोष्ठे हीयते श्रिया।
हैमे वा राजते कांस्ये आयसे काचनिर्मिते ॥
पात्रे पत्रमये वापि नरः कुर्वीत भोजनम्।

सौमनस्यं बलं पुष्टिमुत्साहं हृद्धिमायुषः ॥
स्वादु सङ्ग्रहणत्वन्नमस्वादु च विपर्ययम् ।
अत्युष्णान्नं बलं हन्ति शीतं शुक्रञ्च दुर्जरम् ॥
अतिक्लिन्नं ग्लानिकरं युक्तियुक्तं हि भोजनम् ।
अतिद्रुताग्रिताहारो गुणान् दोषान्न विन्दति ॥
भोज्यं शीतमहृद्यञ्च स्यादविलम्बितमश्नतः ।
मन्दानलो नरो द्रव्यं मात्रागुरु विवर्जयेत् ॥
स्वभावतश्च गुरु यत्तथा संस्कारतो गुरु ।
मात्रागुरुसु मुद्गादिर्माषादिः प्रकृतेर्गुरुः ॥
संस्कारगुरु पिष्टान्नं प्रोक्तमित्युपलक्षणम् ।
गुरूणामर्द्धसौहित्यं लघूनां तृप्तिरिष्यते ॥
द्रवो द्रवोत्तरश्चापि न मात्रा गुरुरिष्यते ।
आहारं षड्विधं चूष्यं पेयं लेह्यं तथैव च ॥
भोज्यं भक्ष्यं तथा चर्व्यं गुरु विद्याद्यथोत्तरम् ।
नाप्राप्तकालं भुञ्जीत हीनाधिकमथापि वा ॥
अप्राप्तकाले भुञ्जानो ह्यसमर्थतनुर्नरः ।
तांस्तान् व्याधीनवाप्नोति मरणञ्चाधिगच्छति ॥
कालेऽतीतेऽश्नतो ह्यन्तोर्वायुनोपहतेऽनले ।
क्षुच्छादिपच्यते भुक्तं न स्याद्भोक्तुं पुनः स्पृहा ॥
हीनमात्रमसन्तोषं करोति च बलक्षयम् ।
आलस्यगौरवाटोपसादांश्च कुरुतेऽधिकम् ॥
तस्मात् सुसंस्कृतं युक्त्या दोषैरेतैर्विवर्जितम् ।
सुखासनो गुणैर्युक्तमुपसेवेत भोजनम् ॥
दौर्मनस्यं भयं क्रोधं भुञ्जानः परिवर्जयेत् ।

प्रक्षालयेदङ्गिराश्च भोजनाग्रे मुहुर्मुहुः ॥
विशुद्धरसनायास्तै रोचतेऽन्नमपूर्ववत्।
क्षुधितस्तु न चाश्नीयात् क्षुधितो न पिबेज्जलम् ॥
क्षुधितस्तु भवेद्गुल्मी क्षुधितस्तु जलोदरी।
न चैकरससेवायां प्रसज्येत कदाचन ॥
एकैकशः समस्तान् वा नाश्नीयाद्रसान् सदा।
कुर्य्यात् क्षीरान्तमाहारं न दध्यन्तं कदाचन ॥
लवणाम्लकटूक्षाणि विदाह्यन्नतियानि तु।
तद्दोषं हर्त्तुमाहारं मधुरेण समापयेत् ॥
एवं भुक्त्वा समाचामेदूर्द्ध्वग्रहणपूर्वकम्।
भोजने दन्तलग्नानि निर्हृत्याचमनं चरेत् ॥
दन्तान्तरगतञ्चान्नं शोधनैनाहरेच्छनैः।
कुर्य्यादनिर्हृतं तत्र मुखस्यानिष्टगन्धताम् ॥
दन्तलग्नमनिर्हार्य्यं लेपं मन्येत दन्तवत्।
न तत्र बहुशः कुर्य्याद्यत्नं निर्हरणं प्रति ॥
रतौ सुप्तोत्थिते स्नाते भुक्ते वान्ते च सङ्गरे।
सभायां विदुषां राज्ञां कुर्य्यात्ताम्बूलचर्वणम् ॥
ताम्बूलमुक्तं तीक्ष्णोष्णं रोचनन्तु वरं सरम्।
मुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम् ॥
हनुदन्तमलध्वंसि जिह्वेन्द्रियविशोधनम्।
मुखप्रसेकशमनं गलामयविनाशनम् ॥
ताम्बूलं नातिसेवेत न विरिक्तो बुभुक्षितः।
देहदीप्तेऽग्निदीप्तौ च वर्णबलक्षयः ॥
शोषः पित्तानिलास्रं स्यादतिताम्बूलचर्वणात्।

ताम्बूलं न हितं दन्तदुर्बलेक्षणरोगिणाम् ॥
विषमूर्च्छामदार्त्तानां क्षयिणां रक्तपित्तिनाम् ।
भुक्त्वा राजवदासीत यावद्वक्त्रमो गतः ॥
ततः पदशतं गत्वा वामपार्श्वं तु संविशेत् ।
शब्दरूपरसान् गन्धान् स्पर्शांश्च मनसः प्रियान् ॥
भुक्तवानुपसेवेत तेनान्नं साधु तिष्ठति ।
व्यायामञ्च व्यवायञ्च धावनमानमेव च ॥
युद्धं गीतञ्च पाठञ्च मुहूर्त्तं भुक्तवांस्त्यजेत् ।
शयनञ्चासनञ्चाति न भजेन्न द्रवोत्तरम् ॥
नाग्न्यातपौ न प्लवनं न यानं नापि वाहनम् ।
दिवास्वापं न कुर्वीत यतोऽसौ स्यात् कफावहः ॥
ग्रीष्मवर्ज्जेषु कालेषु दिवास्वापो निषिध्यते ।
उचितो हि दिवास्वप्नो नित्यं येषां शरीरिणाम् ॥
वातादयः प्रकुप्यन्ति तेषामस्वपतां दिवा ।
व्यायामप्रमदाध्ववाहनरतान् क्लान्तानतीसारिणः
शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीड़ितान् ।
क्षीणान् क्षीणकफान् गिशून् मदहतान् क्षुद्रान् रसाजीर्णिनो
रात्रौ जागरितान् नरान् निरशनान् कामं दिवा स्वापयेत् ॥
आयुःक्षयभयाद्विद्वान् नाङ्गि सेवेत कामिनीम् ।
अवश्ये यदि सेवेत तदा ग्रीष्मवसन्तयोः ॥
मैत्रीं सङ्गं समं कुर्य्यात् स्नेहं सत्सु च सर्वथा ।
संसर्गं साधुभिः कुर्य्यादसत्सङ्गं परित्यजेत् ॥
विमुखान्नार्थिनः कुर्य्यान्नावमन्येत कानपि ।
गुरूणां सन्निधौ तिष्ठेत् सदैव विनयान्वितः ॥

पादप्रसारणादीनि तत्र नैव समाचरेत्।
अपकारपरेऽपि स्यादुपकारपरः पुमान्॥
आत्मवत् सकलान् पश्येद्वैरिणो दूरतो वसेत्।
प्रकाश्यैवापमानं न च निःस्नेहतां प्रभोः॥
काले हितं मितं सत्यं संवादि मधुरं वदेत्॥
जनस्याशयमालक्ष्य यो यथा परितुष्यति।
न तथैवानुवर्त्तेत पराराधनपण्डितः॥
नैकः सुखी न सर्वत्र विश्वस्तो न च शङ्कितः॥
नोद्यमे विरमेत् क्वापि हितावीर्षेत् फले मतु।
न पीड़येदिन्द्रियाणि न ग्लानान्यतिलालयेत्॥
वर्षातपादिषु कृती दण्डी रात्रौ भयेषु च।
सोपानत्कस्तनुं रक्षेद्विचरेद्युगमात्रदृक्॥
नोपरक्तं न चोद्यन्तं नास्तं यातं दिवाकरम्।
सर्वथा न समीक्षेत न जले प्रतिबिम्बितम्॥
नेक्षेत सततं सूक्ष्मं दीप्तामेध्याप्रियाणि च।
नेच्छेदलघता युक्तं न भारं शिरसा वहेत्॥
एवं दिनानि गमयेत् सदाचारपरः सदा।
ततो रात्रिप्रयुक्तानि कुर्य्यात्कर्म्माणि मानवः॥

षट्त्रिंशोऽध्यायः ।

अथ रात्रिचर्य्या ।

एतानि पञ्चकर्माणि सन्ध्याया वर्जयेद्बुधः ।
आहारं मैथुनं निद्रां संपाठं गतिमध्वनि ॥
चिन्तयेत्परमात्मानं चराचरपतिं विभुम् ।
भक्तिमान् प्रयतो नित्यं ध्यानयोगपरायणः ॥
रात्रौ च भोजनं कुर्य्यात्प्रथमप्रहरान्तरे ।
किञ्चिदून समश्नीयाद्दुर्जरं तत्र वर्जयेत् ॥
शरीरे जायते नित्यं देहिनः सुरतस्पृहा ।
अव्यवायान्मेहमेदोवृद्धिः स्यिथिलता तनोः ॥
शूलकासज्वरश्वासकार्श्यपाण्डामयक्षयाः ।
अतिव्यवायाज्जायन्ते रोगाश्चोपद्रवादयः ॥
आयुष्मन्तो मन्दजरा वपुर्वर्णबलान्विताः ।
स्थिरोपचितमांसाश्च भवन्ति स्त्रीषु संयताः ॥
विहारं भार्य्यया कुर्य्याद्देशेऽतिशयसङ्गते ।
रम्ये शय्याङ्गनागाने सुगन्धे सुखमारुते ॥
देशे गुरुजनासन्ने विद्वतेऽतिश्रपाकरे ।
श्रूयमाणे व्यथाहेतुवचने न रमेत ना ॥
स्नातश्चन्दनलिप्ताङ्गः सुगन्धः सुमनोऽन्वितः ।
भुक्तहृष्टः सुवसनः सुवेशः समलङ्कृतः ॥
ताम्बूलवदनः पद्मरागमुद्रीऽधिकस्मरः ।

पुत्रार्थी पुरुषो नारीमुपेयाच्छयने शुभे ॥
अत्याग्नितोऽधृतिः क्षुद्वान् सव्यथाङ्गः पिपासितः।
बालो वृद्धोऽन्यरोगार्त्तः स्त्र्यजेद्रोगी च मैथुनम् ॥
रजस्वलामकामाच्च मलिनामप्रियां तथा।
वर्षवृद्धां वयोवृद्धां तथा व्याधिनिपीड़िताम् ॥
हीनाङ्गीं गर्भिणीं ह्येतां योनिरोगसमन्वितां।
नाभिगच्छेत् पुमान् नारीं सूरिर्वैगुण्यशङ्कया ॥
तिर्य्यग्योनावयोनौ वा दुष्टयोनौ च सङ्गमात्।
उपदंशस्तथा वायोः कोपः शुक्रस्य च क्षयः ॥
उच्चारिते मूत्रिते च रेतसश्च विधारणे।
उत्ताने च भवेच्छीघ्रं शुक्राश्मर्य्यासु सम्भवः ॥
स्नानं सशर्करं क्षीरं भक्ष्यमेक्षवसंस्कृतम्।
वातो मांसरसः स्वप्नः सुरतान्ते हिता अमी ॥
रात्रौ जागरणं रूक्षं कफदोषविषार्त्तिजित्।
निद्रा तु सेविता काले धातुसाम्यमतन्द्रिताम् ॥
पुष्टिवर्णबलोत्साहं वह्निदीप्तिं करोति च।
अभ्यस्तः प्रसृतौरष्टौ स्वावतुदिते पिबेत् ॥
वातपित्तकफान् जित्वा जीवेद्वर्षशतं सुखी ॥

अर्शःश्लीपदगुल्मौ ज्वरजठरजराकुष्ठमेदोविकारा
मूत्राघातास्रपित्तश्रवणगलशिरःश्रोणिशूलाक्षिरोगाः।
ये चान्ये वातपित्तक्षतजकफकृता व्याधयः सन्ति जन्तो-
स्तांस्तानभ्यासयोगादपहरति पयः पीतमन्ते निशायाः ॥

विगतघननिशीथे प्रातरुत्थाय नित्यं
पिबति खलु नरो यो ब्राह्मरम्भेण वारि।

स भवति मतिपूर्णश्चक्षुषा तार्क्ष्यतुल्यो
वलिपलितविहीनः सर्वरोगैर्विमुक्तः ॥
पातव्यं नासया नीरं प्रसृतित्रयमात्रया ॥
व्यङ्गवलीपलितघ्नं पीनसवैस्वर्य्यकासशोथहरम् ।
रजनीत्रयेऽभ्यनस्यं रसायनं दृष्टिसञ्जननम् ॥
स्नेहे पीते जते शुद्धावाघाते स्निग्धोदरे ।
हिक्कायां कफवातोत्थे व्याधौ तद्वारि वारयेत् ॥

सप्तत्रिंशोऽध्यायः ।

अथ ऋतुचर्य्या ।

ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृड्मिथुनकर्कटौ ।
सिंहकन्ये स्मृता वर्षा तुलावृश्चिकयोः शरत् ॥
धनुर्मकरौ च हेमन्तो वसन्तः कुम्भमीनयोः ।
गङ्गाया दक्षिणे देशे दृष्टैर्बहुलभावतः ।
उभौ मुनिभिराख्यातौ प्रावृड्वर्षाभिधावृतू ॥
अन्ये तु । मासैर्द्विसंख्यैर्माघाद्यैः क्रमात् षड्ऋतवः स्मृताः ।
शिशिरोऽथ वसन्तश्च ग्रीष्मो वर्षाशरद्धिमाः ॥
शिशिरादौ त्रिभिस्तेषु विद्यादयनमुत्तरम् ।
आदानञ्च तदादत्ते नृणां प्रतिदिनं बलम् ॥
तस्मिन् ह्यत्यर्थतीक्ष्णोष्णरूक्षा मार्गस्वभावतः ।
आदित्यपवनाः सौम्यान् क्षपयन्ति गुणान् भुवः ॥

तिक्तः कषायः कटुको बलिनोऽत्र रसाः क्रमात् ।
तस्मादादानमाग्नेयमृतवो दक्षिणायनम् ॥
वर्षादयो विसर्गश्च यद्बलं विसृजत्ययम् ।
सौम्यत्वादत्र सोमो हि बलवान् क्षीयते रविः ॥
मेघवृष्ट्यनिलै. शीतै. शान्तितापे महीतले ।
स्निग्धाम्लेक्षुलवणमधुरा बलिनो रसाः ॥
शीतेऽत्र वृष्टिघर्मेऽल्पं बलं मध्यन्तु शेषयोः ॥

हेमन्तशिशिरचर्य्या ।

बलिनः शीतसंरोधाद्धेमन्ते प्रबलोऽनलः ।
भवत्यल्पेन्धनो धातून् स पचेद्वायुनेरितः ॥
अतो हिमेऽस्मिन् सेवेत स्वादम्ललवणान् रसान् ।
दैर्घ्यान्निशानामेतर्हि प्रातरेव बुभुक्षितः ॥
अवश्यकार्य्यं सम्भाव्य यथोक्तं शीलयेदनु ।
वातघ्नतैलैरभ्यङ्गं मूर्द्धि तैलविमर्दनम् ॥
नियुद्धं कुशलैः सार्द्धं पादाघातञ्च युक्तितः ।
कषायापहृतक्लेदस्ततः स्नातो यथाविधि ॥
कुङ्कुमेन सदर्पेण प्रदिग्धोऽगुरुधूपितः ।
रसान् स्निग्धान् पलं पुष्टं गौडमच्छसुरां सुराम् ॥
गोधूमपिष्टमाषेक्षुक्षीरोत्थविकृतीः शुभाः ।
नवमन्नं वसां तैलं शौचकार्य्यं सुखोदकम् ॥
प्रावाराजिनकौषेयप्रवेणीकुथकास्तृतम् ।
उष्णस्वभावैर्बहुभिः प्रावृतः शयनं भजेत् ॥
युक्त्यर्कांशून् स्पृशन् खेदं पादत्राणञ्च सर्वदा ।
पीवरोरुस्तनश्रोणीः समदाः प्रमदाः प्रियाः ॥

हरन्ति शीतमुष्णाङ्गो धूपकुङ्कुमयौवनैः ।
अङ्गारतापसन्तप्तगर्भभूवेश्मचारिणः ॥
शीतपारुष्यजनितो न दोषो जातु जायते ।
अयमेव विधिः कार्य्यः शिशिरेऽपि विशेषतः ॥
तदा हि शीतमधिकं रौक्ष्यञ्चादानकालजम् ॥

वसन्तचर्य्या ।

कफाचिता हि शिशिरे वसन्तेऽर्कांशुतापितः ।
हृत्वाग्निं कुरुते रोगांस्तस्तं त्वरया जयेत् ॥
तीक्ष्णैर्वमननस्याद्यैर्लघुरूक्षैश्च भोजनैः ।
व्यायामोद्वर्त्तनाघातैर्जित्वा श्लेष्माणमुल्बणम् ॥
स्नातोऽनुलिप्तः कर्पूरचन्दनागुरुकुङ्कुमैः ।
पुराणयवगोधूमचौद्रजाङ्गलशूल्यभुक् ॥
सहकाररसोन्मिश्रानासाद्य प्रियया पितान् ।
प्रियास्यसङ्गसुरभीन् प्रियानेत्रोत्पलाङ्कितान् ॥
सौमनस्यकृतो हृद्यान् वयस्यैः सहितः पिबेत् ।
निगदानासवारिष्टसीधुमाध्वीकमाधवान् ॥
मृद्वेराम्बु सारम्बु मध्यम्बु जलदाम्बु च ।
दक्षिणानिलशीतेषु परितो जलवाहिषु ॥
अदष्टनष्टसूर्य्येषु मणिकुट्टिमकान्तिषु ।
परपुष्टविघुष्टेषु कामकर्मान्तभूमिषु ॥
विचित्रपुष्पवृक्षेषु काननेषु सुगन्धिषु ।
गोष्ठीकथाभिश्चित्राभिर्मध्याह्नं गमयेत्सुखी ॥
गुरुशीतदिवास्वप्नस्निग्धाम्लमधुरांस्त्यजेत् ॥

ग्रीष्मचर्य्या ।

तीक्ष्णांशुरतितीक्ष्णांशुर्ग्रीष्मे सञ्चिपतीव यत् ।
प्रत्यहं क्षीयते श्लेष्मा तेन वायुश्च वर्द्धते ॥
अतोऽस्मिन् षट्कृदभ्यासव्यायामार्कैकरांस्त्यजेत् ।
भजेन्मधुरमेवान्नं लघु स्निग्धं हिमं द्रवम् ॥
सुशीततोयसिक्ताङ्गो लिह्यात् सक्तून् सशर्करान् ।
मद्यं न पेयं पेयं वा स्वल्पं सुबहुवारिणा ॥
अन्यथा शोषग्लैथिल्यदाहमोहान् करोति तत् ।
कुन्देन्दुधवलं शालिमश्नीयाज्जाङ्गलैः पलैः ॥
पिबेद्रस नातिघन रसालां रागषाड़वौ ।
पानकं पञ्चसार वा नवभृङ्गाजनस्थितम् ॥
मौचचोचदलैर्युक्तं साम्लं भृष्टमयश्लिभिः ।
पाटलावासितच्छायं सकर्पूरं सुशीतलम् ॥
अभ्रङ्घषमहाशालतालरुद्धोष्णरश्मिषु ।
वनेषु माधवीश्लिष्टद्राक्षास्तवकशालिषु ॥
कदलीदलकह्लारमृणालकमलोत्पलैः ।
कोमलैः कल्पिते तल्पे हसत्कुसुमपल्लवे ॥
मध्यन्दिनेऽर्कतापार्त्तैः सुप्याद्वाराग्रहे सुखम् ।
निशाकरकराकीर्णे सौधपृष्ठे निशासु च ॥
आसना स्वस्थचित्तस्य चन्दनार्द्रस्य मालिनः ।
निवृत्तकामतल्पस्य सुसूक्ष्मतनुवाससः ॥
जलार्द्रतालवृन्तानि विस्तृताः पद्मिनीपुटाः ।
उत्क्षेपाश्च मृदूत्क्षेपा जलवर्षिहिमानिलाः ॥
मृणालवलयाः कान्ताः प्रोत्फुल्लकमलोज्ज्वलाः ।

जङ्गमा इव पञ्चिन्यो हरन्ति दयिताः क्लमम् ॥

वर्षाचर्य्या ।

आदानग्लानवपुषामग्निः सन्नोऽपि सीदति ।
वर्षासु दोषैर्दूष्यन्ति तेऽम्बुलम्बाम्बुदेऽम्बरे ॥
सतुषारेण मरुता सहसा शीतलेन च ।
भूवाष्पेणाम्लपाकेन मलिनेन च वारिणा ॥
वह्निनैव च मन्देन तेष्वित्यन्योन्यदूषिषु ।
भजेत् साधारणं सर्वमुष्णस्तोजनञ्च यत् ॥
आख्यापनं शुद्धतनुर्जीर्णं धान्यं रसान् कृतान् ।
जाङ्गलं पिशितं यूषान् मध्वरिष्टं चिरन्तनम् ॥
मस्तु सौवर्चलाढ्यं वा पञ्चकोलावचूर्णितम् ।
दिव्यं कौपं श्रृतशीतं भोजनस्यातिदुर्दिने ॥
व्यक्ताम्ललवणस्नेहं संशुष्कं चौद्रवल्लघु ।
अपादचारी सुरभिः सततं धूपिताम्बरः ॥
हर्म्यपृष्ठे वसेद्वाप्यशीतशीकरवर्जिते ।
नदीजलोदमन्याहःस्नायासातपास्त्यजेत् ॥

शरदृतुर्य्या ।

वर्षाशीतोचिताङ्गानां सहसैवार्करश्मिभिः ।
तप्तानां सञ्चितं पित्तं प्रायशरदि कुप्यति ॥
तज्जयाय घृतं तिक्तं विरेको रक्तमोक्षणम् ॥

अष्टात्रिंशोऽध्यायः ।

अथ देशप्रविभागः ।

भूमिदेशस्त्रिधानूपो जाङ्गलो मिश्रलक्षणः ।

आनूपलक्षणम् ।

नदीपल्वलशैलाढ्यः फुल्लोत्पलकुलैर्युतः ।
हससारसकारण्डचक्रवाकादिसेवितः ॥
शय्यवाराहमहिषरुरुरोहिकुलाकुलः ।
प्रभूतद्रुमपुष्पाढ्यो नीलश्यस्फलान्वितः ॥
अनेकशालिकेदारकदलीक्षुविभूषितः ॥
आनूपदेशो ज्ञातव्यो वातश्लेष्मामयार्त्तिमान् ॥

जाङ्गललक्षणम् ।

आकाशशुभ्र उच्चश्च स्वल्पपानीयपादपः ।
शमीकरीरबिल्वार्कपीलुकर्कन्धुसङ्कुलः ॥
हरिणैर्नर्त्तपृषतगोकर्णखरसङ्कुलः ।
सुस्वादुफलवान् देशो वातलो जाङ्गलः स्मृतः ॥

साधारणलक्षणम् ।

संसृष्टलक्षणो यस्तु देशः साधारणो मतः ।
समाः साधारणे यस्माच्छीतवर्षोष्णमारुताः ॥
समता तेन दोषाणां तस्मात्साधारणो वरः ॥
उचिते वर्त्तमानस्य नास्ति दुर्दैशजं भयम् ।
आहारस्वप्नचेष्टादौ तद्दैशस्य कृते सति ॥

यस्य देशस्य यो जन्तुस्तज्जन्तोस्तौषधं हितम् ।
देशादन्यत्र वसतस्तत्तुल्यगुणमौषधम् ॥
स्वे देशे निचिता दोषा अन्यस्मिन् कोपमागताः ।
बलवन्तस्तथा न स्युर्जलजास्तथा ॥

अथ प्रकृत्यादिवर्णनम् ।

सप्त प्रकृतयो नृणां वातात्पित्तात्कफात्तथा ।
संसर्गात् सन्निपाताच्च भवन्तीति भिषङ्मतम् ॥
शुक्रशोणितसंयोगे यो भवेद्दोष उत्कटः ।
प्रकृतिर्जायते तेन तस्या लक्षणमुच्यते ॥
सोऽपि दोषः स्वभावावस्थितो न तु दुष्टः ।

तत्र वातप्रकृतिलक्षणम् ।

जागरूकः प्रीतद्वेषो दुर्भगः स्त्रैणो मत्सर्यनार्यः स्फुटितकरचरणोऽतिरूक्षश्मश्रुनखकेशः क्रोधी दन्तनखखादी च भवति ।

अस्थितिरटदसौहृदः कृतघ्नः
क्षयपरुषो धमनीततः प्रलापी ।
द्रुतगतिरटनोऽनवस्थितात्मा
वियदपि गच्छति सञ्झमेण सुप्तः ॥
अव्यवस्थितमतिश्चलदृष्टि-
र्मन्दरत्नधनसञ्चयमित्रः ।
किञ्चिदेव विलपत्यनिबद्धं
मारुतप्रकृतिरेष मनुष्यः ॥

वातिकाश्वाजगोमायुश्वाखूष्ट्रशुनां तथा ।
गृध्रकाकखरादीनां मनुष्यैः कीर्त्तिता नराः ॥

पित्तप्रकृतिलक्षणम् ।

स्वेदनो दुर्गन्धः पीतस्निग्धिलाङ्गस्नायुनखनयन-तालुजिह्वौष्ठपाणिपादतलो दुर्भगो वलीपलितखालित्य-युक्तो बहुभुक्तुषाद्वेषी क्रोधप्रकोप-प्रसादो मध्यमबलो मध्यमायुश्च भवति ।

मेधावी निपुणमतिर्विशुद्ध वक्ता
तेजस्वी समितिषु दुर्निवारवीर्य्यः ।
सुप्तः सन् कनकपलाशकर्णिकारान्
सम्पश्येदपि च हुताशविद्युदुल्काः ॥
न भयात् प्रणमेदनतेष्वमृदुः
प्रणतेष्वपि सान्त्वनदानरुचिः ।
भवतीह सदा व्यथितास्य गतिः
स भवेदिह पित्तबलप्रकृतिः ॥
भुजङ्गोलूकगन्धर्वयक्षमार्জ্জারवानरैः ।
व्याघ्रर्क्षकुलानूकैः पैत्तिकास्तु नराः स्मृताः ॥

कफप्रकृतिलक्षणम् ।

प्रियङ्गुदूर्वाग्रकाण्डदर्भगोरोचनापद्मानामन्यतमवर्णः सुभगः प्रियदर्शनो मधुरप्रियः कृतज्ञो धृतिमान् सहिष्णुरलोलुपो बलवांश्चिरग्राही दृढ़वैरश्च भवति ।

शुक्लाक्षः स्थिरकुटिलातिनीलकेशो
लक्ष्मीवान् जलदमृदङ्गसिंहघोषः ।
सुप्तः सन् प्रथकलहंसचक्रवाकान्
सम्पश्येदपि च जलाशयान् मनोज्ञान् ॥
रक्तान्तनेत्रः सुविभक्तगात्रः

स्निग्धच्छविः सत्त्वगुणोपपन्नः ।
क्लेशक्षमो मानयिता गुरूणां
श्लेष्मो बलासप्रकृतिर्मनुष्यः ॥
दृढशास्त्रमतिः स्थिरमित्रधनः
परिगण्य चिरात् प्रददाति बहु ।
परिनिश्चितवाक्यपदः सतत
गुरुमानकरश्च भवेत् स सदा ॥
ब्रह्मरुद्रेन्द्रवरुणैः सिंहाम्बुगजगोवृषैः ।
तार्क्ष्यहंससमानूका: श्लेष्मप्रकृतयो नराः ॥
द्वयोर्वा तिसृणां वापि प्रकृतीनान्तु लक्षणैः ।
ज्ञात्वा ससर्गजा वैद्यः प्रकृतीरभिनिर्दिशेत् ॥
प्रकोपो वान्यथाभावः क्षयो वा नोपजायते ।
प्रकृतीनां स्वभावेन जायते तु गतायुषः ॥
विषजातो यथा कीटो न विषेण विपद्यते ।
तद्वत्प्रकृतयो मर्त्यं भक्षयन्ति न बाधितुम् ॥

अत्र प्रसङ्गाद्वयोविभागः कथ्यते । वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकमिति । तत्रोनषोड़शवर्षा बालास्तेऽपि त्रिविधाः क्षीरपाः क्षीरान्नादा अन्नादा इति । तेषु संवत्सरपराः क्षीरपाः द्विसंवत्सरपराः क्षीरान्नादाः परतोऽन्नादा इति । षोड़शसप्तत्योरन्तरे मध्य वयस्तस्य विकल्पो वृद्धियौवनं सम्पूर्णता हानिरिति । तत्राविंशतेर्वृद्धिराविंशतो यौवनमाचत्वारिंशतः सर्वधात्विन्द्रियबलवीर्यसम्पूर्णता अत ऊर्ध्वमीषत्परिहाणिर्यावत्सप्ततिरिति । सप्ततेरूर्ध्वं क्षीयमाणधात्विन्द्रियबलवीर्यौजोहृन्मज्जहानि वली-

पलितखालित्यजुष्टं कासश्वासप्रभृतिभिरुपद्रवैरभिभूयमानं सर्वक्रियासुसमर्थं जीर्णागारमिवाभिहृष्टमवसीदन्तं वृद्धमाचक्षते। तत्रोत्तरोत्तरासु वयोऽवस्थासूत्तरोत्तरा भेषजमात्राविशेषा भवन्त्यृते च परिहाणिस्त्वायापेक्षया प्रतिकुर्वीत।

बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु।
भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत्॥
अग्निचारविरेकेषु बालवृद्धौ विवर्जयेत्।
तत्साध्येषु विकारेषु मृदौ कुर्यात् क्रियां यत्नैः॥
पञ्चविंशे ततो वर्षे पुमान् नारी तु षोडशे।
समत्वागतवर्य्यौ तौ जानीयात् कुशलो भिषक्॥

अथ सारान् वक्ष्यामः। स्मृतिभक्तिप्रज्ञाशौर्य्यशौचोपेतं कल्याणाभिनिवेशं सत्त्वसारं विद्यात्। स्निग्धं संहतस्निग्धास्थिदन्तनखं बहुलकामप्रजं शुक्रेण। प्रकृष्टमुत्तमबलं स्निग्धगम्भीरस्वरं सौभाग्योपपन्नं महानेत्रञ्च मज्जा महाशिरःस्कन्धबृहद्दन्तहन्वस्थिनखमस्थिभिः। स्निग्धमूत्रस्वेदस्वरं बृहच्छरीरमायाससहिष्णुं मेदसा। अच्छिद्रगात्रं गूढास्थिसन्धिं मांसोपचितञ्च मांसेन। स्निग्धताम्रनखनयनतालुजिह्वौष्ठपाणिपादतलं रक्तेन। सुप्रसन्नं मृदुत्वग्लोमाणं त्वक्सारं विद्यात्। इत्येषां पूर्वं पूर्वं प्रधानमायुःसौभाग्ययोरपि।

सत्त्ववान् सहते सर्वं संस्तम्यात्मानमात्मना।
राजसः स्तभ्यमानोऽन्यैः सहते नैव तामसः॥

त्रिनवतितमोऽध्यायः।

अथारिष्टलक्षणवर्णनाध्यायः।

पुष्पं यथा पूर्वरूपं फलस्येह भविष्यतः।
तथा लिङ्गमरिष्टाख्यं पूर्वरूपं मरिष्यतः॥
अप्येव तु भवेत् पुष्पं फलेनानुपपद्यते यत्।
फलञ्चापि भवेत् किञ्चिदस्य पुष्पं न पूर्वजम्॥
न त्वरिष्टस्य जातस्य नाशोऽस्ति मरणादृते।
मरणञ्चापि तन्नास्ति यन्नारिष्टपुरःसरम्॥
मिथ्यादृष्टमरिष्टाभमनरिष्टमजानता।
अरिष्टञ्चाप्यसम्बुध्यमेतत् प्रज्ञापराधजम्॥
तानि सौक्ष्म्यात् प्रमादाद्वा तथैवार्थ व्यतिक्रमात्।
गृह्यन्ते नोद्गतान्येऽङ्गैर्मुमूर्षोर्नलसम्भवात्॥
असिद्धिमाप्नुयाल्लोके प्रतिकुर्वन् गतायुषः।
अतोऽरिष्टानि यत्नेन लक्षयेत् कुशलो भिषक्॥
शरीरशैलयोर्यस्य प्रकृतेर्विकृतिर्भवेत्।
तल्लरिष्टं समासेन व्यासतस्तु निबोध मे॥
शृणोति विविधान् शब्दान् यो दिव्यानामभावतः।
समुद्रपुरमेघानामसम्पत्तौ च निःस्वनान्॥
तान् स्वनान् नावगच्छति मन्यते चान्यशब्दवत्।
ग्राम्यारण्यस्वनांश्चापि विपरीतान् शृणोत्यपि॥
द्विषच्छब्देषु रमते सुहृच्छब्देषु कुप्यति।

न शृणोति च योऽकस्मात्तं ब्रुवन्ति गतायुषम् ॥
यस्तूष्णमिव गृह्णाति शीतमुष्णञ्च शीतवत् ।
सञ्जातशीतपिड़को यश्च दाहेन पीड्यते ॥
उष्णगात्रोऽतिमात्रञ्च यः शीतेन प्रवेपते ।
प्रहारान् नाभिजानाति योऽङ्गच्छेदमथापि वा ॥
पांशुनेवावकीर्णानि यस्य गात्राणि मन्यते ।
वर्णान्यभावो राज्यो वा यस्य गात्रे भवन्ति हि ॥
स्नातानुलिप्तं यश्चापि भजन्ते नीलमक्षिकाः ।
सुगन्धिर्वाति योऽकस्मात्तं ब्रुवन्ति गतायुषम् ॥
विपरीतेन गृह्णाति रसान् यश्चोपयोजितान् ।
उपयुक्ताः क्रमाद्यस्य रसा दोषाभिहृदये ॥
यस्य दोषाग्निसाम्यञ्च कुर्य्युर्मिथ्योपयोजिताः ।
यो वा रसान् न संवेत्ति गतासुं तं प्रचक्षते ॥
सुगन्धं वेत्ति दुर्गन्धं दुर्गन्धस्य सुगन्धिताम् ।
यो वा गन्धान् न जानाति गतासुं तं विनिर्दिशेत् ॥
इन्द्रान्युष्णहिमादीनि कालावस्था दिशस्तथा ।
विपरीतेन गृह्णाति भावानन्यांश्च यो नरः ॥
दिवा ज्योतींषि यश्चापि ज्वलितानीव पश्यति ।
रात्रौ सूर्य्यं ज्वलन्तं वा दिवा वा चन्द्रवर्चसम् ॥
अभिघोपप्लवे यस्य शक्रचापतड़िद्गुणान् ।
तड़ित्वतोऽसितान् यो वा निर्म्मले गगने घनान् ॥
विमानयानप्रासादैर्यश्च सङ्कुलमम्बरम् ।
यश्चानिलं मूर्त्तिमन्तमन्तरीक्षञ्च पश्यति ॥
धूमनीहारवासोभिराततामिव मेदिनीम् ।

प्रदीप्तमिव लोकञ्च यो वा घृतमिवाम्भसा ॥
भूमिमष्टापदाकारां लेखाभिर्यश्च न पश्यति ।
ज्योत्स्नादर्शोष्णतोयेषु छायां यश्च न पश्यति ॥
पश्यत्येकाङ्गहीनां वा विकृतां वान्यसत्त्वजाम् ।
खकाककङ्कगन्धाणां प्रेतानां यश्चरक्षसाम् ॥
पिशाचोरगनागानां भूतानां विकृतामपि ।
यो वा मयूरकण्ठाभं विधूमं वह्निमीक्षते ॥
आतुरस्य भवेन्मृत्युः स्वस्थो व्याधिमवाप्नुयात् ॥
श्यावा लोहितिका नीला: पीतिका वापि मानवम् ।
अभिद्रवन्ति यं छाया: स परासुरसंशयम् ॥
क्षीयिणौ नश्यतो यस्य तेज ओजः स्मृतिः प्रभा ।
अकस्माद्यं भजन्ते वा स परासुरसंशयम् ॥
यस्याधरौष्ठः पतितः क्षिप्तश्चोर्द्धं तथोत्तरः ।
उभौ वा जाम्बवाभासौ दुर्लभं तस्य जीवितम् ॥
आरक्ता दशना यस्य श्यावा वा स्युः पतन्ति च ।
खञ्जनप्रतिमा वापि तं गतायुषमादिशेत् ॥
क्षीणा स्तब्धावलिप्ता वा जिह्वा शूना च यस्य वै ।
कर्कशा वा भवेद्यस्य सोऽचिराद्विजहात्यसून् ॥
कुटिला स्फुटिता वापि शुष्का वा यस्य नासिका ।
अवस्फुर्जति भग्ना वा न स जीवति मानवः ॥
संक्षिप्ते विषमे स्तब्धे रक्ते स्रस्ते च लोचने ।
स्रवतां वा प्रसुप्ते यस्य स गतायुर्नरोऽध्रुवम् ॥
केशाः सीमन्तिनो यस्य संक्षिप्ते विनते भ्रुवौ ।
लुठन्ति चाक्षिपक्ष्माणि सोऽचिराद्याति मृत्यवे ॥

नाहरत्यन्नमात्मस्थं न धारयति यः शिरः ।
एकाग्रदृष्टिर्मूढात्मा सद्यः प्राणान् जहाति सः ॥
बलवान् दुर्बलो वापि सम्मोहं योऽधिगच्छति ।
उत्थाप्यमानो बहुशस्तं धीरः परिवर्जयेत् ॥
उत्तानः सर्वदा शेते पादौ विकुरुते च यः ।
विप्रसारणशीलो वा न स जीवति मानवः ॥
शीतपादकरोच्छ्वासश्छिन्नश्वासश्च यो भवेत् ।
काकोच्छ्वासश्च यो मर्त्यस्तं धीरः परिवर्जयेत् ॥
निद्रा न क्षियते यस्य यो वा जागर्त्ति सर्वदा ।
मुह्येद्वा वक्तुकामस्तु प्रत्याख्येयः स जानता ॥
उत्तरौष्ठश्च यो लिह्यादुद्वारांश्च करोति यः ।
प्रेतैर्वा भाषते सार्द्धं प्रेतरूपं तमादिशेत् ॥
खेभ्यः सरोमकूपेभ्यो यस्य रक्तं प्रवर्त्तते ।
पुरुषस्याविषार्त्तस्य सद्यो जह्यात्स जीवितम् ॥
वाताष्ठिला तु हृदये यस्योर्द्ध्वमनुधायिनी ।
कलाग्रविद्वेषकरी स परासुरसंशयम् ॥
अनन्योपद्रवकृतः शोथः पादसमुत्थितः ।
पुरुषं हन्ति नारीन्तु मुखजो गुह्यजो द्वयम् ॥
अतिसारो ज्वरो हिक्काछर्दिः शूनाण्डमेढ्रता ।
श्वासिनः कासिनो वापि यस्य तं परिवर्जयेत् ॥
स्वेदो दाहश्च बलवान् हिक्का श्वासश्च मानवम् ।
बलवन्तमपि प्राणैर्वियुञ्जन्ति न संशयः ॥
श्यावा जिह्वा भवेद्यस्य सर्व्वं चाक्षि निमज्जति ।
मुखञ्च जायते पूति यस्य तं परिवर्जयेत् ॥

वक्त्रमापूर्य्यतेऽश्रूणां स्रियतश्चरणावुभौ ।
चक्षुषाकुलतां याति यमराष्ट्रं गमिष्यत ॥
अतिमात्रं लघूनि स्युर्गात्राणि गुरुकाणि च ।
यस्याकस्मात्स विज्ञेयो गन्ता वैवस्वतालयम् ॥
पङ्कमल्यवसातैलघृतगन्धाश्च ये नराः ।
सृष्टगन्धांश्च ये वान्ति गन्तारस्ते यमालयम् ॥
देषां वापि रतिर्नास्ति यातारस्ते यमालयम् ॥
ज्वरातिसारशोफाः स्युर्यस्यान्योन्यामसादिनः ।
प्रक्षीणबलमांसस्य नासौ शक्यश्चिकित्सितुम् ॥
क्षीणस्य यस्य क्षुत्तृष्णे हृद्यैर्मिष्टैर्हितैस्तथा ।
न शाम्यतोऽन्नपानैश्च तस्य मृत्युरुपस्थितः ॥
प्रवाहिका शिरःशूलं कोष्ठशूलञ्च दारुणम् ।
पिपासा बलहानिश्च तस्य मृत्युरुपस्थितः ॥
विषमेणोपचारेण कर्म्मभिश्च पुराकृतैः ।
अनित्यत्वाच्च जन्तूना जीवितं निधनं व्रजेत् ॥

स्वभावप्रसिद्धाना शरीरैकदेशानामन्यथाभावित्वं मरणाय । यथा- शुक्लानां कृष्णता कृष्णानां शुक्लता रक्तानामन्यवर्णत्वं स्थिराणामस्थिरत्वं मृदूनां स्थिरता चलानामचलत्वमचलानां चलता पृथूनां सङ्क्षिप्तत्वं सङ्क्षिप्तानां पृथुता दीर्घाणा ह्रस्वत्वं ह्रस्वाना दीर्घताऽपतनधर्मिणां पतनधर्मित्वं पतनधर्मिणामपतनधर्मित्वमकस्माच्च शैत्यौष्ण्यस्नैग्ध्यरौक्ष्यप्रस्तब्धवैवर्ण्यावसदनत्वाङ्गानाम् । स्वेभ्यः स्थानेभ्यः शरीरैकदेशानामवस्रस्तोत्क्षिप्तभ्रान्तावक्षिप्तपतितविमुक्तनिर्गतास्तगतगुरुलघुत्वानि । प्रवालवर्णव्यङ्ग-

प्रादुर्भावोऽकस्मात्। शिराणाञ्च दर्शनं ललाटे नासावंशे वा पिड़कोत्पत्तिः। ललाटे प्रभातकाले वा स्वेदः। नेत्ररोगादिना वाश्रुप्रवृत्तिः गोमयचूर्णप्रकाशस्य वा रजसो दर्शनं मूत्रपुरीषवद्विरभुञ्जानानां तत्क्षणाभ्यो भुञ्जानानाम्। स्तनमूलहृदयोरःसु च शूलोत्पत्तयः। मध्ये शून्यत्वमन्तेषु परिस्रावित्वं विपर्य्ययो वा तथार्द्धाङ्गे क्षयथुः। शोषोऽङ्गप्रत्यङ्गयोर्वा नष्टहीनविकलविकृतस्वरता। विवर्णपुष्पप्रादुर्भावो वा दन्तमुखनखशरीरेषु। यस्य वासु कफपुरीषरेतांसि निमज्जन्ति। यस्य वा दृष्टिमण्डले भिन्नविकृतानि रूपाण्यालोकन्ते। स्नेहाभ्यक्तकेशाङ्ग इव यो भाति। यश्च दुर्बलो भक्तद्वेषातिसाराभ्यां पीड्यते। कासमानश्च क्षणाभिभूतः। क्षीणश्छर्द्दिभक्तद्वेषयुक्तः। सफेनपूयरुधिरोद्गामी हतस्वरः शूलाभिपन्नश्च मनुष्यः। शूनकरचरणवदनः क्षीणोऽन्नद्वेषी स्रस्तपिण्डिकांसपार्श्वपादो ज्वरकासाभिभूतः। यस्तु पूर्वाह्णे भुक्तमपराह्णे छर्दयत्यविदग्धमतिसार्य्यते वा ज्वरकासाभिभूतः स श्वासान्म्रियते। वस्तवद्विलपन् यश्च भूमौ पतति स्रस्तमुष्कः स्तब्धमेढ्रो भग्नग्रीवः प्रनष्टमेहनश्च मनुष्यः। प्राग्विशुष्यमाणहृदय आर्द्रशरीरो यश्च लोष्टं लोष्टेनाभिहन्ति काष्ठं काष्ठेन तृणानि वा छिनत्ति। अधरोष्ठं दशत्युत्तरोष्ठं वा लेढ़ि। आलुञ्चति यदि वा कर्णौ केशांश्च।

चिकित्स्यमानः सम्यक् च विकारो योऽभिवर्द्धते।
प्रक्षीणबलमांसस्य लक्षणं तन्नृतायुषः॥
निवर्त्तन्ते महाव्याधिः सहसा यस्य देहिनः।

न चाहारफलं यस्य दृश्यते स विनश्यति ॥
एतान्यरिष्टरूपाणि सम्यग् बुध्येत यो भिषक् ।
साध्यासाध्यपरीक्षायां स राज्ञः सम्मतो भवेत् ॥
उपद्रवैस्तु यो जुष्टा व्याधयो याप्यवार्यताम् ।
रसायनादिना वत्स तान्॰ मृत्युकमना मम ॥
वातव्याधिः प्रमेहश्च कुष्ठमर्शो भगन्दरः ।
अश्मरी मूढ़गर्भश्च तथैवोदरमष्टकम् ॥
अष्टावेते प्रकृत्यैव दुश्चिकित्स्या महागदाः ।
प्राणमांसक्षयश्वासतृष्णाशोषवमिज्वरैः ॥
मूर्च्छातिसारहिक्काभिः पुनश्चैतैरुपद्रुताः ।
वर्जनीया विशेषेण भिषजा सिद्धिमिच्छता ॥
शूनं सुप्तत्वचं भग्नं कम्पाध्माननिपीड़ितम् ।
नरं रुजार्त्तिमन्तञ्च वातव्याधिर्विनाशयेत् ॥
यथोक्तोपद्रवाविष्टमतिप्रसुतमेव वा ।
पिड़कापीड़ितं गाढ़ं प्रमेही हन्ति मानवम् ॥
प्रभिन्नं प्रसुताङ्गञ्च रक्तनेत्रं हतस्वरम् ।
प्रच्युकर्म्माणुषातीतं कुष्ठं हन्तीह कुष्ठिनम् ॥
तृष्णारोचकशूलार्त्तं मतिप्रसृतशोणितम् ।
शोफातिसारसंयुक्तमर्शोव्याधिर्विनाशयेत् ॥
वातमूत्रपुरीषाणि क्रिमयः शुक्रमेव च ।
भगन्दरात् प्रस्रवन्ति यस्य तं परिवर्जयेत् ॥
प्रशूननाभिहृषणं रुद्धमूत्रं रुगन्वितम् ।
अश्मरी चपयत्याशु सिकताशर्करान्विता ॥
गर्भकोषपरासङ्गो मक्कलो योनिसंवृतिः ।

हन्यात् स्त्रियं मूढगर्भं यथोक्ताश्चाप्युपद्रवाः ॥
पार्श्वभङ्गान्नविद्वेषश्लोफातिसारपीड़ितम् ।
विरिक्तं पूर्य्यमाणञ्च वर्जयेदुदरार्दितम् ॥
यस्याभ्यति विसंज्ञश्च श्वेते निपतितोऽपि वा ।
श्वीतार्दितोऽन्तरुष्णश्च ज्वरेण म्रियते नरः ॥
यो हृष्टरोमा रक्ताक्षो हृदि सङ्घातशूलवान् ।
नित्यं वक्त्रेण चोच्छ्वः स्यात् तं ज्वरी हन्ति मानवम् ॥
हिक्काश्वासपिपासार्त्तं मूढं विभ्रान्तलोचनम् ।
सन्ततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः ॥
श्वासशूलपिपासार्त्तं क्षीणं ज्वरनिपीड़ितम् ।
विशेषेण नरं वृद्धमतीसारो विनाशयेत् ॥
रक्ताक्षमन्नद्वेष्टारमूर्द्ध्वश्वासनिपीड़ितम् ।
कृच्छ्रेण बहुमेहन्तं यक्ष्मा हन्तीह मानवम् ॥
श्वासशूलपिपासान्नविद्वेषग्रन्थिमूढ़ताः ।
भवन्ति दुर्बलत्वञ्च गुल्मिनो मृत्युमेयतः ॥
आध्मातं बन्धनिष्पन्दं हृद्धिक्काटङ्कवितम् ।
रुजाश्वासमाविष्टं विद्वधिर्नाशयेन्नरम् ॥
पाण्डुदन्तनखो यश्च पाण्डुनेत्रश्च मानव ।
पाण्डुसङ्घातदर्शी च पाण्डुरोगी विनश्यति ॥
लोहितं छर्दयेद्यश्च बहुशो लोहितेक्षणः ।
रक्तानाञ्च दिशां द्रष्टा रक्तपित्ती विनश्यति ॥
अवाङ्मुखस्तूर्द्ध्वमुखो वा क्षीणमांसबलो नरः ।
जागरिष्णुरसन्देहमुन्मादेन विनश्यति ॥
बहुशोऽपस्मरन्तन्तु प्रक्षीण चलितभ्रुवम् ।

नेत्राभ्याञ्च विकुर्वाणमपस्मारो विनाशयेत् ॥
नानापुरोपमो गन्धो यस्य याति दिवानिशम् ।
पुरितस्य वनस्येव नानाद्रुमलतावतः ॥
तमाहुः पुरितं धीरा नरं स्मरणलक्षणैः ।
स वै सम्वत्सरादेहं जहातीति विनिश्चयः ॥
एवमेकैकशः पुरैर्यस्य गन्धः समो भवेत् ।
इष्टैर्वा यदिवानिष्टैः स च पुरित उच्यते ॥
यथथा चन्दनं कुष्ठं तगरागुरुणी मधु ।
मांसं मूत्रपुरीषे वा मृतानि कुणपानि वा ॥
ये चान्ये विविधाआनो गन्धा विविधयोनयः ।
तेऽप्यनेनानुमानेन विज्ञेया विकृतिं गते ॥
इदञ्चाप्यतिदेशार्थं लक्षणं गन्धसंश्रयम् ।
वक्ष्यामो यदभिज्ञाय भिषक्प्रत्रणमादिशेत् ॥
विद्योनिर्विक्षरो यस्य गन्धो गात्रेषु दृश्यते ।
इष्टो वा यदिवानिष्टो न स जीवति तां समाम् ॥
एतावदस्यविज्ञान रसज्ञानमतः परम् ।
आतुराणां शरीरेषु वक्ष्यामो विधिपूर्वकम् ॥
यो रसः प्रकृतिस्थानां नराणां देहसम्भवः ।
स एषां चरमे काले विकारान् भजते बहून् ॥
कश्चिदेवास्य वैरस्यमत्यर्थमुपपद्यते ।
स्वादुत्वमपरस्यापि विपुलं भजते रसः ॥
तमनेनानुमानेन विद्याद्विकृतिमागतम् ।
मनुष्यो हि मनुष्यस्य कथं रसमवाप्नुयात् ॥
मक्षिकास्वेव दंशाय मशकाश्च पिपीलिकाः ।

विरसादुपसर्पन्ति जन्तोः कायान्मूर्षतः ॥
अत्यर्थरसिकं कायं कालपक्षस्य देहिनः ।
अपिशाताननुलिप्तस्य भयमायान्ति सर्वशः ॥
यान्येतानि मयोक्तानि लिङ्गानि रसगन्धयोः ।
पुष्पितस्य नरस्यैतैः फलं मरणमादिशेत् ॥

कतमानि शरीराणि व्याधिमन्ति महामुने ।
यानि वैद्यः परिहरेद्येषु कर्म न सिध्यति ॥
इत्याहेदं शतक्रतवेऽब्रह्मण्यः सुदुर्वचम् ।
आचचक्षे यथा तस्मै भगवांस्तन्निबोधत ॥
यस्य यै भावभावस्य कालमृत्युर्मुनेऽग्रगम् ।
अन्नञ्च भजते शुक्लं स्निग्धं चापि न जीर्यति ॥
बलञ्च हीयते यस्य तृष्णा चाभिप्रवर्धते ।
जायते हृदि शूलञ्च तं भिषक् परिवर्जयेत् ॥
हिक्का गम्भीरजा यस्य शोणितञ्चातिसार्यते ।
न तस्मै भेषजं दद्यात् स्वस्थाचेद्यशसनम् ॥
आनाहश्चातिसारश्च यमेतौ दुर्बलं नरम् ।
व्याधितं विद्यतो वोभौ दुर्लभं तस्य जीवितम् ॥
आनाहश्चैव तृष्णा च यमेतौ दुर्बलं नरम् ।
विद्यतो विद्धि तेनं प्राणा नातिचिराद्धरम् ॥
ज्वर मौर्वाक्षिको यस्य शुष्कः कासश्च दारुणः ।
बलमांसविहीनस्य यथा प्रेतस्तथैव सः ॥
यस्य मूत्रं पुरीषञ्च यथितं संप्रवर्त्तते ।
निरक्षिणो जठरिणः श्वसनो न स जीवति ॥
श्वयथुर्यस्य कुक्षिस्थो हस्तपादं विसर्पति ।

जातिसङ्गं स संक्षेप्य तेन रोगेण हन्यते ॥
क्षयथुर्यस्य पादस्थस्तथा स्तोके च पिण्डिके ।
सौदतश्चाप्युभे शङ्के तं भिषक् परिवर्जयेत् ॥
शूनहस्तं शूनपादं शूनगुह्योदरं नरम् ।
हीनवर्णबलाहारमौषधैर्नोपपादयेत् ॥
जरोसृक्को बहुः श्लेष्मा नीलः पीतः सलोहितः ।
सततं च्यवते यस्य दूरात्तं परिवर्जयेत् ॥
हृष्टरोमा सार्द्रमूत्रः शूनः कासज्वरार्दितः ।
क्षीणमांसो नरो दूराद्वर्ज्यो वैद्येन जानता ॥
क्षयः प्रकुपिता यस्य दोषाः कष्टाभिलक्षिताः ।
क्षयस्य बलहीनस्य नास्ति तस्य चिकित्सितम् ॥
ज्वरातिसारौ शोकान्ते क्षयथुर्वा तयोः क्षये ।
दुर्बलस्य विशेषेण नरस्यान्ताय कल्पते ॥
हनुमन्याग्रहस्तृष्णा बलङ्गासोऽतिमात्रया ।
प्राणाञ्शोरसि वर्त्तन्ते यस्य तं परिवर्जयेत् ॥
ताम्यतायच्छते शर्म्म न किञ्चिदपि विन्दति ।
क्षीणमांसबलाहारो सुमूर्षुरचिरान्नरः ॥
विरुद्धयोनयो यस्य विरुद्धोपक्रमा क्षयम् ।
वर्द्धन्ते दारुणा रोगाः शीघ्रं शीघ्रं स हन्यते ॥
बलं विज्ञानमारोग्यं ग्रहणीमांसशोणितम् ।
एतानि यस्य क्षीयन्ते क्षिप्रं क्षिप्र स हन्यते ॥
विकारा यस्य वर्द्धन्ते प्रकृतिः परिहीयते ।
सहसा सहसा तस्य मृत्युर्हरति जीवितम् ॥
इत्येतानि शरीराणि व्याधिमन्ति विवर्जयेत् ।

न ह्येषु धीराः पश्यन्ति सिद्धिं कांचिदुपक्रमात् ॥
यस्य श्यावे परिध्वस्ते हरिते चापि दर्शने ।
आपन्नो व्याधिरन्ताय ज्ञेयस्तस्य विजानता ॥
निःसंज्ञः परिशुष्कास्यः संविद्धो व्याधिभिश्च यः ।
उपरुद्धायुषं ज्ञात्वा तं धीरः परिवर्जयेत् ॥
हरिताश्च शिरा यस्य लोमकूपाश्च सस्रुताः ।
सोऽम्लाभिलाषी पुरुषः पित्तान्मरणमश्नुते ॥
शरीरान्ताश्च शोभन्ते शरीरञ्चोपशुष्यति ।
बलञ्च हीयते यस्य राजयक्ष्मा निहन्ति तम् ॥
अंसाभितापो हिक्का च छर्दनं शोणितस्य च
आनाहः पार्श्वशूलश्च भवत्यन्ताय शोषिणः ॥
वातव्याधिरपस्मारी कुष्ठी शोफी तथोदरी ।
गुल्मी च मधुमेही च राजयक्ष्मी च यो नरः ॥
अचिकित्स्या भवन्त्येते बलमांसक्षये सति ।
अन्येष्वपि विकारेषु तान् भिषक् परिवर्जयेत् ॥
विरेचनहृतानाहो यस्तृष्णानुगतो नरः ।
विरिक्तः पुनराध्माति यथा प्रेतस्तथैव सः ॥
पेयं पातुं न शक्नोति कण्ठस्य च मुखस्य च ।
उरसश्च विशुष्कत्वाद्यो नरो न स जीवति ॥
स्वरस्य दुर्बलीभावं हानिञ्च बलवर्णयोः ।
रोगवृद्धिमयुक्त्या च दृष्ट्वा मरणमादिशेत् ॥
ऊर्ध्वश्वासं गतोष्माणं शूलोपहतवङ्क्षणम् ।
श्रमं चानधिगच्छन्तं बुद्धिमान् परिवर्जयेत् ॥
यं नरं सहसा रोगो दुर्बलं परिमुञ्चति ।

संशयप्राप्तमाचष्टे यो जीवितं तस्य मन्यते ॥
निष्पूते यस्य दृश्यन्ते वर्णा बहुविधाः पृथक् ।
तच्च सौदल्यपः प्राप्य न स जीवितुमर्हति ॥
पित्तसृष्टानुगं यस्य शङ्खौ प्राप्य विमूर्च्छति ।
सरोषुः शङ्खको नाम्ना चिरात्त्रायन्ति जीवितम् ॥
सफेनं रुधिरं यस्य मुहुरास्यात्प्रमुच्यते ।
शूलैश्च तुद्यते कुक्षिः प्रत्याख्येयः स तादृशः ॥
बलमांसक्षयस्तीव्रो रोगवृद्धिररोचकः ।
यस्यातुरस्य लक्ष्यन्ते त्रीण्यहानि न जीवति ॥
सद्यस्तितिक्षतः प्राणान् लक्षणानि पृथक् पृथक् ।
अग्निवेश प्रवक्ष्यामि संसृष्टे यैर्न जीवति ॥
वाताष्ठीला तु सङ्क्षुब्धा तिष्ठन्ती दारुणा हृदि ।
तृष्णयाभि परीतस्य सद्यो मुष्णाति जीवितम् ॥
पिण्डिके शिथिलीकृत्य जिह्मीकृत्य च नासिकाम् ।
वायुः शरीरे विचरन् सद्यो मुष्णाति जीवितम् ॥
भ्रुवौ यस्य च्युते स्थानादन्तर्दाहश्च दारुणः ।
तस्य हिक्याकरो रोगः सद्यो मुष्णाति जीवितम् ॥
क्षीणशोणितमांसस्य वायुरूर्ध्वगतिश्चरन् ।
उभे मन्ये समायस्य सद्यो मुष्णाति जीवितम् ॥
अन्तरेण गुदं गच्छन् नाभिञ्च सहसानिलः ।
कुक्षेस्तु वङ्क्षणौ गृह्णन् सद्यो मुष्णाति जीवितम् ॥
हृदयञ्च गुदञ्चोभे गृहीत्वा मारुतो बली ।
दुर्बलस्य विशेषेण सद्यो मुष्णाति जीवितम् ॥
वङ्क्षणौ च गुदञ्चोभे गृहीत्वा मारुतो बली ।

श्वासं सञ्जनयन् जन्तोः सद्यो मुष्णाति जीवितम् ॥
नाभिं वस्तिं शिरो मूत्रं पुरीषञ्चापि मारुतः ।
विवध्य जनयन् शूलं सद्यो मुष्णाति जीवितम् ॥
भिद्येते वङ्क्षणौ यस्य वातशूलेः समन्ततः ।
भिन्नं पुरीषं तृष्णा च सद्यः प्राणान् जहाति सः ॥
शरीरं शोफिनं यस्य वातशोफेन देहिनः ।
भिन्नं पुरीषं तृष्णा च सद्यो जह्यात्स जीवितम् ॥
आमाशयसमुत्थाना यस्य स्यात्परिकर्त्तिका ।
तृष्णा गुदश्च घोरः सद्यो जह्यात् स जीवितम् ॥
पक्वाशयमधिष्ठाय हत्वा संज्ञाञ्च मारुतः ।
कण्ठे घुर्घरकं कृत्वा सद्यो हरति जीवितम् ॥
दन्ताः कृष्णमचूर्णाभाः मुखं चूर्णकसन्निभम् ।
सिद्यन्ते च गात्राणि लिङ्गं सद्यो मरिष्यतः ॥
तृष्णाश्वासशिरोरोगमोहदौर्ब्बल्यकूजनैः ।
स्पृष्टः प्राणान् जहात्याशु यकृद्रोगेण चातुरः ॥

ललाटे मूर्द्ध्नि वा वस्तौ नीला यस्य प्रकाशते ।
राजी बालेन्दुकुटिला न स जीवितुमर्हति ॥
प्रवालगुटिकाभासा यस्य गात्रे मसूरिकाः ।
उत्पद्याशु विनश्यन्ति न चिरात् स विनश्यति ॥
ग्रीवावमर्दो बलवान् जिह्वाश्वयथुरेव च ।
ब्रध्नास्यगलपाकश्च यस्य पक्वं तमादिशेत् ॥
सम्भ्रमोऽतिप्रलापोऽतिभेदोऽस्यामतिदारुणः ।
कालपाशपरीतस्य त्वयमेतत् प्रवर्त्तते ॥
अट्टहासश्च सुप्तस्य प्रलेढि दशनच्छदौ ।

श्रोतपादकरोच्छ्वासो यो नरो न स जीवति ॥
आह्वयन्तं समीपस्थं स्वजन जनमेव वा ।
महामोहाहृतमनाः पश्यन्नपि न पश्यति ॥
अतिप्रवृद्धया रोगाणां मनसश्च बलक्षयात् ।
वासमुत्सृजति क्षिप्रं शरीरी देहसञ्ज्ञकम् ॥
वर्णस्वरावग्निबलं वागिन्द्रियमनोबलम् ।
हीयतेऽसुक्षये निद्रा नित्या भवति वा न वा ॥

अथ प्रसङ्गात् साध्यलक्षणानि कथ्यन्ते ।

सौम्या दृष्टिर्भवेद्यस्य शौचं वक्त्र तथैव च ।
स्वादं गन्ध विजानाति स साध्यो नात्र संशयः ॥
पाणिपादौ च यस्योष्णौ दाहश्चाल्पतरो भवेत् ।
जिह्वा च कोमला यस्य स रोगी न विनश्यति ॥
स्वेदहीनो ज्वरो यस्य श्वासो नासिकया चरेत् ।
कण्ठश्च कफहीनः स्यात् स रोगी जीवति ध्रुवम् ॥
यस्य निद्रा सुखेन स्यात् शरीरं द्युतिमद्भवेत् ।
इन्द्रियाणि प्रसन्नानि स रोगो नैव नश्यति ॥
शरीरं यस्य शीतञ्च प्रकृत्या नैव हीयते ।
तस्य रोगा ध्रुवं साध्या विद्धि वक्त्र समासतः ॥

चत्वारिंशोऽध्यायः।

अथातो जनपदोद्ध्वंसनीयमध्यायं
व्याख्यास्यामः।

जनपदनखण्डे पञ्चालक्षेत्रे द्विजातिवराध्युषिते काम्पिल्यराजधान्यां भगवान् पुनर्वसुरात्रेयोऽन्तेवासिगणपरिवृत पश्चिमे धर्मेमासे गङ्गातीरे वनविचारमनुविचारन् शिष्यमग्निवेश्यमब्रवीत्। दृश्यन्ते हि खलु सौम्य! नक्षत्रग्रहचन्द्रसूर्यानिलानलाना दिशाञ्च प्रकृतिभूता ऋतुविकारिका भावा अचिरादितो भूरपि च न यथावद्रसवीर्य्यविपाकप्रभावनौषधीना प्रतिविधास्यति। यद्धियोगाच्चातङ्कप्रायता नियता तस्मात् प्रागुद्ध्वंसात् प्राक् च भूमेर्विरसीभावादुद्धर सौम्य! भैषज्यानि। यावन्नोपहतरसवीर्य्यविपाकप्रभावाणि। वयञ्चैषा रसवीर्य्यविपाकप्रभावानुपर्य्यालोचामहे। ये चास्माननुकाङ्क्षन्ति याश्च वयमनुकाङ्क्षामो न हि सम्यगुद्धृतेषु भैषज्येषु सम्यगुद्धृतेषु सम्यग्विहितेषु सम्यग्विचारचारितेषु जनपदोद्ध्वंसकराणा विकाराणा किञ्चिन्नतीकारगौरव भवति। एवं वादिन भगवन्तमात्रेयमग्निवेश्य उवाच। उद्धृतानि खलु भगवान् भैषज्यानि सम्यग्विहितानि च सम्यग्विचारितानि। अपि तु खलु जनपदोद्ध्वंसनमेकेन व्याधिना युगपदसमानप्रकृ-

त्याहारदेहबलसात्म्यसत्त्ववयसां मनुष्याणां कस्माद्भव-
तीति। तमुवाच भगवानात्रेयः। एवमसामान्यानामे-
भिरप्यग्निवेश। प्रकृत्यादिभिर्भावैर्मनुष्याणामेऽन्ये भावाः
सामान्यास्तद्गुणात् समानकालाः समानलिङ्गाश्च व्या-
धयोऽभिनिवर्त्तमाना जनपदमुद्ध्वंसयन्ति। ते तु खल्विमे
भावाः सामान्या जनपदेषु भवन्ति। तद्यथा, वायुरुदकं
देशः काल इति। तत्र वातमेवंविधमनारोग्यकरं विद्यात्।
तद्यथा, ऋतुविषममतिस्निग्धमतीक्ष्णमतिरूक्षमत्यभिष्यन्दिनमतिभैरवारावमतिप्रतिहत-
मरुत-गतिमतिकुण्डलिनमसाम्यगन्धवाष्पसिकता-पांशु-
धूमोपहतमिति। उदकन्तु खलु अत्यर्थविकृतगन्धवर्णरस-
स्पर्शवत् क्लेदबहुलमपक्रान्तजलचरविहङ्गमुपक्षीणजलाशय-
मप्रीतिकरमपगतगुणं विद्यात्। देशं पुनः प्रकृतिवि-
कृतिवर्णगन्धरसस्पर्शं क्लेदबहुलमुपसृष्टं सरीसृपव्याल-
मशकमूषकमक्षिका-मूषकोलूकश्मशानिकशकुनिजम्बुका-
दिभिस्तृणोलुपोपवनवन्तं प्रतानादिबहुलमपूर्ववदवपतितं
शुष्कनष्टशस्यं धूम्रपवनं प्रध्मातपक्षिगणमुत्क्रुष्टखगण-
मुद्भ्रान्तव्यथितविविधमृगपक्षिसङ्घमुत्सृष्टनष्टधर्मसत्यलज्जा-
चारगुणजनपदं यच्चतुर्भिरुदीर्णसलिलाशयं प्रततोल्का-
पातनिर्घातभूमिकम्पमतिभयारावरूपं रूक्षताम्रारुण-
सिताभ्रजालसंवृतार्कचन्द्रतारकमभीक्ष्णं ससम्भ्रमोद्वेग-
मिव सत्रासरुदितमिव सतमस्कमिव गुह्यकाचरितमिवा-
क्रन्दितशब्दबहुलञ्चाहितं विद्यात्। कालन्तु खलु यथार्तु-
लिङ्गादिपरीतलिङ्गमतिलिङ्गं हीनलिङ्गञ्चाहितं व्यवस्येत्।

इमानेवंयुक्तांश्चतुरो भावान् जनपदोद्ध्वंसकरान् वदन्ति कुशलाः। अतोऽन्यथाभूतांस्तु हितानाचक्षते।

वैगुण्यमुपपन्ने च देशे काले निलेऽग्नि।
रसायनानां विधिवदुपयोगः प्रशस्यते॥
शस्यते देहवृत्तिश्च भेषजैः पूर्वसृष्टैः।
हितं पथ्याशनं नित्यं चित्ताज्ञीते विसर्जनम्॥
सत्यं भूते दया दानं बलयो देवतार्चनम्।
सद्वृत्तस्यानुवृत्तिश्च प्रशमो गुणिरात्मनः॥
हितं जनपदानाञ्च शिवानामुपसेवनम्।
सेवन ब्रह्मचर्यस्य तथैव ब्रह्मचारिणाम्॥
सद्धया धर्मशास्त्राणां महर्षीणां जितात्मनाम्
धार्मिकैः सात्त्विकैर्नित्यं सहास्या वृद्धसम्मतैः॥
इत्येदङ्गेषजं प्रोक्तमायुषः परिपालनम्।
येषामनियतो मृत्युस्तस्मिन् काले सुदारुणे॥

इत्येवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच किन्नु खलु भगवन्। नियतकालप्रमाणमायुः सर्वं न वेति? भगवानुवाच, इहाग्निवेश। भूतानामायुर्युक्तिमपेक्षते।

दैवे पुरुषकारे च स्थितं ह्यस्य बलाबलम्।
दैवमात्मकृतं विद्यात् कर्म यत् पौर्वदैहिकम्॥
स्मृतः पुरुषकारस्तु क्रियते यदिहापरम्।
बलाबलविशेषोऽस्ति तयोरपि च कर्मणोः॥
दृष्टं हि त्रिविधं कर्म हीनं मध्यमुत्तमम्।
तयोरुदारयोर्युक्तिर्दीर्घस्य सुखस्य च॥
नियतस्यायुषो हेतुर्विपरीतस्य चेतरा।

मध्यमा मध्यमश्रेष्ठा कारणं शृणु चापरम् ॥
दैव पुरुषकारेण दुर्बल ह्युपहन्यते ।
दैवेन चेतरत् कर्म्म विशिष्टेनोपहन्यते ॥
दृष्ट्वा यदेके मन्यन्ते नियतं मानमायुषः ।
कर्म्म किञ्चित् क्वचित् काले विपाके नियतं महत् ॥
किञ्चिन्नकालनियतं प्रत्यये प्रतिबोध्यते ॥

तस्मादुभयदृष्टत्वादैकान्तग्रहणमसाधु । निदर्शनमपि चात्रोदाहरिष्यामः । यदि हि नियतकालप्रमाणमायुः सर्वं स्यादायुष्कामानां न मन्त्रौषधिमणिमङ्गलबल्युपहार-होमनियम-प्रायश्चित्तोपवास-स्वस्त्ययन-प्रणिपातगमनाद्याः क्रिया इष्टश्च प्रयोज्येरन् । नोद्भ्रान्तचण्डचपलगोगजोष्ट्र-खरतुरगोन्महिषादयः पवनादयश्च दुष्टा परिहार्य्याः स्युः । न प्रपातगिरिविषमदुर्गाम्बुवेगाः । तथा न प्रमत्तोन्मत्तो-द्भ्रान्तचण्डचपलमोहलोभाकुलमतयो नारयो न प्रहर्त्तोऽग्नि-र्न च विविधविषाश्रयाः सरीसृपोरुमादयः । न साहसं न देशकालचर्य्या न नरेन्द्रप्रकोप इत्येवमादयो भावा नाभावकराः स्युरायुषः सर्वस्य नियतकालप्रमाणत्वात् । न चानभ्यस्ताकालमरणभयनिवारकाणामकाल-मरणभय-मागच्छेत् प्राणिनाम् । व्यर्थाश्चारम्भकाः प्रयोगबुद्धयः स्यु-र्मेहर्षीणां रसायनाधिकारे । नापीन्द्रो नियतायुष मन्तुं वज्रेणाभिहन्यात् । नाश्विनावार्त्तं भेषजैनोपपादयेता नर्षयो यथेष्टमायुस्तपसा प्राप्नुयुर्न च विदितवेदितव्या महर्षयः ससुरेशाः सम्यक् पश्येयुरुपदिशेयुराचरेयुर्वा तस्मादितोपचारमूलं जीवितम् । अतो विपर्य्ययान्मृत्यु-

रिति । इत्येवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच । एवं सति अनियतकालप्रमाणायुषां भगवन् ! कथं काल-मृत्युरकालमृत्युर्भवतीति । तमुवाच भगवानात्रेयः श्रूयतामग्निवेश ! यथा यानसमायुक्तोऽक्षः प्रकृत्यैवाचगुणै-रुपेतः सर्वगुणोपपन्नो वाह्यमानो यथाकालं स्वप्रमाण-क्षयादेवावसानमाच्छेत् तथायुः शरीरोपगतं प्रकृत्या यथा-वदुपचर्य्यमाणं स्वप्रमाणक्षयादेव अवसानं गच्छति । स मृत्युः कालः । यथा च स एवाक्षोऽतिभाराधिष्ठितत्वाद्वि-षमपथादपथाद्वक्रभङ्गाद्वाह्यवाहक-दोषादनिर्मोक्षात् पर्य्यसनादनुपाङ्गाक्षान्तरा व्यसनमापद्यते । तथायुरप्य-यथाबलमारम्भादयथाग्न्यभ्यवहरणाद्विषमाभ्यवहरणाद्विष-मशरीरन्यासादतिमैथुनादसत्संश्रयादुदीर्णवेगविनिग्रहा-द्विधार्य्यवेगाविधारणाद्भूतविषाग्न्युपतापादभिघातादाहा-रविवर्जनाद्वान्तरा व्यसनमापद्यते । स मृत्युरकाल इति ।

एकचत्वारिंशोऽध्यायः ।

चिकित्साविधिः ।

जातमात्रश्चिकित्स्यः स्यान्नोपेक्ष्योऽल्पतया गदः ।
वह्निश्चस्विषैस्तुल्यः स्वल्पोऽपि विकरोत्यसौ ॥
रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् ।
ततः कर्म्म भिषक् पश्चाज्ज्ञानपूर्वं समाचरेत् ॥

भेषजं केवलं कर्त्तुं यो जानाति न चामयम् ।
वैद्यकर्म्म स चेत् कुर्य्याद्वधमर्हति राजतः ॥
यस्तु केवलशास्त्रज्ञो भेषजेष्वविचक्षणः ।
तं वैद्यं प्राप्य रोगी स्याद्यथा नौर्नाविकं विना ॥
यस्तु केवलशास्त्रज्ञः क्रियास्वकुशलो भिषक् ।
स मुह्यत्यातुरं प्राप्य प्राप्य भीरुरिवाहवम् ॥
यस्तु कर्म्मसु निष्णातो बाह्यांश्छास्त्रबहिष्कृतः ।
स सत्सु पूजां नाप्नोति बध चार्हति राजतः ॥
क्षेत्रादिष्वनभिज्ञो यः स्नेहादिषु च कर्म्मसु ।
स निहन्ति जनं लोभात् कुवैद्यो नृपदोषतः ॥
यस्तूभयज्ञो मतिमान् स समर्थोऽर्थसाधने ।
आहवे कर्म्म निर्वोढुं द्विचक्रः स्यन्दनो यथा ॥
यस्तु रोगविशेषज्ञः सर्वभैषज्यकोविदः ।
देशकालविभागज्ञस्तस्य सिद्धिर्न संशयः ॥
आदावतो नृजा ज्ञाने प्रयतेत चिकित्सकः ।
भेषजानां विधानेन ततः कुर्य्याच्चिकित्सितम् ॥
विकाराणामकुशलो न जिह्रीयात् कदाचन ।
न हि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः ॥
न चैकान्ते न निर्दिष्टे शास्त्रे निविशते बुधः ।
स्वयमप्यत्र भिषजा तर्कणीय चिकित्सता ॥
उत्पद्यते च सावस्था देशकालबलं प्रति ।
यस्यां कार्य्यमकार्य्यं स्यात्कर्म्म कार्य्यं विवर्जितम् ॥
क्वचिदर्थः क्वचिच्चैवो क्वचिदर्थः क्वचिद्वयः ।
कर्म्माभ्यासः क्वचिच्चापि चिकित्सा नास्ति निष्फला ॥

नैव कुर्वीत लोभेन चिकित्सापुण्यविक्रयम् ।
ईश्वराणां वसुमतां लिप्से तार्थन्तु वृत्तये ॥
नास्ति रोगो विना दोषैर्यस्मात्तस्माच्चिकित्सकः ।
अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत् ॥
ये न कुर्वन्त्यसाध्यानां चिकित्सां ते भिषग्वराः ।
अतो वैद्यैः श्रमः कार्य्यः साध्यासाध्यपरीक्षणे ॥
शीते शीतप्रतीकारमुष्णे तूष्णनिवारणम् ।
कृत्वा कुर्य्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत् ॥
अप्राप्ते वा क्रियाकाले प्राप्ते वा न क्रिया कृता ।
क्रिया हीनातिरिक्ता च साध्येष्वपि न सिध्यति ॥
विकारेऽल्पे महत्कर्म्म क्रिया लघ्वी गरीयसी ।
इदमेतदकौशल्यं कौशल्यं युक्तकर्म्मता ॥
क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत् ।
पूर्वस्यां शान्तवेगायां न क्रियासङ्करो हितः ॥

चिकित्सायां अङ्गानि ।

भिषग्द्रव्याण्युपस्थाता रोगी पादचतुष्टयम् ।
गुणवत्कारणं ज्ञेयं विकारस्योपशान्तये ॥
अपरञ्च । रोगी दूतो भिषग्दीर्घमायुर्द्वय सुसेवकः ।
सदौषधं चिकित्सायामित्यङ्गानि जगुर्बुधाः ॥

तत्रादौ रोगिणो लक्षणम् ।

रोगो यस्यास्ति रोगी स स चिकित्स्यस्तु याट्टयः ।
याट्टययाचिकित्स्योऽपि वक्ष्यमाणो निगाम्यताम् ॥
निजप्रकृतिवर्णाभ्यां युक्तः सत्त्वेन चक्षुषा ।
चिकित्स्यो भिषजा रोगी वैद्यभक्तो जितेन्द्रियः ॥

अयुक्तान् सत्त्ववान् साध्यो द्रव्यवान् मित्रवानपि ।
चिकित्स्यो भिषजा रोगो वैद्यवाक्यकृदास्तिकः ॥
चण्डः साहसिको भीरुः कृतघ्नो व्यग्र एव च ।
शोकाकुलो मुमूर्षुश्च विहीनः करणैश्च यः ॥
वैरी वैद्यविद्वेषश्च श्रद्धाहीनश्च शङ्कितः ।
भिषजामविधेयाश्च नोपक्रम्या भिषग्विधाः ॥
स न सिध्यति वैद्यस्तु यदि यस्य न पूज्यते ।
एतानुपाचरन् वैद्यो बहून् दोषानवाप्नुयात् ॥

दूतस्य लक्षणम् ।

यश्चिकित्सकमानेतुं याति दूतः स कथ्यते ।
स च यादृक् समुचितस्तादृगत्र निगद्यते ॥
दूताः सुजातयोऽव्यग्राः पटवो निर्मलाम्बराः ।
सुखिनः शीलवन्तश्च बलिनो धर्मसंयुताः ॥
नम्रप्रकृतयो वश्याः प्रभुकल्याणकाङ्क्षिणः ।
दूताः सत्त्वगुणैर्युक्ताः प्रशस्ता दौत्यकर्मणि ॥

वैद्यस्य लक्षणम् ।

चिकित्सां कुरुते यस्तु स चिकित्सक उच्यते ।
स च यादृक्समीचीनस्तादृशोऽपि निगद्यते ॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्मा स्वयंकृतो ।
लघुहस्तः शुचिः शूरः सद्योऽपस्करभेषजः ॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी प्रियंवदः ।
सत्यधर्मपरो यश्च वैद्य ईदृक् प्रशस्यते ॥
कुचेलः कर्कशः स्तब्धो ग्रामीणः स्वयमागतः ।
यश्च वैद्यो न पूज्यन्ते धन्वन्तरिसमा यदि ॥

दीर्घायुषो लक्षणानि अरिष्टलक्षणवर्णनाध्याये वर्णितानि तानि सम्यग्विचार्य भिषजा रोगी चिकित्स्यः ।

द्रव्यम ।

सर्वे द्रव्यमपेक्षन्ते रोगिप्रभृतयो यतः ।
विना वित्तं न भैषज्यं चिकित्साङ्गं ततो धनम् ॥

परिचारकस्य लक्षणम् ।

स्निग्धोऽनुगुणबलवान् युक्तो व्याधितरक्षणे ।
अव्यवायजडश्चान्तो युज्यते परिचारकः ॥

भिषजस्य लक्षणम् ।

यो व्याधिं हरति न तद्द्रव्यं प्रोक्तमौषधम् ।
तद्व्याहृतमवश्यं स्याद्रोगघ्नं तादृशं ध्रुवे ॥
प्रशस्तदेशे सञ्जातं प्रशस्तेऽहनि चोद्धृतम् ।
अल्पमात्रं बहुगुणं गन्धवर्णरसान्वितम् ॥
दोषघ्नमग्लानिकरमधिकं न विकारि यत् ।
समीक्ष्य काले दत्तञ्च भेषजं स्याद्गुणावहम् ॥

यथा विषं यथा शस्त्रं यथाग्निरशनिर्यथा ।
तथौषधमविज्ञातं विज्ञातममृतं यथा ॥
रोगादपि विषं तीक्ष्णमुत्तमं भेषजं भवेत् ।
भेषजं वापि दुर्युक्तं तीक्ष्णं सम्पद्यते विषम् ॥
तस्मात्राभिषजायुक्तं युक्तिवाह्यं न भेषजम् ।
धीमता किञ्चिदादेयं जीवितारोग्यकाङ्क्षिणा ॥
दुःखिताय प्रयाताय श्रद्दधानाय रोगिणे ।
यो भेषजमविज्ञाय प्राज्ञमानी प्रयच्छति ॥
मृत्युभूतस्य पापस्य दुर्मतेरस्यकर्मणः ।

नरो नरकपाती स्यात्तस्य सम्भाषणादपि ॥
वरमाशीविषविषं क्वथितं ताम्रमेव वा ।
पीतमत्यग्निसन्तप्ता भक्षिता वाप्ययोगुडाः ॥
न तु श्रुतवतां वैद्य विभ्रता शरणागतात् ।
गृहीतमन्नपानं वा क्षिप्तं वा रोगपीड़ितात् ॥
वरं दग्धो वरं व्याले वरं याद्योविभीषणे ।
सागरे जीवनोत्सर्गः सुघोरे वापि धन्वनि ॥
नाधीतशास्त्रे नाभ्यस्तकर्म्मण्यखिलवैरिणि ।
न कार्य्यं दुर्म्मतौ पापे भिषज्यात्मसमर्पणम् ॥

भिषजा सर्वथा सर्वप्राणभृतां शर्म्माशासितव्यम् । अहरहरुत्थिष्ठा चोपविशता च सर्वात्मना चातुराणामारोग्ये प्रयतितव्यम् । जीवितहेतोरपि चातुरा न द्रोग्धव्याः । मनसापि च परस्त्रियो नाभिधर्षयितव्याः । तथा सर्वमेव परस्वम् । निभृतवेशपरिच्छदेन भवितव्यम् । श्लक्ष्णशुक्लधर्म्मगम्यधन्यसत्यहितमितवचसा देशकालविचारिणा स्मृतिमता ज्ञानोत्थानोपकरणसम्पन्नेन नित्यं यत्नवता न कदाचिद्राजद्विष्टानां महाजनद्विष्टानां वाप्योषधमनुविधातव्यम् । एवं सर्वेषामत्यर्थविकृतदुष्टदुःखशीलाचारोपचाराणां सुमूर्षतां तथैवासन्निहितेश्वराणां स्त्रीणामनध्यक्षाणां वा विशेषतस्तु युवतीनां न प्रतिकर्त्तव्यम् । आतुरकुलं चानुप्रविशता विदितेनानुमतप्रवेशिना सार्द्धं पुरुषेण सुसंवीतेनावाक्शिरसा स्मृतिमता स्तिमितेनावेक्ष्यावेक्ष्यबुद्धया सम्यगनुप्रवेष्टव्यम् अनुप्रविश्य च वाङ्मनोबुद्धीन्द्रियाणि न क्वचित् प्रणिधातव्यानि अन्यत्रातुरोप-

कारार्थादातुरगतेष्वन्येषु वा भावेषु न चातुरकुलप्रवृत्तयो बहिर्निसारयितव्याः क्षसितं चायुषः प्रमाणं न वर्णयितव्यं जानतापि तत्र यत्नीयमानमातुरस्यान्यस्य वाप्युपघाताय उम्पद्यते तेनैतदप्यवश्यं चिन्तनीयं यज्जीवनाशाच्छेदात् प्राणिनो धैर्यगाम्भीर्यादिप्रभ्रष्टाः परं शोचनीयतां यान्ति अपिच न कश्चिज्जगत्यप्रमत्तो विद्यते कदाचिद्व्याधेः साध्यत्वेऽप्यसाध्यता भ्रान्तेस्तद्व्याख्यानात्तद्वचनप्रतीतौ ह्यातुर आयुष्मानपि विपद्यते अतो नानिवार्यहेतुं विनारिष्टलक्षणं प्रकटनीयम्। ज्ञानवतापि च नात्यर्थमात्मनो ज्ञाने कत्थितव्यम्।

आप्तादपि कत्थमानादत्यर्थमुद्विजन्त्येके।
स्त्रीभिः सहास्यां संवादं परिहासञ्च वर्जयेत्॥
दत्तञ्च ताभ्यो नादेयमन्नाद्यद्विप्रवरैः॥

मातरं पितरं पुत्रान् बान्धवानपि चातुरः।
अथैतानभिगच्छेत वैद्ये विश्वासमेति च॥
विसृजत्यात्मनात्मान न चैनं परिगच्छते।
तस्मात् पुत्रवदेवैनं पालयेदातुरं भिषक्॥
धर्म्यार्थौ कीर्त्तिमत्यञ्च सतां ग्रहणमुत्तमम्।
प्राप्नुयात् स्वर्गवासञ्च हितमारभ्य कर्म्मणा॥

———

द्विचत्वारिंशोऽध्यायः ।

अथ वैद्यविचार ।

द्विविधासु खलु भिषजो भवन्त्यग्निवेश ! प्राणानामेकेऽभिसरा हन्तारो रोगाणामेकेऽभिसरा रोगाणां हन्तारः प्राणिनामिति । एवमादिन भगवन्तमात्रेयमग्निवेश उवाच भगवंस्ते कथमस्माभिर्वेदितव्या भवेयुरिति । भगवानुवाच य इमे कुलीना पर्य्यवदातश्रुता परिशिष्टकर्म्माणो दक्षा शुचयो जितहस्ताजितात्मानः सर्वोपकरणवन्तः सर्वेन्द्रियोपपन्नाः प्रकृतिज्ञाः प्रतिपत्तिज्ञास्ते प्राणिनामभिसरा हन्तारो रोगाणाम् । तथाविधा हि केवले शरीरज्ञाने शरीराभिनिर्वृत्तिज्ञाने प्रकृतिविकारज्ञाने च निःसंशया सुखसाध्यकृच्छ्रसाध्ययाप्यप्रत्याख्येयानाञ्च रोगाणां समुत्थानपूर्वरूपलिङ्गवेदनोपशयसंप्राप्तिविशेषविज्ञाने अपगतसन्देहाः त्रिविधस्यायुर्वेदसूत्रस्य सनिदानस्य सविविधौषधग्रामस्य प्रवक्तारः सर्वेषां मूलफलानां चतुर्णां महास्नेहानां पञ्चानां लवणानामष्टानाञ्च मूत्राणामष्टानाञ्च क्षीराणां पञ्चकर्म्मात्ययस्यौषधगणस्य सर्वेषां चूर्णप्रदेहानां विरेचनानां कषायाणामिति स्वस्थवृत्तौ च भोजनयाननिद्रास्नानचंक्रमणव्यायामात्राद्रव्याञ्जनधूमनावनाद्यञ्जन-परिमार्जनवेगविधारणाविधारणव्यायामसात्म्येन्द्रियपरोपक्रमसद्वृत्तकुशलाः बहु-

विधविधानयुक्तानाञ्च स्नेहस्वेदवमनविरेचौषधोपचाराणां कुशलाः शिरोरोगादेश्च दोषाश्रयविकल्पजस्य व्याधिसंग्रहस्य संचयपिड़कादिद्रधेः सर्वेषाञ्च शोफानां बहुविधशोफानुबन्धानां व्रणानाञ्च लङ्घनादीनामुपक्रमाणां सन्तर्पणापतर्पणजानां रोगाणां सरूपप्रशमनानां शोणितजानाञ्च व्याधीनां मदमूर्च्छासंन्यासानाञ्च सकारणरूपौषधानां कुशलाः कुशलाश्च धात्वाशयानाञ्च रोगाणामौषधसंग्रहाणाञ्च कृत्स्नस्य च तन्त्रोद्देशलक्षणस्य तन्त्रस्य च ग्रहणधारणविज्ञानप्रयोगकर्मैकार्थ्यकालकर्तृकरणकुशलाः कुशलाश्च स्मृतिमतिप्रज्ञायुक्तिज्ञानस्य सर्वप्राणिषु च परं कृपालव इत्येवंबहुविधगुणयुक्ता भवन्त्यस्मिन्वेद्य। अतो विपरीता रोगाणामभिसरा हन्तारः प्राणिनामिति। ते भिषक्छद्मप्रतिच्छन्ना राज्ञां प्रसादाचरन्ति राष्ट्राणि तेषामिदं विशेषविज्ञानमत्यर्थं वेद्यवेशेन श्लाघमाना विभिक्षान्तरमनुचरन्ति कर्मलोभात् श्रुत्वा च कस्यचिदार्त्तस्यभितः परिपतन्ति गृध्रा इव मांसलोभात् सश्रवणे चास्यात्मनो वेद्यगुणानुचैर्वदन्ति यश्चास्य वैद्यः प्रतिकर्म करोति तस्य च दोषान् मुहुर्मुहुरुदाहरन्त्यातुरमित्राणि च प्रहर्षेणोपजापोपसेवाभिरिच्छन्त्यात्मोकर्तुमल्पेच्छताञ्चात्मनः ख्यापयन्ति। कर्म चासाद्य मुहुर्मुहुरवलोकयन्ति दाक्ष्येणाज्ञानमात्मनश्छादयितुकामा व्याधितञ्चापवर्त्तयितुमशक्नुवन्तो व्याधितमेवानुपकरणमपचारिकमनात्मवन्तमुद्दिशन्ति अन्तगतञ्चाभिसमीक्ष्यान्यमाश्रयन्ति देशमपटेशमात्मनः कृत्वा प्राकृतजनसन्निपाते चात्मनः कौशलमकुशलवद्वर्ण-

यन्ति अधीरवच्च धैर्यमपवदन्ते विद्वज्जनसन्निपातज्वाभिसमीक्ष्य प्रतिभयमिव कान्तारमध्वगाः परिहरन्ति । न चैषामाचार्यः शिष्यो वा सब्रह्मचारी वैद्यादिको वा कश्चित् प्रज्ञायते इति ।

भिषक्छद्मप्रतिच्छन्ना व्याधितांस्तर्कयन्ति ये ।
वीतंसमिव संत्रित्य वने शाकुन्तिको द्विजान् ॥
श्रुतदृष्टक्रियाकालमात्रज्ञानवदिष्कृताः ।
वर्जनीया हि ते मर्त्योश्वरन्त्यनुचरा भुवि ॥
वृत्तिहेतोर्भिषङ्ज्ञानपूर्णान् मूर्खविगारदान् ।
वर्जयेदातुरो विद्वान् सर्पांस्ते पीतमारुताः ॥
ये तु शास्त्रविदो दक्षाः शुचयः कर्मकोविदाः ।
जितहस्ता जितात्मानस्तेभ्यो नित्यकृतं नमः ॥

त्रिचत्वारिंशोऽध्यायः ।

अथायुर्वेदाध्ययनविधिः ।

शुचये कृतोत्तरासङ्गायाव्याकुलायोपस्थिताय्याध्ययनकाले शिष्याय यथाशक्ति गुरुरुपदिशेत् पदं पादं श्लोकं वा ते च पदपादश्लोका भूयःक्रमेणानुसन्धेया एवमेकैकशो वाचयेदात्मना चानुपठेत् । अद्रुतमविलम्बितमविशङ्कितमननुनासिकं व्यक्ताक्षरमपीड़ितवर्णमस्थिस्थूलौष्ठहस्तैरनभिनीतं सुसंस्कृतं नात्युच्चैर्नातिनीचैश्च स्वरे पठेन्नचान्तरेण कञ्चिदुच्चरेत् तयोरधीयानयोः । एतदवश्यमध्येयमधीत्य

च कर्मण्यवश्यमुपासितव्यमुभयज्ञो हि भिषगाख्याहों भवति ।

शुचिर्गुरुपरो दक्षस्तन्द्रानिद्राविवर्जितः ।
पठेदेतेन विधिना शिष्यः शास्त्रान्तमाप्नुयात् ॥
वाक्सौष्ठवेऽर्थविज्ञाने प्रागल्भ्ये कर्मनैपुणे ।
तदभ्यासे च सिद्धौ च यतेताध्ययनान्तगः ॥
इत्यष्टाङ्गमिदं तन्त्रमादिदेवप्रकाशितम् ।
विधिनाधीत्य युञ्जाना भवन्ति प्राणदा भुवि ॥
अधिगतमप्यध्ययनमप्रभाषितमर्थतः ।
खरस्य चन्दनभार इव केवलं परिश्रमकरं भवति ॥
यथा खरश्चन्दनभारवाही
भारस्य वेत्ता न तु चन्दनस्य ।
एवं हि शास्त्राणि बहून्यधीत्य
चार्थेषु मूढाः खरवद्वहन्ति ॥

तस्मात् समग्रमायुर्वेदशास्त्रमनुपदपादश्लोकार्द्धश्लोकमनुवर्णयितव्यमनुश्रोतव्यञ्च । कस्मात् सूक्ष्मा हि द्रव्यरसगुणवीर्यविपाकदोषधातुमलाशयमर्मशिरास्नायुसन्धिस्थिगर्भसम्भवद्रव्यसमूहविभागास्तथा प्रनष्टशल्योद्धरणव्रणविनिश्चयभग्नविकल्पाः साध्यायाप्रत्याख्येयता च विकाराणामेवमादयश्चान्ये विशेषाः सद्वृत्तयो ये विचिन्त्यमानाः विमलविपुलबुद्धेरपि बुद्धिमाकुलीकुर्युः किं पुनरल्पबुद्धेः । तस्मादवश्यमनुपदपादश्लोकार्द्धश्लोकमनुवर्णयितव्यमनुश्रोतव्यञ्च । अध्यशास्त्रविप्रयोपपत्तानाच्चार्थानामिहोपविपतितानामर्थवशात् तेषां तद्विद्येभ्य एव व्याख्यान-

मनुश्रोतव्य कस्मात्र श्लोकस्मिन् शास्त्रे शक्यः सर्वशास्त्राणा-मवरोधः कर्त्तुम् ।

अध्ययनविधिवत् सभाषाविधिमत कर्त्तुं व्याख्या-स्यामः । भिषक् भिषजा सह सभाषते । तद्विद्यस-भाषा हि ज्ञानाभियोगसंघर्षकरी भवति वैशारद्यमपि चाभिनिर्वर्त्तयति वचनशक्तिमपि चाधत्ते यद्यच्चाभि-दीपयति पूर्वश्रुते च सन्देहवतः पुनः श्रवणात् श्रुतसंशय-मपकर्षति श्रुतेश्चासन्देहवतो भूयोऽध्यवसायमभिनिर्वर्त्त-यति अश्रुतमपि कञ्चिदर्थं श्रोत्रविषयमापादयति ।

शास्त्र गुरुमुखोदीर्णमादायोपास्य चासकृत् ।
यः कर्म कुरुते वैद्यः स वैद्योऽन्ये तु तस्कराः ॥

चतुस्त्रिंशोऽध्यायः ।

योग्यासूत्रीयोऽध्यायः ।

अधिगतसर्वशास्त्रार्थमपि शिष्यं योग्याङ्कारयेत् । छेद्या-दिषु स्नेहादिषु च कर्मपथमुपदिशेत् । सुश्रुतोऽप्य-कृतयोग्यः कर्मसु अयोग्यो भवति । तत्र पुष्पफलालाबू-कालिन्दकपुषैर्वारुककर्कारुकप्रभृतिषु छेद्यविशेषान् दर्श-येदुत्कर्त्तनपरिकर्त्तनानि चोपदिशेत् । दृतिवस्तिप्रसे-वकप्रभृतिषूदकपङ्कपूर्णेषु भेद्ययोग्याम् । सरोजि चर्मण्या-मते लेख्यस्य । मृतपशुशिरासूत्पलनालेषु च वेध्यस्य ।

घृष्टोपहतकाष्ठवेणुनलनालोशुष्कालाबुमुखेष्वेषस्य । पनस-विम्बीबिल्वफलमज्जमृतपशुदन्तेष्वाहार्यस्य । मधूच्छिष्टो-पलिप्ते शाल्मलीफलके विस्राव्यस्य । सूक्ष्मबनवस्त्रान्तयो-र्मृदुचर्मान्तयोश्च सेव्यस्य । पुस्तमयपुरुषाङ्गप्रत्यङ्गविभे-षेषु बन्धनयोग्याम् । मृदुमांसपेशीषूत्पलनालेषु च कर्ण-सन्धिबन्धनयोग्याम् । उदकपूर्णघटपार्श्वस्रोतस्यलाबू-मुखादिषु च नेत्रप्रणिधानबस्तित्रणबस्तिपीड़नयोग्या-मिति ।

एवमादिषु मेधावी योग्याहेंषु यथाविधि ।
द्रव्येषु योग्यां कुर्वाणो न प्रमुह्यति कर्मसु ॥
तस्मात् कौशलमन्विच्छन् शस्त्रक्षाराग्निकर्मसु ।
यस्य यत्रेह साधर्म्यं तत्र योग्यां समाचरेत् ॥
व्याधितानामभावादि ष्टणामेष विधिर्मतः ।
तत्राप्तो गुरुणा कर्म कृतं पश्येत् समाहितः ॥
अभ्यस्येच्च स्वयं कर्म सद्गुरोरुपदेशतः ।
नाभ्यस्तकर्मा कार्येषु मुह्येन्नौरिवाहवे ॥

अथातो द्विज्ञानार्जनीयमध्यायं व्याख्यास्यामः ।

द्विविधं खलु ज्ञानं भवति आनुमानिकमैन्द्रियञ्च । शास्त्राध्ययनादृगुरूपदेशात् सदृशदर्शनादेशोपायादनुमित्या वस्तुस्वरूपोपलब्धिर्नामानुमानिकम् । ऐन्द्रियं नाम यद्यत् साक्षादिन्द्रियद्वयकव्यापारादाविर्भवति । इदं अप्येते भिषग्भिरर्जनीये ज्ञाने धर्मार्थयशःप्रेप्सुभिः । न खलु सर्वत्र तत्त्वावबोधार्थमिन्द्रियप्रयोगः सर्वेषां सुकरो भवति ।

न च केवलेनानुमानिकज्ञानेन कश्चित् कर्मसु पाटवं लभेत । विशेषतस्तु देहविज्ञाने शस्त्रादिकर्मणि च ऐन्द्रिय-ज्ञानस्यैकान्तत एव प्रयोजनं तद्दृते न कथमपि तत्त्वाव-बोधो जायते । भिषगनर्जितैन्द्रियज्ञानः शस्त्रावचारणो-द्यतः शस्त्रपाणिराततायी साक्षात् कृतान्तानुचर इव वा ज्ञेयः । देहस्यास्थिपेशीकोष्ठशिराधमनीस्नायुत्वयस्रस्रक्ष्मे-दोमज्जादीनां प्रकृत्याकृतिसंस्थित्वादीन् विशेषान् विज्ञातु-कामेन वैद्येनावश्यं शवच्छेदः । छित्त्वा शारीरस्थाने यद्यदुपरेक्षते तत्तदवश्यं प्रत्यक्षं करणीयम् । अकृतव्यव-च्छेदो हि भिषक् शस्त्रादिकर्मणि सर्वथैवासमर्थः, स्नेहा-दिष्वपि क्रियासु न सम्यक् क्षमो भवति । औषधेनवौर-भ्रसौयुतपौष्कलावतादेषु शस्त्रतन्त्रेषु व्यवच्छेदं विना न च तत्तच्छास्त्राध्ययनाधिकारित्वमपि जायते कस्यापीति । अतः शवं व्यवच्छिद्य वर्णविषयकमैन्द्रियज्ञानमवश्यमर्जनीय भिषजा इति ।

ज्ञानं यद्द्विविधं प्रोक्तमानुमानिकमैन्द्रियम् ।
प्रयतेत तयोः प्राप्तौ वीततन्द्रो भिषक् सदा ॥
अनुमानमसम्यक् स्यादैन्द्रिय सम्यगेव हि ।
तत् तत्त्वे निखिले शस्त्रया योगमैन्द्रियमाचरेत ॥
ऐन्द्रिय संशयच्छेदि तेन तत्त्वं प्रकाशते ।
एकस्यैन्द्रियमन्येन चिन्त्यं स्यादानुमानिकम् ॥
वर्णनं चैन्द्रियाणां यद्विधिवाक्यादिसंयुतम् ।
तदेव कौर्त्तितं शास्त्रमाप्तैः संग्रथितं शुभम् ॥
अधीतव्यमवश्यं तद्भूतत्त्वबुभुत्सुभिः ।

कथमन्यथा न स्याद्बालिशत्वविनाशनम् ॥
आयुष्मद्भिश्च विद्वद्भिरार्षैर्लोकहिते रतैः ।
स्वार्थलेशमनिच्छद्भिर्ब्रह्मचिन्तापरायणैः ॥
शास्त्रेषु ग्रथितेष्वेषु विचिकित्सां प्रकुर्वताम् ।
नरके नियतो वासो नास्ति तेषां गतिः शुभा ॥
सर्वमिन्द्रियबोधेन तत्त्वं केनोपलभ्यते ।
प्रत्यक्षं जगति स्वल्पमनुमेयं मतं बहु ॥

पञ्चचत्वारिंशोऽध्यायः ।

अथ नाड़ीपरीचा ।

कल्याणमपिवारिष्टं स्फुटं नाड़ी प्रकाशयेत् ।
रुजां कालिकवैशिष्ट्यादुक्तवेत् सापि विलक्षणा ॥
यल्लक्षणा तु नैरुज्ये नोदितायां तथा रुजि ।
वयःकालरुजां भेदैर्भिन्नभावं बिभर्त्ति सा ॥
तदवस्थामतः प्राज्ञः सर्वथा सार्वकालिकीम् ।
ज्ञातुं यतेत मतिमान् लक्षणैः सुसमाहितः ॥
परिव्याप्याखिल काय धमन्यो हृदयाश्रयाः ।
वहन्तःशोणितस्रोतः शरीर पोषयन्ति ताः ॥
हृदयाकुञ्चनाद्रक्तं कियदुत्प्रुत्य धामनीम् ।
तत्सञ्चितं तदुत्थाच्च प्रविश्य चापरास्वपि ॥

व्रजित्वा निखिलं देहं ततो विशति फुप्फुसम् ।
फुप्फुसाद्धृदयं याति क्रियैव स्यात्पुनः पुनः ॥
शोणितोत्प्लववेगेन धमनी स्पन्दते मुहुः ।
उत्प्लवप्रकृतेर्भेदाद्भेदः स्यात् स्पन्दनस्य च ॥
स्थौल्यादिकं धमन्याश्च तत्प्रकृत्यैव जायते ।
तत्प्रकारान् समासेन ब्रुवे वक्ष्ये निशामय ॥
स्नायुर्नाड्यो रसा हिरा धमनी धामनी धरा ।
तन्तुकी जीवितघ्ना च शिरापर्य्यायवाचकाः ॥

नाड़ीस्पन्दनसंख्या ।

षष्ट्या स्पन्दास्तु मात्राभिः षट्पञ्चाशद्भवन्ति हि ।
शिशोः सद्यः प्रसूतस्य पञ्चाशत्तदनन्तरम् ॥
चत्वारिंशत्ततः स्पन्दाः षट्त्रिंशद्यौवने ततः ।
प्रौढ़स्यैकोनत्रिंशत्स्युर्वार्द्धकेऽष्टौ च विंशतिः ॥
पुंसोऽतिस्थविरस्य स्युरेकत्रिंशदतः परम् ।
योषितां पुरुषाणाञ्च स्पन्दास्तुल्याः प्रकीर्त्तिताः ॥
प्रौढ़ानां रमणीनान्तु द्व्यधिका सम्मता बुधैः ।
दशगुर्वक्षरोच्चारकालः प्राणः षडात्मकैः ॥
ते पलं स्यात्तु तत्षष्ट्या दण्ड इत्यभिधीयते ॥

जलस्थलनभश्चारिजीवानां गतिभिः सह ।
गतयो ह्युपमीयन्ते नाड़ीनां भिन्नलक्षणाः ॥
कस्य कोट्टगतिस्तत्र विज्ञातव्या विचक्षणैः ।
अधेतव्यञ्च तच्छास्त्रं सद्गुरोर्ज्ञानशालिनः ॥
परीक्षणीयाः सततं नाड़ीनां गतयः पृथक् ।
न चाध्ययनमात्रेण नाड़ीज्ञानं भवेदिह ॥

सव्येन सा विधृतकूर्परभागभाजा
पीड्याथ दक्षिणकराङ्गुलिकात्रयेण।
अङ्गुष्ठमूलमधिपश्चिमवामभागे
नाड़ीप्रभञ्जनगतिः सततं परीक्ष्या॥
अङ्गुष्ठस्य तु मूले या धमनी जीवसाक्षिणी।
तस्या गतिवशाद्विद्यात् सुखं दुःखञ्च देहिनाम्॥
प्रातःकृत्यसमाचारः कृताचारपरिग्रहम्।
सुखासीनः सुखासीनं परीक्षार्थमुपाचरेत्॥
सद्यः स्नातस्य सुस्थस्य क्षुत्तृष्णातपवर्जिनः।
व्यायामश्रान्तदेहस्य सम्यङ्नाड़ी न बुध्यते॥
तैलाभ्यङ्गे रतेरन्ते भोजनान्ते तथैव च।
उद्वेगादिषु नाड़ी च न सम्यगवबुध्यते।
भूलताभुजगप्राया स्वस्था स्वास्थ्यमयी शिरा।
प्रातः स्निग्धमयी नाड़ी मध्याह्नेऽप्युष्णतान्विता॥
सायाह्ने धावमाना च रात्रौ वेगविवर्जिता।
वाताङ्कगता नाड़ी चपला पित्तवाहिनी।
स्थिरा श्लेष्मवती ज्ञेया मिश्रिते मिश्रिता भवेत्॥
सर्पजलौकादिगतिं वदन्ति विबुधाः प्रभञ्जने नाडीम्।
पित्ते च काकलावकभेकादिगतिं विदुः सुधियः॥
राजहंसमयूराणां पारावतकपोतयोः।
कुक्कुटादेर्गतिं धत्ते धमनी कफसङ्गता॥
मुहुः सर्पगतिं नाड़ीं मुहुर्भेकगतिं तथा।
वातपित्तद्वयोद्भूतां भाषन्ते तद्विदो जनाः॥
भुजगादिगतिस्थानां राजहंसगतिं तथा।

वातश्लेष्मसमुद्भूता प्रवदन्ति महाधियः ॥
मण्डूकादिगतिं नाडीं मयूरादिगतिं धराम् ।
पित्तश्लेष्मसमुद्भूतां प्रवदन्ति मनीषिणः ॥
कदाचिन्मन्दगा नाड़ी कदाचिच्छीघ्रगा भवेत् ।
त्रिदोषप्रभवे रोगे विज्ञेया च भिषग्वरैः ॥
यदा यं धातुमाप्नोति तदा नाड़ी तथागतिः ।
तदा हि सुखसाध्यत्व नाडीज्ञानेन बुध्यते ॥
भुक्तस्य वान्तस्य च मेदुरस्य
निद्रारतस्यातितथा रिरंसोः ।
कफाकुलस्यातिसुखे रतस्य
स्थौल्य दधाना शिथिलं प्रयाति ॥
मन्द मन्द शिथिलशिथिलं व्याकुलं व्याकुलं वा
स्खित्वा स्खित्वा वहति धमनी याति नाशञ्च सूक्ष्मा ।
नित्यस्थानात् स्खलति पुनरप्यङ्गुलि सस्पृशेद्या
भावैरेवंविधबहुविधैः सन्निपातादसाध्या ॥
महादाहेऽपि शीतत्व शीतत्वे तापिता शिरा ।
नानाविधगतिर्यस्य तस्य मृत्युर्न संशयः ॥
भारप्रवाहमूर्च्छाभयशोकप्रमुखकारणान्नाड़ी ।
संमूर्च्छितापि गाढ़ं पुनरपि सा जीवितं धत्ते ॥
पतितः सन्धितो भेदी नष्टशुक्रश्च यः पुमान् ।
श्राम्यति विस्मयस्तस्य न किञ्चिन्मृत्युकारणम् ॥
स्वस्थानहीने शीते च हिमाक्रान्ते च निर्गदाः ।
भवन्ति निश्चला नाड्यो न किञ्चित्तत्र दूषणम् ॥
मृलताभुजगाकारा नाड़ी देहस्य संक्रमात् ।

वियोगे क्षीणतां याति मासान्ते मरणं ध्रुवम् ॥
क्षणाद्गच्छति वेगेन शान्ततां लभते क्षणात्।
सप्ताहान्मरणं तस्य यदङ्गे शैथिल्यजितः ॥
हिमवद्दिग्दा नाड़ी ज्वरदाहेऽपि तापिनाम्।
त्रिदोषसर्गं भजतां तदा मृत्युर्दिनत्रयात् ॥
निरीक्ष्य दक्षिणे पादे नाड़ीमेकां विशेषतः।
मुखे नाडी वहेन्नित्यं ततो दिनचतुष्टयम् ॥
जहाति यस्य स्वस्थानं यदाङ्गमपि नाडिका।
न स जीवितमाप्नोति त्रिदिनाभ्यन्तरे मृतिम् ॥
गतिं भ्रमरकस्येव वहेदेकदिनेन तु ॥
स्कन्धे न स्पन्दते नित्यं पुनर्गलति नाङ्गुली।
मध्ये दाहश्यामानां मृत्युर्भवति निश्चितम् ॥
स्थित्वा नाड़ी मुखे यस्य विद्युज्ज्योतिरिवेक्ष्यते।
दिनैकं जीवितं तस्य द्वितीये मरणं भवेत् ॥
स्वस्थानविच्युता नाड़ी यदा वहति वा न वा।
ज्वाला च हृदये तीव्रा तदा ज्वालावधिस्थितिः ॥
अङ्गुष्ठमूलतो वाह्ये हाङ्गुले यदि नाडिका।
प्रहरार्द्धाद्भिर्मृत्युं जानीयाच्च विचक्षणः ॥
सार्द्धयाङ्गुलाद्बाह्ये यदि तिष्ठति नाड़िका।
प्रहरैकाद्दिभिर्मृत्युं जानीयाच्च विचक्षणः ॥
पादाङ्गुलगता नाड़ी चञ्चला यदि गच्छति।
त्रिभिस्तु दिवसैस्तस्य मृत्युरेव न संशयः ॥
पादाङ्गुलगता नाडी कीर्णा वेगवती भवेत्।
चतुर्भिर्दिवसैस्तस्य मृत्युरेव न संशयः ॥

पादाङ्गुलगता नाड़ी मन्दमन्दा यदा भवेत् ।
पञ्चभिर्दिवसैस्तस्य मृत्युर्भवति नान्यथा ॥
स्वस्थानच्यवनं यावद्गमना नोपजायते ।
तत्स्थचिह्नस्य सत्त्वेऽपि नासाध्यत्वमिति स्थितिः
पुष्टिस्तैलगुड़ाहारे मांसे च लगुड़ाकृतिः ।
क्षीरे च स्निग्धता वेगा मधुरे भेकवद्गतिः ॥
रक्षागुड़वटाहारे रूक्षशुष्कादिभाजने ।
वातपित्तात्तिरूपेण नाड़ी वहति निष्क्रमम् ॥
मधुरे वर्हिगमना तिक्ते स्यात् स्थूलता गतेः ।
अम्ले कोष्णा ध्रुवगतिः कटुकैर्भृङ्गसन्निभा ॥
कषाये कठिना स्थाना लवणे सरला द्रुता ।
एवं द्विचतुर्योगे नानाधर्मवती धरा ॥
अम्लैश्च मधुराम्लैश्च नाड़ी शीता विशेषतः ।
चिपिटैर्भृष्टद्रव्यैश्च स्थिरा मन्दतरा भवेत् ॥
कुष्माण्डमूलकैश्चैव मन्दमन्दा च नाड़िका ।
शाकैश्च कदलैश्चैव रक्तपूर्णेव नाड़िका ॥
मासात् स्थिरवहा नाड़ी दुग्धे शीता बलोयसी ।
गुड़े क्षीरैश्च पिष्टैश्च स्थिरा मन्दवहा भवेत् ॥
रमणान्ते निशि प्रातस्तप्ता दीपशिखोपमा ।
कामात् क्रोधाद्भवतो क्षीणा चिन्ताभरप्लुता ॥
मध्ये करे वहेन्नाड़ी यदि सन्तापिता ध्रुवम् ।
तदा नूनं मनुष्याणां रुधिरापूरिता मलाः ॥
व्यायामे भ्रमणे चैव चिन्तायां धनशोकतः ।
नानाप्रभावगमना नाड़ी भवति निश्चितम् ॥

असृक्पूर्णा भवेत् कोष्णा गुर्वी सामा गरीयसी।
सुखितस्य स्थिता ज्ञेया चपला क्षुधितस्य सा॥
अङ्गग्रहेण नाड़ीनां जायन्ते मन्थराः प्लवाः।
प्लवप्लवलतां याति ज्वरदाहाभिभूतये॥
सान्निपातिकरूपेण भवन्ति सर्ववेदनाः॥
ज्वरप्रकोपे धमनी सोष्मा वेगवती भवेत्॥
सौम्या सूक्ष्मा स्थिरा मन्दा नाड़ी सहजवातजा।
स्थूला च कठिना शीघ्रा स्पन्दते तीव्रमारुते॥
द्रुता च सरला दीर्घा शीघ्रा पित्तज्वरे भवेत्।
शीघ्रमाहनन नाभ्याः काठिन्याच्चलते तथा॥
नाडी तन्तुसमा मन्दा शीतला श्लेष्मकोपतः॥
चञ्चला तरला स्थूला कठिना वातपित्तजा।
द्वैधञ्च दृश्यते तूर्णा मन्दा स्यात् श्लेष्मवातजा॥
निरन्तरं खरं रूक्षं मन्दश्लेष्मातिवाँतला।
रूक्षवातभवे तस्य नाड़ी स्यात् पिण्डसन्निभा॥
सूक्ष्मा शीता स्थिरा नाड़ी पित्तश्लेष्मसमुद्भवा॥
ऐकाहिकेन क्वचन प्रदूरे
क्षणान्तगामा विषमज्वरेण।
द्वितीयके वाथ तृतीयतूर्ये
गच्छन्ति तस्या भ्रमिवत् क्रमेण॥
ज्वरे च रमणे नाडी क्षीणाङ्गा मन्दगामिनी।
ज्वरे कामार्त्तिरूपेण भवन्ति विकलाः शिराः॥
व्यायामे भ्रमणे चैव चिन्तायां धनशोकतः।
नानाप्रभावगमना शिरा गच्छति विज्वरे॥

अजीर्णे तु भवेन्नाडी कठिना परितो जड़ा ।
प्रसन्ना तु हुता शुद्धा त्वरिता च प्रवर्त्तते ॥
पक्वाजीर्णे पुष्टिहीना मन्दं मन्दं वहेत्तु या ।
लघ्वी भवति दीप्ताग्नेस्तथा वेगवती मता ॥
मन्दाग्नेः क्षीणधातोश्च नाड़ी मन्दतरा भवेत् ।
मन्दे ऽग्नौ क्षीणतां याति नाड़ी हंसाकृतिस्तथा ॥
पादे च हंसगमना करे मण्डूकसंप्लवा ।
तस्माग्नेर्मन्दता देहे ज्ञेया ग्रहणीगदः ॥
मेदेन याता ग्रहणीगदेन
निर्वीर्यरूपा त्वतिसारभेदे ।
विलम्बिकायां प्लवगा कदाचि-
दामातिसारे पृथुला जड़ा च ॥
निरोधे मूत्रशक्रतोर्विड्ग्रहे त्वितराश्रिते ।
विसूचिकाभिभूते च भवन्ति भेकवत् क्रमा ॥
आनाहे मूत्रशक्रच्छे च भवेन्नाड़ीगरिष्ठता ॥
वातेन शूलेन मरुत्प्लवेन
सदातिवक्रा हि शिरा वहन्ती ।
ज्वालामयी पित्तविचेष्टितेन
सामेन शूलेन च पुष्टिरूपा ॥
श्लेष्मेह ग्रन्थिरूपा च सुतप्ता चामदूषिता ॥
छर्त्यिक्षुरूपा विषारिष्टकाले
विष्टब्धगुल्मेन च वक्ररूपा ।
अत्यर्थवातेन अधःस्फुरन्ती
उत्तानभेदिन्यसमाप्तिकाले ॥

गुल्मेन कम्पोऽथ पराक्रमेण
पारावतस्येव गतिं करोति ॥
व्रणेऽतिकठिने देहे प्रयाति पैत्तिकं क्रमम् ।
भगन्दरानुरूपेण नाड़ी व्रणनिवेदने ॥
प्रयाति वातिकं रूपं नाडी पावकरूपिणी ।
वान्तस्य ग्रस्याभिहतस्य जन्तो-
र्वेगावरोधाकुलितस्य भूयः ।
गतौर्विधत्ते धमनी गजेन्द्र-
मरालमालेव कफोल्वणा च ॥
दोषसाम्याच्च साहश्यादनुक्तास्तु रुजास्वपि ।
ज्ञातव्या धमनीधर्म्मा युक्तिभिश्चानुमानतः ॥

षट्चत्वारिंशोऽध्यायः ।

नेत्रपरीक्षा ।

नेत्रं स्यात् पवनाद्रूक्षं धूम्रवर्णं तथारुणम् ।
कोणं गतं प्रविष्टञ्च तथा स्तब्धविलोकनम् ॥
हरिद्राखण्डवर्णं वा रक्तं वा हरितं तथा ।
दीपद्वेषि सदाहञ्च नेत्रं स्यात् पित्तकोपतः ॥
चक्षुर्वलासबाहुल्यात् स्निग्धं स्यात् सलिलप्लुतम् ।
तथा धवलवर्णञ्च ज्योतिर्हीनं बलान्वितम् ॥
नेत्रं द्विदोषबाहुल्यात् स्याद्दोषद्वयलक्षणम् ।
त्रिदोषलिङ्गसङ्गेन तन्मारयति रोगिणम् ॥

त्रिदोषदूषितं नेत्रमन्तर्मग्नं भृशं भवेत् ।
त्रिलिङ्गं सलिलस्रावि प्रान्तेनोन्मीलयत्यपि ॥
हृन्मौलपिण्डयोर्बाधाद्विषमे ह्युदरे गदे ।
उत्पत्स्यमाने नेत्रस्य जायते शून्यवर्त्मता ॥
न वर्त्मोन्मीलने शक्तिं स्मरोगे लभेत ना ।
वेपतेऽपस्मृतौ वर्त्म सुदुर्मुडरपूर्ववत् ॥
फुप्फुसे मस्तुलुङ्गे च हृदि रुद्धे च शोणिते ।
तदुष्णवेगान्नयनं सम्पद्येत सुविस्तृतम् ॥
अतिशोणितसंस्रावात् तथा चातिविरेचनात् ।
क्षयादन्नयनान्नेत्रमन्तर्मग्नं भृशं भवेत् ॥
यद्येकं कोटरं गच्छेदन्यत् प्रकृतिमावहेत् ।
दृक्स्रायोः पक्षाघात वा जानीयाद्वा शिरोरुजम् ॥
संरुद्धास्रजि मस्तिष्के नयनं लोहितं भवेत् ।
पाण्डौ पीत प्रतीश्यायाद्दृश्यते शुक्लमण्डलम् ॥
मस्तुलुङ्गे समुद्दिग्ने तत्र रुद्धे च शोणिते ।
अपस्मारे च सन्त्रासे तथाहिफेनसेवनात् ॥
सङ्कोचं तारका याति विह्वला सा सृतेऽस्रजि ।
मस्तिष्के त्वथ सन्त्रासमूर्च्छायां दृष्टरिष्टके ॥
धुस्तूरभक्षणात्तेन समन्ताच्च प्रलेपनात् ।
वैपुल्यं त्वरया याति नयनस्य कनीनिका ॥
ज्योतिष्मन्नयन नृणामुच्चादाहलिनी भवेत् ।
स्नायूनामवसादेन हीयते नयनप्रभा ॥

जिह्वापरीक्षा ।

श्लाकपत्रप्रभा रूक्षा स्फुटना रसनानिलात् ।

रक्ता श्यावा भवेत्पित्तालिसार्द्रा धवला कफात् ॥
परिदग्धा खरस्पर्शा कृष्णा दोषत्रयेऽधिके।
सैव दोषद्वयाधिक्ये दोषद्वितयलक्षणम् ॥

आधिक्यादक्तजां दाहाज्जिह्वोष्णा लोहिता भवेत्।
विसूचिकाया मूर्च्छायां रुजे श्वासे च शीतला ॥
खर्वीकृतिस्तु दौर्बल्ये याति वृद्धिं प्रदाहतः।
विरूक्षणात् समुद्दिग्धा तीक्ष्णाग्रा च कनीयसी ॥
अवसादात् प्रशस्ता सा तथा मृदुतरा मता।
म्लक्ष्णा श्लेष्मितस्रावाद्विज्ञेया श्लेष्मितस्य च ॥
आमाशयान्त्रयोर्दाहात् पार्श्वयोरथवाग्रतः।
सर्वतो वापि लौहित्यं विपुलं भजते च सा ॥
कण्ठाभ्यन्तरदाहेन कृष्णतां यात्यसंशयम्।
शुष्का सार्द्रा सदा ज्ञेया नीरसा ज्वरदाहयोः ॥
शुष्का चेदार्द्रतां याति कुर्यादुपशमं रुजाम्।
ज्वरिणामवसादेन स्नायूनां वा शिरोरुजा ॥
न वहिर्निःसरेज्जिह्वा निःसरेच्चेत् सवेपना।
अन्तर्यन्त्ररुजा राजरोगान्ते व्रणपीडिता ॥
यकृद्दोषात् पित्तरोधात् तथा मलनिरोधतः।
युज्यते पाण्डुभिर्लैंपैर्विदीर्णा मद्यपायिनाम् ॥
आमवाते नवे सामे ज्वरे दाहे च दारुणे।
आमाजीर्णे च धवलैर्लेपैर्युज्येत सा भृशम् ॥
पृथुभिर्मेचकैः शुष्कैर्ज्वरे दोषत्रयोद्भवे।
लेपैर्लिप्ता खरस्पर्शा निर्वाणालातवद्भवेत् ॥

सप्तचत्वारिंशोऽध्यायः ।

अथ मूत्रपरीक्षा ।

वातेन पाण्डुरं मूत्रं रक्तं नीलञ्च पित्ततः ।
रक्तमेव भवेद्रक्ताद्दधवलं फेनिलं कफात् ॥

अहोरात्रेण विसृजेत् स्वस्थो मूत्रमनाविलम् ।
आपाण्डुरञ्च तरलं पलानामष्टसम्मितम् ॥
बाहुल्येन जलं तत्र कठिनं स्वल्पमेव हि ।
दृश्यते पलमूत्रे तु चतुर्णां ह्रासवृद्धिता: ॥
वस्तिदेशे समुद्दिग्ने मलेष्वल्पे क्षितेषु च ।
तस्मिन् क्रिमिगणाकीर्णे दाहैर्वापि सुदारुणै: ॥
नार्य्याश्चापत्यसत्त्वाया अप्रजस्या वापि निःस्रवेत् ।
सुक्ष्मं विन्दुयस्तदा न स्रवेदापि किञ्चन ॥
वस्तौ विस्तीर्णतां याते तद्वीवा कुण्डलात्तथा ।
मस्तुलुङ्गरजा मूत्र सञ्चितत्वापि न स्रवेत् ॥
विद्रधिर्मूत्रपिण्डे चेद्विसूची वापि दारुणा ।
नोत्सृजते ततो मूत्रं तद्वत्यावपि किञ्चन ॥
वस्तेः प्रदाहतो मूत्रं विन्दुशस्तु स्रवेत् सदा ।
द्रवातियोगाच्छ्लैष्मेण संयोगाच्चातिवर्द्धते ॥
व्याधिक्षीणशरीरस्य नष्टसञ्ज्ञस्य देहिनः ।
तस्य स्वेदस्य बाल्यं हृद्धिः स्यान्मूत्रत्वे मता ॥
विरत्या द्रवपानाच्च स्वेदाधिक्यात् सुतेऽल्पजि ।

जलोदरेऽति क्षारे च मूत्रं स्तोकं स्रवेन्नृणाम् ॥

आर्त्तवपरीक्षा।

द्वादशाब्दात्परादूर्द्धमापञ्चाशत् समाः स्त्रियः।
मासि मासि भगद्वारा प्रकृत्यैवार्त्तवं स्रवेत् ॥
यद्यासृक्प्रतिमं यच्च यद्वा लाक्षारसोपमम्।
तदार्त्तवं प्रशंसन्ति यच्चासु च विरज्यते ॥
मासान्निषिच्यदाहार्त्तिं पञ्चरात्रानुबन्धि च।
नैवातिबहुलात्यल्पमार्त्तवं शुद्धमादिशेत् ॥
तस्यायथाप्रवृत्त्या हि शारीरा मानसास्तथा।
व्याधयो बहवः स्त्रीणां जायन्ते कृच्छ्रसाधनाः ॥
स्त्रायूनां रक्तयुक्तानां पाचकाग्नेश्च जायते।
व्याहतिर्व्याहते तस्मिन् सुस्थितिर्नियते भवेत् ॥
क्वचौ कण्डूयनं योनौ क्वचिदङ्गे च वेदना ॥
बाहुल्यं स्खलता वापि चानुबन्धिलमस्य वा ॥
सरोधः सर्वथा वापि वेदान्ये तानि यत्नतः।
आमयेष्वखिलेष्वेव भिषग्भिर्योषितां सदा ॥

———

अष्टचत्वारिंशोऽध्यायः।

अथ बालानां रोगपरीक्षाविधिः।

न किञ्चिदस्ति कर्म्म दुरूहतरं यथा शिशूनां रोगपरीक्षणम् परं धैर्य्यशीलगाम्भीर्य्यसान्त्वादिभिस्तेषां प्रियप्रदर्शनप्रदानाभ्यां तथान्यैस्तोषणकर्म्मभिश्च तदपि सुकरं भवति। बाला ह्यात्मवेदनानिवेदने सर्वथैवासमर्था रोदनमात्रसहाया आत्मशुभाशुभबुद्धिपरिहीनाः सर्वथान्येषु समर्पितप्राणा भृशं परावलम्बिनः परं दयाभाजनानि। जगति न तस्मात्क्लिष्टतरः पापीयान् यः सर्वया सर्वप्रयत्नेन समाहितचेताः सम्यग्विचार्य्य तान् भेषजैरुपपादयेत्। भिषजा सर्व एवातुरा अविशेषेण पुत्रवद्द्रष्टव्या विशेषतः शिशवः। तेनात्यर्थमवधानपरेणावश्यं भवितव्यं यथा ते न तस्माद्भीतिमापद्येरन्।

भिषजा परीक्षार्थं गृहं प्रविश्य प्रथमं शिशोर्धात्रीतः एतान्यवश्यं वेद्यानि। यथा वर्त्तमानरोगोत्पत्तेः प्राक् तस्य दैहिकोऽवस्थाविशेषः, अतीता पूर्वरूपप्रकृतिर्जातरोगसृष्टा विविधाश्चपरा विकृतयः, शिशुः पुमान् स्त्री वा त्वक्स्तनो वा न वा स यदाहारप्रियस्तस्य वयःपरिमाणं मलमूत्रादीनां प्रकृतिरित्याद्यानि। शिशुर्यदि स्वपिति न तं प्रबोधयेत् सुप्तस्यैव तस्याकृत्यङ्गसंस्थितिप्रभृतीनि विशेषेणेक्षणीयानि स उत्तानशायी पार्श्वशायी

वा विस्तीर्णजङ्घः कुञ्चितजङ्घो वा इत्यादिभिस्तस्याङ्गसंस्थितिविशेषैर्व्याधेः कृच्छ्रत्वमकृच्छ्रत्वं वावगम्येत। ज्वरे सान्निपातिके फुप्फुसे च व्यथाकुले गण्डौ लोहितौ स्याताम्। कूजनात् सहसा निद्राच्छेदादकस्मादाक्षेपाद्विक्रोशनाद्धस्तग्रहाच्च तस्य मस्तिष्कविकृतिरनुमेया। आमाशये उग्रतामापन्नेऽकस्मान्मुखविवरमाक्षिप्यते। नयनयोरसम्यङ्निमीलनान्मस्तिष्कविक्रियारोगस्य कृच्छ्रसाध्यत्वञ्चावगम्यम्।

ऊनचत्वारिंशोऽध्यायः।

हृदयपरीक्षा।

हृदयपरीक्षाशब्देनात्र फुप्फुसौ हृदयञ्चेत्युभयोरेव श्रोणितयन्त्रयोरुरःस्थितयोः परीक्षणमवगन्तव्यम्। पवनः प्रतिनियतं प्रविश्य फुप्फुसं तत्स्थं श्रोणितं विशोधयति अयमेव वायुः प्राणनाम्ना व्याख्यातः ततस्तस्माद्विषांशमाकृष्य वह्निनिःसरत्युदानः। असौ श्वासक्रिया। एकस्मिन् श्वासक्रियाकाले नाडीनां चत्वारि स्पन्दनानि भवन्ति। जाग्रतः स्वपतस्तिष्ठतश्वासीनस्यासौ माच्छयानस्योपलभ्यते संख्याक्रमः श्वासस्य।

अतःपरमभिघातपरीक्षाविधिः कथ्यते। फुप्फुसमभितो वक्षसि वामहस्तस्य प्रदेशिनीं मध्यमां वा स्थापयि-

त्वेतरकराङ्गुल्यग्रैरेकत्र योजितैरभिहत्याभिघातशब्देन जानीयादुरोऽभ्यन्तरावस्थां विशेषेणावधानपरः । न च सकृदेव परीक्षया मीमांसं किञ्चित् पुनः पुनरेव तु परीक्षा कर्त्तव्या । असंन्यस्ताङ्गुलिकं केवलमेवोरोऽप्यभिहत्य परीक्ष्यते । आमयपरिरहितात् फुप्फुसादुद्भवति शब्दोऽतिपरिस्फुटोऽभिताच्छून्यगर्भपात्रादिवेति वेद्यम् । दृढीभूते वायुपरिशून्ये वा फुप्फुसस्य क्वचिदंशे तत्राभिघाताज्जड़ो मन्दोऽतीक्ष्णश्चोद्भवति शब्दो विद्रद्धृदयेऽभिघाताच्च । घयकासादिर्विकृतिमापन्ने सम्यङ्मन्दीभवति सः ।

अभिघातेनैव वक्षसि केवलकर्णसंयोगेनापि निरन्तरं प्रक्लेदेनोत्पद्यमानश्लेष्मितयन्त्राभ्यन्तरीणविविधशब्दोपलब्ध्या तद्यन्त्रयोरवस्थाविशेषः प्रतीयते । स्वस्थानां पञ्जरे प्रहिते कर्णे फुप्फुसे वायोः प्रवेशात् ततो बहिर्निःसरणाच्च निरन्तरं श्रूयते शब्दविशेषः स एवोपलभ्यते गभीरतरश्चोग्रतरश्च कण्ठे । विक्रियां याते फुप्फुसे सर्पश्वासवद्घोध्वनिवच्च शब्दः प्रादुर्भवति । श्लेष्मणि श्लेष्मिते पूये वा तत्र सञ्चिते पक्ष्मयन्त्रिकोद्विज्जनिकरपल्वलसंघट्टनाद्बुद्बुदोत्पादशब्द इवोत्पद्यते शब्दः ।

हृदयाकुञ्चनप्रसाराभ्यां द्विविधौ प्रादुर्भवतः शब्दौ । वामस्तनहृन्नाम्निके वक्षस्याकुञ्चनशब्दो व्यक्ततरः श्रूयते । प्रसारस्तु तत ऊर्द्धं हृदस्थिसन्निहिते । अयमद्यात्तीक्ष्णतरोऽगभीरः स्वल्पकालावस्थायी च । आद्यस्तु दीर्घोऽतीक्ष्णश्च । हृदये विद्रद्धिं गते स एव मन्दतरो भवति, नियतस्पन्दनस्थानाविद्धतरे प्रदेशे स्पन्दनं लक्ष्यते च : तरः-

क्षताद्यैः क्षयरोगैर्हृदयपरिपचनात् ततो बुद्बुदस्येव जायते शब्दः ।

अथौदरयन्त्राणां परीक्षा ।

कारुण्याब्धिमाचार्यं सर्वशास्त्रविशारदम् ।
पादयोरुपसंगृह्य हारीतः परिपृच्छति ॥
तातास्माभिः श्रुतं पूर्वं नेत्रादीनां परीक्षणम् ।
अधुनौदरयन्त्राणां परीक्षां वक्तुमर्हसि ॥
तस्य तद्वचनं श्रुत्वा प्रियशिष्यस्य धीमतः ।
आत्रेयो वक्तुमारेभे तत्सर्वं शिष्यवत्सलः ॥
यकृदामाशयः प्लीहा गर्भाशयान्त्राणि वृक्कौ ।
मलमूत्राशयौ यन्त्राण्यौदराण्यपराणि च ॥
तेषां विकृतितो यानि लक्षणानि भवन्ति हि ।
शृणुतावहिता यूयं वक्ष्ये ऽहं समासतः ॥
उदरे सर्वहस्तस्य स्थापयेन्मध्यमाङ्गुलीम् ।
तामन्यस्य करस्याग्रैरङ्गुलीनां विधानतः ॥
अभिहत्याभिघातोत्थैर्ध्वनिभिर्विविधैर्भिषक् ।
क्रियाविशेषान् यन्त्राणां विद्यादुदरवर्त्तिनाम् ॥
यकृद्दाल्यन्तरः शब्दः प्रकृतितो भवेत् ।
शून्यामाशयतः शब्दो जायते शौन्यगर्भिकः ॥
वातैर्वा यदि वा वार्भिः पूर्णस्यामाशयो भवेत् ।
ततः प्रादुर्भवेच्छब्दो वाताघाताहतेर्यथा ॥
वायुना स्फीतिमापन्ने प्रहते च मलाशये ।
प्रतिध्वनिर्भवेच्छब्दो मन्दः स्यान्मलपूरिते ॥
उदकोदरिणं कृत्वा सर्वथा पार्श्वशायिनम् ।

तस्योर्द्धपार्श्वं विधिना परीक्षेताभिघातत: ॥
स्वभावात् सञ्चितं तोयमधो व्रजति निश्चितम् ।
तदूर्द्धमुपतिष्ठन्ते क्षिप्रमन्त्राणि वल्लका: ॥
जङ्घं गतेभ्यश्चाभ्येभ्य: शब्दसाधानिको भवेत् ।
अभिघातपरिक्षेयं मया प्रोक्ता समासत: ॥
भोजनादुदरस्योर्द्धं गौरवं जायते महत् ।
शिरोरुग्वक्त्रवैरस्यं हृद्दाहो वमथुस्तथा ॥
रसना मलसंपूर्णा क्लान्तिर्हृदयवेपनम् ।
निद्रानाशोऽग्निमान्द्ये स्याच्चाधं दु:स्वप्नदर्शनम् ॥
आमाशयव्रणे नृणां जायते परिकर्त्तिका ।
वान्त्या तदाशये शून्ये वेदना सा प्रशाम्यति ॥
भोजनाद्दान्तिरेव स्याच्छ्लेष्मपित्तसंयुता ।
रुधिरस्यापि वमनं रक्तपित्तस्य वा भवेत् ॥
पुरीषैर्मलिनं रक्तं निर्य्यायाद्गुदतोऽपि च ।
प्रायशो योषितामेव व्याधि: स्यादुत्तरोधत: ॥
पर्शुकाधो यकृत् प्लीहा नाविकृतोऽनुभूयते ।
दक्षिणाच्चुक्कानिम्ने हृद्गुलाद्यकृत: स्थिति: ॥
अतीत्यैकाङ्गुलिस्थानं पर्शुकाभ्यश्च निश्चितम् ।
उर:प्राचीरसङ्घोषाद्विद्वद्भा हृदयस्य च ॥
वायुना फुप्फुसस्फीत्या क्षोभणैरपरैरपि ।
यकृत्स्थानात् प्रच्यवेत न तद्दृष्टं विधारयेत् ॥
दक्षिणे शकले प्रायो विद्रधिर्यकृतो भवेत् ।
हिक्का श्वासो वमि: कासो जायते तीव्रवेदना ॥
न शक्ति: शयने तस्य सव्ये पार्श्वे भवेच्च नु ।

इति प्रोक्तं समासेन रक्तदिद्रधिलक्षणम् ॥
अनुभूयेत हस्तेन ग्लौहा च यदि कस्यचित् ।
तदा तं व्याधितं विद्यात्तेन रक्तक्षयो भवेत् ॥
पश्चान्मलाशयाद्दुष्टो वर्त्तते चोदरान्तरे ।
तत्र रक्तावरोधेन मूत्रं स्तोकं त्यजेन्नरः ॥
मूत्रं सशोणितं वापि वेदना तत्र दारुणा ।
तथा स्पर्शासहत्वञ्च वृक्कविकृतिलक्षणम् ॥
विकृते तिलके नृणां मल मेदोयुतं भवेत् ।
वह्निमान्द्यं भवेत्तापि दौर्ब्बल्यं चाप्यजीर्णता ॥
अल्पावरोधाद्वान्तः स्याद्बलादथ चेतसः ।
विट्सङ्गो वेदनात्युग्रा पुरीषवमनं तथा ॥
रोगस्थानादधश्चान्त्रे शून्यतोपरिपूर्णता ।
रोगिणानेन चाक्रान्तो नरः प्रायस्त्यजत्यसून् ॥
मलमूलाशयौ दुष्टौ मेहानाहादिकान् बहून् ।
व्याधीन् जनयतो दुष्टा ग्रहणी वह्निमन्दताम् ॥
इत्योदराणां वक्ष्माणां विक्रियायां समासतः ।
व्याख्यातानि चिह्नानि मया प्रोक्तानि वत्सकाः ॥
प्रतिरोगं प्रवक्ष्यामि लक्षणान्यौपराणि च ।
तानि सर्वाणि वेद्यानि भिषजा सिद्धिमिच्छता ॥

वाह्याकृतिपरीक्षा ।

अथावधीयतां वत्सा बहिराकृतिवेदने ।
तद्विज्ञानाद्भिषङ्नूनं भवेद्रोगविशेषवित् ॥
शयानो भजते दुःखमासीनः सुखमश्नुते ।
श्वासाद्यैरुपसृष्टस्तु हृल्लोठार्त्तियुतो नरः ॥

आमयं सुचिरं भुक्त्वा क्षीणेन्द्रियबलो नरः ।
उत्तानः सततं शेते सादं परमृच्छति ॥
औदरं शिथिलीकृत्य चर्म सङ्कोच्य सक्थिनी ।
उत्तानशायी भवति विकृतोदरकोष्ठकः ॥
क्षणमुत्तानशयनं भजते क्षणमन्यथा ।
न शर्म कथमप्येष लभते शूलपीडितः ॥
संज्ञा सम्यक्शयानस्य बल धैर्यं रतिः स्मृतिः ।
प्रवर्त्तनञ्च दोषाणां गद्यते शुभलक्षणम् ॥
आमाशये फुप्फुसे च विकृते हृदये तथा ।
सहसा वर्द्धते कार्श्यं नातिकल्याणदं हि तत् ॥
शोणितादिक्षतेः स्तन्यदायिनीनाञ्च योषिताम् ।
कृशः कायो भवेत्तत्र प्रतिकुर्य्याद्यथाविधि ॥
सहसा चेदतिस्थूल· कश्चित्तद्भीतिकारणम् ।
उत्पत्स्यमाने सन्यासे प्रायेणैवं प्रदृश्यते ॥
विक्रियां फुप्फुसे याते हृदये वृक्के तथा ।
प्रायोनृणां मुखे शोफो बाह्वोश्चापि प्रजायते ॥
व्याधिते यकृति प्लीह्नि हृदि वृक्के च पादयोः ।
प्रायः शोथो भवेन्नृणामादितोऽपि दकोदरे ॥
शीतदेहस्य चेत् स्वेदः शैत्यं याति च देहिनः ।
संज्ञानाशो भवेत्तर्हि स शीघ्रं विजहात्यसून् ॥
अवसादो हिमः स्वेदो जाड्यं वेपथुरेव च ।
तूष्णीं कायो न चेष्टणो भवेत्तत्र शुभावहम् ॥
प्रायः शुभावहः स्वेदो यद्यनौषधजो भवेत् ।
पर स्वास्थ्यं भवेत्तस्मिन् जाते तु ज्वरादिषु ॥

वह्निमान्द्यं निशाखेदो व्याधेश्च पुनरागमः।
क्लिश्नाति रोगिणं भूयस्तच्च पथ्याशनं हितम्॥
धमनीस्यन्दनं तापो दैहिको रसना तथा।
दोषप्रवृत्तिः प्रकृतिं भवेत् कल्याणहेतवे॥
इति संक्षेपतो यानि लक्षणानि रुजां मया।
कीर्त्तितान्यवधानेन तानि धार्य्याणि चेतसा॥
नाड़ीमेकां भिषग्भिः सुविदितनिगमैर्नेत्रमेकञ्च मूत्रं
जिह्वां वैकां परीक्ष्य प्रचुरमतिधरैर्वर्णनीया न रोगाः।
कोष्ठाद्यञ्चापि सर्वं हृदुदरपिहितं देहसंस्थानमन्त्य-
न्निर्णेया वीक्ष्य कृत्स्नं निगदितविधिभिः सर्वथा सर्वभावैः॥

साधारणो रोगपरीक्षाविधिः।

समासतः षड्विधो हि रोगाणां विज्ञानोपायः। तद्यथा, पञ्चभिः श्रोत्रादिभिः प्रश्नेन चेति। तत्र श्रोत्रेन्द्रियविज्ञेया विशेषा रोगेषु व्रणास्रावविज्ञानीयादिषु वक्ष्यन्ते सफेनं रक्तमीरयन्नभिलः सशब्दो निर्गच्छतीत्येवमाद्यः प्रागीरिता अभिघातोत्थशब्दविशेषाश्च। स्पर्शनेन्द्रियविज्ञेयाः शीतोष्णस्निग्धरूक्षकर्कशमृदुकठिनत्वाद्यो ज्वरशोफादिषु। चक्षुरिन्द्रियविज्ञेयाः शरीरोपचयापचयायुर्लक्षणबलवर्णविकारादयः। रसनेन्द्रियविज्ञेयाः प्रमेहादिषु रसविशेषाः। घ्राणेन्द्रियविज्ञेया अरिष्टलिङ्गादिषु व्रणानामव्रणानाञ्च गन्धविशेषाः। प्रश्नेन च विजानीयाद्देशं कालं जातिं साम्यमातङ्कसमुत्पत्तिं वेदनासमुच्छ्रायं बलं दीप्ताग्नितां वातमूत्रपुरीषरजसां प्रवृत्त्यप्रवृत्ती कालप्रकर्षादींश्च विशेषान्।

दर्शनस्पर्शनप्रश्नैस्तं परीक्षेत रोगिणम् ।
आयुरादि दृशा स्पर्शाच्छीतादि प्रश्नतः परम् ॥
मिथ्यादृष्टा विकारा हि दुराख्यातास्त्वयैव च ।
तथा दुष्परिपृष्टाश्च मोहयेयुश्चिकित्सकान् ॥

एवमभिसमीक्ष्य साध्यान् साधयेद्याप्यान् यापयेदसाध्यानुपक्रमेत् परिसवत्सरोत्थितांश्च विकारान् प्रायशो वर्जयेत्। तत्र साध्या अपि व्याधयः प्रायेणैषां दुश्चिकित्स्यतमा भवन्ति। तद्यथा—श्रोत्रियनृपतिस्त्रीबालवृद्धभीरुराजसेवककितवदुर्बलवैद्यविदग्धव्याधिगोपकदरिद्रकृपणक्रोधवतामबालवतामनाथानाञ्चैवं निरूप्य चिकित्सां कुर्वन् धर्मार्थकामयशांसि प्राप्नोति ।

पञ्चाग्रत्तमोऽध्यायः ।


अथ यन्त्रविधिः ।

नानाविधानां शस्त्राणां नानादेश्यप्रबाधिनाम् ।
आहर्त्तुमभ्युपायो यस्तद्यन्त्रं यच्च दर्शने ॥
अर्शोभगन्दरादीनां शस्त्रक्षाराग्नियोजने ।
शेषाङ्गपरिरक्षायां तथा वस्त्यादिकर्मणि ।
घटिकानाडुशङ्कुश्च जाम्बवौष्ठादिकानि च ।
अनेकरूपकार्य्याणि यन्त्राणि विविधान्यतः ॥
विकल्पाकल्पयेद्बुद्ध्या यथास्थूलन्तु वक्ष्यते ॥


खस्तिकयन्त्रम् ।

तुल्यानि कङ्कसिंहर्क्षकाकादिमुखपक्षिणाम् ।
मुखैर्मुखानि यन्त्राणां कुर्यात्तत्संज्ञकानि च ॥
अष्टादशाङ्गुलायामान्यायसानि च शूरिभिः ।
मसूराकारपर्य्यन्तैः कण्ठे बद्धानि कीलकैः ॥
विद्यात् खस्तिकयन्त्राणि मूलेऽङ्गुष्ठयुतानि च ।
तैर्दृढैरक्षिसंलग्नशल्याहरणमिष्यते ॥

कङ्कमुखम् ।




सिंहास्यम् ।



ऋक्षमुखम् ।



काकमुखम् ।




तरक्षास्यम् ।



सन्दंशयन्त्रम् ।

कौलवद्वियुक्ताग्रौ सन्दंशौ षोडशाङ्गुलौ ।
त्वक्शिरास्नायुपिशितलग्नशल्यापकर्षणौ ॥
षड़ङ्गुलोऽन्यो हरणे सूक्ष्मशल्योपपक्ष्मणाम् ॥





सुचुटीयन्त्रम् ।

सुचुटी सूक्ष्मदन्तर्जुर्मूले रुचकभूषणा ।
गम्भीरव्रणमांसास्थौ अर्शसः प्रेषितस्य च ॥

तालयन्त्रम् ।

द्वे तालयन्त्रे द्वादशाङ्गुले मत्स्यतालुवदेकतालद्वितालके कर्णनासानाड़ीशल्यानामाहरणार्थम् ।




सुचुटीयन्त्रम् ।

तालयन्त्रम् ।

नाड़ीयन्त्रम् ।

नाड़ीयन्त्राण्यनेकप्रकाराण्यनेकप्रयोजनान्येकतोमुखान्युभयतोमुखानि च तानि स्रोतोगतशल्योद्धरणार्थं रोग-

दर्शनार्थमाच्छादनार्थं क्रियासौकर्य्यार्थञ्चेति । तानि स्रोतो-द्वारपरिणाहानि यथायोगपरिणाहदीर्घाणि च ।



अन्तःकण्ठशल्यावलोकिनी नाड़ी ।

दशाङ्गुलाद्वैनाहान्तःकण्ठशल्यावलोकिनी ।

सुहीपत्रम् ।

सुहीपत्रं प्रयोज्यं स्याज्जिह्वारक्षणकर्मणि ॥



शल्यनिर्घातिनी ।

पञ्चकर्णिकया मूर्ध्ना सदृशी द्वादशाङ्गुला ।

चतुर्थशुषिरा नाड़ी शल्यनिर्घातिनी मता ॥

अर्शोयन्त्रम् ।

अर्शसां मोक्षणाकारं यन्त्रकं चतुरङ्गुलम् ।

नाहे पञ्चाङ्गुलं पुंसां प्रमदानां षडङ्गुलम् ॥

द्विच्छिद्रं दर्शने व्याधेरेकच्छिद्रन्तु कर्मणि ।

शम्याख्यं तादृगच्छिद्रं यन्त्रमर्शःप्रपीड़नम् ॥



शमीयन्त्रम् ।



भगन्दरयन्त्रम्।

तद्भगन्दरयन्त्रं स्याद्गोयन्त्रं निरोष्ठकम्।

नासायन्त्रम्।

घ्राणार्बुदार्शसामेकच्छिद्रा नाड्यङ्गुलद्वया।
प्रदेशिनीपरीणाहा स्याद्भगन्दरयन्त्रवत्॥

अङ्गुलित्राणकयन्त्रम्।


अङ्गुलित्राणकं दान्तं वार्द्धं वा चतुरङ्गुलम्।
द्विच्छिद्रं गोस्तनाकारं तद्बन्धविधौ सुखम्॥



योनिव्रणेक्षणम्।

योनिव्रणेक्षणं मध्ये शुषिरं षोडशाङ्गुलम्।
सुद्राबद्धं चतुर्भिस्तमङ्गोलमुकुलाननम्॥
चतुःशलाकमाक्रान्तं मूले तद्विलसेन्मुखे॥

अन्यच्च। योनिव्रणेक्षणं चान्यद्वैर्ध्यतो यद्विधाङ्कितम्।
विपर्य्यासेन सञ्चस्तं विषाण महिषस्य यथा॥



यन्त्रे नाडीव्रणाभ्यङ्गचालनाय षडङ्गुले।
वस्तियन्त्राङ्कितं मूलमुखेऽङ्गुष्ठकलायखे॥
अयतःकर्णिके मूले निबद्धमृदुचर्मणी॥


वस्तियन्त्रम्।



द्विद्वारा नलिका पिच्छनलिका वा दकोदरे ।




धमवस्त्यादियन्त्राणि निर्दिष्टानि यथायथम् ।



त्रयङ्गुलास्यं भवेच्छृङ्गं चूषणेऽष्टादशाङ्गुलम् ।
अग्रे सिद्धार्थकच्छिद्रं सूनडुच्चुकाकृति ॥
स्याद्दादशाङ्गुलोऽलाबुर्नाड्यै त्वष्टादशाङ्गुलः ।
चतुस्त्र्यङ्गुलहस्तास्यो दीर्घोऽन्तः श्लेष्मरक्तहृत् ॥
तद्वद्घटी हिता गुल्मविलयोदमने च सा ।

शलाकायन्त्रम् ।

शलाकाख्यानि यन्त्राणि नानाकर्माकृतीनि च ।
यथायोगप्रमाणानि तेषामेषणकर्मणी ॥
उभे गण्डूपदमुखे स्रोतोभ्यः शल्यहारिणी ।
मसूरदलभक्ते ते स्यातामष्टनवाङ्गुले ॥






सूचीयन्त्रम् ।

भ्रुवः षड्भौ तेषां षोडशद्वादशाङ्गुलौ ।
व्यूहनेऽहिफणाक्षौ द्वौ वृद्धपत्रमुखाङ्गुलौ ॥

चालने शरपुङ्खास्यावाहार्ये वड़िशाकृती ॥

गर्भशङ्कुः ।

नतोऽग्रे शङ्कुना तुल्यो गर्भशङ्कुरिति स्मृतः ।
वृष्टाङ्गुलायतस्तेन मूढ़गर्भं हरेत् स्त्रियाः ॥




यौग्मशङ्कुः ।

संवृतशङ्कुयुगलो यौग्मशङ्कुः प्रकीर्त्तितः ।
मूढ़गर्भाहृतौ सोऽपि प्रयोज्यो गर्भशङ्कुकः ॥




अश्मर्य्याहरणं सर्पफणवदक्रमवतः ।




शरपुङ्खमुखं दन्तपातनं चतुरङ्गुलम् ॥

तीक्ष्णपराणि श्लाकायन्त्राणि दर्व्याहृतीनि खल्ल-मुखानि क्षारौषधप्रणिधानार्थम् । नासार्व्युद्हरणार्थमेकं कोलास्थिदलमात्रमुखम् । अञ्जनार्थमेकं कलायपरिमण्डल-मुभयतोमुकुलाग्रम् । सूत्रमार्गविशोधनार्थमेकं मालती-पुष्पवृन्ताग्रप्रमाणपरिमण्डलमिति ।







उपयन्त्राण्यपि अयस्कान्तरज्जुवस्त्राश्मवालप्रभृतीनि ।
एतानि देहे सर्वस्मिन् देहस्यावयवे तथा ।
सन्धौ कोष्ठे धमन्याञ्च यथायोगं प्रयोजयेत् ॥

निर्घातनोन्मथनपूरणमार्गशुद्धि-
सव्यूहनाहरणबन्धनपीडनानि ।
आचूषणोन्नमननामनचालभङ्ग-
व्यावर्त्तनर्जुकरणानि च यन्त्रकर्म्म ॥

स्वबुद्ध्या चापि विभजेद्यन्त्रकर्म्माणि बुद्धिमान् ।
असंख्येयविकल्पत्वाच्छास्त्रानामिति निश्चयः ॥

तत्रातिस्थूलमसारमतिदीर्घमतिह्रस्वमग्राहि-विषम-ग्राहि वक्रं शिथिलमत्युन्नतं मृदुकीलं मृदुमुखं मृदुपाय-मिति द्वादश यन्त्रदोषाः ।

विवर्त्तते साध्ववगाहते च
ग्रस्यं ग्रहीत्वोद्धरते च यस्मात् ।
यन्त्रेष्वतः कङ्कमुखं प्रधानं
स्थानेषु सर्वेष्वधिकारि यच्च ॥

———

एकपञ्चाशत्तमोऽध्यायः ।

शस्त्रविधिः ।

शस्त्राणि बहुविधानि तत्र प्रधानानि मण्डलाग्रकरपत्रवृद्धिपत्रमुद्रिकोत्पलपत्रप्रभृतीनि सलक्षणप्रयोजनानि वर्ण्यन्ते । तानि सुग्रहाणि सुलोहानि सुधारानि सुरूपाणि सुसमाहितसुखाग्राण्यकरालानि चेति शस्त्रसम्पत् । तत्र वक्रं कुण्ठं खण्डं खरधारमतिस्थूलमत्यल्पमतिदीर्घमतिह्रस्वमित्यष्टौ शस्त्रदोषाः अतो विपरीतगुणमाददीतान्यत्र करपत्रात् तद्धि खरधारमस्थिच्छेदनार्थम् । तेषां पायना त्रिविधा क्षारोदकतैलेषु तत्र क्षारपायितं शरशस्त्रास्थिच्छेदनेषु उदकपायितं मांसच्छेदनभेदनपाटनेषु तैलपायितं शिराव्यधनस्नायुच्छेदनेषु । तेषां निशानार्थं श्लक्ष्णशिला माषवर्णा धारासंस्थापनार्थं शस्त्रयोफलकमिति ।

यदा सुनिशितं शस्त्रं रोमच्छेदि सुसंस्थितम् ।
सुगृहीतं प्रमाणेन तदा कर्मसु योजयेत् ॥


मण्डलाग्रं शस्त्रम् ।

मण्डलाग्रं फले तेषां तर्जन्यन्तर्नखाकृति ।
लेखने छेदने योज्यं पोथकौशुण्डिकादिषु ॥



द्विपत्रम् ।

द्विपत्रं क्षुराकारं छेदभेदनपाटने ।
ऋज्वग्रमुन्नते कोष्ठे गम्भीरे तु तदन्यथा ॥
नताग्रं पृष्ठतो दीर्घक्षत्रवक्त्रं यथायथम् ॥



उत्पलपत्रमध्यधारञ्च ।

उत्पलाध्यधाराख्ये भेदने छेदने तथा ।




सर्पास्यम् ।


सर्पास्यं घ्राणकर्णार्थंश्छेदनेऽर्द्धाङ्गुलं फले ॥



एषणी ।

गतेरन्वेषणे क्षुद्रा गण्डूपदमुखैषणी ।
भेदनार्थंऽपरा सूचीमुखा मूलनिविष्टखा ॥







वेतसपत्रं शरारीमुखं त्रिकूर्चकञ्च ।
वेतसं व्यधने स्याद्ये शरार्थास्त्रिकूर्चके ।







कुशपत्रमाटीमुखञ्च ।
कुशाटीवदने स्याद्ये द्वाङ्गुलं स्यात्तयोः फलम् ।





अर्द्धचन्द्रमुखमर्द्धचन्द्राननञ्च ।
तद्वदस्यमुखं तस्य फलमप्यर्द्धमङ्गुलम् ।
अर्द्धचन्द्राननं चैतत् तथाप्यर्द्धाङ्गुलं फले ॥

व्रीहिवक्त्रम् ।
व्रीहिवक्त्रं प्रयोज्यञ्च तच्छिरोदरयोर्व्यधे ।



कुठारी ।

पृथुः कुठारी गोदन्तसदृशार्द्धाङ्गलानना ।
तयोर्द्धदण्डया विध्येदुपर्य्यस्थां शिरां स्थिताम् ॥



शलाकाशस्त्रम् ।

ताम्री शलाका द्विमुखा मुखे कुरकाकृतिः ।
नेत्रनाड़ीं तया विध्येत् कफदोषसमुद्भवाम् ॥




सुद्रिका ।

प्रदेशिन्यग्रपर्वप्रमाणा फलेऽर्द्धाङ्गुलायता सुद्रिका ।



बड़िशः ।

यष्टौ शुष्किकार्मादेर्बड़िशः सुनताननः ।




करपत्रम् ।

भेदेऽस्थां करपत्रन्तु खरधारं दशाङ्गुलम् ।
विस्तारि द्व्याङ्गुलं सूक्ष्मदन्तं सव्यवबन्धनम् ॥



कर्त्तरी ।

स्नायुस्त्विगर्भशल्यानां क्रियादीनाञ्च कर्त्तने ।
विविधाकृतयो योज्याः कर्त्तर्यः कर्त्तरीनिभाः ॥




नखशस्त्रम् ।

वक्रजुधारं द्विमुखं नखशस्त्रं नवाङ्गुलम् ।
सूक्ष्मशल्योद्धृतिच्छेदभेदप्रच्छाननलेखने ॥




दन्तलेखनम् ।

एकधारं चतुष्कोणं प्रहृद्याकृति चैकतः ।
दन्तलेखनकं तेन शोधयेद्दन्तमर्कराम् ॥



सूची ।

वृत्ता गूढ़ट्टढ़ाः पार्श्वे तिस्रः सूच्योऽत्र सीवने ।
मांसलानां प्रदेशानां व्रस्रा व्रङ्गुलमायता ॥
अल्पमांसास्थिसन्धिस्थव्रणानां द्व्रङ्गुलायता ।
व्रीहिवक्त्रा धनुर्वक्त्रा पक्वामाशयमर्म्मसु ॥
सा सार्द्धद्व्रङ्गुला सर्वा वृत्तास्ताः सूचयः स्मृताः ॥



कूर्चः ।

कूर्चौ वृत्तैकपीठस्थाः सूचयस्ताः सुबन्धनाः ।
संयोज्यो नीलिकाव्यङ्गकेशगातेषु कुट्टने ॥



कर्णवेधनशस्त्राणि ।

व्यधने कर्णपालीनां यूथिका मुकुलानना ।
धारार्द्धाङ्गुलवृत्तास्या तत्रवेशा तथोर्द्धतः ॥
चतुरस्रा तया विध्येच्छोथं पक्वासंशये ।
कर्णपालीञ्च बहलां बहलायाञ्च शस्यते ॥

सूची त्रिभागशुषिरा चाङ्गुला कर्णवेधनी ॥

शस्त्राण्येतानि चान्यानि बाहुल्येनाङ्गुलानि षट् ।
तलौकःक्षारदहनकचोपलनखादयः ॥
अलोहान्यनुशस्त्राणि तान्येवञ्च विकल्पयेत् ।
अपराण्यपि शस्त्रादीन्युपयोगञ्च यौगिकम् ॥
छेद्यभेद्यलेखार्थं शस्त्रं हस्तफलान्तरे ।
तर्जनीमध्यमाङ्गुष्ठैर्गृह्णीयात् सुसमाहितः ॥
विस्रावणानि हस्ताग्रे तर्जन्यङ्गुष्ठकेन च ।
तलप्रच्छनवृद्ध्यग्रं ग्राह्यं व्रीहिमुखं मुखे ॥
मूलेष्वाहरणार्थानि क्रियासौकर्य्यतोऽपरम् ॥
स्यात्रवाङ्गुलविस्तारः सुघनो द्वादशाङ्गुलः ।
चौमपट्टोर्णकौषेयदुकूलमृदुचर्मजः ॥
विन्यस्तपाशः सुस्यूतः सान्तरोर्णास्यशस्त्रकः ।
शलाकापिहितास्यश्च शस्त्रकोषः सुसञ्चयः ॥

त्रिपञ्चाशत्तमोऽध्यायः।

शस्त्रचिकित्साविधिः।

तत्रादावग्रोपहरणीयमध्यायं व्याख्यास्यामः।

त्रिविधं कर्म। पूर्वकर्म प्रधानकर्म पश्चात्कर्मेति तद्व्याधिं प्रति प्रत्युपदेक्ष्यामः। शस्त्रकर्मविधिमिदानीं समासत उपदेक्ष्यामस्तत्सम्भारांश्च। तच्च शस्त्रकर्माष्टविधम्। तद्यथा, छेद्यं भेद्यं लेख्यं वेध्यमेष्यमाहार्यं विस्राव्यं सीव्यमिति।

अतोऽन्यतमं कर्म चिकीर्षता वैद्येन पूर्वमेवोपकल्पयितव्यानि। तद्यथा, यन्त्रशस्त्रक्षाराग्निजलौकाशृङ्गजलौकालाबूजाम्बवौष्ठपिचुप्रोतसूत्रपट्टमधुघृतवसापयस्तैलतर्पणकषायालेपनकल्कव्यञ्जनशीतोष्णोदकटाहादीनि परिकर्मियश्च स्निग्धाः स्थिरा बलवन्तः। ततो निर्दिष्टदिवसे लघुभुक्तवन्तं प्राङ्मुखमातुरमुपवेश्य यन्त्रयित्वा प्रत्यङ्मुखो वैद्यो मर्म्मशिरास्नायुसन्ध्यस्थिधमनीः परिहरननुलोमं शस्त्रं निदध्यादापूयदर्शनात् सकृदेवापहरेच्छस्त्रमाशु च। महत्स्वपि च पाकेषु द्राङ्मुखं द्राङ्मुखं वा शस्त्रपदमुत्तमम्। तत्रायतो विशालः समः सुविभक्त इति व्रणगुणाः।

आयतश्च विशालश्च सुविभक्तो निराश्रयः।

प्राप्तकालतयापि व्रणः कर्म्मणि शस्यते ॥

शौर्य्यमाशुक्रिया शस्त्रतैक्ष्ण्यमस्वेदवेपथू ।

असंमोहश्च वैद्यस्य शस्तकर्म्मणि शस्यते ॥

एकेन वा व्रणेनाशुध्यमानेनान्तराबुद्ध्यावेक्ष्यापरान् व्रणान् कुर्य्यात् ।

यतो यतो गतिं विद्यादुत्सङ्गौ यत्र यत्र च ।

तत्र तत्र व्रणं कुर्य्याद्यथा दोषो न तिष्ठति ॥

तत्र भ्रूगण्डशङ्खललाटाक्षिपुटौष्ठदन्तवेष्टकवाकुचिवङ्क्षेषु तिर्य्यक् छेद उक्तः ।

चन्द्रमण्डलवच्छेदान् पाणिपादेषु कारयेत् ।

अर्द्धचन्द्राकृतींश्चापि गुदे मेढ्रे च बुद्धिमान् ॥

अन्यथा तु शिरास्नायुच्छेदनादतिमात्रं वेदना चिराद्व्रणसंरोहो मांसकन्दप्रादुर्भावश्चेति । मूढगर्भोदरार्शोऽश्मरीभगन्दरमुखरोगेष्वभुक्तवतः कर्म्म कुर्वीत । ततः शस्त्रमवचार्य्य शीताभिरद्भिरातुरमाश्वास्य समन्तात् परिषीड्याङ्गुल्या व्रणमभिसृत्य प्रक्षाल्य कषायेण स्नेहेनोदकमादाय तिलकल्कमधुसर्पिःप्रगाढामौषधयुक्तां वर्त्तिं प्रणिदध्यात् । ततः कल्केनाच्छाद्य वस्त्रपट्टेन बध्नीयाद्गुग्गुल्गुरुसर्जरसवचागौरसर्षपचूर्णैर्लवणनिम्बपत्रव्याभिश्चैराज्ययुक्तैर्धूपैर्धूपयेत् ।

ततश्चातुरमागारं प्रवेश्याचारिकमादिशेत् । ततस्तृतीयेऽहनि विमुच्यैवं बध्नीयाद्वस्त्रपट्टेन नचैवं त्वरमाणोऽपरेद्युर्मोचयेत् । द्वितीयदिवसे परिमोक्षणाद्यथास्थितो व्रणशिरादुपसंरोहति मोक्षणञ्च भवति । अत ऊर्द्धं

दोषकालबलादीनवेक्ष्य कषायालेपनबन्धाहाराचारान् विदध्यात् । न चैव त्वरमाणः सान्तर्दोषं रोपयेत् । स शल्येनाप्यपचारेणाभ्यन्तरमुत्सङ्गं कृत्वा भूयोऽपि विकरोति ।

तस्मादन्तर्बहिश्चैव सुशुद्धं रोपयेद्व्रणम् ।
रूढेऽप्यजीर्णव्यायामव्यवायादीन् विवर्जयेत् ॥
हर्षं क्रोधं भयञ्चापि यावदास्थैर्यसम्भवात् ।
हेमन्ते शिशिरे चैव वसन्ते चापि मोक्षयेत् ॥
त्र्यहाद्व्यहाच्छरद्ग्रीष्मवर्षास्वपि च बुद्धिमान् ।
अतिपातिषु रोगेषु नेच्छेद्विधिमिमं भिषक् ॥
प्रदीप्तागारवच्छीघ्रं तत्र कुर्यात् प्रतिक्रियाम् ॥

या वेदना शस्त्रनिपातजाता
तीव्रा शरीरं प्रदुनोति जन्तोः ।
घृतेन सा शान्तिमुपैति सिक्ता
कोष्णेन यष्टीमधुकान्वितेन ॥

विषज्ञानीयमोऽध्यायः ।

अथातोऽष्टविधशस्त्रकर्मीयमध्यायं
व्याख्यास्यामः ।

छेद्या भगन्दरा ग्रन्थिः श्लैष्मिकस्तिलकालकः ।
अर्बुदार्शोविदार्यर्शश्चर्मकीलोऽस्थिमांसगम् ॥
अन्त्रं जतुमणिर्मांससंघातो गलशुण्डिका ।
स्नायुमांसशिराकोथो वल्मीकं शतपोनकः ॥
अधृषोपदंशाश्च मांसकन्ध्वधिमांसकः ॥
भेद्या विद्रधयोऽन्यत्र सर्वजाद्व्यङ्गशस्त्रवः ।
आदितो ये विसर्पाश्च ह्रदयः सविदारिकाः ।
प्रमेहपिडकाग्रोफस्तनरोगावमन्थकाः ॥
वल्मीकानुशयीनाड्यो ह्रन्दी पुष्करिकालजौ ।
प्रायशः क्षुद्ररोगाश्च पुप्पुटौ तालुदन्तजौ ॥
तुण्डिकेरी गिलायुश्च पूर्वं ये च प्रपाकिणः ।
वस्तिस्तथाश्मरीहेतोर्मेढ्रजा ये च केचन ॥
लेख्याश्चतस्रो रोहिण्यः किलासमुपजिह्विका ।
मेदोजो दन्तवेदर्भौ ग्रन्थिर्वर्माधिजिह्विका ॥
अर्शांसि मण्डलं मांसकन्दो मांसोन्नतिस्तथा ।
वेध्याः शिरा बहुविधा भूवटर्दिदकोदरम् ॥
एषा नाड्यः सशल्याश्च व्रणा उन्मार्गिणश्च ये ।
आहार्याः शर्करास्थिश्च दन्तकर्णमलाश्मरी ॥

शल्यानि मूढगर्भश्च वर्चश्च निचितं गुदे ।
स्राव्या विद्रधय पञ्च भवेयुः सर्वजाहते ॥
कुष्ठानि वायु सरुज शोफो यश्चैकदेशज ।
पक्वामया: श्लीपदानि विषजुष्टञ्च शोणितम् ॥
अर्बुदानि विसर्पाश्च ग्रन्थयश्चादितश्च ये ।
चयस्तयश्चोपदंशा: स्तनरोगा विदारिका ॥
शौषिरो गलशालूकं कण्टका कृमिदन्तक: ।
दन्तवेष्ट सोपकुश: शीतादो दन्तपुप्पुट: ॥
पित्तास्रकफजाश्चौष्ठा: क्षुद्ररोगाश्च भूयसा ।
सौव्या भेद:समुत्थाश्च भिन्ना: सुलिखिता गदा ॥
सद्योव्रणाश्च ये चैव शल्यसन्धिव्यपाश्रया: ।
न चाराग्निविषैर्जुष्टा न वा मारुतवाहिन ॥
नाम्लशोणितशल्याश्च तेषु सम्यग्विशोधनम् ।
पांशुरोमनखादीनि शल्यस्थि भजेच्च यत् ॥
अहतानि यतोऽस्मृनि पाचयेयुर्भृशं व्रणम् ।
रुजश्च विविधा कुर्युस्तस्मादेतान् विशोधयेत् ॥
ततो व्रण समुन्नम्य स्थापयित्वा यथास्थितम् ।
सीव्येत् सूक्ष्मेण सूत्रेण वल्केनाश्मन्तकस्य वा ॥
शणजक्षौमसूत्राभ्यां स्नायुना बालेन वा पुन: ।
मुर्वागुडूचीतानैर्वा सीव्येद्वेल्लितकं यने: ॥
सीव्येद्वाफणिकां वापि सीव्येद्वा तुन्नसेवनीम् ।
ऋजुग्रन्थिमथो वापि यथायोगमथापि वा ॥
देशेऽल्पमांसे सन्धौ च सूची वृत्ताङ्गुलद्वयम् ।
आयता त्र्यङ्गुला त्रसा मांसले वापि पूजिता ॥

धनुर्वक्रा हिता मर्म्मफलकोषोदरोपरि ।
इत्येतास्त्रिविधाः सूचीस्तीक्ष्णाग्राः सुसमाहिताः ॥
कारयेन्मालतीपुष्पदन्ताग्रपरिमण्डलाः ।
नातिदूरे निकृष्टे वा सूचीं कर्म्मणि पातयेत् ॥
दूराद्भुजो व्रणोष्ठस्य सन्निकृष्टेऽङ्गुलक्षनम् ।
अथ क्षौमप्रतिच्छन्नं सुस्यूतं प्रतिसारयेत् ॥
प्रियङ्गुक्षनयष्याह्वरोध्रचूर्णैः समन्ततः ।
शल्लकीफलचूर्णैर्वा क्षौमश्यामेन वा पुनः ॥
ततो व्रणं यथायोगं बद्धाचारिकमादिशेत् ।
एतदष्टविधं कर्म्म समासेन प्रकीर्त्तितम् ॥
चिकित्सितेषु कार्त्स्न्येन विस्तरस्तस्य वक्ष्यते ।
हीनातिरिक्तं तिर्य्यक् च गात्रच्छेदनमात्मनः ॥
एतावत्तस्योऽष्टविधे कर्म्मणि व्यापदः स्मृताः ।

अज्ञानलोभाहितवाक्ययोग-
भयप्रमोहैरपरैश्च भावैः ।
यदा प्रयुञ्जीत भिषक् कुशस्त्रं
तदा सशेषान् कुरुते विकारान् ॥
तं चारशस्त्राग्निभिरौषधैश्च
भूयोऽभियुञ्जानमयुक्तियुक्तम् ।
जिजीविषुर्दूरत एव वैद्यं
विवर्ज्जयेदुग्रविषाग्नितुल्यम् ॥
तदेव युक्तञ्चतिमर्म्मसन्धीन्
छिंद्यात् शिरास्नायुमथास्थि चैव ।
मूर्खप्रयुक्तं पुरुषं क्षणेन

प्राणैर्वियुञ्ज्याद्यदि वा कथञ्चित् ॥
स्रम. प्रलाप: पतनं प्रमोहो
विचेष्टनं सलपनोष्णता च ।
स्रस्ताङ्गता मूर्च्छनमूर्ध्ववात-
स्तीव्रा रुजो वातकृताश्च तास्ता: ॥
मांसोदकाभं रुधिरञ्च गच्छेत्
सर्वेन्द्रियार्थोपरमस्तथैव ।
दशार्द्धसंख्येष्वपि हि क्षतेषु
सामान्यतो मर्म्मसु लिङ्गमुक्तम् ॥
सुरेन्द्रगोपप्रतिम प्रभूतं
रक्तं स्रवेद्यै क्षततश्च वायु: ।
करोति रोगान् विविधान् यथोक्तान्
क्षिप्तासु भिन्नास्वथवा शिरासु ॥
कौञ्जं शरीरावयवाङ्गसाद.
क्रियास्वशक्तिश्चुलुका रुजश्च ।
चिराद्व्रणो रोहति यस्य चापि
तं स्नायुविद्धं मनुजं व्यवस्येत् ॥
शोफातिवृद्धिश्चुलुका रुजश्च
बलक्षय: पर्वसु भेदशोफौ ।
क्षतेषु सन्धिष्वचलाचलेषु
स्यात् सन्धिकर्मोपरतिश्च लिङ्गम् ॥
घोरा रुजो यस्य निशादिनेषु
सर्वास्ववस्थासु न शान्तिरस्ति ।
तृष्णाङ्गसादौ क्षयथुश्च रुक्च

तमस्विविद्वं मनुजं व्यवस्येत् ॥
यद्यात्मितानि विभावयेयु-
र्लिङ्गानि मर्म्मस्वभिताडितेषु ।
सर्वं न जानाति विषाकुलधीर्
यो मांसमर्म्मस्वभिताडितः स्यात् ॥
आत्मानमेवाथ जघन्यकारी
शस्त्रेण यो हन्ति हि कर्म्म कुर्वन् ।
तमात्मवानात्महनं कुवैद्यं
विवर्ज्जयेदायुरभीप्समानः ॥
तिर्य्यक् प्रणिहिते शस्त्रे दोषाः पूर्वमुदाहृताः ।
तस्मात् परिहरन् दोषान् कुर्य्याच्छस्त्रनिपातनम् ॥

चतुःपञ्चाशत्तमोऽध्यायः ।

अथातः आमपक्वैषणीयमध्यायं व्याख्यास्यामः ।

श्लेष्मसमुत्थाना यन्त्रिविद्रध्यलजीप्रभृतयः प्रायेण व्याधयोऽभिधास्यन्तेऽनेकाश्रयत्वैर्विलक्षणः पृथुर्ग्रथितः समो विषमो वा स्वमांसस्थायी दोषसंघातः शरीरैकदेशोत्थितः श्लेष्म इत्युच्यते । स षड्विधो वातपित्तकफशोणितसन्निपातागन्तुनिमित्तः ।

तस्य दोषरूपव्यञ्जनैर्लक्षणानि व्याख्यास्यामः। तत्र वातशोफोऽरुणः कृष्णो वा परुषो मृदुरनवस्थितास्रोदाद्यश्च वेदनाविशेषा भवन्ति। पित्तशोफः पीतो मृदुः सरक्तो वा शीघ्रानुसारी चोषादयश्च वेदनाविशेषा भवन्ति। श्लेष्मशोफः पाण्डुः शुक्लो वा कठिनः शीतः स्निग्धो मन्दानुसारी कण्डूदयश्च वेदनाविशेषा भवन्ति। सर्वलक्षणसन्निपातजः। पित्तरक्तशोणितजौ तिक्तक्षणश्च। पित्तरक्तलक्षण आगन्तुर्लोहितावभासश्च।

स यदा वाह्याभ्यन्तरैः क्रियाविशेषैर्न सम्भावितः प्रशमयितुं क्रियाविपर्ययाद्बहुत्वाद्वा दोषाणां तदा पाकाभिमुखो भवति। तस्यामस्य पच्यमानस्य पक्वस्य च लक्षणमुच्यमानमवधारय। तत्र मन्दोष्मता त्वक्त्वर्णता शीतशोफता स्थैर्यं मन्दवेदनताल्पशोफता चामलक्षणमुद्दिष्टम्। सूचीभिरिव निसुद्यते दंश्यत इव पिपीलिकाभिस्ताभिश्च संसृप्यत इव क्षिप्यत इव शस्त्रेण भिद्यत इव शक्तिभिस्ताड्यत इव दण्डेन पीड्यत एव पाणिना घट्टयत इव चाङ्गुल्या दह्यते पच्यत इव चाग्निद्वाराभ्यामोषचोषपरीदाहाश्च भवन्ति हृश्चिकविद्ध इव च स्थानाशनशयनेषु न शान्तिमुपैति। आध्मातवस्तिरिवातितत्त्व शोफो भवति त्वग्वैवर्ण्यं शोफाभिवृद्धिज्वरदाहपिपासा भक्तारुचिश्च पच्यमानलिङ्गम्। वेदनोपशान्तिः पाण्डुताल्पशोफता वलीप्रादुर्भावस्त्वक्परिपुटनं शिथिलदर्शनमङ्गुल्यावपीड़िते प्रत्युन्नमनं वस्तावित्रोदकसञ्चरणं पूयस्य पीड़यत्ये कमन्तमन्ते वावपीड़िते मुहुर्मुहुस्रोतः कण्डूरतुन्नतता च व्याधिरुपद्रव-

वशान्तिर्भक्ताभिकाङ्क्षा च पक्वलिङ्गम्। कफजेषु तु रोगेषु गम्भीरगतित्वाद्भिषातजेषु वा केषुचिदसमस्त पक्वलक्षणं दृष्ट्वा पक्वमपक्वमिति मन्यमानो भिषङ्मोहमुपैति यत्र हि त्वक्सवर्णता शीतशोफता स्त्रीत्वमल्परुजताश्मवद्घनता न तत्र मोहमुपेयादिति।

आमं विपच्यमानञ्च सम्यक् पक्वञ्च यो भिषक्।
जानीयात्स भवेद्वैद्यः शेषास्तस्करवृत्तयः॥

वाताढ्ते नास्ति रुजा न पाकः
पित्ताढ्ते नास्ति कफाच्च पूयः।
तस्मात्समस्ताः परिपाककाले
यवन्ति शोफास्त्रय एव दोषाः॥
कालान्तरेणाभ्युदितन्तु पित्तं
कृत्वा वशे वातकफौ प्रसह्य।
पचत्यतः शोणितमेष पाको
मतोऽपरेषां विदुषां द्वितीय॥

तत्रामच्छेदे मांसशिरास्नायुस्रिसन्धिव्यापादनमतिमात्रं शोणितातिप्रवृत्तिर्वेदनाप्रादुर्भावोऽवदरणमनेकोपद्रवदर्शनं क्षतविद्विधिर्वा भवति। स यदा भयमोहाभ्यां पक्वमप्यपक्वमिति मन्यमानश्चिरमुपेक्षते व्याधिं वैद्यस्तदा गम्भीरानुगतो द्वारमलभमानः पूयः स्वमाश्रयमवदीर्य्यान्यङ्गं महान्तमवकाशं कृत्वा नाड़ीं जनयित्वा कृच्छ्रसाध्यो भवत्यसाध्यो वेति।

यस्त्विनस्यामयज्ञानाद्यश्च पक्वमुपेक्षते।
श्वपचाविव मन्तव्यौ तावनिश्चितकारिणौ॥

प्राक्शस्तकर्मणश्चेष्टं भोजयेदातुरं भिषक्।
मद्यं पाययेन्मद्यं तीक्ष्णं शोऽविदनासहः॥
न मूर्च्छत्यन्नसंयोगान्मत्तः शस्त्रं न बुध्यते।
तस्मादवश्यं भोक्तव्यं रोगिणूक्तेषु कर्मसु॥
प्राणो ह्याभ्यन्तरो नृणां बाह्यप्राणगुणान्वितः।
धारयत्यविरोधेन शरीरं पाञ्चभौतिकम्॥

अल्पो महान् वा क्रियया विना यः
समुच्छ्रितः पाकमुपैति शोफः।
विशालमूलो विषमो विदग्धः
स कृच्छ्रता वालवगाढ़दोषः॥
आलेपविस्रावणशोधनैश्च
सम्यक् प्रयुक्तैर्यदि नोपशाम्येत्।
पच्येत शोफ्रं सममल्पमूलः
स पिण्डितश्चोपरि चोन्नतः स्यात्॥
कच्चं समासाद्य यथैव वह्नि-
र्वायोरितः सन्दहति प्रसह्य।
तथैव पूयोऽप्यविनिःसृतो हि
मांसं शिरास्नायु च खादतीह॥
आदौ विस्रापनं कुर्याद्द्वितीयमवसेचनम्।
तृतीयमुपनाहश्च चतुर्थीं पाटनक्रियाम्॥
पञ्चमं शोधनं कुर्यात् षष्ठं रोपणमिष्यते।
एते क्रमा व्रणस्योक्ताः समं वैकृतापहम्॥

———

पञ्चपञ्चाशत्तमोऽध्यायः ।

व्रणालेपनबन्धनविधिः ।

अतः आलेपनबन्धनविधिं व्याख्यास्यामः ।

अथातो व्रणालेपनबन्धनविधिं व्याख्यास्यामः ।

इति ह स्माह भगवान् धन्वन्तरिः ।

इति ह स्माह भगवान् धन्वन्तरिः ।

आलेपः आद्य उपक्रम एष सर्वव्रणानां सामान्यः प्रधानतमश्च तच्च प्रति रोगं वक्ष्यामः । ततो बन्धः प्रधानं तेन शुद्धिर्व्रणरोपणमस्थिसन्धिक्षेपश्च तत्र प्रतिलोमनालिम्पेन्नानुलोमं प्रतिलोमे हि सम्यग्भेषजमवतिष्ठतेऽनुप्रविशति रोमकूपान् स्वेदवाहिभिः शिरामुखैश्च वीर्यं प्राप्नोति । न च शुष्यमाणमुपेक्षेतान्यत्र पीडयितव्यात् । शुष्को ह्यपार्थकोऽरुक्करश्च । स त्रिविधः प्रलेपः प्रदेह आलेपश्च तेषामन्तरं प्रलेपः शीतस्तनुरविशोषी विशोषी च । मध्यमोऽवालेपः । तत्र रक्तपित्तप्रसादजदालेपः प्रदेहो वातश्लेष्मप्रशमनः सन्धानः शोधनो रोपणः शोफवेदनापहश्च तस्योपयोगः क्षतात्क्षतेषु । यस्तु क्षतेभ्यूपयुज्यते स भूयः कल्क इति संज्ञां लभते निरुद्धालेपनसञ्जस्रेनास्रावरुनिरोधो मृदुता पूतिमांसापकर्षणमन्तर्निर्दोषता व्रणशुद्धिश्च भवति ।

अविदग्धेषु शोफेषु हितमालेपनं भवेत् ।
यथास्वं दोषशमनं दाहकण्डूरुजापहम् ॥
त्वक्प्रसादनमेवाग्र्यं मांसरक्तप्रसादनम् ।
दाहप्रशमनं श्रेष्ठं तोदकण्डूविनाशनम् ॥
मर्म्मदेशेषु ये रोगा गुह्येष्वपि तथा नृणाम् ।
संरोधनाय तेषां हि कुर्यादालेपनं भिषक् ॥
षड्भागं पैत्तिके स्नेहं चतुर्भागन्तु वातिके ।

अष्टभागन्तु कफजे स्नेहनार्थं प्रदापयेत् ॥

तस्य प्रमाणमार्द्रमाहिषचर्मादिलेपमुपदिशन्ति । न चालेपं रात्रौ प्रयुञ्जीत मा भूच्छैत्यपिहितोष्मणस्तदनिर्ग-मादविकारप्रवृत्तिरिति ।

प्रदेहसाध्ये व्याधौ तु हितमालेपनं दिवा ।
पित्तरक्ताभिघातार्त्ये सविषे च विशेषतः ॥
न च पर्य्युषितं लेपं कदाचिदुपचारयेत् ।
उपर्य्युपरि लेपन्तु न कदाचित् प्रदापयेत् ॥
उष्णं वेदनां दाहं वलत्वाज्जनयेत् स हि ।
न च तेनैव लेपेन प्रदेहं दापयेत् पुनः ॥
शुष्कभावात् स निर्वीर्य्यो युक्तोऽपि स्यादपार्थकः ।

अत ऊर्द्धं व्रणबन्धनद्रव्याण्युपदेक्ष्यामः । तद्यथा, क्षौमकार्पासाविकदुकूल-कौशेयपत्तोर्णचीनपट्टचर्म्मान्तर्वल्क-लालाबूयकललतातिदलरज्जुतूलफलसत्त्वानि कालोहानीति तेषां व्याधि काल चावेक्ष्योपयोगः प्रकरणतश्चैषामादेयः ।

तत्र कोशदामस्वस्तिकानुवेल्लितप्रतोलीमण्डलस्थगिका-यमकखट्टाचीनविवन्धवितानगोफणाः पञ्चाङ्गी चेति चतु-र्दश बन्धविशेषाः । तेषां नामभिरेवाकृतयः प्रायेण व्याख्याताः । तत्र कोशमङ्गुष्ठाङ्गुलिपर्वसु विदध्यात् । दामसन्धावङ्गे । सन्धिकूर्चकभ्रूस्तनान्तरतलकर्णेषु स्वस्ति-कम् । अनुवेल्लितन्तु शाखासु । ग्रीवामेढ्रयोः प्रतोलीम् । वृत्तेऽङ्गे मण्डलम् । अङ्गुष्ठाङ्गुलिमेढ्राग्रेषु स्थगिकाम् । यमलव्रणयोर्यमकम् । हनुभङ्गगण्डेषु खट्टाम् । अपाङ्ग-योश्चीनम् । पृष्ठोदरोरःसु विबन्धम् । मूर्द्धि वितानम् ।

चिबुकनासौष्ठांसवस्तिषु गोफणाम्। जत्रुण ऊर्ध्वं पश्चाङ्गी-मिति। यो वा यस्मिन् शरीरप्रदेशे सुनिविष्टो भवति त तस्मिन् विदध्यात्। यत्रणमत ऊर्ध्वमधस्तिर्य्यक् च।

तत्र घनां कवलिकां दत्त्वा वामहस्तपरिक्षेप-मृजुमनाविह्वलसङ्कुचित मृदु पट्टं निवेश्य बध्नीयात्। न च व्रणस्योपरि कुर्याद्ग्रन्थिमाबाधकरं वा।

न च विकेशिकौषधे अतिस्निग्धे अतिरूक्षे विषमे वा कुर्वीत यस्मादतिस्नेहात् क्लेदो रौक्ष्याच्छेदो दूर्न्यासाद्-व्रणवर्त्मावघर्षणमिति। तत्र व्रणायतनविशेषाद्बन्धविशेष-स्त्रिविधो भवति गाढ़ः समः शिथिल इति।

यो ऽयत्नरुजो गाढः सोच्छ्वासः शिथिलः स्मृतः।
नैव गाढ़ो न शिथिलः समो बन्धः प्रकीर्त्तितः॥

तत्र स्फिक्कुक्षिकक्षावङ्क्षणोरःशिरःसु गाढ़ः। शाखा-वदनकर्णकण्ठमेढ्रमुष्कपृष्ठपार्श्वोदरोरःसु समः। अक्ष्णोः सन्धिषु च शिथिल इति। तत्र पैत्तिकं गाढ़स्थाने समं बध्नीयात् समस्थाने शिथिलं शिथिलस्थाने नैवं शोणित-दुष्टञ्च। श्लैष्मिकं शिथिलस्थाने सम समस्थाने गाढ़ं गाढ़-स्थाने गाढ़तरमेव वातदुष्टञ्च। तत्र तैत्तिकं शरदि ग्रीष्मे हिरण्यो बध्नीयादक्तोपद्रुतमप्येवं श्लैष्मिकं हेमन्तवसन्तयो-स्त्रयहाहातोपद्रुतमप्येवम्। एवमभ्यूह्य बन्धविपर्य्ययञ्च कुर्वीत। तत्र समशिथिलस्थानेषु गाढ़बन्धे विकेशिकौषध-नैरर्थक्यं शोफवेदनाप्रादुर्भावश्च। गाढ़समस्थानेषु शिथि-लबन्धे विकेशिकौषधपतनं पट्टसञ्चाराद्व्रणवर्त्मावघर्षण-मिति। गाढ़शिथिलस्थानेषु समबन्धे च गुणाभाव इति।

अविपरीतबन्धे वेदनोपशान्तिरसृक्प्रसादो मार्दवञ्च । अबध्यमानो दंशमशककण्डूकाष्ठोपलपांशुशीतवातातपप्रभृतिभिर्विशेषैरभिहन्यते व्रणो विविधवेदनोपद्रुतश्च दुष्टतामुपैत्यालेपनादीनि चास्य विशोषमुपयान्ति ।

चूर्णितं मथितं भग्नं विश्लिष्टमतिपातितम् ।
अस्थिस्थायुशिराच्छिन्नमाशु बन्धेन रोहति ॥
सुखमेवं व्रणी शेते सुखं गच्छति तिष्ठति ।
सुखमभ्यासनस्थस्य क्षिप्रं संरोहति व्रणः ॥

अबन्ध्याः पित्तरक्तविषातविषनिमित्ता यदा च शीघ्रदाहपाकरागवेदनाभिभूता क्षाराग्निदग्धाः पाकात् प्रकुपिताः प्रविशीर्णमांसाश्च भवन्ति ।

कुष्ठिनामग्निदग्धानां पिड़का मधुमेहिनाम् ।
कर्णिकाश्चान्दुरुविषे विषजुष्टव्रणाश्च ये ॥
मांसपाके न बध्यन्ते गुदपाके च दारुणे ।
स्रवुद्या चापि विभजेत् क्रत्याक्रत्यास्र बुद्धिमान् ॥
देशं दोषञ्च विज्ञाय व्रणञ्च व्रणकोविदः ।
ऋतूंश्च परिसंख्याय ततो बन्धान्विवेचयेत् ॥

———

षट्पञ्चाशत्तमोऽध्यायः।

अथातो व्रणितोपासनीयमध्यायं
व्याख्यास्यामः।

व्रणिनः प्रथममेवागारमन्विच्छेत्तदागार प्रशस्तवास्त्वादिकं कार्यम्।

प्रशस्तवास्तुनि गृहे शुचावातपवर्जिते।
निवाते न च रोगाः स्युः शारीरागन्तुमानसाः॥

तस्मिन् शयनं स्वास्तीर्णमसम्बाध मनोज्ञं कुर्वीत।
सुखचेष्टाप्रचारः स्यात् स्वास्तीर्णे शयने व्रणी॥

तस्मिन् सुहृद्भिरनुकूलैः प्रियवदैरुपास्यमानो यथेष्टमासीत।

सुहृदो विचित्रपल्वाभ्यां कथाभिर्व्रणवेदनाः।
आश्वासयन्तो बहुशस्त्वनुकूलाः प्रियंवदाः॥

न च दिवानिद्रावशगः स्यात्।

दिवास्वप्नाद्व्रणे कण्डूर्गौरवाणां गौरव तथा।
शूयथुर्वेदना रागः स्रावश्चैव भृशं भवेत्॥

उत्थानसंवेशनपरिवर्त्तनचक्रमणोच्चैर्भाषणादिषु चात्मचेष्टास्वप्रमत्तो व्रणं संरक्षेत्।

स्थानासनं चंक्रमणं यानयानातिभाषणम्।
व्रणवान् न निषेवेत शक्तिमानपि मानवः॥

उत्थानाद्यासनं स्थानं शय्यां चातिनिषेविता।

प्राप्नुयान्मारुतादङ्गे रुजस्तस्मादिवर्जयेत् ॥

गम्यानाञ्च स्त्रीणां सन्दर्शनसम्भाषणसंस्पर्शनानि दूरतः परिहरेत्।

स्त्रीदर्शनादिभिः शुक्रं कदाचिच्चलित स्रवेत्।

आम्यधर्मकृतान् दोषान् सोऽसर्गेऽथवाप्नुयात् ॥

नवधान्यमाषतिलकलायकुलत्थनिष्पावहरितकशाकास्नलवणकटुकगुड़पिष्टविकृतिवल्लूरशुष्कयाकाजाविकानूपौदकमांसवसासर्पीतोदकक्षीरापायसदधिदुग्धतक्रघृतान् परिहरेत्।

तक्रान्तो नवधान्यादिर्योऽयं वर्गः प्रकीर्त्तितः।

दोषसञ्जननो ह्येष विज्ञेयः पूयवर्द्धनः ॥

मद्यपश्च मैरेयारिष्टासवसौधुसुराविकारान् परिहरेत्।

मद्यमम्लं तथा रूक्षं तीक्ष्णमुष्णञ्च वीर्य्यतः।

आशुकारि च तत्पीतं क्षिप्रं व्यापादयेद्व्रणम् ॥

वातातपरजोधूमावश्यायातिसेवनातिभोजनानिष्टश्रवणदर्शनेर्ष्यामर्षभयक्रोधशोकध्यानरात्रिजागरणविषमाशनानशनवमनोपवासवाग्व्यायामस्थानचंक्रमणशीतवातविरुद्धाशनाजीर्णमक्षिकाद्या बाधाः परिहरेत्।

व्रणिनः संप्रतप्तस्य कारणैरेवमादिभिः।

क्षीणशोणितमांसस्य भुक्तं सम्यक् न जीर्य्यति ॥

अजीर्णात्यवनादीनां विभ्रमो बलवान् भवेत्।

ततः शोफरुजास्रावदाहपाकानवाप्नुयात् ॥

सर्षपारिष्टपत्राभ्यां सर्षपा लवणेन च।

हितहृत: कारयेदूर्ध्वं दशरात्रमतन्द्रित: ॥
व्यजेत बालव्यजनेनैव न च विघट्टयेत् ।
न तुदेन्न च कण्डूयेच्छयान: परिपालयेत् ॥
जीर्णशाल्योदनं स्निग्धमल्पमुष्णं द्रवोत्तरम् ।
भुञ्जानो जाङ्गलैर्मांसै: शीघ्रं व्रणमपोहति ॥
तण्डुलीयकजीवन्तीसुनिषण्णकवास्तुकै: ।
बालमूलकवार्त्ताकपटोलै: कारवेल्लकै: ॥
सदाडिमै: सामलकैर्हितैस्तृष्टै: ससैन्धवै: ।
अन्यैरेवंगुणैर्वापि मुद्गादीनां रसेन वा ॥
सक्तून् विलेपी कुल्माषं जलेनापि घृतं पिबेत् ॥
व्रणी क्षयश्रमायासात् स च रागश्च जागरात् ।
तौ च क्रुद्धश्च दिवास्वापात् ताश्च मृत्युश्च मैथुनात् ॥
दिवा न निद्रावशगो निवातगृहगोचर: ।
व्रणी वैद्यवशे तिष्ठन् शीघ्रं व्रणमपोहति ॥
एवं वृत्तसमाचारो व्रणी सम्पद्यते सुखी ।
आयुश्च दीर्घमाप्नोति धन्वन्तरिरिवो यथा ॥

———

सप्तपञ्चाशत्तमोऽध्यायः ।

अथातो व्रणास्रावविज्ञानीयमध्यायं
व्याख्यास्यामः ।

त्वङ्मांसशिरास्नायुसन्धिकोष्ठमर्म्माणीत्यष्टौ व्रण-वस्तूनि । अत्र सर्वव्रणसन्निवेशः । तत्राद्यैकवस्तुसन्निवेशात्त्वग्भेदी व्रणः सूपचरः शेषाः स्वयमवदीर्य्यमाणा दुरुपचराः । तत्रायतश्चतुरस्रो वृत्तस्त्रिपुटक इति व्रणाकृतिसमासः । शेषासु विकृताकृतयो दुरुपक्रमा भवन्ति । सर्व एव व्रणाः क्षिप्रं सरोहन्त्यात्मवतां सुभिषग्भिरुपक्रान्ताः । अनात्मवतामज्ञैरुपक्रान्ताः प्रदुष्यन्ति प्रवृद्धत्वाद्दोषाणाम् । तत्रातिसंवृतोऽतिविवृतोऽतिकठिनोऽतिमृदुरुत्सन्नोऽवसन्नोऽतिस्रोतोऽल्पस्रुतिः क्षणरक्तपीतशुक्लादीनां वर्णानामन्यतमवर्णो भैरव पूतिपूयस्राव्यसाध्यर्युत्सङ्गमनोज्ञदर्शनगन्धोऽत्यर्थं वेदनावान् दाहपाकरागकण्डूशोफपिडकोपद्रुतोऽत्यर्थं दुष्टयोनितास्रावी दीर्घकालानुबन्धी चेति दुष्टव्रणलिङ्गानि । तस्य दोषोच्छ्रायेण षट्त्वं विभज्य यथास्वं प्रतीकारे प्रयतेत ।

अत ऊर्द्धं सर्वस्रावान् वक्ष्यामः । तत्र दुष्टासु क्षिप्रासु वा त्वचि स्फोटेषु भिन्नेषु सलिलप्रकाशो भवत्यास्रावः किञ्चिदिस्रः पीतावभासश्च । मांसगतः सर्पिःप्रकाशः सान्द्रः श्वेतः पिच्छिलश्च । शिरागतः सद्यश्छिन्नासु शिरासु रक्तातिप्रवृत्तिः

पक्वासु च तोयनाड़ीभिरिव तोयागमनं पूयस्रावश्च तनुर्विच्छिन्नः पिच्छिलोऽवलम्बी श्यावोऽवश्यायप्रतिमश्च । स्रावयुगतः स्निग्धो घनः सिंहाणकप्रतिमः सरक्तश्च । अस्थिगतोऽस्यभिहते स्फुटिते भिन्ने दीर्णावदारिते वा दोषभक्षितत्वादस्थि निःसारं शुक्तिधौतमिवाभाति । आस्रावश्चात्र मज्जमिश्रः सरुधिरः स्निग्धश्च । सन्धिगतः पीड्यमानो न प्रवर्त्तते आकुञ्चनप्रसारणोन्नमनविनमनप्रधावनोत्प्लवनप्रवाहणेषु स्रवति । आस्रावश्चात्र पिच्छिलोऽवलम्बी सफेनपूयरुधिरोन्मिश्रितश्च कोष्ठगतोऽङ्गूनपुरीषपूयोदकानि स्रवति । मर्म्मगतस्त्वगादिष्ववरुद्धत्वान्नोच्यते । तत्र त्वगादिगतानामास्रावाणां यथाक्रमं पारुष्यश्यावावश्यायदधिमस्तुचारोदकमांसधावनपुलाकोदकसन्निभत्वानि भवन्ति । पित्तान्मेदोगोमूत्रभस्मयङ्गकषायोदकमाध्वीकतैलसन्निभत्वानि । पित्तवद्रक्तादतिविस्रत्वञ्च । कफान्नवनीतकासीसमज्जपिष्टतिलनारिकेलोदकवराङ्गवसासन्निभत्वानि सन्निपातात् तिलनारिकेलोदकैर्वारुकरसकाञ्जिकप्रसादासकोदकप्रियङ्गुफलयकृन्मुद्गयूषसवर्णत्वादिति ।

पक्वाशयादसाध्यस्तु पुलाकोदकसन्निभः ।
क्षारोदकनिभः स्रावो वर्च्चो रक्ताशयात् स्रवन् ॥
आमाशयात् कलायाम्भोनिभश्च त्रिकसन्धिजः ।
स्रावानेतान् परीक्षादौ ततः कर्म्माचरेद्भिषक् ॥

अत ऊर्द्धं सर्व्वव्रणवेदना वक्ष्यामः । तोदनभेदनताड़नच्छेदनायमनमन्थनविक्षेपणक्षुभ्यमाणनिर्देहनाव-

भञ्जनस्फोटनविदारणोत्पाटनकम्पनविविधशूलविश्लेषण-विक्रिरणपूरणस्तम्भनस्रावकुच्चनाङ्गग्रिकाः सम्भवन्ति। अनिमित्तविविधवेदनाप्रादुर्भावो वा मुहुर्मुहुर्यत्रागच्छन्ति वेदनाविशेषास्तं वातिकमिति विद्यात्। उषाचोषपरिदाहधूमायनानि यत्र गात्रमङ्गारावकीर्णमिव पच्यते यत्र चोष्माभिवृद्धिः क्षते क्षारावसिक्तवच्च वेदनाविशेषास्तं पैत्तिकमिति विद्यात्। पित्तवद्रक्तसमुत्थं जानीयात्। कण्डूर्गुरुत्वं सुप्तत्वमुपदेहोऽल्पवेदनत्वं स्तम्भः श्लैत्यञ्च यत्र तं श्लैष्मिकमिति विद्यात्। यत्र सर्वासां वेदनानां समुत्पत्तिस्तं सान्निपातिकमिति।

अत ऊर्द्धं व्रणवर्णान् वक्ष्यामः। भस्मकपोताम्बिवर्णः परुषोऽरुणः कृष्ण इति मारुतजस्य। नीलः पीतो हरितः श्यावः कृष्णो रक्तः कपिलः पिङ्गल इति रक्तपित्तसमुत्थयोः। श्वेतः स्निग्धः पाण्डुरिति श्लेष्मजस्य। सर्ववर्णोपेतः सान्निपातिक इति।

न केवलं व्रणेष्वेतो वेदनावर्णसंग्रहः।
सर्वशोफविकारेषु व्रणवच्चतयेङ्गितम्॥

अष्टशब्दाशत्तमोऽध्यायः ।

अथ क्षत्क्षतव्रणविधिः ।

तत्र वयःस्थानां दृढानां प्राणवतां सत्त्ववतां च सुचिकित्स्या व्रणा एकस्मिन् वा पुरुषे यत्रैतद्व्रणचतुष्टयं तस्य सुखसाधनीयतमाः । तत्र वयःस्थाना प्रत्यग्रधातुत्वादाशु व्रणा रोहन्ति । दृढाना स्थिरवहुमांसत्वाच्छस्त्रमवचार्यमाणं शिरास्नायुादिविशेषान् न प्राप्नोति । प्राणवता वेदनाभिघाताहारयत्नक्षणादिभिर्न ग्लानिरुत्पद्यते । सत्त्ववता दारुणैरपि क्रियाविशेषैर्न व्यथा भवति । तस्मादेतेषां सुखसाधनीयतमा । त एव विपरीतगुणा दुश्चिकित्स्याल्पप्राणभीरुषु द्रष्टव्याः । स्त्रिक्पार्श्वप्रजननललाटगण्डौष्ठपृष्ठकर्णफलकोपोदरजत्रुसुखाभ्यन्तरसन्धाः सुखरोपणीया व्रणाः । अक्षिदन्तनासापाङ्गश्रोत्रनाभिजठरसेवनीनितम्बपार्श्वकुक्षिवङ्क्षणकक्षास्तनसन्धिभागगताः सफेनपूयरक्तानिलवाहिनोऽन्तर्ग्रस्ताश्च दुश्चिकित्स्याः । अधोभागाश्चोर्ध्वभागनिर्वाहिणो रोमान्तोपनखमर्म्मजङ्घास्थिसंश्रिताश्च । भगन्दरमपि चान्तर्मुखं सेवनीकूटकास्थिसंश्रितम् ।

कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनाम् ।
व्रणाः कृच्छ्रेण सिध्यन्ति येषां चापि व्रणे व्रणाः ॥

अवपाटिकानिरुद्धप्रकाशसन्निरुद्धगुदजठरग्रन्थिवृद्धक्रिमयः प्रतिश्यायजाः कोष्ठजाश्च लङ्घनोषणां प्रमेहिनां वा

ये परिच्छेषु दृश्यन्ते शर्करासिकतामेहवातकुण्डलिकाष्ठीलादल्मशर्करोपकुशयकण्ठशालूकनिक्कोथदूषिताश्च दन्तवेष्टा विसर्पाक्षिचतोरःक्षतव्रणग्रन्थिप्रभृतयश्च याप्याः।

साध्या याप्यत्वमायान्ति याप्यायालाध्यतां तथा।
घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम्॥
यापनीयं विजानीयात् क्रिया धारयते तु यम्।
क्रियायान्तु निवृत्तायां सद्य एव विनश्यति॥
प्राणा क्रिया धारयति याप्यव्याधितमातुरम्।
प्रपतिष्यदिवागारं विष्कम्भः साधुयोजितः॥

अत ऊर्ध्वमसाध्यान् वक्ष्यामः। आसपिण्डवदुन्नताः प्रक्लेदिनोऽन्तः पूयवेदनावन्तोऽन्त्रायानवदुन्नतौष्ठाः। केचित् कठिना गोशृङ्गवदुन्नतमृदुमासप्ररोहाः। अपरे दुष्टरुधिरास्राविणस्तनुपिच्छिलास्राविणो वा मध्योन्नताः। केचिदवसन्नशुषिरपर्य्यन्ताः। शणतूलवत् स्नायुजालवन्तो दुर्दर्शा वसामेदोमज्जमस्तुलुङ्गस्राविणश्च दोषसमुत्थाः। पीतासितमूत्रपूरीषवातवाहिनश्च कोष्ठस्थाः। क्षीणमांसानाञ्च सर्वतोगतयश्चाणुमुखा मासबुद्बुदवन्तः सशब्दवातवाहिनश्च शिरःकण्ठस्थाः। क्षीणमांसानाञ्च पूयरक्तनिर्वाहिणोऽरोचकाविपाककासस्रावोपद्रवयुक्ताः। भिन्ने वा शिरःकपाले यत्र मस्तुलुङ्गदर्शनं विद्रधिलिङ्गप्रादुर्भावः कासश्वासौ वा यस्येति।

वसा मेदोऽथ मज्जानं मस्तुलुङ्गञ्च यः स्रवेत्।
आगन्तुमु व्रण सिध्येन्न सिध्येद्दोषसम्भवः॥
अमर्मोपहिते देशे शिरास्नायुक्षिवर्जिते।

विकारो योऽनुपर्य्येति तदसाध्यस्य लक्षणम् ॥
क्रमेणोपचय प्राप्य धातूननुगतः शनैः।
न शक्य उन्मूलयितुं द्रुमो वृत्त इवामयः ॥
स स्थिरत्वान्महत्त्वाच्च धात्वनुक्रमणेन च।
निहन्त्यौषधवीर्य्याणि मन्त्रान् दुष्टग्रहो यथा ॥
अतो यो विपरीतः स्यात् सुखसाध्य स उच्यते।
अवद्धमूलः क्षुपको यद्वदुत्पाटने सुखः ॥
विभिर्दोषैरनाक्रान्तः श्यावोष्टः पिडकः समः।
अवेदनो निरास्रावो व्रणः शुद्ध इहोच्यते ॥
कपोतवर्णप्रतिमा यस्यान्ताः श्लेष्मवर्जिताः।
स्थिराश्चिपिटिकावन्तो रोहतीति तमादिशेत् ॥
रूढवर्त्मानमत्यर्थ्यमशूलमरुजं व्रणम्।
त्वक्सवर्णं समतलं सम्यग्रूढं विनिर्दिशेत् ॥
दोषप्रकोपाद्व्यायामादभिघाताज्जीर्णतः।
हर्षात् क्रोधाच्च यश्चापि व्रणो रूढोऽपि दीर्य्यते ॥

——

जनषष्टितमोऽध्यायः ।

अथातः प्रनष्टशल्यविज्ञानीयमध्यायं

व्याख्यास्यामः ।

शल शल आशुगमने धातुस्तस्य शल्यमिति रूपम् । तद्द्विविधं शारीरमागन्तुकञ्च । सर्वशरीराबाधकरं शल्यं तदिहोपदिश्यते । तत्र शारीर रोमनखादिधातवोऽनमला दोषाश्च दुष्टाः । आगन्त्वपि शारीरशल्यव्यतिरेकेण यावन्तो भावा दुःखमुत्पादयन्ति । अधिकारो हि लोहवेणुदन्तदण्डशृङ्गास्थिमयेषु तत्रापि विशेषतो लोहमयेष्वेव विप्रसनार्थोपपत्तेर्लोहस्य लोहानामपि दुर्वारत्वादण्डमुखत्वादूरप्रयोजनकरत्वाच्च शर एवाधिक्रियतः स द्विविधः कर्णी स्वर्णश्च । प्रायेण विविधवृक्षपत्रपुष्पफलतुल्याकृतयो व्याख्याता व्यालमृगपक्षिवक्त्रसदृशाश्च । सर्वशल्यानान्तु महतामणूनां वा पञ्चविधो गतिविशेष ऊर्ध्वमधोऽर्वाचीनस्तिर्यग्ऋजुरिति । तानि यदा वेगक्षयात् प्रतिघाताद्वा त्वगादिषु व्रणवस्तुष्ववतिष्ठन्ते धमनीस्रोतोऽस्थितद्विवरपेशीप्रभृतिषु वा शरीरप्रदेशेषु तत्र शल्यलक्षणमुच्यमानमुपधारय । तत्तु द्विविधं सामान्यं वैशेषिकञ्च । श्यावं पिडकावन्तं शोफवेदनावन्तं मुहुर्मुहुः शोणितास्राविणं बुद्बुदवदुन्नतं मृदुमांसञ्च व्रणं जानीयात् सशल्योऽयमिति सामान्यलक्षणमेतदुक्तम् । वैशेषिकन्तु त्वग्गते विवर्णः शोफो भवत्यायतः

कठिनत्व । मांसगते शोफाभिवृद्धि. शल्यमार्गानुपलब्धिरुह· पीडनासहिष्णुता चोषपाकौ च । पेश्यन्तरस्थेऽप्येतदेव चोषशोफवर्जम् । शिरागते शिराध्मानं शिराशूल शिराशोफश्च । स्नायुगते स्नायुजालोत्क्षेपणं संरम्भश्चेष्टा रुक् च । स्रोतोगते स्रोतसा स्वकर्मगुणहानि: । धमनीस्थे सफेन रक्तमीरयत्यनिल. सशब्दो निर्गच्छत्यङ्गमर्द: पिपासा हृल्लासश्च । अस्थिगते विविधवेदनाप्रादुर्भाव: शोफश्च । अस्थिविवरगतेऽस्थिपूर्णतास्थितोद: सहर्षो बलवांश्च । सन्धिगतेऽस्थिवच्चेष्टोपरमश्च । कोष्ठगते आटोपानाहौ मूत्रपुरीषोद्गारादर्शनञ्च व्रणमुखात् मर्म्मगते मर्म्मविद्धवच्चेष्टते सूक्ष्मगतिषु शल्येषु तान्येव लक्षणान्यल्पानि भवन्ति । महान्ति स्थूलानि वा शुद्धदेहानामनुलोमसन्निविष्टानि रोहन्ति विशेषत: कण्ठस्रोत:शिरात्वक्पेश्यस्थिसन्धिविवरेषु दोषप्रकोपव्यायामाभिघातेभ्य: प्रचलितानि पुनर्बाधन्ते ।

तत्र त्वक्प्रनष्टे स्निग्धस्निग्धायां मृत्स्नायवगोधूमगोमयस्नदितायां त्वचि यत्र संरम्भो वेदना वा भवति तत्र शल्य जानीयात् । स्थानभ्रष्टमसृङ्मन्दनकल्कैर्वा प्रदिग्धायां शल्योष्मणाशु विसरति घृतमुपशुष्यति वा लेपो यत्र तत्र शल्यं विजानीयात् । मांसप्रनष्टे स्नेहस्वेदादिभि: क्रियाविशेषैरविरुद्धैरातुरमुपपादयेत् । कर्षितस्य तु शिथिलीभूतमनवबद्धं क्षुभ्यमाणं यत्र संरम्भो वेदना वा भवति तत्र च शल्यं विजानीयात् । कोष्ठास्थिसन्धिपेश्योविवरेष्वस्थितमेवं परीक्षेत । शिराधमनीस्रोत:स्नायुप्रनष्टे खण्डचक्रसंयुक्ते याने व्याधितमारोप्याशु विषमेऽध्वनि यायाद्यत्र संरम्भो वेदना वा भवति तत्र शल्यं जानीयात् ।

अस्थिप्रनष्टे स्त्रैहस्नेहोपपन्नान्यस्थीनि बन्धनपीडनाभ्यां श्रममुपचरेत्यत्र संरम्भो वेदना वा भवति तत्र शल्यं जानीयात्। सन्धिप्रनष्टे स्त्रैहस्नेहोपपन्नान् सन्धीन् प्रसारणाकुञ्चनबन्धनपीडनैश्च श्रममुपचरेत्यत्र संरम्भो वेदना वा भवति तत्र शल्यमिति जानीयात्। मर्म्मप्रनष्टे त्वनन्यभावान्मर्म्मणामुक्तं परीक्षण भवति। सामान्यलक्षणमपि च हस्तिस्कन्धाश्वपृष्ठपर्वतद्रुमारोहण-धनुर्व्यायामद्रुतयाननियुद्धाध्वगमनलङ्घनप्लवनव्यायामैर्जृम्भोद्गार-श्वासक्षवथुष्ठीवनहसनप्राणायामैर्वातमूत्रपुरीषशुक्रोत्सर्गैर्वा यत्र संरम्भो वेदना वा भवति तत्र शल्यं जानीयात्।

यस्मिंस्तोदादयो देशे सुप्तता गुरुतापि च।
घट्टते बहुशो यत्र स्रूयते तुद्यतेऽपि च॥
आतुरश्चापि यं देशमभीक्ष्णं परिरक्षति।
संवाह्यमानो बहुशस्तत्र शल्यं विनिर्दिशेत्॥
अल्पबाधमशूनञ्च नीरुजं निरुपद्रवम्।
प्रसन्नं मृदुपर्य्यन्तं निराघट्टमनुव्रतम्॥
एषणा सर्वतो दृष्ट्वा यथामार्गं विकित्सकः।
प्रसाराकुञ्चनाभ्यां न निःशल्यमिति निर्दिशेत्॥
अस्थ्यात्मकं भज्यते तु शल्यमन्तश्च शीर्य्यते।
प्रायो निर्भुज्यते शार्ङ्गमायसञ्चेति निश्चयः॥
षार्च्चैवणवतार्णानि निर्छिन्नो तु नो यदि।
पचन्ति रक्तं मांसञ्च चिरमेतानि देहिनाम्॥
कानकं राजतं ताम्रं रैतिकं त्रपुसीसजम्।
चिरस्थानादिशीर्य्यन्ते पित्ततेजःप्रतापनात्॥

स्वभावशीता मृदवो ये चान्येऽपोद्भवा मताः ।
द्रवीभूताः शरीरेऽस्मिन्ने कलं यान्ति धातुभिः ॥
विषाण्दन्तकेशास्थिवेणुदारूपलानि तु ।
शल्यानि न विशीर्यन्ते शरीरे मृण्मयानि च ॥
द्विविधं पञ्चगतिकं त्वगादिव्रणवस्तुषु ।
यो वेत्त्यधिष्ठितं शल्यं स राज्ञः कर्तुमर्हति ॥

शल्यं द्विविधमवघट्टनमनघट्टञ्च । तत्र समासेनाघट्ट-शल्योद्धरणार्थं पञ्चदशहेतून् वक्ष्यामः । तद्यथा, स्वभावः याचनं भेदनं दारणं पीडनं प्रमार्जनं निर्घापनं वमन विरेचनं प्रक्षालनं प्रतिमर्षः प्रवाहणमाचूषणमयस्कान्तो हर्षश्चेति । तत्रायुक्तवस्थूद्गारकासमूत्रपूरीषानिलैः स्वभाव-बलप्रवृत्तैर्नयनादिभ्यः पतति । सावगाढं शल्यमभिदह्य-मानं याचयित्वा प्रकोपात्तस्य पूयशोणितवेगाद्वोरवाद्वा पतति । पक्वमभिद्यमानं भेदयेद्दारयेद्वा भिन्नमनिरस्यमानं पीड़नीयैः पीड़येत् पाणिभिर्वा । अणून्यक्ष्णिशल्यानि परि-षेचनाधापनैर्बालवस्त्रपाणिभिः प्रमार्जयेत् । आहारशेष श्लेष्महीनाण्वशल्यानि श्वसनोत्क्लेशनप्रधमनैर्निर्हरेत् । अन्त-शल्यानि वमनाङ्गुलिप्रतिमर्षप्रभृतिभिर्विरेचनैः पक्वाशय-गतानि । व्रणदोषाश्रयगतानि प्रक्षालनैः । वातमूत्र-पूरीषगर्भसङ्गेषु प्रवाहणमुक्तम् । मारुतोदकसविषरुधिर दुष्टस्तन्येष्वाचूषणमास्येन विषाणैर्वा । अनुलोमनवघट्ट-मकर्णमनल्पव्रणमुखमयस्कान्तेन । हृद्यवस्थितमनेककार-णोत्थं शोकशल्यं हर्षणेति । सर्वशल्यानान्तु महतामा-शूनां वा द्वावेवाहरणहेतू भवतः प्रतिलोमोऽनुलोमश्च तत्र

प्रतिलोममवाचीनमानयेदनुलोमं पराचीनम् । उत्तुण्डितं छित्त्वा निर्घातयेच्छेदनीयमुखान्यपि कुविवचःकचावङ्गणपशुकान्तरपतितानि च हस्तशक्यं यथामार्गं हस्तेनैवापहर्त्तुं प्रयतेत ।

अनुत्तुण्डितशल्यानि छेदनीयमुखानि च ।
अनिर्घात्यानि जानीयाद्यत्नेदानुबन्धतः ॥

हस्तेनापहर्त्तुमशक्यं विसृज्य शस्त्रेण यन्त्रेण वापहरेत् ।

शीतलेन जलेनैवं मूर्च्छन्तमवसेचयेत् ।
संरम्भेदस्य मर्म्माणि मुहुराश्वासयेच्च तम् ॥

ततः शल्यमुद्धृत्य निर्लोहितं व्रणं कृत्वा स्वेदार्हमभिघृतप्रभृतिभिः संस्वेद्य विदह्य प्रदिह्य सर्पिर्मधुभ्यां बह्वाचारिकमुपदिशेत् । शिरास्नायुविलग्नं शलाकादिभिर्विमोचयापनयेत् शल्यशल्यसमारब्धं समवपीड्य शल्यं दुर्बलवारब्धं कुशादिभिर्बद्ध्वा । हृदयमभितो वर्त्तमानं शल्यं शीतजलादिभिरुद्वेजितस्यापहरेद्यथामार्गं दुरुपहरमन्यतोऽपबाध्यमानं पाटयित्वोद्धरेत् । अस्थिविवरप्रविष्टमस्थिविदष्टं वावगम्य पादाभ्यां यन्त्रेणापहरेदशक्यमेवं वा बलवद्भिः सुपरिगृहीतस्य यन्त्रेण ग्राहयित्वा शल्यवारब्धं प्रविभज्य धनुर्गुणैर्बद्ध्वैकतश्चास्य पश्चाद्भागमुपसंयतस्याभ्रवल्लकटके वा बध्नीयादथैनं कशया ताडयेद्यथोन्नमयन् शिरोवेगेन शल्यमुद्धरति । दृढां वा द्रुशाखामवनम्य तस्यां पूर्ववद्बद्ध्वोद्धरेत् । अस्थिदेशोत्तुण्डितमष्टीलाश्मसुद्गराणामन्यतमस्य प्रहारेण विचाल्य यथामार्गमेव यन्त्रेण विमृदितकर्णानि कर्णवल्यनाबाधकरदेशोत्तुण्डितानि

पुरस्तादेव जातुषे कण्ठासक्ते कण्ठे नाड़ीं प्रवेश्याग्नितप्ताच्च शलाका तथाऽगृह्य श्रोताभिरङ्गैः परिषिच्य स्थिरीभूतमुद्धरेत्। अजातुष जतुमधूच्छिष्टलिप्तया शलाकया पूर्वकल्पेनेत्येके। अस्थिशल्यमन्यद्वा तिर्य्यक्कण्ठासक्तमवेक्ष्य केशोण्डुकं दृढ़ैकसूत्रबद्धं द्रवभक्तोपहितं पाययेदाकण्ठाच्च पूर्णकोष्ठं वामयेत्। वमतश्च शल्यैकदेशसक्तं ज्ञात्वा सूत्रं सहसा त्वाच्चिपेत्। मृदुना वा दन्तधावनकूर्चकेनापहृतं प्रणुदेद्दान्त.चतकण्ठाय च मधुसर्पिषी लेढुं प्रयच्छेच्चिफलाचूर्णं वा मधुघृतसंसृष्टम्। उदकपूर्णमवाक्शिरसमवपीड़येद्दनीयाद्दामयेद्वा भस्मराशौ वा निखनेदासुखात्। ग्रासशल्ये तु कण्ठासक्ते निःशङ्कमनवेक्षमाणे मुष्टिनाभिहन्यात् स्नेहं मद्यं पानीयं वा पाययेत्। वातुरज्जुलतापाशशल्ये तु कण्ठपीड़नाद्वायुः प्रकुपितः श्वासाणं कोपयित्वा स्रोतो निरुणद्धि लालास्रावं फेनागमनं संज्ञानाशञ्चापादयति। तमभ्यज्य सस्नेद्य शिरोविरेचनं तस्मै तीक्ष्णं दद्याद्रसञ्च वातघ्नं विद्ध्यादिति।

शल्याकृतिविशेषांश्च स्थानान्यावेक्ष्य बुद्धिमान्।
तथा यन्त्रपृथक्कञ्च सम्यक् शल्यमथाहरेत्॥
कर्णवन्ति तु शल्यानि दुःखाहार्य्याणि यानि च।
आददीत भिषक् तस्मात् तानि युक्त्या समाहितः॥
एतैरुपायैः शल्यन्तु नैव निर्घात्यते यदि।
मत्वा निपुणया बुद्ध्या यन्त्रयोगैश्च निर्हरेत्॥
शोथपाकौ रुजश्चोग्राः कुर्य्याच्छल्यमनिर्हृतम्।
वैकारं मरणञ्चापि तस्माच्छल्यादिनिर्हरेत्॥

षष्ठितमोऽध्यायः।

अथ धात्वादिमारणोपयुक्तान्
पुटप्रकारानाह।

महापुटम्।

गम्भीरे विस्तृते कुण्डे द्विहस्ते चतुरस्रके।
वनोपलसहस्रेण पूरिते पुटनौषधम्॥
कोष्ठे खर्वं प्रयत्नेन गोविष्ठोपरि धारयेत्।
वनोपलसहस्रार्धं कोष्ठिकोपरि निक्षिपेत्॥
वह्निं विनिक्षिपेत्तत्र महापुटमिति स्मृतम्॥

गजपुटम्।

सपादहस्तमानेन कुण्डे निम्ने तथायते।
वनोपलसहस्रेण पूर्णं मध्ये विधारयेत्॥
पुटनद्रव्यसंयुक्तां कोष्ठिकां मुद्रितां मुखे।
अधोऽधोनि करस्थानि अर्धान्यूपरि निःक्षिपेत्॥
एतद्गजपुटं प्रोक्तं ख्यातं सर्वपुटोत्तमम्।
साधारणनराङ्गुल्या त्रिंशदङ्गुलको गजः॥

अन्यच्च। गजप्रमाणगम्भीरं शुषिरं क्रमशस्तम्।
वितस्तिद्वितयसुखं वितस्तितलं तथा॥
एवं विधाय यत्नेन विधिरस्त्रकारीरवत्।
तस्य पादत्रयं सम्यक् पूरयित्वा वनोपलैः॥
भैषज्यकोष्ठिकां तत्र स्थापयित्वा ततः पुनः।

वनोपलैः संहणयादेतद्गजपुटं स्मृतम् ॥
अत्र पादोनहस्तद्वयप्रमाणो गजः ।

वाराहपुटम् ।

अरत्निमात्रके कुण्डे पुटं वाराहमुच्यते ।

कौक्कुटपुटम् ।

षोडशाङ्गुलके खाते कस्यचित् कौक्कुटं पुटम् ।

कापोतपुटम् ।

यत् पुटं दीयते खाते द्वादशसंख्यैर्वनोपलैः ।
कापोतपुटमेतत्तु कथितं पुटपण्डितैः ॥
एतदेव लघुपुटनाम्ना ख्यातम् ।

गोवरपुटम् ।

द्वद्वङ्गुलस्थितैर्यत्नैर्गोवरैर्दीयते पुटम् ।
तद्गोवरपुटं प्रोक्तं भिषग्भिः सूतभस्मकृत् ॥
गोष्ठान्तर्गोखुरक्षुण्णं शुष्कचूर्णितगोमयम् ।
गोवरं तत् समाख्यातं वरिष्ठं रससाधने ॥

भाण्डपुटम् ।

द्वद्वङ्गुले तुषैः पूर्णे मध्ये सूतं विधारयेत् ।
चित्राग्निं मृद्वेद्भाण्डं तद्भाण्डपुटमुच्यते ॥

एकषष्टितमोऽध्यायः ।

अथ औषधपाकार्थयन्त्राणि निरूप्यन्ते ।

कवचीयन्त्रम् ।

नातिक्षुद्रां काचकूपीं न चातिमहतीं दृढ़ाम् ।
वाससा कर्दमार्द्रेण परिवेष्ट्य समन्ततः ॥
सलिप्य मृदुभिस्तस्यामि. शोषयेद्भानुरश्मिना ।
निधाय भेषजं तत्र मुखमाच्छादयेत्ततः ॥
कठिन्या दृढ़या वापि पचेद्यन्त्रे विधानतः ।
कवचीयन्त्रमेतद्धि रसादिपचने मतम् ॥

वालुकायन्त्रम् ।

भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपिके ।
कूपिकाकण्ठपर्य्यन्तं वालुकाभिश्च पूरिते ॥
भेषजं कूपिकासंस्थं वह्निना यत्र पच्यते ।
वालुकायन्त्रमेतद्धि यन्त्रं तत्र बुधै. स्मृतम् ॥



दोलायन्त्रम् ।


द्रवद्रव्येण भाण्डस्य पूरयित्वार्द्धभागकम् ।
सूत्रेण लम्बयेत् काष्ठे बद्ध्वा भेषजपोटलीम् ॥

स्वेदयेच्चान्तरगतां दोलायन्त्रमिदं स्मृतम् ।
पिधाय पच्यते यत्र तद्यन्त्रं स्वेदनं स्मृतम् ॥



विद्याधरयन्त्रम् ।

अधःस्थाल्यां रसं क्षिप्त्वा निदध्यात्तन्मुखोपरि ।
स्थालीमूर्द्धमुखीं सम्यक् निरुध्य मृदुमृत्तया ॥
ऊर्द्धस्थाल्यां जलं क्षिप्त्वा चुल्लग्यामारोप्य यत्नतः ।
अधस्ताज्ज्वालयेदग्निं यावत् प्रहरपञ्चकम् ॥
स्वाङ्गशीतं ततो यत्नाद्गृह्णीयाद्रसमुत्तमम् ।
विद्याधराभिधं यन्त्रमेतत्तज्ज्ञैरुदाहृतम् ॥




डमरुयन्त्रम् ।

यन्त्रं डमरुसंज्ञं स्यात् तत्स्थालीर्मुद्रिते मुखे ॥



चक्रयन्त्रम् ।

गर्त्तबाह्ये भटेद्गर्त्तौ मध्यगर्त्ते रसं क्षिपेत् ।
चक्रयन्त्रमिदं सिद्धं बाह्ये गर्त्ते दृढं पुटम् ॥



इष्टकायन्त्रम् ।

मध्ये गर्त्तसमायुक्तामिष्टका कारयेद्भिषक् ।
गर्त्ते चैव समास्थाय तस्यां सूतादिकं न्यसेत् ॥
दत्त्वोपरि शरावञ्च सन्धिं मृल्लवणैर्लिपेत् ।
तदूर्द्धे सिकतां किञ्चिद्दत्त्वा देयं पुटं लघु ॥
इष्टकायन्त्रमेतद्धि जारयेद्रम्भकादिकम् ॥



कोष्ठिकायन्त्रम्।

षोडशाङ्गुलविस्तीर्णं हस्तमात्रायतं समम्।
धातुसत्त्वनिपातार्थं कोष्ठिकं परिकीर्त्तितम्॥
वंशखादिरमाधूकवदरीदारुसम्भवैः।
परिपूर्णं दृढाङ्गारैरधोवातेन कोष्ठके॥
मात्रया ज्वालमार्गेण ज्वालयेच्च हुताशनम्॥



कच्छपयन्त्रम्।

जलपूर्णपात्रमध्ये दत्त्वा खर्परन्तु विस्तीर्णम्।
तदुपरि रसविङ्गं स्थाप्यः सूतो मृदः कुण्डाम्॥
लघुलोहकोटविकया कृतपटुमृल्लिप्तलेपमास्थाय।
देया तदुपरि सिकता चैकाङ्गुलिपरिमाणापि॥
तत् खर्पर पूर्यं चाङ्गारकवनोपलेनोपचितम्॥
कृतपटुः कार्य्यपटुर्भिषक्।



वकयन्त्रम्।

दीर्घकण्ठकाचकूप्या गिलयेत्काचभाण्डकम्।
तिर्य्यक्कृत्वा पचेच्चूर्णां वकयन्त्रमिदं स्मृतम्॥



नाडिकायन्त्रम् ।


विनिधाय घटे द्रव्यं कनीयांसमधोमुखम् ।
घटमन्यं मुखे तस्य स्थापयित्वोभयोर्मुखम् ॥
मृदुमृद्भि: समालिप्य नाड़िकां विनिवेशयेत् ।
धन्वात् कुण्डलितां भित्त्वा जलद्रोणीं महत्तमाम् ॥
आधारभाण्डपर्य्यन्तं ततश्चूल्यां विधारयेत् ।
अधस्ताज्ज्वालयेदग्निं यावद्राध्यो विशेदध: ॥
गृह्णीयादाधारगतं निर्म्मलं रसमुत्तमम् ।
नाडिकायन्त्रमेतद्धि मुनिभि: परिकीर्त्तितम् ॥




वारुणीयन्त्रम् ।

ऊर्द्धं तोयसमायुक्तं जलद्रोणीविवर्जितम् ।
तोयसवेष्टिताधारमृजुनाड़ीसमन्वितम् ॥
यन्त्रं तद्वारुणीसंज्ञं सुरासाधनकर्म्मणि ।

अन्यच्च । बीजद्रव्यं घटे दत्त्वा सच्छाद्यान्येन तन्मुखम् ।
सदा मुखं विलिख्याथ नाड़ीं वंशादिसम्भवाम् ॥
यन्त्रादाधारगा कृत्वा स्रावयेद्विधिना रसम् ।
वारुणीयन्त्रमेतद्धि सुरासम्साधने सुखम् ॥






पातालयन्त्रम् ।

भाण्डस्य तलतो रन्ध्रं सविधाय सुवर्त्तुलम् ।
तदधो मृन्मयं वापि दार्षदं काचनिर्म्मितम् ॥
धृत्वा पात्रन्तु तद्भाण्डं भेषजैः परिपूरयेत् ।
समाच्छाद्य ततो भाण्डं सलिप्य च सुदादिभिः ॥
भूगर्त्ते तलमाधाय चोद्दीप्याकीर्य्य वह्निभिः ।
रसं विस्रावयेदेतद्यन्त्रं पातालनामकम् ॥



भूधरयन्त्रम् ।

यन्त्र डमरुवद्वाथ तुल्यं विद्याधरेण वा ।
भूगर्त्ते तत्समाधाय चोर्द्धमाकीर्य्य वह्निना ॥
अधःस्थाच्चां जल क्षिप्ता सूतकं तत्र पातयेत् ।
एतद्भूधरयन्त्रं स्यात् सूतसंस्कारकर्म्मणि ॥



तिर्य्यक्पातनयन्त्रम् ।


घटे रसं विनिक्षिप्य सजलं घटमन्यकम् ।
तिर्य्यङ्मुखं द्वयोः कृत्वा तन्मुखं रोधयेत् सुधीः ॥
रसाधो ज्वालयेदग्निं यावत् सूतो जलं विशेत् ।
तिर्य्यक्पातनमित्युक्तं सिद्धैर्नागार्ज्जुनादिभिः ॥



जलयन्त्रम् ।

अथवा कारयेन्मूषां पात्रलम्नामधोमुखीम् ।
लोहजामनुरूपाञ्च तन्मूषामुखरोधिनीम् ॥
दत्त्वा चान्वा तयोः सन्धिं विलिप्यायोऽस्त्रगादि भिः ।
जलमूर्द्धं विनिक्षिप्य निःसन्देहं विपाचयेत् ।
जलयन्त्रमिदं ख्यातं तेनैव जार्य्यते रसः ॥

आदिना चूर्णातसीतैलसर्जरसगुड़ादिकं ज्ञातव्यम् ।



चुल्ली ।

सारणायन्त्रम् ।

मूषान्तर्निहिता मूषा सरन्ध्रा सूतशोधिनी ।
गम्भीरा सारणा नाम्ना यन्त्रं तत् कथ्यते बुधैः ॥

अथ मूषानिरूपणम् ।

अन्यमूषा तु कर्त्तव्या गोस्तनाकारसन्निभा ।
सैव छिद्रान्विता मध्ये गम्भीरा सारणोचिता ॥
द्वौ भागौ तुषदग्धस्य एका वल्मीकमृत्तिका ।
लौहकिट्टस्य भागैकं श्वेतपाषाणभागिकम् ॥
नरकेशसमं किञ्चिच्छागीचीरेण पेषयेत् ।
यामद्वयं दृढं मर्द्य तेन मूषां सुसम्पुटाम् ॥
शोषयित्वा रसं क्षिप्त्वा तत्कल्कैः सन्निरोधयेत् ।
वज्रमूषा समाख्याता सम्यक् पारदसाधिका ॥

—

द्विषष्टितमोऽध्यायः ।

अथ धात्वादीनां शोधनमारणादिविधिः ।

अथ धातवः ।

स्वर्णं रूप्यञ्च ताम्रञ्च रङ्गं यशदमेव च ।
सीसं लौहञ्च सप्तैते धातवो गिरिसम्भवाः ॥
वलीपलितखालित्यकार्श्यावस्थज्वरामयान् ।
निवार्य्य देहं दधति नृणां तद्धातवो मताः ॥

स्वर्णम् ।

स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् ।
तपनीयञ्च गाङ्गेयं कलधौतञ्च काञ्चनम् ॥
चामीकरं शातकुम्भं तथा कार्त्तस्वरञ्च तत् ।
जाम्बूनदं जातरूपं महारजतमित्यपि ॥
दाहे रक्तं सितं छेदे निकषे कुङ्कुमप्रभम् ।
तारशुल्वोज्झितं स्निग्धं कोमलं गुरु हेम सत् ॥
तच्छ्वेतं कठिनं रूक्षं विवर्णं समलं दलम् ।
दाहे छेदे सित श्वेतं कषे त्याज्यं लघु स्फुटम् ॥

बलं सवीर्य्यं हरते नराणां
रोगव्रजान् पोषयतीह काये ।
असौख्यकार्य्यं च सदा सुवर्ण-
मशुद्धमेतन्मरणञ्च कुर्य्यात् ॥

सौख्यं वीर्य्यं बलं हन्ति नानारोगं करोति च ।

अशुद्धमसृतं स्वर्णं तस्मात् संशोध्य मारयेत् ॥

अथ तस्य शोधनविधिः ।

पत्तलीकृतपत्राणि हेम्नो वह्नौ प्रतापयेत् ।
निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा ।
एवं हेम्नः परेषाञ्च धातूना शोधनं भवेत् ॥

तस्य मारणविधिः ।

शुद्धसूतसमं स्वर्णं खल्ले कृत्वा तु गोलकम् ।
ऊर्द्धाधो गन्धकं दत्त्वा सर्वतुल्यं निरुध्य च ॥
त्रिंशद्दनोपलैर्देयं पुटान्येवं चतुर्दश ।
निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः ॥

एवं मारितस्य तस्य गुणाः ।

कषायतिक्तमधुरं सुवर्णं गुरु लेखनम् ।
हृद्यं रसायनं बल्यं चक्षुष्यं कान्तिदं शुचि ॥
आयुर्मेधावयःस्थैर्यवाग्विशुद्धिस्मृतिप्रदम् ।
निहन्ति वयमुन्मादं विकारांश्चोपदंशिकान् ॥

अन्यच्च,

आयुर्मेधाप्रभाधीस्मृतिकरमखिलव्याधिविध्वंसि पुण्यं
भूतावेशप्रशान्तिस्मरभवसुखदं सौख्यपुष्टिप्रकारि ।
गाङ्गेयं चाथ रूप्यं गरहरमजराकारि मेहापहारि
क्लीबानां पुष्टिकारि स्फुटमतिकरणं कारणं वीर्यदृढेः ॥

अस्य माता १ रक्तिका ।

रौप्यम् ।

रौप्यन्तु रजतं तारं चन्द्रकान्ति सितप्रभम् ।

गुरु स्निग्धं मृदु श्वेतं दाहच्छेदघनक्षमम् ॥
स्वर्णादिरहितं स्वच्छं तारं नवगुणं शुभम् ।
कृत्रिमं कठिनं रूक्षं रक्तं पीतदलं लघु ॥
दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम् ।
आयुः शुक्रं बलं हन्ति नाना रोगान् करोति च ॥
अशुद्धममृतं तारं तस्मात् सशोध्य मारयेत् ॥

अथ तस्य शोधनविधिः ।

पत्तलीकृतपत्राणि तारस्याग्नौ प्रतापयेत् ।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा ।
एवं रजतपत्राणां विशुद्धिः सम्प्रजायते ॥

तस्य मारणविधिः ।

विधाय पिष्टिं सूतेन रजतस्याथ मेलयेत् ।
तालं गन्धं समं पश्चान्मर्दयेद्विल्वकद्रवैः ॥
द्विस्त्रिपुटैर्भवेद्वङ्गसम योज्यमेवं रसादिषु ॥

रौप्यमारणस्यान्यो विधिः ।

हरे कवलिसूतनिर्मितकज्जलसममम्लपिष्टतारदलम् ।
सिकतायां यन्त्रे वा गजपुटयोगाङ्गतं भवति हठाग्नौ ॥

मारितस्य तस्य गुणाः ।

रौप्यं शीतं कषायञ्च स्वादुप्राकरसं सरम् ।
वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित् ॥
प्रमेहादिकरोगांश्च नाशयत्यचिरादध्रुवम् ॥

मात्रा १ रक्तिका ।

ताम्रम् ।

ताम्रमौदुम्बरं शुल्बमुदुम्बरमपि स्मृतम् ।
रविप्रियं म्लेच्छमुखं सूर्यपर्यायनामकम् ॥
जवाकुसुमसङ्काशं स्निग्धं मृदु घनत्वसम् ।
लौहनागोज्झितं ताम्रं मारणाय प्रशस्यते ॥
कृष्णं रूक्षमतिस्वच्छं श्वेतच्छायि घनासहम् ।
लोहनागयुतञ्चेति शुल्बं दुष्टं प्रकीर्त्तितम् ॥
एको दोषो विषे ताम्रे त्वशुद्धेऽष्टौ भ्रमो वमिः ।
विरेकः स्वेद उत्क्लेदो मूर्च्छा दाहोऽरुचिस्तथा ॥

तस्य शोधनविधिः ।

यत्तलीकृतपत्राणि ताम्रस्याग्नौ प्रतापयेत् ।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा ।
एव ताम्रस्य पञ्चानां विशुद्धिः संप्रजायते ॥
गोमूत्रेण पचेद्यामं ताम्रपत्रं दृढाग्निना ।
शुध्यते नात्र सन्देहो मारणञ्चाप्यथोच्यते ॥

तस्य मारणविधिः ।

जम्बीररससंपिष्टरसगन्धकलेपितम् ।
ताम्रपत्रं शरावस्थं त्रिपुटैर्म्रियते ध्रुवम् ॥
सूताभावे भिषग्युक्त्या वात्र हिङ्गुलमर्पयेत् ॥

ताम्रमारणस्यापरो विधिः ।

जम्बीररसपिष्टेन गन्धेन द्विगुणेन च ।
कण्टवेधीकृतं ताम्रदलं लिप्त्वा भिषग्वरः ॥
सिकतायन्त्रयोगेन चतुर्यामेन जारयेत् ॥

अथास्यामृतीकरणम् ।

अथ संमारितं ताम्रमम्लैर्नैकेन मर्दयेत् ।
तद्गोलं शूरणस्यान्तः कृत्वा सर्वत्र लेपयेत् ॥
शुष्कं गजपुटे पाच्यं सर्वरोगहरं भवेत् ।
वान्तिं भ्रान्तिं विरेकञ्च न करोति कदाचन ॥

मारितस्यास्य गुणाः ।

ताम्रं कषायं मधुरं सतिक्त-
मम्लञ्च पाके कटु सारकञ्च ।
पित्तापहं श्लेष्महरञ्च शीतं
तद्दीपनं स्यान्नघु लेखनञ्च ॥
पाण्डूदरार्शोज्वरकुष्ठकास-
श्वासक्षयान् पीनसमम्लपित्तम् ।
शोथं कृमिं शूलमपाकरोति
प्राहुर्बुधा बृंहणमल्पमेतत् ॥

मात्रा १ रत्तिका ।

वङ्गम् ।

रङ्गं वङ्गं त्रपु प्रोक्तं तथा पिच्चटमित्यपि ।
खुरकं मिश्रकञ्चापि द्विविधं वङ्गमुच्यते ॥
उत्तमं खुरकं तत्र मिश्रकं त्ववरं मतम् ॥

वङ्गं विधत्ते खलु शुद्धिहीन-
मान्ध्येकम्पौ च किलासगुल्मौ ।
कुष्ठानि शूलं किल वातशोथं
पाण्डुप्रमेहञ्च भगन्दरञ्च ॥
विषोपमं रक्तविकारवृन्दं

क्षयञ्च कुष्ठानि कफज्वरञ्च ।
मेहाश्मरीविद्रधिमुष्करोगान्
नागोऽपि कुर्य्यात् कथितान् विकारान् ॥

अस्य शोधनविधिः ।

वङ्गनागौ प्रतप्तौ च गालितौ तौ निषेचयेत् ।
त्रिधा त्रिधा विशुद्धिः स्याद्विदुग्धेऽपि च त्रिधा ॥

निषेचयेत् तैलतक्रकाञ्जिकगोमूत्रकुलत्थक्वाथेषु प्रत्येकं त्रिधा त्रिधा ततोऽर्कदुग्धेऽपि त्रिधा ।

अस्य मारणविधिः ।

चुल्लुपरिस्थिते पाचे पाचयेद्यामकद्वयम् ।
घर्षयेल्लौहदण्डेन चूर्णं देयं पुनः पुनः ॥
प्रथमे रजनीचूर्णं दीप्यकञ्च द्वितीयके ।
तृतीये जीरकं देयं चतुर्थेऽम्लत्रिच्चयोः ॥
एवं क्रमेण चूर्णेन वङ्गं निर्यन्त्रकं भवेत् ।
स्वाङ्गशीतं समुद्धृत्य भस्म चन्द्रसमप्रभम् ॥
यथामात्रं प्रदातव्यं वङ्गभस्म च भक्षितुम् ।
अनुपानं प्रदातव्यं यथाव्याध्यनुसारतः ॥

वङ्गमारणस्यान्ये विधयः ।

चिञ्चाम्लत्रयवचारैः सैन्धवलवणेन वा वङ्गम् ।
किंवा चूर्णितचिञ्चाम्लत्रयहिङ्गुकसमायोगात् ॥
सन्ति हि यत्र चारास्तेषां चूर्णेन योगाद्वा ।
किंवा कुनटीयोगात् तालकयोगेन मारयेत् किंवा ॥

मारितस्यास्य गुणाः ।

वङ्गं लघु सरं रूक्षं कुष्ठमेहकफक्रिमीन् ।

निहन्ति पाण्डुं सश्वासं नेत्ररोगौघस्तु पित्तलम् ॥
सिंहो गजौघन्तु यथा निहन्ति
तथैव वङ्गोऽखिलमेहवर्गम् ।
देहस्य सौख्यं प्रबलेन्द्रियत्वं
नरस्य पुष्टिं विदधाति नूनम् ॥
मात्रा ६ रक्तिकाः ।

स्वर्णवङ्गम् ।

प्रक्षिपेद्राजने वङ्गमायसे वापि मृण्मये ।
विद्रुते वह्नितापेन तस्मिन् तच्चानकं रसम् ॥
क्षिप्त्वा सचूर्णवेल्लत्व नरसारञ्च गन्धकम् ।
तनुवासोमृदालिप्तकाचकूप्यां निधाय च ॥
तत् सर्वं सिकतायन्त्रे पचेद्यामचतुष्टयम् ।
पाकात् सञ्जायते चित्रं कीर्णं हेमकणैरिव ॥
रमणीयतरं स्वर्णवङ्गं नाम रसायनम् ।
बल्यं मेहहरं कान्तिमेधावीर्य्याग्निवर्द्धनम् ॥
मात्रा २ रक्तिके ।

महासेतुः ।

एकः सूतो द्विधा वङ्गं सर्वदिगुणगन्धकः ।
कूपीपक्वो महासेतुर्वङ्गस्थानेऽथवा विधुः ॥

यशदम् ।

यशदं गिरिजं तस्य दोषाः शोधनमारणे ।
वङ्गस्येव हि बोद्धव्या गुणांस्तु गणयाम्यथ ॥
यशदं तुवरं तिक्तं शीतलं कफपित्तहृत् ।

चक्षुष्यं परमं मेहान् पाण्डु श्वासञ्च नाशयेत् ॥

मात्रा १ रक्तिका ।

सीसम् ।

सीसं वङ्गञ्च वङ्गञ्च योगेष्टं नागनामकम् ।
तस्य साहजिका दोषा वङ्गस्येव निदर्शिताः ॥
शोधनञ्चापि तस्येव भिषग्भिर्गदितं पुरा ॥

अस्य मारणविधिः ।

नागं खर्परके निधाय कुनटीचूर्णं ददीत द्रुते
निम्बूनीरसुगन्धकेन पुटितं भस्मीभवेत् सत्वरम् ॥

सीसमारणस्यान्यो विधिः ।

सीसकं सयवक्षारं लौहपात्रे विपाचितम् ।
क्षारं पुनः पुनर्देयं यावद्भस्मत्वमाप्नुयात् ॥
रक्तवर्णं भवेद्यावत् तावन्मृद्वग्निना पचेत् ॥

मारितस्यास्य गुणाः ।

सतिक्तो मधुरो नागो मृतो भवति रोगहा ।
आयुःकान्ती वीर्य्यवृद्धिं कुरुते सेवनात् सदा ॥
नागस्तु नागशततुल्यबलं ददाति
व्याधिञ्च नाशयति जीवनमातनोति ।
वह्निं प्रदीपयति कामबलं करोति
मृत्युञ्च नाशयति सन्ततसेवितः सः ॥

मात्रा २ रक्तिके ।

लोहम् ।

लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी ।
लौहपर्य्यायनामानि कीर्त्तितानि च सूरिभिः ॥

षण्डत्वकुष्ठामयमृत्युकारी
हृद्रोगशूलौ कुरुतेऽश्मरीञ्च ।
नानारुजानाञ्च तथा प्रकोपं
कुर्य्याच्च हृल्लाममशुद्धलोहम् ॥

अस्य शोधनविधिः ।

पत्तलीकृतपत्राणि लोहस्याग्नौ प्रतापयेत् ।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा ।
एवं लोहस्य पत्राणां विशुद्धिः संप्रजायते ॥
यथोदितेन विधिना लोहपत्रं विशोध्य च ।
निषिञ्चेल्लोहदोषाणां विनाशाय भिषग्वरः ॥
क्षीरारनालगोमूत्रत्रिफलाक्वाथवारिणि ।
लोहमुष्णं मनाक् तप्तं त्रेधा त्रेधा वि धानतः ॥
निमिषे त्रिफला लोहात् कर्त्तव्याष्टगुणा सदा ।
चतुर्गुणं फलात्तोयमर्द्धभागवशेषितम् ॥
क्षीरादित्रयमानन्तु लोहाद्विगुणमिष्यते ॥

अस्य मारणविधिः ।

विशोधितमयचूर्णं गोमूत्रेण विमर्दयेत् ।
शतशस्तत् पुटेदग्नौ मृतमेवं भवेद्ध्रुवम् ॥
सहस्रशस्तु पुटनात् तद्भवेदमृतोपमम् ॥

लौहमारणस्यान्यो विधिः ।

त्रिपेडा दशमांशेन दरदं तीक्ष्णचूर्णतः ।
मर्दयेत् कन्यकाद्रावैर्यामयुग्मं ततः पुटेत् ॥
एवं सप्तपुटैर्म्रियुं लोहचूर्णमवाप्नुयात् ॥

अथास्यासृतीकरणम् ।

प्रथमावर्त्तनं क्षीरे लौहपात्रे दृढे शुभे ।
ताम्रे वा मार्त्तिके यत्नाद् लोहपाकं समाचरेत् ॥
घृतेन लोहमालोड्य क्षीरेण समनन्तरम् ।
त्रिफलाया जलं दत्त्वा मन्दमन्देन वह्निना ॥
सततं चालयेल्लौहं लौहदर्व्यातिदीर्घया ।
त्रिविधं पाकमिच्छन्ति मृदुं मध्यं खरं तथा ॥
त्रैविध्यात् सर्वधातूनां पित्तानिलकफात्मनाम् ।

एवं मारितस्य लौहस्य गुणाः ।

लौहं तिक्तं सरं शीतं कषायं मधुरं गुरु ।
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत् ॥
कफं पित्तं गरं शूलं शोफार्शःप्लीहपाण्डुताः ।
मेदोमेहकृमीन् कुष्ठं तल्लिङ्गं तद्वदेव हि ॥
गुञ्जामेकां समारभ्य यावत् स्युर्नवरक्तिकाः ।
तावल्लौहं समश्नीयाद्यथादोषानलं नरः ॥
कुष्माण्डं तिलतैलञ्च माषान्नं राजिकां तथा ।
मद्यमम्लरसञ्चैव वर्जयेल्लौहसेवकः ॥

मण्डूरम् ।

ध्मायमानस्य लौहस्य मलं मण्डूरमुच्यते ।
लौहसिंहानिका क्लिष्टं लिङ्गनाच्च निगद्यते ॥
शतोर्द्धमुत्तमं क्लिष्टं मध्यञ्चाशीतिवर्षकम् ।
अधमं षष्टिवर्षीयमतो हीनं विषोपमम् ॥
भस्माग्नौ तप्तमण्डूरं समधा गोजले क्षिपेत् ।
चूर्णीकृत्य प्रयोक्तव्यं पुटाद्दृगुणं भवेत् ॥

अन्यच्च गोमूत्रे त्रिफला क्वाथ्या तत्क्वाथे सेचयेच्छनैः ।
लौहकिट्टं शुतप्तन्तु यावज्जीर्य्यति तत् स्वयम् ॥
तज्जीर्णं चाहयेत् पेथं मण्डूरञ्च प्रयोजयेत् ।
यल्लौहं यद्गुणं प्रोक्तं तत् किट्टमपि तद्गुणम् ॥
स्वर्णाद्यभावे लौहं स्यान्मण्डूरं तदभावतः ।
ये गुणा मारिते लौहे ते गुणा लौहकिट्टके ॥
तस्मात्सर्वत्र मण्डूरं रोगघ्नत्वे प्रयोजयेत् ॥

मात्रा १ माषकः ।

स्वर्णादिलौहान्तानां धातूनां
साधारणो मारणोपायः ।
शिलागन्धार्कदुग्धाक्ताः स्वर्णाद्याः सर्वधातवः ।
म्रियन्ते द्वादशपुटैः सत्यं गुरुवचो यथा ॥

त्रिषष्टितमोऽध्यायः ।

अथोपधातवः ।

सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम् ।
तुत्थं कांस्यञ्च रीतिश्च सिन्दूरञ्च शिलाजतु ॥
उपधातुषु सर्वेषु तत्तद्धातुगुणा अपि ।
सन्ति किन्त्वेतेष्वल्पोनास्तत्तदंशाल्पभावतः ॥

स्वर्णमाक्षिकम् ।

स्वर्णमाक्षिकमाख्यातं तापीजं मधुमाक्षिकम् ।
ताप्यं माक्षिकधातुश्च मधुधातुश्च स स्मृतः ॥
किञ्चित् सुवर्णसाहित्यात् स्वर्णमाक्षिकमीरितम् ।
उपधातुः सुवर्णस्य किञ्चित् स्वर्णगुणान्वितम् ॥
तथा च काञ्चनाभावे दीयते स्वर्णमाक्षिकम् ।
किन्तु तस्यानुकल्पत्वात् किञ्चिदूना गुणास्ततः ॥
भङ्गे सुवर्णसङ्काशो मनाक् क्षणच्छविर्वहिः ।
हृद्धर्णं इति ख्यातो माक्षिकः श्रेष्ठ उच्यते ॥

मन्दानलत्वं बलहानिसूयां
विष्टम्भितां नेत्रगदान् सकुष्ठान् ।
मालां तथैव व्रणपूर्विकाञ्च
कुर्यादशुद्धं खलु माक्षिकञ्च ॥

अस्य शोधनविधिः ।

माक्षिकस्य त्रयो भागा भागैकं सैन्धवस्य च ।
मातुलुङ्गद्रवैर्घ्राह्य जम्बीरस्य द्रवैः पचेत् ॥
चालयेल्लोहजे पात्रे यावत्यात्रं सुलोहितम् ।
भवेत्ततस्तु संशुद्धिं स्वर्णमाक्षिकमृच्छति ॥

अस्य मारणविधिः ।

क्षुल्लस्य कषायेण पुटेत्वा तैलेन वा पुटेत् ।
तक्रेण वाजमूत्रेण म्रियते स्वर्णमाक्षिकम् ॥

तारमाक्षिकम् ।

तारमाक्षिकमन्यत्तु रूप्यवैद्रजतोपमम् ।
किञ्चिद्रजतसाहित्यात्तारमाक्षिकमीरितम् ॥

मन्दानलत्वं बलहानिमुग्रां
विष्टम्भितां नेत्रगदान् सकुष्ठान् ।
तथैव मालां व्रणपूर्विकाञ्च
करोति तापीजमिदञ्च तद्वत् ॥

अस्य शोधनविधिः ।

कर्कोटीमेषशृङ्ग्यर्कैर्वैजयन्तीरजैर्दिनम् ।
भावयेदातपे तीव्रे विमला शुध्यति ध्रुवम् ॥

अस्य मारणविधिः ।

कुलत्थस्य कषायेण पृष्ट्वा तैलेन वा पुटेत् ।
तैलेन वाजमूत्रेण म्रियते तारमाक्षिकम् ॥

एवं मारितयोस्तयोर्गुणाः ।

न केवलं स्वर्णरूप्यगुणास्तापीजयोर्मताः ।
द्रव्यान्तरस्य संसर्गात्सन्त्यन्येऽपि गुणास्तयोः ॥
माक्षिकं मधुरं तिक्तं खर्यं हृद्यं रसायनम् ।
चतुर्थं वस्तिरुक्कुष्ठपाण्डुमेहविषोदरम् ॥
अर्शः शोफं क्षयं कण्डूं त्रिदोषञ्च नियच्छति ॥

मात्रा ६ रक्तिकाः ।

तुत्थम् ।

तुत्थं वितुन्नकञ्चापि शिखिग्रीवं मयूरकम् ।
तुत्थं ताम्रोपधातुर्हि किञ्चित्ताम्रेण तद्भवेत् ॥

अस्य शोधनविधिः ।

विष्ठया मर्दयेत्तुत्थं मार्जारकपोतयोः ।
दग्धांशं टङ्कणं दत्त्वा पचेल्लघुपुटे ततः ॥
पुटं दत्त्वा पुटं चोद्रैर्देयं तुत्थविशुद्धये ॥

अन्यच्च । जम्बीरजरसः पिष्टं तुल्यं लघुपुटे पचेत् ।
त्रिदिनं मस्तुना भाव्यं ततो योगेषु योजयेत् ॥
भ्रान्तिर्भ्रान्तिर्दा न स्यात्तदा सिद्धिं विनिर्दिशेत् ।
लेखनं भेदि तज्ज्ञेयं तुल्यं कण्डूक्रिमिप्रणुत् ॥
अन्यच्च । तुत्थकं कटुकं चारं कषायं वामकं लघु ।
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत् ॥
विषाश्मकुष्ठकण्डूघ्नं भिषग्भिः परिकीर्त्तितम् ॥
मात्रा १ रत्तिका वमनार्थं ६ रत्तिकाः ।

कांस्यम् ।

ताम्रलपुञ्जमाख्यातं कांस्य घोषञ्च कंसकम् ।
उपधातुर्भवेत् कांस्यं द्वयोस्तरणिरङ्गयोः ॥

अस्य शोधनविधिः ।

पत्तलीकृतपत्राणि कांस्यस्याग्नौ प्रतापयेत् ।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा ।
एवं कांस्यस्य रीतेश्च विशुद्धिः सम्प्रजायते ॥

अस्य मारणविधिः ।

अर्कक्षीरेण संपिष्टो गन्धकस्तेन लेपयेत् ।
समेन कांस्यपत्राणि शुद्धान्यस्वद्रवैर्मुहुः ॥
ततो मूषापुटे धृत्वा पचेद्गजपुटेन च ।
एवं पुटद्वयात्कांस्यं रीतिश्च म्रियते ध्रुवम् ॥
कांस्यं कषायं तीक्ष्णोष्णं लेखनं विशदं सरम् ।
गुरु नेत्रहितं रूक्षं कफपित्तहरं परम् ॥
मात्रा १ रत्तिका ।

पित्तलम्।

पित्तल खारकूट स्यादारो रीतिश्च कथ्यते।
राजरीतिर्ब्रह्मरीतिः कपिला पिङ्गलापि च॥
रीतिरप्युपधातुः स्यात् ताम्रस्य यशदस्य च।
कांस्यस्येव हि विज्ञेये रीतेः शोधनमारणे॥
रीतिका तु भवेद्दूचा सतिक्ता लवणा रसे।
शोधिनी पाण्डुरोगघ्नी कृमिघ्नातिलेखनी॥

मात्रा १ रक्तिका।

अथैतयोः शोधनमारणयोरन्यो विधिः।
कांस्यपित्तलयोः शुद्धिर्मृतिश्च ताम्रवद्भवेत्॥

सिन्दूरम्।

सिन्दूरं रक्तरेणुश्च नागगर्भश्च सीसजम्।
सीसोपधातुः सिन्दूरं गुणैस्तत् सीसवन्मतम्॥
संयोगजप्रभावेण तस्याप्यन्ये गुणाः स्मृताः।
दुग्धाम्लयोगतस्तस्य विशुद्धिर्गदिता बुधैः॥
सिन्दूरमुष्णं वीसर्पकुष्ठकण्डूविषापहम्।
भग्नसन्धानजननं व्रणशोधनरोपणम्॥

शिलाजतु।

निदाघे घर्मसन्तप्ता धातुसारं धराधराः।
निर्यासवत् प्रमुञ्चन्ति तच्छिलाजतु कीर्त्तितम्॥
सौवर्णं राजतं ताम्रमायसं तच्चतुर्विधम्।
शिलाजत्वद्रिजतु च शैलनिर्यास इत्यपि॥
गैरेयमश्मजञ्चापि गिरिजं शैलधातुजम्।
सौवर्णन्तु जवापुष्पवर्णं भवति तद्रसात्॥

मधुरं कटु तिक्तञ्च शीतलं कटुपाकि च ।
राजतं पाण्डुरं शीतं कटुकं स्वादुपाकि च ॥
ताम्रं मयूरकण्ठाभ तीक्ष्णमुष्णञ्च जायते ।
यत्तु गुग्गुलुसङ्काशं मतिक्तलवणान्वितम् ॥
विपाके कटु शीतञ्च सर्वमेषं तदायसम् ।
विल्वादौ बहुल तत्तु तत्र लौहं यतोऽधिकम् ॥
तच्छोधनमृते व्यर्थमनेकमलमेलनात् ।
गोमूत्रगन्धवत् क्षारं स्निग्धं मृदु तथा गुरु ॥
तिक्तं कषाय शीतञ्च सर्वमेषं तदायसम् ॥

अथ तस्य शोधनविधिः ।

शिलाजतु समानीय खण्डं खण्डं विधाय च ।
तिन्त्रिण्यात्मुण्डपानीये यामैकं स्थापयेत् सुधीः ॥
मर्दयित्वा ततो नीरं गृह्णीयादस्रगालितम् ।
स्थापयित्वा च मृत्पात्रे धारयेदातपे बुधः ॥
उपरिस्थं घनं यत् स्यात् तत् क्षिपेदन्यपात्रके ।
एवं पुनः पुनर्नीतं द्विमासाभ्यां शिलाजतु ॥
भवेत् कार्श्यक्षमं वह्नौ क्षिप्तं लिङ्गोपम भवेत् ।
निर्धूमञ्च ततः शुद्धं सर्वकर्मसु योजयेत् ॥

अथान्यः प्रकारः ।

चतुर्भागावशिष्टन्तु कारयेच्चैफलं जलम् ।
जलं केवलमुष्णं वा दत्त्वा तत्र शिलाजतु ॥
मर्दितं लौहदण्डेन चण्डरौद्रे निधापयेत् ।
यद्यत् सूर्यातपे दग्धः स्यादूर्ध्वं सरवत् ततः ।
तत् तत् पुनः पुनर्ग्राह्यं क्षिप्त्वा क्षिप्त्वा प्रयत्नतः ॥

कुर्य्यादधि जलं भूरि सारोत्पत्तिस्तदा न हि ॥
इत्थं सारं समादाय भावना तु गुणावहा।
कर्त्तव्या भिषजा तस्याः साधनं कथ्यतेऽधुना ॥
भाव्यद्रव्यसमं द्रव्यं क्वाथ्यमष्टगुणे जले।
अष्टभागावशिष्टन्तु कार्य्यं तेनैव भावयेत् ॥
गालनोचिततोयेन द्रव्यमालोड्य घातपे।
शोषयेदथ शुष्केऽस्मिन् देयं नीरान्तरं बुधैः ॥
दिवा दिवातपे शुष्कं रात्रौ रात्रौ च वासयेत्।
सालसाधादितोयेन भावयेच्च शिलाजतु ॥
दोषघ्नैश्च मदघ्नैश्च द्रव्यैर्वर्ग्यैर्विशेषतः।
रसायनहितैश्चापि भावयेच्च पुनः पुनः ॥

प्रकारान्तरञ्च।

गोदुग्धतिफलाभृङ्गद्रावैः पिष्टं शिलाजतु।
दिनैकं लोहजे पात्रे शुद्धिमाप्नोत्यसंशयम् ॥

शिलाजतु चूर्णयित्वा उष्णे दुग्धादीनामन्यतमस्मिन् द्विगुणद्रवे प्रक्षिप्यातपे स्थापनीयम्। तत्र दधिसरवत् उपरि यदुपतिष्ठते तत् पुनः पुनरालक्ष्यातपे विशोष्य ग्राह्यम्। यदुक्तम्—

यथोक्तद्विगुणे तोये गोलयित्वा शिलाजतु।
गृह्णीयादूर्द्ध्वगं रौद्रे सरवन्मलवर्जितम् ॥

शोधितस्य तस्य गुणाः।

शिलाजतु स्मृतं तिक्तं कटूष्णं कटुपाकि च।
रसायनं योगवाहि श्लेष्ममेहाश्मशर्करा॥
मूत्रकृच्छ्रं चयं श्वासं शोथमर्शांसि पाण्डुताम्।

वातरक्तं तथा कुष्ठमपस्मारोदरं हरेत् ॥

मात्रा १० रक्तिकाः ।

सत्त्वनिर्गमनविधिः ।

खाच्चा मीना पयश्छागं टङ्कन मृगशृङ्गकम् ।
पिण्याकं सर्षपाः शिग्रु गुञ्जोर्णागुडसैन्धवम् ॥
यवतिक्ता घृत चौद्रं यथालाभं विचूर्णयेत् ।
एभिर्विमिश्रिताः सर्वे धातवो गाढवह्निना ॥
मूषाधमाताः प्रजायन्ते मुक्तसत्त्वा न संशयः ॥

चतुःषष्टितमोऽध्यायः ।

अथ रसप्रकरणम् ।

रसः ।

रसायनार्थिभिर्लोकैः पारदो रस्यते यतः ।
अतो रस इति प्रोक्तः स च धातुरपि स्मृतः ॥
क्षेत्रभेदेन विज्ञेयं शिवबीर्य्यं चतुर्विधम् ।
श्वेतं रक्तं तथा पीतं कृष्णं तत्तु भवेत् क्रमात् ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रस्तु खलु जातितः ।
श्वेतं भस्म रजो नाम्ने रक्तं किल रसायनम् ॥
धातुभेदे तु तत् पीतं खेगतौ कृष्णमेव च ।
पारदो रसधातुश्च रसेन्द्रश्च महारसः ॥
चपलः शिवबीर्य्यश्च रसः सूतः शिवाह्वयः ।

पारदः षड्रसः स्निग्धस्त्रिदोषघ्नो रसायनः ॥
योगवाही महातेजः सदा दृष्टिबलप्रदः ।
सर्वामयहरः प्रोक्तो विशेषात् भवेत्कुष्ठनुत् ॥

अस्तः सुनीलो वह्निरुज्ज्वलो यो
मध्याह्नसूर्यप्रतिमप्रकाशः ।
श्लक्ष्णोऽथ धूम्रः परिपाण्डुरश्च
चित्रो न योज्या रसकर्मसिद्धौ ॥

नागो वङ्गो मलो वह्निश्चाल्यश्च विषं गिरिः ।
असह्याग्निमहादोषा निसर्गात् पारदे स्थिताः ॥
पर्पटी पाटनी भेदी द्रावी मलकरी तथा ।
अन्धकारी तथा ध्वाङ्क्षी विज्ञेयाः सप्तकञ्चुकाः ॥
जाड्यं गण्डस्तनो नागात् कुष्ठं वङ्गाज्जडो मलात् ।
वह्नेर्दाहो वोजनाशश्चाल्यान्मरणं विषात् ॥
गिरेः स्फोटो ह्यसह्याग्नेर्दोषान्मोहो विजायते ।
दोषैरेतैर्विनिर्मुक्तं रसं कर्मणि योजयेत् ॥

पारदस्य शोधनविधिः ।

दृष्टकारजनीचूर्णैः षोडशाग्रैः रसस्य च ।
मर्दयेत् सप्तधा खल्वे जम्बीरोत्थद्रवैर्दिनम् ॥
काचिके चालयेत् सूतं नागदोषोपशान्तये ।
विगालाङ्गोठचूर्णेन वङ्गदोषं निवारयेत् ॥
राजद्रुचो मलं हन्ति चित्रको वह्निदूषणम् ।
चाङ्क्ष्य कृष्णधुस्तूरस्नुफला विषनाशिनी ॥
कटुत्रयं गिरिं हन्ति चासह्याग्निं त्रिकण्टकः ।
प्रतिदोषं कलांशेन तत्तच्चूर्णं सकन्यकम् ॥

सुवस्त्रच्छानितं सूतं खल्ले क्षिप्त्वा यथाक्रमम् ।
प्रत्येकं प्रत्यहं यत्नात् सप्तवारं विमर्दयेत् ॥
उद्धृत्योष्णारनालेन मृत्पात्रे क्षालयेत् सुधीः ।
सर्वदोषविनिर्मुक्तं सप्तकञ्चुकवर्जितम् ॥

कलांशमिति रसस्य षोडशांशं चूर्णं कुमारीद्रवेण सह सप्तवारं मर्दयेत् । एवमष्टौ दिनानि प्रत्यहं वस्त्रेण क्षानयित्वा नवमे दिने उष्णारनालेन क्षालयित्वा योगेषु योजयेत् । इष्टकादिर्नागादिं कुमारीकञ्चुकं जयेत् ।

अथ मुख्यदोषहरः

शोधनविधिः ।

गृहकन्या हरति मलं त्रिफलाग्निं चित्रको विषं हन्ति ।
तस्मादेभिर्मिश्रैर्वारान् संमूर्च्छयेत्सप्त ॥

अथ सर्वदोषहरः संक्षिप्तः

शोधनविधिः ।

कुमारिकाचित्रकरक्तसर्षपैः
कृतैः कषायैर्हतीविमिश्रितैः ।
फलत्रिकेणापि विमर्दितो रसो
दिनत्रयं सर्वमलैर्विमुच्यते ॥

अन्यच्च । एकेन लशुनेनैव सम्यक् शुद्धो भवेद्रसः ।

इति मर्दनम् ।

अथ मूर्च्छनम् ।

अथाभिचरितव्याधिघातकत्वन्तु मूर्च्छना ।
चूर्णत्रिफलाबन्याकन्दैः क्षुद्रद्वयान्वितैः ॥
चित्रकोर्णानिशाक्षारकन्याकाँकनकद्रवैः ॥

सूतं क्षतेन यूषेण वारान् सप्ताभिमर्दयेत् ।
इत्थं संमूर्च्छितः सूतस्त्यजेत् सप्तापि कञ्चुकान् ॥

स्वेदनम् ।

रसं चतुर्गुणे वस्त्रे बद्ध्वा दोलाकृतं पचेत् ।
दिनं व्योषवरावङ्किकन्याकल्के सकाञ्जिके ॥
दोषशेषापनुत्त्यर्थमिदं स्वेदनमुच्यते ॥

ऊर्ध्वपातनम् ।

मयूरशीवताप्याभ्यां नष्टपिष्टीकृतस्य च ।
यन्त्रे विद्याधरे कुर्याद्रसेन्द्रस्योर्ध्वपातनम् ॥

नष्टपिष्टीकृतस्य कुमारीद्रवयोगेन तावन्मर्दनं कर्त्तव्यं यावत् पारदो न दृश्यत इत्यर्थः ।

अधःपातनम् ।

त्रिफलाग्निशिखिभिर्लवणासुरिसंयुतैः ।
नष्टपिष्टं रसं कृत्वा लेपयेदूर्ध्वभाजनम् ॥
ततो दीर्घैरधःपातमुपलैस्तस्य कारयेत् ।
यन्त्रे भूधरसंज्ञे तु ततः सूतो विशुध्यति ॥

तिर्यक्पातनम् ।

घटे रसं विनिक्षिप्य सजलं घटमन्यकम् ।
तिर्यग्मुखं द्वयोः कृत्वा तन्मुखं रोधयेत्सुधीः ॥
रसाधो ज्वालयेदग्निं यावत् सूतो जलं विशेत् ।
तिर्यक्पातनमित्युक्तं सिद्धैर्नागार्जुनादिभिः ॥

मिश्रितौ चेद्रसे नागवङ्गौ विक्रयहेतुना ।
ताभ्यां स्यात् कृत्रिमो दोषस्तन्मुक्तिः पातनत्रयात् ॥

बोधनम् ।

कदर्थनेनैव नपुंसकत्व-
मेव भवेदस्य रसस्य पश्चात् ।
वीर्यप्रकर्षाय च भूज्जयन्त्रे
स्वेद्यो जले सैन्धवचूर्णगर्भे ॥

नियमनम् ।

सर्पाक्षीविच्छिकाबन्ध्याभृङ्गजाकनकाम्बुभिः ।
दिनं सस्वेदितः सूतो नियमात् स्थिरतां व्रजेत् ॥

दीपनम् ।

कासीसं पञ्चलवणं राजिका मरिचानि च ।
भूम्यिग्नबीजमेकत्र टङ्कनेन समन्वितम् ॥
आलोड्य काञ्जिके दोलायन्त्रे पाकादिनैस्त्रिभिः ।
दीपनं जायते सम्यक् सूतराजस्य जारणे ॥
अथवा चित्रकद्रावैः काञ्जिके त्रिदिनं पचेत् ॥

अनुवासनम् ।

दीपितं रसराजन्तु जम्बीररससंयुतम् ।
दिनैकं धारयेद्धर्मे सूत्यावे वा शिलोद्भवे ॥

विडकथनम् ।

विड़मत्र प्रवक्ष्यामि साधयेद्भिषजां वर ।
शङ्खचूर्णं रविक्षीरैश्चातपे भावयेद्दिनम् ॥
तद्दुग्धक्षीरजैर्द्रावैर्दिनैकं धूमसारकम् ।
सुवर्चलमजामूत्रैः काथ्यं यामचतुष्टयम् ॥
कण्टकारी च संकाथ्या दिनैकं नरमूत्रकैः ।
सर्जिक्षारस्त्रिलिङ्गोकं कासीसञ्च शिलाजतु ॥

जम्बीरोत्थद्रवैर्भाव्यं पृथग्यामचतुष्टयम् ।
जैपालबीजं त्वग्हीन मूलकानां द्रवैर्दिनम् ॥
सैन्धव टङ्कनं गुञ्जा शिग्रुमूलद्रवैर्दिनम् ।
एतत् सर्वं समांशन्तु मर्द्यं जम्बीरजैर्द्रवैः ॥
तन्नीलं रञ्जयेद्यन्त्रादिड़ोऽयं वाड़वानलः ।
अनेन मर्द्दयेत् सूतं ग्रसते तप्तखल्लके ॥
स्वर्णाभ्रादीनि लोहानि यथेष्टानि च मारयेत् ॥

तप्तखल्ललक्षणम् ।

अजाग्यकृत् तुषाग्निञ्च खानयित्वा भुवि क्षिपेत् ।
तस्योपरिस्थितं खल्लं तप्तखल्लमिति स्मृतम् ॥

षड्गुणवलिजारणविधिः ।

सूतप्रमाणं सिकताख्ययन्त्रे
दत्त्वा वलिं मृद्घटितेऽल्पभाण्डे ।
तैलावशेषेऽत्र रसं निदध्या-
च्चूर्णार्द्धकायं प्रविलोक्य भूयः ॥
आषड्गुणं गन्धकमल्पमल्पं
क्षिपेदसौ जीर्णवलिर्बली स्यात् ।
रसेषु सर्वेषु नियोजितोऽय-
मसंशयं हन्ति गदं जवेन ॥

षड्गुणवलिजारणेन सिन्दूर-
सम्पादनम् ।

कूपीकोटरमागतं रसगुणैर्गन्धैस्तुलार्धं विभुं
विज्ञाय ज्वलनक्रमेण सिकतायन्त्रे शनैः पाचयेत् ।
वारंवारमनेन विद्धि विधिना गन्धक्षयं सिद्धये ।

सिन्दूरायुचितोऽनुभूय भणितः कर्मक्रमोऽयं मया ॥
रसमन्तरेण हिङ्गुलगन्धाभ्यामपि सिन्दूरं सम्पाद्यम् ।
मात्रा १ रक्तिका ।

रसस्य मारणविधिः ।

धूमसारं रसं तोरीगन्धकं नरसादरम् ।
यामैकं मर्दयेदम्लैर्भागं ज्ञात्वा समं समम् ॥
काचकूप्यां विनिक्षिप्य ताञ्च मृदम्लमुद्रया ।
विलिप्य परितो वक्त्रे मुद्रां दत्त्वा विशोषयेत् ॥
अधःसच्छिद्रपिठरीमध्ये कूपीं निवेशयेत् ।
पिठरीं बालुकापूरैर्भृत्वा काचकूपिकागलम् ॥
निवेश्य चुल्लयां तदधो वह्निं कुर्याच्छनैः शनैः ।
तस्मादप्यधिकं किञ्चित् पावकं ज्वालयेत् क्रमात् ॥
एवं द्वादशभिर्यामैर्म्रियते रस उत्तमः ।
स्फोटयेत् खाङ्गशीतं तमूर्ध्वगं गन्धकं त्यजेत् ॥
अधःस्थञ्च मृतं सूतं गृह्णीयात् तन्तु मात्रया ।
यथोचितानुपानेन सर्वकर्मसु योजयेत् ॥

प्रकारान्तरम् ।

काष्ठोदुम्बरिकादुग्धै रसं किञ्चिद्दिमर्दयेत् ।
तद्गन्धघृष्टहिङ्गोश्च मूषायुग्मं प्रकल्पयेत् ॥
चित्वा तत्संपुटे सूतं तत्र मुद्रां प्रदापयेत् ।
धृत्वा तन्नोलकं प्राज्ञो सप्तमूषासंपुटेऽधिके ॥
पचेद्गजपुटेनैव सूतको याति भस्मताम् ॥

प्रकारान्तरम् ।

नागवल्लीरसैर्घृष्टः कर्कोटीकन्दगर्भितः ।

मृन्मूषासंपुटे पक्वः सूतो यात्येव भस्मताम् ॥

कर्पूररसस्य विधिः।

तत्र पारदस्य संचिप्तं शोधनं कर्त्तव्यम्।

शुद्धसूतसमं कुर्य्यात् प्रत्येकं गैरिकं सुधीः।

इष्टिकां खटिकां तद्वत् स्फटिकां सिन्धुजन्म च ॥

वल्मीक क्षारलवणं भाण्डरङ्गकमृत्तिकाम्।

सर्वाण्येतानि संचूर्ण्य वाससा चापि शोधयेत् ॥

एभिश्चूर्णैर्युतं सूत यावद्यामचतुष्टयम्।

तच्चूर्णसहितं सूतं स्थालीमध्ये परिक्षिपेत् ॥

तस्याः स्थाल्या मुखे स्थालीमपरां धारयेत् समाम्।

सवस्त्रकुट्टितश्रद्धा मुद्रयेदनयोर्मुखम् ॥

संशोष्य मुद्रयेद्भूयो भूयः संशोष्य मुद्रयेत्।

सम्यग्विशोष्य मुद्रां तां स्थालीं चुल्यां विधारयेत् ॥

अग्निं निरन्तरं दद्याद्यावद्दिनचतुष्टयम्।

अङ्गारोपरि तद्यन्त्रं रक्षेद्यत्नादहर्निशम् ॥

अनैरुद्घाटयेद्यन्त्रमूर्द्धस्थालीगतं रसम्।

कर्पूरवत् सुविमलं गृह्णीयाद्गुणवत्तरम् ॥

तदेव कुसुमचन्दनकस्तूरीकुङ्कुमैर्युतम्।

खादन् हरति फिरङ्गं व्याधिं सोपद्रवं सपदि ॥

विन्दति वह्निं दीप्तिं पुष्टिं वीर्य्यं बलं विपुलम्।

रमयति रमणीशतकं रसकर्पूरस्य सेवकः सततम् ॥

मात्रा १ रक्तिका।

सिन्दूररसः।

शुद्धसूतस्य गृह्णीयाद्विषभागचतुष्टयम्।

शुद्धगन्धस्य भागक तावत् कृत्रिमगन्धकम् ॥
अथवा पारदस्यार्द्धं शुद्धगन्धकमेव हि ।
तयोः कज्जलिकां कुर्य्याद्दिनमेकं विमर्दयेत् ॥
मृत्तिकां वाससा सार्द्धं कुट्टयेदतियत्नतः ।
तया वारचयं सम्यक् काचकूपीं प्रलेपयेत् ॥
मृत्तिकां शोषयित्वा तु कूप्यां कज्जलिकां क्षिपेत् ।
तां कूपीं वालुकायन्त्रे स्थापयित्वा रसं पचेत् ॥
अग्निं निरन्तरं दद्याद्यावद्दिनचतुष्टयम् ।
गृह्णीयादूर्द्धसंलग्नं सिन्दूरसदृशं रसम् ॥
पारदः क्रिमिकुष्ठघ्नो जयदो दृष्टिकृत् सरः ।
मृत्युघ्नश्च महावीर्य्यो योगवाही ज्वरापहः ॥
मृत्योर्जीरूपदो ह्यथो वृष्यिकृद्धातुवर्द्धनः ।
षण्ढत्वनाशनः शूरः खेचरः सिद्धिदः परः ॥

पारदः सकलरोगहा स्मृतः
षड्रसो निखिलयोगवाहकः ।
पञ्चभूतमय एष कीर्त्तितः
स्तेन तद्गुणगणैर्विराजते ॥

यस्य रोगस्य यो योगस्तेनैव सह योजितः ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥

मात्रा १ रत्तिका ।

पीतरसः ।

रसं गन्धं समं दत्त्वा हस्तिशुण्डीद्रवैर्दृढम् ।
भूधात्रिकारसैर्मर्द्यं दिनमेकं निरन्तरम् ॥
विशुष्कं वालुकायन्त्रे मूषायां सन्निवेशयेत् ।

दिनमेकं पचेदग्नौ मन्दमन्दं निशावधि ॥
एवं निष्पाद्यते पीतः सूतराजश्च गृह्यते ।
क्षुद्रोषं कुरुते पूर्वमुदरादीन् विनाशयेत् ॥
वातपित्तकफोद्भूतान् रोगान् सर्वान् जयेद्ध्रुवम् ॥
मात्रा १ रक्तिका ।

क्षणरसः ।

लौहपात्रेऽथवा ताम्रे पलैकं शुद्धगन्धकम् ।
मृदग्निना द्रुते तस्मिन् शुद्धसूतपलत्रयम् ॥
क्षिप्त्वा च चालयेत् किञ्चिल्लोहदर्व्या पुनः पुनः ।
गोमये कदलीपत्रं तस्योपरि च चालयेत् ॥
इत्येवं गन्धवद्वन्तु सर्वरोगेषु योजयेत् ॥
मात्रा १ रक्तिका ।
श्वेतरक्तं तथा पीतं क्षणश्चेति चतुर्विधम् ।
सूतभस्म प्रयोक्तव्यं यथाव्याध्यनुपानतः ॥

रसतालकस्य विधिः ।

रसो गन्धस्तालकञ्च रक्तयष्ट्या समांशतः ।
संमर्द्य सिकतायन्त्रे पचेद्यामचतुष्टयम् ॥
पीताभं जायते पाकाद्रसतालकसंज्ञितम् ।
ज्वरघ्नं दीपनं वह्नेर्वीर्य्यस्तम्भनमुत्तमम् ॥
हन्त्यष्टादश कुष्ठानि द्विविधं वातशोणितम् ।
बल्यमायुष्करं मेध्यं परमेतद्रसायनम् ॥
मात्रा १ यवः ।

सामान्यकज्जलीकरणविधिः ।

शुद्धं रसं गन्धकञ्च समं संमर्दयेद्दिनम् ।

निश्चन्द्रं कज्जलीभूतं ततो योगेषु योजयेत् ॥
पृथग्योगेषु यत्रोक्तौ समौ पारदगन्धकौ ।
तत्र भागद्वयं योज्यं कज्जलस्येति निश्चयः ॥
यावान् स्यादधिकः सूतात् तावन्तं गन्धकं पुनः ।
चिपेद्योगे विधानज्ञो नात्र कार्य्या विचारणा ॥
यत्र सूतोऽधिको योगे गन्धपाषाणतो भवेत् ।
तत्र तन्मानतः कुर्य्यादादावेव हि कज्जलम् ॥
विना गन्धकसंयोगाद्रसः प्रायो न युज्यते ।
उक्ते पारदमात्रे तु सिन्दूरं प्रायशो मतम् ॥
यो न वेत्ति कृपासिन्धुं रसं हरिहरात्मकम् ।
वृथा चिकित्सां कुरुते स वैद्यो हास्यतां व्रजेत् ॥

पञ्चषष्टितमोऽध्यायः ।

अथोपरसाः ।

गन्धो हिङ्गुलमभ्रतालकशिलाः स्रोतोऽञ्जनं टङ्कनं
राजावर्त्तकतुम्बकौ स्फटिकया गङ्गः खटीगैरिकम् ।
कासीसं रसकं कपर्दसिकते तद्वच्च कङ्कुष्ठकं
सौराष्ट्री च मता अमी उपरसाः सूतस्य किञ्चिद्गुणैः ॥

हिङ्गुलम् ।

हिङ्गुलं [illegible] चूर्णपारदम् ।
[illegible] खल्वकः ॥

हंसपादस्तृतीयः स्याद्गुणवानुत्तरोत्तम् ।
चर्मारः शुक्लवर्णः स्यात्सपीत शुकतुण्डकः ।
जवाकुसुमसङ्काशो हंसपादो महोत्तमः ॥

हिङ्गुलस्य शोधनविधिः ।

मेषीक्षीरेण दरदमम्लवर्गेण भावितम् ।
सप्तवारान् प्रयत्नेन शुद्धिमायाति निश्चितम् ॥

एवं शोधितस्यास्य गुणाः ।

तिक्तं कषायं कटुहिङ्गुलं स्या-
त्स्नेत्रामयघ्नं कफपित्तहारि ।
कुष्ठास्रकण्डूज्वरकामलाश्च
प्लीहामवातौ च गरं निहन्ति ॥

मात्रा १ रत्तिका ।

हिङ्गुलाद्रसाकर्षणविधिः ।

निम्बुरसैर्निम्बपत्ररसैर्वा याममात्रकम् ।
घृष्ट्वा दरदमूर्ध्वन्तु पातयेत् सूतयुक्तिवत् ।
तन्मूर्ध्वपिठरीलग्नं शुक्लीद्रसमुत्तमम् ।
शुद्धमेव हितं सूतं सर्वकर्मसु योजयेत् ॥

गन्धकः ।

गन्धको गन्धिकश्चापि गन्धपाषाण इत्यपि ।
सौगन्धिकश्च कथितो वल्लिवल्लरसोऽपि च ॥
चतुर्धा गन्धकः प्रोक्तो रक्तः पीतः सितोऽसितः ।
रक्तो हेमक्रियासूक्तः पीतश्चैव रसायने ॥
व्रणादिलेपने श्वेतः श्रेष्ठः कृष्णः सुदुर्लभः ।
शुकपुच्छसमाच्छायो नवनीतसमप्रभः ॥

मसृणः कठिनः स्निग्धो गन्धकः श्रेष्ठ उच्यते ॥
अशोधितो गन्धक एष कुष्ठं
करोति तापं विषमं शरीरे ।
शोषञ्च रूपञ्च बलं तथौजः
शुक्रं निहन्त्येव करोति चास्रम् ॥

अथास्य शोधनविधिः ।

लौहपात्रे विनिक्षिप्य घृतमग्नौ प्रतापयेत् ।
तप्ते तप्ते तत्समानं क्षिपेद्गन्धकजं रजः ॥
विद्रुतं गन्धकं ज्ञात्वा दुग्धमध्ये विनिक्षिपेत् ।
एव गन्धकशुद्धिः स्यात् सर्वकार्येषु योजयेत् ॥

शोधितस्यास्य गुणाः ।

गन्धकः कटुकस्तिक्तो वीर्य्योष्णसुदरः नरः ।
पित्तलः कटुकः पाके कण्डूवीसर्पजन्तुजित् ।
हन्ति कुष्ठत्वयश्लोहकफवातान् रसायनम् ॥
मात्रा १ माषकः ।

अथास्य तैलम् ।

अर्कक्षीरैः सुहीक्षीरैर्वल्ल लेप्यन्तु सप्तधा ।
गन्धकं नवनीतेन पिष्ट्वा वस्त्रं प्रलेपयेत् ॥
तद्वर्त्तिं ज्वलिता दण्डे धृता धार्य्या त्वधोमुखी ।
तैलं पतत्यधः पात्रे ग्राह्य योगेषु योजयेत् ॥
अन्यच्च । आवर्त्तमाने पयसि दत्त्वा गन्धकजं रजः ।
तज्जातदधिजं सर्पिर्गन्धतैलं वदन्ति हि ॥
गन्धतैलं गलत्कुष्ठं हन्ति लेपाच्च भक्षणात् ॥

गन्धकद्रावकम्।

कासीसं गन्धकं वापि सन्दहेद्यन्त्रयोगतः।
सौरकञ्चापि सन्दह्य द्वयोर्धूमं विमिश्रयेत्॥
सीसपात्रेऽम्बुवाष्पेन द्रावकं तेन जायते।
अग्निवीर्य्यं महारुद्रं क्षौद्रादीनाञ्च भस्मकृत्॥
परं सन्दीपनं वह्नेः सर्वोदरविनाशनम्।
जगतां हितकामेन पूरा रुद्रेण निर्मितम्॥
स्रुते रक्तेऽतिघर्मे च विमूर्च्छां तरुणे ज्वरे।
अग्निमान्द्यादिरोगे च शस्यते द्रावकं महत्॥
निर्जलं तत्र सेवेत परं दाहकरं हि तत्।
चतुर्दशगुणैस्तोयैर्युतं विन्दुमितं पिबेत्॥

अभ्रम्।

पिनाकं दर्दुरं नागं वज्रञ्चेति चतुर्विधम्।
पिनाकाद्यास्त्रयो वज्रा वज्रं यत्नात्समाहरेत्॥
सुच्चत्यग्नौ विनिक्षिप्तं पिनाकं दलसञ्चयम्।
अज्ञानाज्जरणं तस्य महाकुष्ठप्रदायकम्॥
दर्दुरं त्वग्निनिःक्षिप्तं कुरुते दर्दुरध्वनिम्।
गोलकान् बहुशः कृत्वा तत् स्यान्मृत्युप्रदायकम्॥
नागन्तु नागवह्नौ फुल्कारं परिमुञ्चति।
तद्भक्षितमवश्यन्तु विदधाति भगन्दरम्॥
वज्रन्तु वज्रवत् तिष्ठेत्तत्राग्नौ विकृतिं व्रजेत्।
सर्वाभ्रेषु वरं वज्रं व्याधिवार्द्धक्यमृत्युहृत्॥
अभ्रमुत्तरशैलोत्थं बहुसत्त्वं गुणाधिकम्।
दक्षिणाद्रिभवं स्वल्पसत्त्वमल्पगुणप्रदम्॥

पीडां विधत्ते विविधां नराणां
कुष्ठं भयं पाण्डुगदञ्च कुर्य्यात् ।
हृत्वार्ग्घपीड़ाञ्च करोत्यसह्या-
मशुद्धमभ्रं गुरु वह्निहृत् स्यात् ॥

अभ्रस्य शोधनविधिः ।

क्षणाभ्रकं धमेद्वह्नौ ततः क्षीरे विनिक्षिपेत् ।
भिन्नपत्रन्तु तत् कृत्वा तण्डुलीयाम्लयोर्द्रवैः ॥
भावयेदष्टयामं तदेवमभ्रं विशुध्यति ॥

धान्याभ्रकस्य विधिः ।

पादांशशालि संयुक्तमभ्रं बद्ध्वाथ कम्बले ।
चिरात्तं स्थापयेन्नीरे तत् क्लिन्नं मर्दयेत् करैः ॥
कम्बलाद्गलितं सूक्ष्म वालुकारहितञ्च यत् ।
तद्धान्याभ्रमिति प्रोक्तमभ्रमारणसिद्धये ॥

अथास्य मारणविधिः ।

कृत्वा धान्याभ्रकं तच्च शोषयित्वाथ मर्दयेत् ।
अर्कक्षीरैर्दिनं खल्ले चक्राकारञ्च कारयेत् ॥
वेष्टयेदर्कपत्रैश्च सम्यग्गजपुटे पचेत् ।
पुनर्मर्द्यं पुनः पाच्यं सप्तवारान् पुनः पुनः ॥
ततो वटजटाक्वाथैस्तद्वदेयं पुटत्रयम् ।
म्रियते नात्र सन्देहः प्रयोज्यं सर्वकर्मसु ॥

मतान्तरम् ।

गवां मूत्रेण धान्याभ्रं मर्दयित्वा पुनः पुनः ।
शरावसंपुटे रुद्ध्वा पुटेद्यत्नात् सहस्रशः ॥

अथ सिद्धमतजारणविधिः।

स्फटिकायास्तु भागैकमष्टौ धान्याभ्रकस्य च।
भागानेकत्र संयोज्य सलिलेन विमर्दयेत्॥
चक्रवत्तु ततः कृत्वा सप्तकृत्वः पुटे पचेत्।
अनेन विधिनाभ्रस्य मृतिः सम्पद्यते ध्रुवम्॥

अथास्यामृतीकरणम्।

सर्वेषां मारिताभ्राणाममृतीकरणं शृणु।
त्रिफलोत्थकषायस्य पलान्यादाय षोड़श॥
गोघृतस्य पलान्यष्टौ पलान्यभ्रस्य वै दश।
एकीकृत्य लौहपात्रे पचेन्मृदग्निना शनैः॥
द्वे जीर्णे समादाय सर्वरोगेषु योजयेत्।
अनुपानं विना ह्यभ्रं जरामृत्युरुजापहम्॥
योजयेदनुपानैर्वा तत्तद्रोगहरं क्षणात्॥
अन्यच्च। तुल्यं घृतं मृताभ्रञ्च लौहपात्रे विपाचयेत्।
घृते जीर्णे तदभ्रन्तु सर्वयोगेषु योजयेत्॥

अथास्य गुणाः।

अभ्रं कषायं मधुर सुशीत-
मायुष्करं धातुविवर्द्धनञ्च।
हन्यात् त्रिदोषं व्रणमेहकुष्ठ-
प्लीहोदरग्रन्थिविषक्रिमींश्च॥
रोगान् हन्ति दृढ़यति वपुर्वीर्य्यमूर्जां विधत्ते।
तारुण्याढ्यं रमयति शतं योषितां नित्यमेव।
दीर्घायुष्कान् जनयति सुतान् सिंहतुल्यप्रभावान्।

मृत्योर्भीतिं हरति सुतरां सेव्यमानं सताभ्रम् ॥

मात्रा ६ रक्तिकाः।

हरितालम्।

हरितालन्तु तालं स्यादाल तालकमित्यपि।
हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञकम् ॥
तयोराद्य गुणैः श्रेष्ठं ततो हीनगुणं परम्।
स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाभ्रपत्रवत् ॥
पत्राख्यं तालकं विद्याद्गुणाढ्य तद्रसायनम्।
निष्पत्रं पिण्डसदृशं स्वल्पसत्त्वं तथा गुरु ॥
स्त्रीपुष्पहारकं स्वल्पगुणं तत्पिण्डतालकम् ॥

हरति च हरितालं चारुतांदेहजातां
सृजति च बहुतापामङ्गसङ्कोचपीडाम्।
वितरति कफवातौ कुष्ठरोगं विदध्या-
दिदमसितमशुद्धं मारितञ्चाप्यसम्यक् ॥

अथास्य शोधनविधिः।

तालकं कणशः कृत्वा तच्चूर्णं काञ्जिके पचेत्।
दोलायन्त्रेण यामैकं ततः कुष्माण्डजद्रवैः ॥
तिलतैले पचेद्यामं यामञ्च त्रिफलाजले।
एव यन्त्रे चतुर्यामं पक्वं शुध्यति तालकम् ॥

अन्यच्च। तालकं वंशपत्राख्यं चूर्णोदकविभावितम्।
सप्तभिर्वासरैः शुद्धं ततः कर्मणि युज्यते ॥

अस्य मारणविधिः।

सदलं तालकं शुद्धं पौनर्नवरसेन तु।
खल्वे विमर्दयेदेकं दिनं पश्चाद्विशोषयेत् ॥

ततः पुननवाचारे स्थाल्यां भर्दं प्रपूरयेत् ।
तत्र तद्गोलकं धृत्वा पुनस्तेनैव पूरयेत् ॥
आकण्ठं पिठरं तस्य पिधानं धारयेन्मुखे ।
स्थालीं चुल्लयां समारोप्य क्रमादग्निं विवर्द्धयेत् ॥
दिनान्यन्तरशून्यानि पञ्चवह्निं प्रदापयेत् ।
एवं तच्छ्रियते तालं माचा तस्यैकरक्तिका ॥

अथान्यप्रकारः ।

शुद्धतालञ्च संभाव्य स्वरसेऽम्लपुरीषजे ।
भाव्यं भाव्यं पुनः शुष्कं यावत् स्यात् सप्तवारकम् ॥
घोटकस्य करीषाग्नौ दद्याद्गजपुटं पुनः ।
मर्दयित्वा पुनर्मर्द्यं पुटं सप्तवगुण्ठकम् ॥
तप्ते लौहे विनिक्षिप्ते यदा धूमो न जायते ।
तदा सिद्धिं विजानीयाद्गच्छणान्मधुना सह ॥
गुञ्जैकामर्दगुञ्जां वा सर्वकुष्ठप्रशान्तये ।
निहन्ति सकलान् रोगान् कुर्य्यात् कामसमं वपुः ॥
तालभस्मकमित्येतद्वलीपलितनाशनम् ।
रसायनवरं हृद्यं वह्निदीप्तिकरं परम् ॥

एवं शोधितस्य मारितस्य हरि-
तालस्य गुणाः ।

हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम् ।
कण्डूकुष्ठाख्यरोगास्रकफपित्तव्रणान् ॥
अन्यच्च । हरितालं हरेद्रोगान् कुष्ठसत्युच्चरापहम् ।
शोधितं मारितं कान्तिं कुरुते वीर्य्यवर्द्धनम् ॥
माता ३ सर्षपाः ।

हरितालात् तच्छेतवीर्य्यकर्षण-

विधिः ।

तिर्य्यक्पातनयन्त्रेण ताले भस्मीकृते ततः ।
लभ्यते श्वेतवीर्य्यं यत् तन्मात्रा सर्षपोन्मिता ॥
तदजोर्णं ज्वरं हन्ति कान्तिपुष्टिबलप्रदम् ॥

मनःशिला ।

मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका ।
नैपाली कुनटी गोला शिला दिव्यौषधिः स्मृता ॥
तालकस्यैव भेदोऽसौ कथ्यते नागजिह्विका ।
तालकं त्वतिपीतं स्याद्वेदज्ञा मनःशिला ॥

मनःशिला मन्दबलं करोति
जन्तुं ध्रुवं शोधनमन्तरेण ।
महागुणत्वं किल सूतरोधं
सशर्करं छर्च्छगदञ्च कुर्य्यात् ॥

अस्याः शोधनविधिः ।

पचेत् त्वाढकमाजामूत्रे दोलाधन्ते मनःशिलाम् ।
भावयेत् सप्तधा पित्तैरजायाः सा विशुध्यति ॥

मतान्तरम् ।

अगस्त्यपत्रतोयेन भाविता सप्तवारकम् ।
शुद्धवैरससेवापि सशुध्यति मनःशिला ॥

मतान्तरम् ।

चूर्णतोयेमेषीमूत्रे सप्तकृत्वो विभाविता ।
शुद्धिमायाति नितरां तत कर्म्मणि युज्यते ॥

शोधितायाः अस्याः गुणाः ।

मनःशिला गुरुर्वर्ष्या मरोषा लेखनी कटुः ।
तिक्ता स्निग्धा विषश्वासकासभूतविषास्रनुत् ॥

मात्रा ३ सर्षपः ।

अञ्जनम् (सुर्मा इति यस्य प्रसिद्धिः) ।

अञ्जनं यामुनञ्चापि कापोताञ्जनमित्यपि ।
तत्तु स्रोतोऽञ्जन कृष्णं सौवीरं श्वेतमीरितम् ॥
वल्मीकशिखराकारं भिन्नमञ्जनसन्निभम् ।
घृष्टन्तु भैरिकाकारमेतत् स्रोतोऽञ्जनं स्मृतम् ॥
स्रोतोऽञ्जनसमं ज्ञेयं सौवीरं तत्तु पाण्डुरम् ।
किन्तु द्वयोरञ्जनयोः श्रेष्ठं स्रोतोऽञ्जनं मतम् ॥

अस्य शोधनविधिः ।

नीलाञ्जनं चूर्णयित्वा जम्बीरद्रवभावितम् ।
दिनैकमातपे शुष्कं शुद्धं योगेषु योजयेत् ॥

शोधितस्याञ्जनस्य गुणाः ।

स्रोतोऽञ्जनं स्मृतं स्वादु चक्षुष्यं कफपित्तनुत् ।
कषाय लेखन स्निग्धं याहिच्छर्दिविषापहम् ॥
सिध्मत्वयास्रदृच्छीतं सेवनीयं सदा बुधैः ।
स्रोतोऽञ्जनादीनगुणं मत सौवीरमञ्जनम् ॥

मात्रा ३ रक्तिकाः ।

टङ्कनम् ।

टङ्कन वह्नियोगेन स्फुटित शुद्धतां व्रजेत् ।
टङ्कनोऽग्निकरो रूक्षः कफघ्नो वातपित्तकृत् ॥

मात्रा अतीसारादौ २ रक्तिके रजःकृच्छ्रे ६ रक्तिकाः गर्भस्रावार्थं १ माषकः ।

अथ खर्परशोधनविधिः ।

नृमूत्रैर्वाथ गोमूत्रे सप्ताह रसकं पचेत् ।
दोलायन्त्रे विशुद्धिः स्यात् ततः कार्य्येषु योजयेत् ॥

शोधितस्य खर्परस्य गुणाः ।

खर्परं कटुकं क्षारं कषायं वामकं लघु ।
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत् ॥
विषाश्मकुष्ठकण्डूनां नाशनं परमं मतम ॥

मात्रा ६ रक्तिकाः ।

अथ सर्वोपरसानां साधारणः

शोधनविधिः ।

सूर्य्यावर्त्तो वज्रकन्दः कदली देवदालिका ।
गिरियः कोशातकी बन्ध्या काकमाची च बालकम ॥
एषामेकरसेनैव विचारैर्लवणैः सह ।
भावयेदम्लवर्गैश्च दिनमेकं प्रयत्नतः ॥
ततः पचेच्च तद्वावैर्दोलायन्त्रे दिनं सुधीः ।
एवं शुध्यन्ति ते सर्वे प्रोक्ता उपरसा हि ये ॥

विशेषश्च । कङ्कुष्टं गैरिकं शङ्खः कासीसं टङ्कनं तथा ।
नीलाञ्जनं शुक्तिभेदाः शुल्काः सवराटकाः ॥
अम्लवारिणा क्षिप्ताः क्षालिताः कोष्णवारिणा ।
शुद्धिमायान्त्यमी योज्या भिषग्भिर्योगसिद्धये ॥

मात्रैषां प्रायेण १ माषकः ।

अथोद्भेद्यः शेषाणामुपरसानां गुणाः ।

राजावर्त्तः।

राजावर्त्तः कटुस्तिक्तः शिशिरः पित्तनाशनः।
राजावर्त्तः प्रमेहघ्नश्छर्दिहिक्कानिवारणः॥

मात्रा ६ रक्तिकाः।

चुम्बकः।

चुम्बकः क्षान्तपाषाणो यः क्षान्तो लौहकर्षकः।
चुम्बको लेखनः शीतो मेदोविषगरापहः॥

मात्रा ६ रक्तिकाः।

अस्य विशेषशोधनमारणविधिः।

अगस्त्यपत्रतोयेन भावयेल्लौहकर्षकम्।
दोलायन्त्रे पचेद्युक्त्या त्रिफलासलिले ततः॥
गोमूत्रेण ततः पिष्ट्वा वराक्षाग्नेन वा भिषक्।
पुटेत्तं सप्तधा तेन मृतिरस्य प्रजायते॥
एवं शुद्धो मृतो बल्यः पुष्टिकृद्दीप्यवह्निनः।
ज्वरघ्नो रक्तजननो रक्तपित्त क्षयं तथा॥
प्रमेहान् विंशतिं हन्ति कासान् श्वासान् सुदारुणम्।
शुक्रदोषं रजोदोषं क्लैब्यं हृदयवेपनम्॥

स्फटी (फट्किरी इति यस्य प्रसिद्धिः)।

स्फटी च स्फटिका प्रोक्ता श्वेता शुभ्रा च रङ्गदा।
टङ्करङ्गा रङ्गटङ्गा रङ्गाङ्गापि च कथ्यते॥
स्फटिका तु कषायोष्णा वातपित्तकफव्रणान्।
निहन्ति श्वित्रकीसर्पान् योनिसङ्कोचकारिणी॥

मात्रा १ माषकः।

कठिनी

खटिका कठिनी चापि लेखनी च निगद्यते।
खटिका दाहनिच्छीता मधुरा विषशोथजित्॥
लेपादेतद्गुणा प्रोक्ता भक्षिता सास्रनाशिनी॥

मात्रा २ माषकौ।

गैरिकम्।

गैरिकं रक्तधातुश्च गैरेयं गिरिजं तथा।
सुवर्णगैरिकन्त्वन्यत् ततो रक्ततरं हि तत्॥
गैरिकहितयं स्निग्धं मधुरं तुवरं हिमम्।
चक्षुष्यं दाहपित्तास्रकफहिक्काविषापहम्॥

मात्रा ६ रक्तिकाः।

कासीसम्।

कासीसं धातुकासीसं पांशुकासीसमित्यपि।
तदेव किञ्चित् पीतन्तु पुष्पकासीसमुच्यते॥
कासीसमम्लमुष्णञ्च तिक्तञ्च तुवरं तथा।
वातश्लेष्महरं केश्यं नेत्रकण्डूविषप्रणुत्॥
मूत्रकृच्छ्राश्मरीक्षित्वच्वरघ्नं प्लीहनाशनम्॥

मात्रा २ रक्तिके।

वालुका।

वालुका सिकता सूक्ष्मशर्करा शीतलापि च।
वालुका लेखनी शीता व्रणोरःक्षतनाशिनी॥

कङ्कुष्टम्।

हिमवत्पादशिखरे कङ्कुष्टमुपजायते।
कङ्कुष्टं कालकुष्टञ्च विरङ्गं रङ्गदायकम्॥

रेचकं पुलकञ्चापि शोधकं कालपालकम् ।
तद्विधा रजताभञ्च परं स्वर्णनिभं तथा ॥
पीतप्रभं गुरुस्निग्धं श्रेष्ठं कङ्कुष्टमादिशेत् ।
श्यामलं यल्लघु त्यक्तसत्त्वं तन्न गुणावहम् ॥
कङ्कुष्टं रेचनं तिक्तं कटूष्णं वर्णकारकम् ।
क्रिमिशोथोदराध्मानगुल्मानाहकफापहम् ॥
मात्रा ६ रक्तिकाः ।

षष्ठषष्टितमोऽध्यायः ।

अथ रत्नानि

धनार्थिनो जनाः सर्वे रमन्तेऽस्मिन्नतीव यत् ।
ततो रत्नमिति प्रोक्तं शब्दशास्त्रविशारदैः ॥
रत्नं क्लीबे मणिः पुंसि स्त्रियामपि निगद्यते ।
तत्तु पाषाणभेदोऽस्ति मुक्तादि च तदुच्यते ॥
रत्नं माणिक्यमेव च ।
इन्द्रनीलश्च गोमेदस्तथा वैदूर्यमित्यपि ॥
मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव ।

हीरकः ।

हीरकः पुंसि वज्रोऽस्ति चन्द्रो मणिवरश्च सः ।
स तु श्वेतः स्मृतो विप्रो लोहितः क्षत्रिय स्मृतः ॥

पीतो वैश्योऽसितः शूद्रश्चतुर्वर्णात्मकश्च सः ।
रसायने मतो विप्र सर्वसिद्धिप्रदायकः ॥
क्षत्रियो व्याधिविध्वंसी जरामृत्युहरः स्मृतः ।
वैश्यो धनप्रदः प्रोक्तस्तथा देहस्य दार्ढ्यकृत् ॥
शूद्रो नाशयति व्याधीन् वयःस्तम्भं करोति च ।
पुंस्त्रीनपुंसकानीह लक्षणीयानि लक्षणैः ॥
सुवृत्ताः फलसम्पूर्णास्तेजोयुक्ता बृहत्तराः ।
पुरुषास्ते समाख्याता रेखाबिन्दुविवर्जिताः ॥
रेखाबिन्दुसमायुक्ताः षडस्रास्ते स्त्रियः स्मृताः ।
त्रिकोणाश्च सुदीर्घास्ते विज्ञेयाश्च नपुंसकाः ॥
तेषु स्युः पुरुषाः श्रेष्ठा रसबन्धनकारिणः ।
स्त्रियः कुर्वन्ति कायस्य कान्तिं स्त्रीणां सुखप्रदाः ॥
नपुंसकास्त्ववीर्याः स्युरकामाः सत्त्ववर्जिताः ।
स्त्रियः स्त्रीभ्यः प्रदातव्याः क्लीबं क्लीबे प्रयोजयेत् ॥
सर्वेभ्यः सर्वदा देयाः पुरुषा वीर्यवर्द्धनाः ।
अशुद्धं कुरुते वज्रं कुष्ठं पार्श्वव्यथां तथा ॥
पाण्डुतां पङ्गुत्वञ्च तस्मात् संशोध्य मारयेत् ॥

अथास्य शोधनविधिः ।

कुलत्थकोद्रवक्वाथे दोलायन्त्रे विपाचयेत् ।
व्याघ्रीकन्दगतं वज्रं विदिनं तद्विशुध्यति ॥

अस्य मारणविधिः ।

छिङ्गुसैन्धवसंयुक्ते क्षिपेत् क्वाथे कुलत्थजे ।
तप्तं तप्तं पुनर्वज्रं भवेद्भस्म त्रिसप्तधा ॥

एव मारितस्य वज्रस्य गुणाः ।

आयुः पुष्टिं बलं वीर्यं वर्णं सौख्यं करोति च ।
सेवित सर्वरोगघ्नं मृत वज्रं न संशयः ॥

मात्रा २ यवौ ।

वैक्रान्तम् ।

वैक्रान्तं वज्रवच्छोध्यं नीलं श्वेतञ्च लोहितम् ।
हयमूत्रेण तत् सेव्यं तप्तं तप्तं त्रिसप्तधा ॥
ततश्चोत्तरवारुण्याः पञ्चाङ्गपिण्डके क्षिपेत् ।
रुद्ध्वा मूषापुटे पाच्या उद्धृत्य पिण्डकैः पुनः ॥
लिप्त्वा रुद्ध्वा पुटे पाच्या सप्तधा भस्मतां व्रजेत् ।
भस्मीभूतञ्च वैक्रान्तं वज्रस्थाने नियोजयेत् ॥

मात्रा २ यवौ ।

उत्तरवारुणी राखालग्नया तस्याः पञ्चाङ्गं पुष्पफल-मूललतापत्रं पिण्डं कृत्वा तत्र वैक्रान्तं दत्त्वा तत् पिण्डं मूषाभ्यन्तरे स्थापयित्वा सन्धिं रुद्ध्वा गजपुटं दद्यात् । एवं सप्तभिः पुटैर्म्रियते ।

शेषरत्नाना शोधनमारणविधिः ।

स्वेद्यैर्दोलिकायन्त्रे जयन्त्याः स्वरसेन च ।
मणिमुक्ताप्रवालानि यामैकं शोधनं भवेत् ॥
कुमार्या तण्डुलीयेन स्नुह्या च निषेचयेत् ।
प्रत्येक सप्तवेलञ्च तप्ततप्तानि कृतत्रयः ॥
मौक्तिकानि प्रवालानि तथा रत्नान्यशेषतः ।
क्षणादिविधवर्णानि म्रियन्ते नात्र संशयः ॥

अन्यच्च । वज्रवत् सर्वरत्नानि शोधयेन्मारयेत्तथा ।

शुद्धानां मारितानाञ्च तेषां शृणु गुणानपि ॥
मणयो वीर्य्यतः प्रोक्ता मधुरास्तुवरा रसात् ।
चक्षुष्या लेखनाश्चापि सारका विषहारकाः ॥

अथोपरत्नानि ।

उपरत्नानि काचश्च कर्पूराश्मा तथैव च ।
मुक्ता शुक्तिस्तथा शङ्ख इत्यादीनि बहून्यपि ॥
गुणा यथैव रत्नानामुपरत्नेषु ते तथा ।
किन्तु किञ्चित् ततो हीना विशेषोऽयमुदाहृतः ॥

सप्तषष्टितमोऽध्यायः ।

द्रव्यशोधनविधि ।

तत्रादौ विषोपविषशोधनविधिः ।

विषस्य नाम लक्षणगुणाः ।

विषन्तु गरलं क्ष्वेडस्तस्य भेदानुदाहरे ।
वत्सनाभ सहारिद्रः सक्तुकश्च प्रदीपनः ॥
सौराष्ट्रिकः शृङ्गकश्च कालकूटस्तथैव च ।
हालाहलो ब्रह्मपुत्रो विषभेदा अमी नव ॥

वत्सनाभः ।

सिन्धुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा ।
यत्याग्रे न तरोर्वृद्धिर्वत्सनाभः स भाषितः ॥

हारिद्रः ।

हरिद्रातुल्यमूलो यो हारिद्र स उदाहृतः ।

सक्तुकः ।

यद्ग्रन्थिः सक्तुकेनैव पूर्णमध्यः स सक्तुकः ।

प्रदीपनः ।

प्रदीपलोहितो यः स्याद्दीप्तिमान् दहनप्रभः ।
महादाहकरः पूर्वैः कथितः स प्रदीपनः ॥

सौराष्ट्रिकः ।

सुराष्ट्रविषये यः स्यात् स सौराष्ट्रिक उच्यते ।

शृङ्गकः ।

यस्मिन् गोशृङ्गके वृन्ते दुग्धं भवति लोहितम् ।
स शृङ्गक इति प्रोक्तो द्रव्यतत्त्वविशारदैः ॥

कालकूटः ।

देवासुररणे देवैर्हतस्य पृथुमालिनः ।
दैत्यस्य रुधिराज्जातस्तरुरक्तत्वसन्निभः ॥
निर्यासः कालकूटोऽस्य मुनिभिः परिकीर्त्तितः ।
सोऽहिच्छत्रे शृङ्गवेरे कोकणे मलये भवेत् ॥

हालाहलः ।

गोस्तनाभफलो गुच्छस्तालपत्रच्छदस्तथा ।
तेजसा यस्य दह्यन्ते समीपस्था द्रुमादयः ॥
असौ हालाहलो ज्ञेयः किष्किन्धायां हिमालये ।
दक्षिणाब्धितटे देशे कोकणेऽपि च जायते ॥

ब्रह्मपुत्रः ।

वर्णतः कपिलो यः स्यात् तथा भवति सारकः ।

ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले ॥

विषं प्राणहरं प्रोक्तं व्याधि च विकाशि च ।
आग्नेयं वातकफहृद्योगवाहि मदावहम् ॥
तदेव युक्तियुक्तन्तु प्राणदायि रसायनम् ।
योगवाहि त्रिदोषघ्नं हृद्यं वीर्य्यबर्द्धनम् ॥
ये दुर्गुणा विषेऽशुद्धे ते स्युर्हीना विशोधनात् ।
तस्माद्विषं प्रयोगेषु शोधयित्वा प्रयोजयेत् ॥

विषस्य शोधनविधिः ।

गोमूत्रे त्रिदिनं स्थाप्यं विषं तेन विशुध्यति ।
रक्तसर्षपतैलाक्ते तथा धार्य्यञ्च वाससि ॥

विषस्य भक्षणमात्रा १ यवः ।

अथोपविषाणि ।

अर्कक्षीरं स्नुहीक्षीरं लाङ्गली करवीरकः ।
गुञ्जाहिफेनधत्तूराः सप्तोपविषजातयः ॥

अन्यच्च । जयपालञ्च धुस्तूरबीजञ्च विषतिन्दुकम् ।
विजयालाङ्गलीगुञ्जाकरवीराहिफेनकाः ॥
स्नुहीक्षीरमर्कक्षीरमित्याद्यपविषं स्मृतम् ।
क्षीरेण परिपूर्णायां स्थाल्यामुपविषं सुधीः ॥
दोलायन्त्रे पचेत् सम्यग्विशुध्यति न संशयः ॥

जयपालस्य विशेषशोधनम् ।

स्विन्नं गोमयतोये वा दुग्धे वा जयपालकम् ।
खर्परे मृदुभृष्टं तन्निःस्नेहं शुद्धिमृच्छति ॥

अन्यच्च । पत्राङ्कुरं परित्यज्य पेषयेत् पयसा ततः ।
स्वोलत्रे भर्जयित्वा तु पुनर्बस्त्रेण पीडयेत् ॥

मातुलुङ्गरसैर्भाव्यं विशोष्य ग्राहयेत्ततः ।
जेपाल शुद्धिमाप्नोति दोषं त्यजति निश्चितम् ॥
दुग्धेन किञ्चित् पेषयेत् । एवं दन्तीबीजशोधनम् ।

विषतिन्दुकस्य विशेषशोधनम् ।

त्रिदिनं काञ्जिके न्यस्तः शुद्धः स्याद्विषतिन्दुकः ।

अथ कृष्णसर्पविषशोधनविधिः ।

विषेषु जङ्गमाख्येषु ग्राह्यं नागोद्भवं विषम् ।
इति चैव महाश्रेष्ठं त्रिदोषघ्नपणं क्रमात् ॥
दीपनं कुरुते सद्यो वाडवाग्निसमीपगम् ।
सन्निपातप्रतीकारप्रभावप्रभुरुच्यते ॥
नागोद्भवं यथाप्राप्तं विषं गोमूत्रसंयुतम् ।
आतपे त्रिदिनं शुष्कं निहितं वीर्यशुद्धभवेत् ॥

मतान्तरम् ।

यूनो बलवतो ग्राह्यं कृष्णसर्पाहिषं नवम् ।
तत् सार्षपेण तैलेन संप्लुतं परिशोषयेत् ॥
पर्णतोयैर्मुनितरोस्तुलसीपचजै रसैः ।
क्वाथेनापि च कुष्ठस्य भावयेत् तत् त्रिधा त्रिधा ॥
तद्देव सर्वथा योज्यं नाविशुद्धं कदाचन ।
विषमप्यमृतञ्चैव मतसञ्जीवनं परम् ॥

दारुमूषादीनां शोधनम् ।

दारुमूषारक्तयङ्गादीनां शोधनं हरितालस्येव श्रेयम् ।

गोदन्तशोधनविधिः ।

गोदन्तं डमरौ यन्त्रे गोमयोपरि संस्थिते ।
नागवल्लीदले क्षिप्ता पचेद्यामचतुष्टयम् ॥

अनेन विधिना चूर्णं गृहीत्वा परिशोधितम् ।
मन्देऽग्नावतिसारे च ज्वरे जीर्णे बलक्षये ॥
कुष्ठेषु कफरोगेषु पीनसेऽपिच हृद्विषु ।
यथाव्याधनुपानेन मात्रया च प्रयोजयेत् ॥

रसचूर्णम् ।

विंशतौ सूतभागेषु गन्धकद्रावकं क्षिपेत् ।
द्वादशांशमितं पश्चात् तापयेन्मृदुवह्निना ॥
निरन्तरं समावर्त्य द्रुते सूते च संहरेत् ।
ततो भागान् दशैषस्य भागान् समाव संक्षिपेत् ॥
किञ्चिदार्द्रीकृतांस्तोयैः सर्वथा परिमर्दयेत् ।
अथात्र लवणं दत्वा यच्चांशप्रमितं भिषक् ॥
मर्दयित्वा च विस्तीर्णे यन्त्रे तूर्णं प्रपातयेत् ।
ततः सूतकनान् सर्वान् गृहीत्वा विमलाम्भसा ॥
क्षालयित्वा च योगेषु योजयेद्विधिना सुधीः ।
रसचूर्णौषधं नाम रेचनं पित्तहृत् परम् ॥
रसायनं क्रिमिघ्नञ्च शोषणं दाहनाशनम् ।
उपदंशहरं श्रेष्ठं सन्निपातज्वरे शुभम् ॥
विसूचीभ्रमनं लालास्रावणं कुष्ठसंहरम् ।
जगतामुपकारार्थं यन्मुनैतद्विनिर्मितम् ॥

मात्रा—लालादिस्रावणार्थं १ रक्तिका । विरेचन पित्तहरणक्रिमिनाशनार्थं ४ रक्तिकाः ।

भल्लातकस्य शोधनविधिः ।

भल्लातकानि पक्वानि समानीय क्षिपेज्जले ।

मज्जन्ति यानि तत्रैव शुद्ध्यर्थं तानि योजयेत् ॥
इष्टकाचूर्णनिकरैर्घर्षणाद्विर्विषं भवेत् ॥
मात्रा ४ रक्तिकाः ।

अष्टषष्टितमोऽध्यायः ।

मत्स्यादिपित्तशोधनविधिः ।

मत्स्यादिपित्तं संशुष्कं निम्बद्रावैर्विभावितम् ।
दिनान्ते शुद्धिमायाति सत्यं गुरुवचो यथा ॥

गुग्गुलुशोधनविधिः ।

क्वाथे हि दशमूलस्य घोषणे प्रक्षिप्य गुग्गुलुम् ।
आलोड्य वस्त्रपूतं तं चण्डातपरिशोषितम् ॥
घृताक्तं पिण्डित कुर्य्यात् शुद्धिमायाति गुग्गुलुः ।
अन्यच्च । अमृतायाः क्वाथेन शोषयित्वाथ गुग्गुलुम् ॥
गृह्णीयादातपे शुष्कं तथाक्षकरवर्जितम् ॥
अन्यच्च । दुग्धे वा त्रिफलाक्वाथे दोलायन्त्रे विपाचितः ।
वाससा गालितो ग्राह्यः सर्वकर्मसु गुग्गुलुः ॥
मात्रा ४ माषकाः ।

नखीशोधनविधिः ।

चण्डीगोमयतोयेन यदि वा तिन्तिडीजलैः ।
नखं संक्षाययेद्भिरलाभे मृण्मयेन तु ॥

पुनरुद्धृत्य प्रक्षाल्य भर्जयित्वा निषेचयेत् ।
गुड़पथ्याम्बुना ह्येवं शुध्यते नात्र संशयः ॥
मात्रा ६ रत्तिकाः ।

चण्डीमहिषी उक्तं हि महिषी चोच्यते चण्डी सौरभी च निगद्यते इति । अस्या गोमयं मलमित्यर्थः । किन्तु गोमयेनाप्युत्क्लेद उक्तः यथाह—गोविट् काञ्जिकाक्तिक्षाम्बुसंक्लिन्नेति । तिन्तिड़ीजलैरिति तिन्तिडीफलसलिलैरित्यर्थः । अलाभे मृण्मयेनेति क्षणमृत्तिकामिश्रितजलेनेत्यर्थः ।

हिङ्गुशोधनविधिः ।

अङ्गारस्थे लौहपात्रे सघृते रामठं क्षिपेत् ।
चालयेत् किञ्चिदारक्तवर्णं योगेषु योजयेत् ॥
मात्रा ६ रत्तिकाः ।

नरसारशोधनविधिः ।

नरसारो भवेच्छुद्धशूर्णतोये विपाचितः ।
दोलायन्त्रेण यत्नेन भिषग्भिर्योगसिद्धये ॥
मात्रा १ माषकः ।

नरसारस्यापरः शोधनविधिः ।

नरसारं विनिक्षिप्य तोयेऽत्युष्णे विमर्द्य च ।
पृथुना वाससा चाथ स्रावयेदखिलं जलम् ॥
शीतीभूते जले तस्मिन् गृह्णीयात् तमधोगतम् ।
एवं विशोधितं सर्वकार्य्येषु परियोजयेत् ।

यवक्षारः ।

गङ्गातीरमृदा विलोड्य सलिले संस्राव्य वस्त्रेण च

तोयेऽस्मिंस्तृणराशिभस्म निखिलं निक्षिप्य तत्तापयेत्।
भूयोऽस्मिन् परिगालिते च विधिना गाढ़ीकृते वह्निना
यावच्चारकणाः परस्परयुता जायन्त इत्यद्भुतम्॥
अन्यस्या अपि मृत्तिकाः सलवणा भूमेर्विगच्छाम्बुना
संलोड्यौद्भिदभस्मभिः परिपचेद्दिस्राव्य यत्नात्ततः।
एतेनापि च लभ्यते सुविमलः प्राग्वद्यवक्षारक-
स्तं संशोध्य विधानतो विमलधीर्योगेषु दद्याद्भिषग्॥

अथास्य शोधनविधिः।

अत्युष्णे सलिले क्षारं द्रवीकुर्य्याद्विमर्द्य तम्।
शीतीभूते जले तस्मिन् गलीयात् तमधोगतम्॥
एवं विशोधितः क्षारः शीतलो ज्वरवेगहृत्।
औपसर्गिकमेहे च श्वासकृच्छ्रे सुदारुणे॥
मसूरिकायां रोमान्तिज्वरे शोथे सुतीक्ष्णजि।
आमवाते च पित्तास्रे कृच्छ्रादिष्वपि शस्यते॥

यवक्षारद्रावकम्।

सौरकाष्टपलं ग्राह्यं गन्धद्रावाच्चतुःपलम्।
वकयन्त्रे परिक्षिप्य क्रमेणाग्निं विवर्द्धयेत्॥
एतेनैव यवक्षारद्रावकं विधिना भवेत्।
आधारे सञ्चितं तद्धि वह्निवीर्य्यं प्रदाहकम्॥
पित्तघ्नं वह्निकृद्बल्यं यकृद्दोषनिवारकम्।
प्लीहाभिवृद्धौ कासे च वह्निमान्द्ये बलक्षये॥
मधुमेहे मूत्रदोषे विकारे चौपदंशिके।
क्लिन्नव्रणे च लेपार्थं द्रावकं परिशस्यते॥
निर्जलं नैव सेवेत तोयैः पञ्चगुणैर्युतम्।

पिबेद्विन्दुमितं तत्तु सर्वव्याधिनिवृत्तये ॥

रसाञ्जनशोधनविधिः ।

तोयेऽत्युष्णे परिक्षिप्य द्रवीकुर्याद्रसाञ्जनम् ।
वाससा स्रावयित्वाथ शोषयेद्भानुरश्मिना ॥
एवं विशोधितं सर्वकार्येषु परियोजयेत् ।
विशुद्धं नाशयेद्व्याधीन् नाविशुद्धं कदाचन ॥

जीरकादिशोधनविधिः ।

जीरकद्वयधन्याकमेथिकेन्द्रयवं क्रमात् ।
भृष्ट्वा ग्राह्यं विशेषेण शुद्धिरेषां न संशयः ॥

कटुकातिविषयोः शोधनविधिः ।

दोलायां गोमयक्वाथे पचेदतिविषां तथा ।
कटुकीमुष्णदुग्धेन प्रक्षाल्य ग्राहयेदपि ॥

क्षपालेख्याद्यस्याः सृजति रजसा विश्वमेतद्विधाता
हरिः सत्त्वेनैवं निखिलनिलयः पाति नित्यं महिम्ना ।
क्षणादीशो नाशं नयति तमसा तां हि नत्वाद्यशक्तिं
मया सूत्रस्थानं लघुमतिभृता वर्णितं तत्प्रसादात् ॥

इत्यायुर्वेदविज्ञाने सूत्रस्थानं समाप्तम् ।

अथ शारीरस्थानम्।

प्रथमोऽध्यायः।

तत्रादावस्थिनिर्णयः।

शरीरं द्विविधं स्थूलसूक्ष्मभेदात्। तद्यथा, क्षित्यप्तेजो-मरुद्व्योममयं चक्षुरादीन्द्रियग्राह्यं स्थूलसंज्ञं तथा पञ्च-प्राणमनोबुद्धिदशेन्द्रियसमन्वितमपञ्चीकृतभूतोत्थं शरीरं सूक्ष्मसंज्ञां लभते। अस्मिन् पुनः शास्त्रे स्थूलदेहप्रकृतिरेव वर्णनीया। देहः स हि सारभूतैरस्थिभिरेव ध्रियते। तथाच,

अभ्यन्तरगतैः सारैर्यथा तिष्ठन्ति भूरुहाः।
अस्थिसारैस्तथा देहा ध्रियन्ते देहिनां ध्रुवम्॥
तस्माच्छिरविनष्टेषु त्वङ्मांसेषु शरीरिणाम्।
अस्थीनि न विनश्यन्ति सारार्घ्यानि देहिनाम्॥
मांसान्यत्र निबद्धानि कलाभिश्छादितानि हि।
अस्थीन्यालम्बनं कृत्वा न शीर्य्यन्ते पतन्ति वा॥

तान्यस्थीनि पञ्चविधानि भवन्ति। तद्यथा, अणु-कपालनलकासमगात्ररुचकसंज्ञकानि। कैश्चित् कपाल-रुचकतरुणवलयनलकसंज्ञानि पञ्चविधान्युच्यन्ते। तत्र वलयादीनामस्थादिष्वन्तर्भाव इत्यभेदः। सुकोमलास्थीनि

तरुणसन्नामुपास्थिसंज्ञां वा लभन्ते । लक्षांसादिरहितः स्वस्थानस्थितः शरीरास्थिचयः कङ्कालसंज्ञो भवति । स च कङ्कालः षडङ्गो भवति । यथा, शाखाश्चतस्रो मध्यं पञ्चम षष्ठं शिर इति ।

अष्ठीनि ।

देहस्य दृढ़ान्यचलान्यङ्गानि अस्थिभिर्विनिर्मितानि । मणिबन्धगुल्फादिषु तान्यवस्थितानि ।

कपालास्थीनि ।

देहस्यास्थिमयविवराणि कपालास्थिभिर्निर्मितानि । तानि प्रशस्ताकृतीनि । करोटिवस्त्यायङ्गेषु कपालास्थीनि सन्ति ।

नलकास्थीनि ।

नलकास्थीनि नलवच्छुषिराणि सुदीर्घाणि च तानि शाखास्ववस्थितानि ।

असमगात्रास्थीनि ।

असमगात्राणामस्थां नाम्नैवाकृतिर्व्याख्याता ।
कपोलकाग्रहनुस्थिप्रभृतीन्यसमगात्राणि ॥

रुचकानि ।

दशना रुचकानि स्युश्चतुर्धा ते भवन्ति हि ।
छेदनाः शौवना द्रंष्ट्राः पेषणास्ते तु संख्यया ॥
अष्टौ चत्वारश्चाष्टौ हि ततस्तु द्वादश स्मृताः ।
दन्तानां पतनं जन्म पुनः पाते त्वसम्भवः ॥

सर्वास्थेवास्थीनि बहिरन्तः समन्तात् कलावृतानि सगर्भाणि च । तेषां गर्भाः पीताभस्नेहविशेषेण पूर्णाः,

स मज्जेत्यभिधीयते। अस्थां सन्धिषु कला न दृश्यते ते हि लनुभिस्तरुणास्थिभिरावृताः सन्ति। अस्थिगात्राणि क्वचिदवटुमन्ति क्वचिदुत्सेधवन्ति च।

अथास्थिसंख्यानम्।

एकैकस्यां पादाङ्गुल्यां त्रीणि त्रीणि अन्यत्राङ्गुष्ठात्, अङ्गुष्ठे द्वे तानि चतुर्दश। प्रपदे पञ्च तान्यग्रतोऽङ्गुलीनां मूलास्थिखण्डैः पञ्चभिर्मिलितानि, तेषां कतिपयानि गुल्फसन्धिपर्य्यन्तं विस्तृतानि। गुल्फे सप्त जङ्घायां द्वे। जानुन्येकम्। एकमूरावितिं। त्रिंशदेवमेकस्मिन् सक्थि भवन्ति। द्वयोः सक्थ्नोरुपरि वस्तिमुभयतो द्वे श्रोणिस्थिनी स्तः। अनयोरग्रभागावौपास्थिकास्थिसंज्ञां लभेते। एतेनेतरसक्थि व्याख्यातम्।

पादाङ्गुलिवत् कराङ्गुलिषु चतुर्दश। प्रपदवत् करभे पञ्च। मणिबन्धे अष्टौ। प्रकोष्ठे द्वे। प्रगण्डे एकम्। त्रिंशदेवमेकस्मिन् बाहावस्थीनि भवन्ति। प्रगण्डास्थ्न उपरित एकमंसास्थि। अंसास्थित उरोऽस्थिपर्य्यन्तं विस्तृतं जत्रुस्थि। एतेनेतरबाहुर्व्याख्यातः।

उरोऽस्थ्येकमुभयजत्रुसंयुतं सत् क्रमेणोदराभिमुखमागतम्। निम्नोऽन्तोऽस्याङ्गुल्यादिभिरनुभूयते।

पृष्ठवंश्य परस्परमिलितैः कशेरुकाभिधैः षड्विंशत्यास्थिखण्डैर्निर्मितानि। स हि ग्रीवामारभ्य क्रमेण निम्नाभिमुखो गुह्यपश्चाङ्गागपर्य्यन्तमागतः। निम्नखण्ड त्रिकनाम्नाभिधीयते।

एकैकस्मिन् पार्श्वे द्वादश पर्शुकाः पृष्ठवंश्यतो धनु-

र्वङ्क्रा देहस्य सम्मुखभागमागतास्तासामूर्ध्वाः सप्त उरोऽस्थ्ना मिलिताः, शेषाः पञ्च साम्मुख्ये न केनाप्यस्थ्ना मिलिताः । प्रथमामारभ्य अष्टमपर्शुकां यावत् क्रमेण दैर्घ्यहसिस्तः क्रमशो हानिः । एकैकस्याः पर्शुकाया अग्रत एकैकं तरुणास्थि विद्यते, तत्रोर्ध्वस्थानां सप्तानां तरुणास्थीनि उरोऽस्थ्ना, तन्निम्नगतानां तिसृणां त्रीणि परस्पर मिलितानि शेषयोर्द्वयोर्न केनापि मिलिते ।

करोटावष्टास्थीनि सन्ति । यथा, एकं ललाटे । द्वयोः पार्श्वयोरूर्ध्वतः परस्परमिलिते द्वे ऊर्ध्वशिर पार्श्वास्थिनी । तन्निम्नतो द्वयोः पार्श्वयोर्द्वे शङ्खास्थिनी । पश्चादेकं पृष्ठवंशस्योर्ध्वकशेरुकोपरिस्थितम् । करोटिमूलेऽयतः शौषिरास्थि, बहुभिः शुषिरैर्व्याप्तत्वादस्य शौषिरसंज्ञता । करोटिमूले पश्चादेकम् । एतच्छेषैः सप्तभिर्मिलितम् । एवं करोटावष्टास्थीनि पूर्यन्ते । करोटिगह्वरं मस्तिष्कस्य स्थानम् ।

वदनमण्डले चतुर्दशास्थीनि सन्ति । यथा, द्वे नासास्थिनी वदनमण्डलस्योर्ध्वं मध्यतो द्वयोः पार्श्वयोः स्थिते परस्परमिलिते च । नेत्रविवरस्याभ्यन्तरमभितो द्वे तन्वस्थिनी । नासारन्ध्रव्यवधायिन्या भित्तेः पश्चादेकम् । नासिकाधश्छिद्रत उपरि द्वे उष्णीषास्थिनी । तालुनि द्वे । द्वे गण्डयोः । द्वे ऊर्ध्वहन्वस्थिनी वदनमण्डलमुभयतोऽधिष्ठिते । दन्तवेष्टीयद्वहद्वह्वरवती च । एकमधोहन्वस्थि निम्नतो वदनस्यावस्थितम् । अत्रैवाधोदन्तपङ्क्तिरस्थिष्ठति ।

एकैकस्य कर्णस्याभ्यन्तरतस्त्रीणि त्रीणि क्षुद्रास्थीनि सन्ति ।


जिह्वामूलात् पश्चादेकं क्षुद्रास्थि, न केनाप्यस्थ्ना संयुतं पेशीभिरेव धृतं तिष्ठति ।

अङ्गुष्ठमूलादिषु कलायपरिमण्डलानि कतिपयान्यणु-मण्डलास्थीनि सन्ति, संख्यातश्चैतानि प्रायशोऽष्टौ ।

अतः षट्चत्वारिंशदधिकद्विशतसंख्यास्थिमयोऽयं नर-कङ्काल इति भगवत उरभ्रस्य मतम् । यथा—

सक्थ्नोर्द्विषष्टिरस्थीनि बाह्वोस्तु द्व्यधिकानि च ।
उरस्येकं पृष्ठवंशे षड्विंशतिरतः परम् ॥
पर्शुका पार्श्वयोर्ज्ञेयाश्चतुर्विंशति संश्रिताः ।
अस्थीन्यष्टौ करोटौ च वदनेऽथ चतुर्दश ॥
कर्णयोः षट् तथैकञ्च रसनामूलसंश्रितम् ।
अष्टाणुमण्डलानि स्युर्द्वात्रिंशद्द्व्यधिका मताः ॥

एतेभ्योऽतिरिक्तान्यपि कतिपयानि क्षुद्रास्थीनि कङ्काले दृश्यन्ते ।



प्रतिक्लतावत्र न गुल्फसन्धिस्तत्यानि सप्ताक्षीनि च ।

एषामयतः पञ्च पादाङ्गुलयः ।

ट गुल्फसन्धिः ।

ठ, ड जङ्घास्थ्नोरस्थिद्वयम् ।

ढ जानुसन्धिः ।

ट जान्वस्थिः ।

ऋ ऊर्वस्थि ।

ज वङ्क्षणसन्धिः ।

थ श्रोण्यस्थि ।

छ सर्वा हस्ताङ्गुल्यः।

छ-चिह्नतः च-चिह्नपर्य्यन्तं विस्तृतानि पञ्च करभास्थीनि।

च मणिबन्धस्थान्यष्टास्थीनि।

ङ, घ प्रकोष्ठस्थमस्थिद्वयम्।

ग कर्पूरसन्धिः।

थ प्रगण्डस्थमस्थि।

द स्कन्धसन्धिवंसास्थि च।

क पृष्ठवंशः। तस्य सम्मुखे स्थितमुरोऽस्थि। इदमुभयपार्श्वस्थेन जत्रुद्वयेन सह मिलितम्।

क-चिह्नितात् पृष्ठवंशाङ्गुल्यादेशस्य पश्चाङ्गागपर्य्यन्तं विस्तृतं यदस्थि तस्य निम्नभागं त्रिकनाम्नाभिधीयते।

द-चिह्नादुरोऽस्थिपर्य्यन्तं विस्तृतं जत्रुद्वयम्।

त पञ्जरकासमूहः।

पृष्ठवंशस्योपरि वदनमण्डलास्थीनि करोट्यस्थिप्रभृतीनि च।

द्वितीयोऽध्यायः ।

अथ सन्धयः ।

उभयोर्मिलनं सन्धिरस्थ्नोः स द्विविधो मतः ।
चेष्टावान् स्थिरसन्धिश्च चेष्टावांश्च पुनर्द्विधा ॥
सम्यक्चेष्टोऽल्पचेष्टश्च तरुणास्थिभिरादिमः ।
संयुतः कलया स्नेहस्नाविण्या च समावृतः ॥
तरुणास्थिभिरालिप्तै रज्जुभिर्वा समावृतैः ।
अस्थिप्रान्तैः कृतोऽल्पश्च स्थिरस्तु केवलास्थिभिः ॥
शाखास्थ्नोः कक्ष्याश्च तथाप्यूर्ध्वगयोर्द्वयोः ।
कक्ष्येर्वीजत्रणोश्चैव सम्यक्चेष्टास्तु सन्धयः ॥
अल्पचेष्टाः कक्ष्यरूपा ग्रैवाणां परिकीर्त्तिताः ।
इतरे सन्धयः सर्वे स्थिरा मुनिभिरीरिताः ॥
अस्थ्नान्तु सन्धयो ह्येते केवलाः परिकीर्त्तिताः ।
पेश्यीस्नायुशिराणान्तु सन्धिसंख्या न विद्यते ॥

तृतीयोऽध्यायः ।

रज्जवः ।

अस्थां संयोजिकाः शुभ्राः सौत्रिका रज्जवो मताः ।
काश्चित् स्थूलाः प्रशस्ताश्च दीर्घा बहुविधास्तथा ॥
मध्यकाये तथा बाह्वोः सक्थ्नोरेव च ताः स्थिताः ।
अस्थीन्याभिर्निबद्धानि स्वस्थानान्न चलन्ति हि ॥
पदाङ्गुलीनां पर्वास्थां योजिन्यस्ताः परस्परम् ।
अङ्गुल्यस्थां तथा सन्ति प्रपदास्थाश्च योजिकाः ॥
गुल्फास्थां प्रपदास्थाश्च गुल्फास्थाश्च परस्परम् ।
गुल्फसन्धेश्च जङ्घास्थ्नोर्जानुसन्धेस्ततः परम् ॥
तथा वङ्क्षणसन्धेश्च रज्जवो विविधा मताः ।

अङ्गुल्यस्थां प्रपदास्था योजिका इत्यत्र या अङ्गुल्यस्थां योजिका बन्धनकारिण्यस्ता एव प्रपदास्थाश्च योजिका इति बोध्यम्, अङ्गुल्यस्थां प्रपदास्थाश्च परस्परयोजिका इत्यर्थः । अङ्गुल्यस्थिभिः सह प्रपदास्थां योजिका इति फलितार्थः । (एवमन्यत्रापि ज्ञेयमिति ।)

कराङ्गुलीनां पर्वास्थां संयोजिन्यः परस्परम् ।
अङ्गुल्यस्थां तथा सन्ति करभास्थाश्च योजिकाः ॥
तदस्थां मणिबन्धास्थां तेषाञ्चापि परस्परम् ।
मणिबन्धस्य सन्धेश्च प्रकोष्ठास्थ्नोश्च योजिकाः ॥
कफोणेः स्कन्धसन्धेश्च तथाप्यंसस्य रज्जवः ।

अंसजत्रुस्थियोजन्य उरोऽस्थिजत्रुयोजिकाः ॥
रज्जवो मध्यकायस्य पर्शुकोरोऽस्थियोजिकाः ।
त्रयाणामपि भित्तानामुरोऽस्थ्नः परिमेलिका ॥
कशेरुकापर्शुकानां कशेरूणां परस्परम् ।
शिरसः पश्चिमास्थ्नश्च तथाप्यूर्ध्वगयोर्द्वयोः ॥
कशेर्वोर्हनुकुल्यस्य पृष्ठवंश्यस्थियोजिकाः ।
संयोजिन्यश्च वंश्यास्थां परस्परमुदीरिताः ॥

चतुर्थोऽध्यायः ।

अथ पेश्यः ।

पेश्यस्त्वा लोहिताः सौम्याः सर्वकायसमाश्रिताः
ताः सङ्कोचनशीलाश्च समन्तात् कलयावृताः ॥
स्नन्दनादिप्रवर्त्तिन्यो द्विधा ताः परिकीर्त्तिताः ।
इच्छाधीनाश्च काश्चित् स्युः स्वाधीनाः काश्चिदेव च ॥
सक्थिबाह्वादिषु ज्ञेया इच्छाधीनास्तथापराः ।
अन्त्रोपस्थादिषु प्रोक्ता मुनिभिर्दृष्टवेत्तृभिः ॥
धमन्यस्थिशिरास्नायुसन्धयश्च शरीरिणाम् ।
पेशीभिः संवृताः सर्वे भवन्ति बलिनो यतः ॥

पञ्चमोऽध्यायः ।

कलास्वरूपकथनम् ।

स्नायुभिश्च प्रतिच्छन्नान् सन्ततांश्च जरायुणा ।
श्लेष्मणा वेष्टितांश्चापि कलाभागांस्तु तान् विदुः ॥
अन्तेषु धवलाः पेश्यश्चिक्कणा रज्जवो यथा ।
नष्टसूत्राः स्थितास्तासु कण्डरा नामतो विदुः ॥
यद्यच्च संकुचेदङ्गं पृथक् तत्रैव संस्थितिम् ।
पेशीखण्डस्य जानीयाच्चिह्नभिरिति निश्चितम् ॥

षष्ठोऽध्यायः ।

अथ पेशीसंख्यानम् ।

मानवदेहे चत्वारि पेशीशतानि सन्ति, सुश्रुतस्तु पञ्चशतान्याह । तासां कतिचिद्विशेषेणोच्यन्ते ।

मूर्द्धन्युपरित एका तन्वी करोटेः पश्चादधः शङ्खास्थिभ्याञ्च समुत्थाय मूर्द्धोर्ध्वमतिव्याप्य तत्र च कण्डरामयी सती ललाटाधःपेशीपर्य्यन्तमागता । एतया भ्रुवावूर्द्ध्वमाकृष्येते ।

कर्णटेग्रयोस्तिस्रस्तिस्रो यथाक्रमं पश्चादूर्ध्वाभिमुख्यश्च स्थिताः। आभिः कर्णौ पश्चादूर्ध्वाभिमुख्यौ चाक्रष्येते ।

समन्तान्नेत्रवर्त्म परिवेष्ट्य स्थितैका नेत्रं निमीलयति । नयनपुटाध स्थितापरा भ्रुवौ परस्परासन्ने करोति । अन्यैकाग्रनाडीमन्तराकर्षति ।

नेत्रस्थानां पेशीनां कयाचिदूर्ध्ववर्त्म ऊर्ध्वमाक्रष्यते । कयाचिन्नेत्रमण्डलमूर्ध्वं कयाचिदधः कयाचिदन्तः कयाचिद्बहिराक्रष्यते । कयाचिदन्तरभितः कयाचिद्बहिः पश्चाद्वा घूर्ण्यते ।

नासादेश्यो तिस्रो नसो नमनादिक्रियाः कुर्वन्ति ।

ओष्ठस्थानां पेशीनां कयाचिन्मुखसंवृतिः कयाचिदोष्ठनसोरूर्ध्वाकर्षणं कयाचिदोष्ठस्योर्ध्वाकर्षणं कयाचिदास्यप्रान्तयोरन्तराकर्षणं कयाचित्तयोरूर्ध्वाकर्षणं कयाचिद्वास्यं कयाचिन्नासापुटसंवरणञ्च सम्पाद्यत इति ।

अधरस्थानां कयाचिदधरस्याधस्तादाकर्षणं कयाचिदूर्ध्वाकर्षणं कयाचित् सकलस्याधस्तादाकर्षणं सम्पाद्यते ।

हनुस्थाभिरूर्ध्वं हनुस्थाभिश्च हन्वस्थ ऊर्ध्वाकर्षणं मुखान्तर्गृहीततोयादीनां वहि क्षेपणं हन्वस्थिचालनमित्याद्याः क्रियाः सम्पाद्यन्ते ।

ग्रीवास्थिताभिश्चिबुकाधश्चर्मपेशीभिरधोऽवनमनं मुखमण्डलस्येतस्ततश्चालनं (आभ्यामेव शिरोमण्डलस्याभिनमनं सम्पाद्यते) जिह्वामूलस्थितस्याग्रः कण्ठस्य चाधोनमनम् आस्वाद्यानं जिह्वाचिबुकयोरधोनमनम् व्यवहरणं ता-

स्वधोनमनं तदूर्ध्वाकर्षणमुपजिह्वानमं पर्शुकानामूर्ध्वाकर्षणं पृष्ठवंशस्य नमनं शिरोमण्डलस्याघूर्णनश्चेत्याद्याः क्रियाः सम्पाद्यन्ते।

पृष्ठस्थाभिः स्वस्थस्य पश्चादूर्ध्वाकर्षणं मध्यकायस्याभितः समाकर्षणं पृष्ठवंशस्यर्जूकरणमित्याद्याः क्रियाः सम्पाद्यन्ते।

वक्षस्येकैकस्मिन् पार्श्वे पर्शुकानां बहिर्देशमभिव्याप्यैकादशैकादश सन्ति। तासामेकैका द्वे द्वे पर्शुके अभिव्याप्य वर्त्तते। एवमन्तरैकादशैकादश। उरोऽस्थ्येका तदस्थ्नोऽधोभागाच्चतुर्थीपञ्चमीषष्ठीनां पर्शुकाना तरुणास्थिपर्य्यन्तमुपस्थिता। वक्षस्तल एका उदरवक्षसी पृथक् करोति। आभिः श्वसनप्रश्वसनशोणितयन्त्रधारणाद्याः क्रियाः सम्पाद्यन्ते।

उदरस्थिताभिर्वमनरेचनसूत्रणप्रसवनाद्याः क्रियाः सम्पाद्यन्ते। गुह्यस्थिताभिर्मूत्रणरेचनपायुसङ्कोचनलिङ्गोत्थापनादीनि कर्म्माणि।

उरोऽस्थिजत्रु-पर्शुकांस-प्रगण्ड-प्रकोष्ठकराङ्गुल्यादिषु बह्वः पेश्यः सन्ति। ताः श्वसनालिङ्गनबाहुचालनग्रहणक्षेपणादीनि बह्वनि कर्म्माणि कुर्वन्ति।

श्रोणिस्थानामेकातिपृथुला इयं चिकश्रोण्यस्थित जर्वस्थ्न ऊर्ध्वभागपर्य्यन्तमागता। श्रोणिप्रदेशे अपरा अपि कतिपयाः सन्ति। आभिः सुखास्था जर्वस्थ्नो बहिराकर्षणं क्रमणं तथैवविधान्यन्यानि च कर्म्माणि निष्पाद्यन्ते।

जङ्घापादाङ्गुलिस्थाभिः सक्थिसंचालनदण्डायन-

गमनप्रभृतीति कर्म्माणि सम्पाद्यन्ते।

पादयोस्तलतः पृष्ठे ग्रीवायामपि ताः स्थिताः।
उपर्य्युपरि भावेन स्वं स्वं कुर्वन्ति कर्म्म च॥
पेश्यः कुर्वन्ति कर्म्माणि निखिलानि शरीरिणाम्।
गोपयन्ति च कुड्यानि जनयन्ति सुखानि च॥
नाभविष्यन्नवयेतास्ताः स्नायुसन्धिविवर्ज्जिताः।
काष्ठीभूता मृतप्राया अभविष्यन् हि देहिनः॥
भारवाहो गतिः स्पन्दो व्यायामः क्षसनं स्थितिः।
आक्षेपगूहनं हास्यं गीतिर्नर्त्तनवादने॥
विहाराहारनिर्हारास्वप्नं शयनं रतिः।
गर्भोत्पत्तिस्तत्स्रवणं सर्वं पेश्यीकृतं मतम्॥
अथ किं बहुनोक्तेन प्राणिना प्राणधारणे।
कारणानि प्रधानानि पेश्य एवेति निश्चितम्॥

सप्तमोऽध्यायः।


अथ धमन्यः।

सव्यप्रकोष्ठाद्धृदयस्य नाडी
द्वितीयपर्शोस्तरुणास्थि यावत्।
ऊर्द्धं गता चाङ्गुलसम्मिता सा
आखे च तस्या हृदयं प्रयाति॥

ततश्च पश्चात् प्रसृता तृतीय
कशेरुभित्तं ननु सव्यपार्श्वे ।
समागताख्या वपुषो महत्यः
शाखाश्च तिस्रो विसृताः समन्तात् ॥
अवाङ्मुखी साथ कशेरुखण्डं
तुरीयमाप्ता खलु निम्नदेशे ।
भागत्रयं वर्णितमेतदेव
स्मृतं हि मूलं धमनीगणस्य ॥
धमन्यथोरस्तलगां विभिद्य
पेशी प्रविष्टोदरगह्वरान्तः ।
इयञ्च मूल धमनीगणस्य
स्कन्धोऽथवोक्तोऽपि यथा द्रुमस्य ॥

अतः शाखाः प्रशाखाश्च क्रमात् सूक्ष्मतराश्च ताः ।
व्याप्नुवन् निखिलं देहं शोणितौघप्रवाहिकाः ॥
कलास्वस्थिषु पेशीषु मस्तुलुङ्गे च मज्जसु ।
सर्वत्रैव स्थिता एता धमन्यो धमनीष्वपि ॥
नास्ति वर्ष्मणि तच्चाङ्ग धमन्यो यत्र न स्थिताः ।
केशादिष्वेव नाड्यस्ता न दृश्यन्ते कदाचन ॥
हृदयाच्छोणितं शुद्धं निर्मलं प्राणधारणम् ।
सुलोहितं सुखोष्णञ्च वाहयन्ति समन्ततः ॥
मुहुर्मुहुः चयं यान्ति सर्वाण्याङ्गानि देहिनाम् ।
श्वासभाषगतिस्पन्दरतिचिन्तादिकारणात् ॥
चपयित्वा चय तेषामङ्गानां रक्तयोगतः ।
कुर्युः सवर्द्धनं नाड्यो जनयेरन् बलं तथा ॥

सर्वाण्येवोपदानानि शारीराणि च शोणिते ।
यतः सन्ति ततस्तत् स्यात् कारणं देहरचणे ॥
शोणिताज्जायते पेशी कला मज्जास्थिरेतसी ।
बलौजसी मस्तुलुङ्गः सर्वं शोणितसम्भवम् ॥
कुल्याभिः सलिलं यद्वदौद्यानिकमहीरुहान् ।
जीवयेत् तर्पयत् तद्वद्धमनीभिश्च शोणितम् ॥
सर्वाण्यङ्गानि जीवानामिति धन्वन्तरेर्मतम् ।
अतो धमन्यो विज्ञेयाः प्राणने चापि हेतवः ॥
शोणितस्रोतसां वेगात् स्यन्दते च धरा मुहुः ।
तासां स्यन्दनतो ज्ञेयं सुखं दुःखञ्च देहिनाम् ॥
अङ्गुष्ठमूले धमनी सतत या परीक्ष्यते ।
भागो द्वितीयो मूलस्य तदादिः कीर्त्तितो बुधैः ॥
कक्षे चापि प्रगण्डे च प्रकोष्ठेऽथ करे तथा ।
अङ्गुल्या ह्यनुभूयेत बाह्वोरेषा द्वयोरपि ॥
मणिबन्धे यथा नाडी तथा गुल्फेऽनुभूयते ।
कण्ठे पार्श्वकपाले च वङ्क्षणे योनिशिश्नयोः ॥
तनुत्वगाद्रतेष्वेव तथाङ्गेष्वपरेषु च ।
शोणितोद्वाह्य सूक्ष्माणामनुभावो गतेर्भवेत् ॥
यं यं हेतुं समाश्रित्य याति यां यां गतिं धरा ।
यया यया सुखं गत्वा दुःखं वापि यया यया ॥
यया यया च जीवोऽयं याति मृत्युवशं ध्रुवम् ।
कृता तद्विवृतिर्वत्स सूत्रस्थाने मया पुरा ॥



(দ্বিতীয়া প্রতিকৃতিঃ)

অত্র দ্বিতীয়প্রতিকৃতৌ খ গ ধমনীমূলম্। ঊর্দ্ধ-মুখং পশ্চাদ্গামি নিম্নমুখঞ্চেতি তৎ দ্বিবিধম্।

দ ক কপালস্থা ধমনী।

ঘ ন মস্তিষ্কা ধমনী।

গ কণ্ঠস্থা ধমনী।

ক কক্ষনাড়ী।


ज धमनी स्कन्धस्था वा वक्षःस्था मूलनाड़ी।
त ङ उदरस्था मूलनाड़ी।
ट ङ ज आभ्यन्तरवस्तिनाड़ी।
ज ट बाह्यवस्तिनाडी।
च जङ्घस्था नाड़ी।
द ललाटस्थीया धमनी।
न जानुपश्चाद्धमनी।
व जानुस्था सम्मुखनाड़ी।
ख त पर्शुकाभ्यन्तरधमनी।
ह क प्रगण्डीया नाड़ी।
त क मणिबन्धस्था नाड़ी।
ग ध प्रकोष्ठीया धमनी।

अष्टमोऽध्यायः।

अथ शिराः।

धमन्य इव विज्ञेयाः शिराश्च सर्वदेहगाः।
रक्तस्रोतःप्रवाहिण्यो देहरक्षणहेतवः॥
शिरस्युरसि कण्ठे च बाह्वोरपि च याः स्थिताः।
सर्वास्ता जत्रुणोरारान्मिलित्वैकलमागताः॥
सक्थ्नोरुदरवस्त्योर्या वस्तिदेशे च सङ्गताः।

भित्त्वा वक्षस्तले पेशीं नयन्त्यस्रं हृदालयम् ॥
शिराभिर्निखिलाभिश्च शिरासङ्गमजातयोः ।
द्वयोर्महत्योः शिरयोरप्यते शोणितं सदा ॥
हृदयाच्छोणितं शुद्धमाश्रित्य धमनीपथम् ।
गुणविशाणनार्हं च चोणं पुष्णाति नित्यशः ॥
एवं त्यक्तगुणं कृष्णं देहनाशगुणान्वितम् ।
शिराभिश्च पुनर्याति दक्षिणं हृदयालयम् ॥
तत्र निःश्वासवातेन वीतदोषं गुणान्वितम् ।
सुरक्तं धमनीभिश्च पुनर्भ्रमति वर्त्म तत् ॥
एकैकस्या धमन्याश्च कुतश्चित् पार्श्वयोर्द्वयोः ।
विद्यमाने शिरे द्वे द्वे वहतो दुष्टशोणितम् ॥
नाड्यः सूक्ष्मा नयन्त्यस्रं धमनीभ्यः शिराः सदा ।
शिराभिर्हृदयं याति ततस्तद्धमनीः पुनः ॥
एवं पुनः पुनर्देहं भ्रमेदस्रं निरन्तरम् ।
आभूमिस्पर्शनाद्यावन्मृत्यु सर्वस्य देहिनः ॥
निवृत्तायां गतौ रक्तस्रोतसां सद्य एव हि ।
मृत्युर्भवति जीवस्य विचिकित्सा न विद्यते ॥
सन्ति सूक्ष्माः शिराः काश्चित् काश्चिच्च पृथुलास्तथा ।
काश्चिन्नभीरदेशस्था अगभीरगतास्तथा ॥
बाह्नोः सक्थ्नोरधःस्थाना अगभीरस्थिता हि याः ।
अमांसलेषु देशेषु व्याधिक्षीणस्य देहिनः ॥
शिरा व्यक्ततराः स्युस्तास्तल्लक्षयलक्षणम् ।
दृंहणं तर्पणं तत्र कार्यं यथायथम् ॥



तृतीया प्रतिकृतिः।

अत्र तृतीयप्रतिकृतौ ख ग्रीवापार्श्वस्था बाह्या अभ्यन्तरस्था च कण्ठसिरा।

ग अनाख्याता सिरा।

घ जत्रुनिबद्धसिरा।

ङ हृदयम्।

च हृत्सिरा।

छ ऊर्ध्वहृत्सन्धिषि

ङ रेतोरज्जुशिरा।

थ वाङ्क्षणवस्तिशिरा।

जत्रूर्ध्वनिम्ने जङ्घास्था महाशिरा वक्षोवधःस्था महाशिरा च।

नवमोऽध्यायः।

अथ स्रोतांसि।

तत्र केचिदाहुः शिराधमनी स्रोतसामविभागः शिराविकारा एव धमन्यः स्रोतांसि चेति। तत्तु न सम्यक्। अन्यान्येव हि स्रोतांसि धमन्यश्च शिराभ्यः कर्म्मादाञ्जनान्यत्वान्मूलसन्निश्रयमात् कर्म्मवैशेष्यादागमाच्च केवलन्तु परस्परसन्निकर्षात् सङ्गागमकर्म्मत्वात् सौक्ष्म्याच्च विभक्तकर्म्मणामप्यविभाग इव कर्म्मसु भवति।

स्रोतांसि सन्ति देहेऽस्मिन् धमन्यश्च शिरा यथा।
तानि रसौकागर्भाणि कर्म्म कुर्वन्ति दैहिकम्॥
मस्तिष्के नाभिरञ्जौ च नेत्रयोः पृष्ठमज्जनि।
नखेषु कण्डरायाञ्च न सन्त्यस्मिन्नुपास्थिनि॥
स्रोतसां निखिलानाञ्च परस्परसमागमात्।
महास्रोतोदयं जातमधस्ताञ्जत्रुणोश्च तत्॥
शिरासङ्गमसंग्राम्यं खरसं तत्र निक्षिपेत्।


स रसः शैररक्तेन हृत्कोष्ठञ्च समागतः ॥
शोणितीभूय व्रजति देहमेतन्निरन्तरम् ।
स रसो देहजः पूर्वं पश्चाच्छोणिततां व्रजेत् ॥
धराभ्यस्तान्यादत्ते पदार्थान् देहपोषकान् ।
अन्नाद्यादिभ्य आदाय रसमाहारजं तथा ॥
शिरामार्गेण हृदयमानयन्ति निरन्तरम् ।
बलं पुष्टिञ्च लावण्यं देहस्तन्नित्यमाव्रजेत् ॥

दशमोऽध्यायः ।

अथ स्रोतांसि ।

स्रोतांसि सूत्रवत् सूक्ष्मा शुभ्रा निखिलदेहगाः ।
कारणानि चेतनाना सदा चैतन्यसाधने ॥
सुखदुःखावबोधे च प्रवृत्तौ च निवर्त्तने ।
रूपगन्धरसस्पर्शशब्दज्ञाने च हेतवः ॥
निखिलास्ताश्च सञ्जाता मस्तिष्कात् पृष्ठमज्जनः ।
शिरोमण्डलमेवाद्या शेषाः शेषाङ्गमाश्रिताः ॥
तेषु तेषु च भावेषु देहमात्रेषु वत्सलाः ।
कम्पमानाः कम्पयन्ते मस्तुलुङ्गञ्च तत्क्षणात् ॥
तस्य विकम्पभेदेन ज्ञानभेदो भवेद्ध्रुवः ।
अतो मस्तिष्कमेवैको ज्ञानहेतुः प्रकीर्त्तितः ॥

कपोटिगह्वरान्तस्तदसेदाज्यमुपेक्षवम् ।
सुशुम्नाश्चासमतलमाभिन्नञ्च द्विधोपरि ॥
नेत्रे रूपवतां विम्बपतनात्रेक्षवस्त्रयाः ।
भावान्तर मसुलुङ्गं नयन्ते तद्धि दर्शनम् ॥
पदार्थानां गन्धवतां गन्धाणूना समागमात् ।
नासाख्याः कुर्वते तद्वत् तद्घ्राण परिकीर्त्तितम् ॥
तथा रसवताञ्चाणु सङ्गमाद्रसनान्विताः ।




चतुर्थी प्रतिकृतिः ।

अस्मिन् चतुर्थचित्रपटे १, २, ७, ४, प्रभृतिचिह्नितः १८, १९, २० चिह्नपर्यन्तं विस्तृतानि मस्तिष्कनिम्न-भागस्य प्रतिरूपाणि । तत्रार्थे

१ क्षुद्रमस्तिष्कः ।
७ मस्तिष्कस्याग्रखण्ड ।
४ घ्राणस्नायुः ।
१ दर्शनस्नायुः ।
८ दर्शनस्नायुप्रदेशः ।
९ नेत्रसन्धकः स्नायुः ।
१० दृष्टिसन्धिः ।
१२ पञ्चाच्छिद्रान्वितः प्रदेशः ।

क्रियां तां कुर्वते तद्धि रसनस्याभिधीयते ॥
शीतोष्णादिगुणवतां द्रव्याणां त्वचि सङ्गमात् ।
तत्रस्थाः कर्म्म कुर्वन्ति तादृशं स्पर्शनं हि तत् ॥
परस्पराभिघातेन द्रव्याणामनिलस्तदा ।
तरङ्गवानभिहन्यात् कर्णान्तः श्रवणं ततः ॥
गत्यादिष्वपि कीर्त्यन्ते स्नायवो मुख्यहेतवः ।
अथ किं बहुनोक्तेन जीवत्वं स्नायुसम्भवम् ॥
स्नायुनाशो भवेद्यस्मिन्नङ्गे तत्स्यान्मृतोपमम् ।
पञ्चाघातादिरोगेषु कारणं तद्विधं मतम् ॥



पञ्चमी प्रतिकृतिः

अत्र पञ्चमप्रतिकृतौ क मस्तकस्थो बृहन्मस्तिष्कः ।

ख क्षुद्रमस्तिष्कः ।

ग ग्रीवास्नायुः ।

घ वदनस्नायुः ।
ङ प्रगण्डसन्धिस्नायुः ।
ज प्रगण्डस्नायुः ।
च प्रकोष्ठस्नायुः ।
छ प्रकोष्ठनिम्नस्नायुः ।
झ करतलस्नायुः ।
ञ नितम्बस्नायुः ।
ट पर्ष्णीकाभ्यन्तरस्नायुः ।
ठ जानुपश्चात्स्नायुः ।
ड जान्वभिमुखस्नायुः ।
ढ पदतलस्नायुः ।
ण कटीस्नायुः ।
त जघस्नायुः ।

एकादशोऽध्यायः ।

अथ गुदाः ।

शरीरं त्रिगुदं प्रोक्तं करोटिहृदयोदरे ।
करोटी मस्तकस्थो हौ वक्षस्युण्डकफुप्फुसौ ॥
हृत्कोष्ठखोदरे सन्ति यकृत्प्लीहामधामनौ ।
क्लोम स्तन्यो धामनीकः क्षुद्रान्त्रं स्थूलमन्त्रकम् ॥
प्लीहा हृक्कद्वय मूवनाड़ी वस्तिगुदं तथा ।
मत्तः शृणुत सर्वेषामुक्तानां गुणकर्म्मणी ॥

मध्यगुहा ।

विहृतोर्ध्वगुहा पूर्वमिदानीं मध्यमा मया ।
सकोष्ठा वर्ण्यते वत्सा ! निशामयत तत्त्वतः ॥
उरोऽस्थि पर्शुकोपास्थि पर्शुका अभितः स्थिताः ॥
पार्श्वयोः पर्शुकाः सन्ति पश्चात् पृष्ठकशेरुकाः ॥
पर्शुकाद्योर्ध्वपट्टश्च शिरस्यस्याभिवर्त्तते ।
आस्तेऽधस्तात्तथा वक्षस्तलपेश्यौ च वक्षसः ॥
गर्भे गुहाया एतस्या हृल्कोष्ठोरुककफुप्फुसाः ।
सन्त्यमीषां त्रयाणाञ्च ब्रवीमि गुणकर्म्मणी ॥


हृल्कोष्ठः ।

उरोमध्यगतः कोष्ठो लवनीफलवर्त्तुलः ।
रक्ताधारश्चतुर्गर्भ आवरणा समावृतः ॥
तिर्य्यक्स्थो धमनीभूमिः फुप्फुसहृदयशीर्षकः ।
स्फीत्या क्षुब्धनशोलोऽसौ हृल्कोष्ठ इति कीर्त्तितः ।
ऊर्द्ध गर्भद्वयं तस्य निम्नतश्चापि तद्वयम् ।
ऊर्द्ध स्थे दक्षिणे गर्भे शिरासङ्गमजे शिरे ॥
अर्पयतो महतीं ते रक्तं गुणविवर्जितम् ।
तथःस्थोद्दामगर्भाभ्यां धमनी मूलमुत्थितम् ॥
सर्वेष्वपि च गर्भेषु रक्तं क्रमसमागतम् ।
दोषहीनं गुणैर्युक्तं जन्तुं जीवयते गुणैः ॥
अनिशं स्फायते कोष्ठः प्रकृत्या संकुचत्यपि ।
आभूमिस्पर्शनाद्यावन्मृत्यु सर्वस्य देहिनः ॥
तदाकुञ्चनतो रक्तं महता खलु रंहसा ।
प्रविशेद्धमनीमूलं ततो भ्रमति विग्रहम् ॥

स्नायना कुप्यते तस्य विरमेतां क्षणं यदि।
सहसैव भवेन्मृत्युर्नास्ति कोऽप्यत्र संशयः॥

फुप्फुसः।

फुप्फसस्तु द्विधा भिन्नो वामदक्षिणभेदतः।
पेश्यां वक्षस्तलस्थायां समासक्तोऽणुरौर्षकः॥
अधो विशालो बहुभिः कोषैरिव मधुक्रमः।
दुष्टशोणितसंशुद्धिकोषोऽय परिकीर्त्तितः॥
तरुणास्थिमयी नाड़ी जिह्वामूलात् प्रधाविता।
अधः शाखाद्वयवती फुप्फुसद्वयमागता॥
ततः शाखाद्वयात्तस्माद्बह्व्यः शाखा विनिःसृताः।
कोषेषु फुप्फुसस्थेषु सुसूक्ष्माः समुपस्थिताः॥
नासामुखसमाकृष्टः पवनः श्वासकर्म्मणा।
श्वसनाख्या तया सर्वांस्तान् कोषान् प्रविशत्यसौ॥



षष्ठप्रतिकृतिः।

अथ षड्चिक्रचेत्रे ग श्वासनाड़ी अनया मुखनासाकृष्टो बाह्यो वायुः फुप्फुसे प्रविशति ।

य मूलान्त्रनाड़ी ।

ङ आभ्यन्तरकण्ठशिरा ।

ङ, छ, ज, झ चिक्किताः काश्चिद्विशेषिताः शिराः ।

ञ जङ्घास्थूला महाशिरा ।

ट धमनीमूलम् ।

ठ जङ्घो दक्षिणहृत्प्रकोष्ठः ।

ड दक्षिणफुप्फुसधमनी ।

ढ धामनिकी प्रणाली ।

त वामफुप्फुसधमनी ।

थ निम्नस्थो दक्षिणहृत्प्रकोष्ठः ।

द हृद्भीर्या वृतिः ।

ध निम्नस्थूला महाशिरा ।

न जङ्घो वामहृत्प्रकोष्ठः ।

प निम्नस्थो वामहृत्प्रकोष्ठः ।

फ फुप्फुसः ।

क फुप्फुसस्योर्द्ध्वखण्डः ।

ब फुप्फुसस्य मध्यखण्डः । तन्निम्ने निम्नखण्डः ।

महाशिराभ्यां हृत्प्रकोष्ठं संप्राप्तं दुष्टशोणितम् ।
नाड़ीविशेषो नियतं तदानयति फुप्फुसम् ॥
श्वासाकृष्टोऽनिलस्तत्र समर्प्यात्मगुणं ततः ।
निर्दोषं शोणितं कुर्यात् सुखोष्णञ्च सुलोहितम् ॥
तद्रक्तं हृदयं भूयः प्रविष्टं धमनीगणैः ।

निरन्तरं महारंहो देहात्तर्देहिनां भवेत् ॥
श्वासाक्षेपोऽनिलोऽस्राय समर्प्यात्मगुणान् शुभान् ।
अशुभांश्च समादाय फुप्फुसादथ निःसरेत् ॥
अमी श्वासक्रिया सा च कालेन यावता यति ।
वारान् प्रवर्त्तते नाड्याः स्पन्दसंख्या च या भवेत् ॥
इत्याद्या निखिला भावाः सूत्रस्थाने पुरा मया ।
वर्णिताः शृणुतेदानीं हेतु वाचां प्रवर्त्तने ॥
ऊर्ध्वगः श्वासनाड्या हि वाग्यन्त्रमिति कीर्त्तितः ।
तरुणास्थिधरारज्जुपेशीस्नायुकलागणः ॥
निर्मितं कण्ठदेशे तत् पुरस्तादभिवर्त्तते ।
तस्योपास्थिविशेषस्य द्वे पत्रे पक्षिपक्षवत् ॥
कण्ठोत्क्षेध जनयतो मिलित्वा च परस्परम् ।
लक्ष्यते चक्षुषैकेषु क्षीणानाञ्च विशेषतः ॥
अस्मादुपरि वाग्यन्त्रादुपजिह्वाभिवर्त्तते ।
अन्नग्रहणकाले या श्वासरुध्र प्रगोपयेत् ॥
जनयन् वाक्यन्त्रस्य हेतूना समवायिनाम् ।
जन्तुर्भेदानवस्थायाः स्वरान् जनयते बहून् ॥
सिंहशार्दूलखड्गानां रवैर्मूर्च्छन्ति जन्तवः ।
विहङ्गगीतध्वनिभिः को न मुह्यति जन्तुषु ॥
द्रवीकरोति हृदयं बालानां सुखदः स्वरः ।
क्रन्दनध्वनिभिः कस्य न गलत्यश्रु नेक्षत ॥
मुखैरमृदुनिःस्वनैः कोमलैः कामिनीस्वरैः ।
सुरारण्येषु को न मुह्यति सर्वथा ॥
जिह्वं [illegible] स्वरान्योन्याभिहते स्वरः ।

कण्ठोद्भवः कादिवर्णभेदेनाथ प्रकाशते ॥
न नरादितरेषां तयन्त्राङ्गानां सुसंस्थितिः ।
निर्मितिश्चेद्दृशी तेऽतो न वदेरन् यथा नरः ॥

उण्डुकः ।

फुप्फुसस्यावरणौ द्वे ऊर्ध्वतस्तद्वयं तयोः ।
उण्डुकः शैशवे मध्यमध्यास्ते महतां न हि ॥

अधोगुहा ।

गुहानां तिसृणां ज्ञेया गुहाधस्थाः महत्तमा ।
बहुयन्त्राण्डवृत्तास्थानं पाकादिकर्मणाम् ॥
ऊर्ध्वं वक्षस्थलस्थास्याः पेशी वस्तिरध स्थिता ।
पार्श्वयोश्चामितः पेश्यः पश्चात् पेश्यः कशेरुकाः ॥

द्वादशोऽध्यायः ।


अन्नविपाकक्रिया ।

हस्तविंशतिसम्माना कला पेशीविनिर्मिता ।
अन्नपाकक्रियार्था च पाकनाड़ी प्रकीर्त्तिता ॥
ऊर्ध्वांशो मुखनामास्य अधोऽंशो गुदनामकः ।
कण्ठादामाशयं यावदन्ननाड़ीति कथ्यते ॥
ततश्चामाशयस्तस्मात् क्षुद्रान्त्रं स्थूलमन्त्रकम् ।
आमाशयात् समारभ्य भागः प्रथमः आन्त्रिकः ॥

ग्रहणी चाग्न्यधिष्ठान बुधैरायै प्रकीर्त्तितः ।
ततः पक्वाशयः प्रोक्त पक्वान्नपरिधारणात् ॥
स्थूलान्त्रस्याप्यधोभागः सरलो गुदसंज्ञकः ।
अन्नकिट्टं मल सर्वं वहिर्निःसारयत्ययम् ॥
श्वासनाड्या स्थिता पश्चादन्ननाड्यन्ववाहिनी ।
अधस्तात कुण्डलीभूता नाड़ी चोदरमध्यगा ॥
कण्ठादधोगतिर्नाड़ी भित्त्वा वक्षस्थलाश्रयाम् ।
पेशीं सुखहृयवती प्रविष्टेयमधोगुहाम् ॥

अन्नं मुखार्पितं दन्तैश्चर्वित क्षणिकायुतम् ।
पिण्डीभूतं चान्ननाडीं प्रापितं पतति क्षणात् ॥
आमाशये यल्लघ्वस्थलपिण्डोरधःस्थिते ।
तच्च प्रकृतितोऽत्यक्ष्ण कोऽप्यतो नि सरेद्भम. ॥
रसेनानेन तत् क्लिन्नं चूर्णितं प्रकृतेर्बलात् ।
क्षुद्रान्त्रान्तर्मुच्चैन विशेत् सजलपङ्कवत् ॥
आमाशयाद्विच्युत क्षुद्रान्त्रं कुण्डलाकृति ।
अस्यैव प्रथमो भागो ग्रहणीति निगद्यते ॥
असम्यग् जीर्णमन्न तत् प्रविश्य ग्रहणीं कलाम् ।
आन्त्रिकेण रसेनात्र मिलित परिपच्यते ॥
तदैव यकृतो नाड्या पित्तकोषात् तदुद्भवात् ।
पीतस्निग्ध पित्तरसो ग्रहणीमुपतिष्ठति ॥
अन्नपाके रसोऽप्येष प्रधानं कारण मतम् ।
पित्तमेवाग्निनाम्नैतन्मुनिभिः परिकीर्त्तितम् ॥
न केवल कालखण्डमन्नपाकप्रयोजनम् ।
यतः शोणितमंशुद्धिं विदधाति निरन्तरम् ।

औदरे दक्षिणे पार्श्वे तदास्ते पर्युकाहृतम् ।
ऊर्ध्वं वक्षस्तलस्यास्य पेश्यधस्ताच्च वृक्कके ॥
यकृतत् कारणं क्लोम विज्ञेयं पाचकर्मणि ।
प्लीहक्षुद्रान्त्रयोर्मध्यमध्यास्ते दोषवर्ष तत् ॥
आमाशयोऽस्य पुरतो वर्त्ततेऽन्त्रादिनिःसृतः ।
रसो नाड़ीविशेषेण क्षुद्रान्त्रमुपतिष्ठति ॥
प्लीहाप्यत्रस्य पचने हेतुर्मुनिभिरीरितः ।
वामतोऽधोगुहाया स वर्त्तते पर्युकाहृतः ॥
अरुणाभोऽयतश्छिद्रैर्बहुभिश्च समाततः ।
ऊर्ध्वं वक्षस्तलस्यास्य पेश्यधो वामवृक्कक. ॥
स्रोतास्यन्त्रादधो पक्वं खेताभं रसमत्रजम् ।
शिरामार्गेण निखिलं प्रेरयन्ति हृदालयम् ॥
आमाशयकलाचारिधमनीभिरपोऽखिलाः ।
गृह्यन्ते प्रायशः शेषा अन्त्रस्थाभिरनन्तरम् ॥
आकृष्टद्रवभक्तं तत् किट्टयेषन्तु पङ्क्तवत् ।
स्थूलान्त्रं प्रविशेत् पश्चात् पुरीषं तत्रिगद्यते ॥
ततः प्राप्य गुदं काले सर्वथा सारवर्जितम् ।
तद्बहिर्निःसरेद्धात्रित्यं कल्याणहेतवे ॥



सप्तमी प्रतिकृतिः ।

अत्र सप्तमप्रतिकृतौ २ गलनाड्याः शेषांशोऽन्ननाड़ी-मुखादागत्यान्त्रत्यामाशये मिलितः ।

१, २, ७, ४ चिह्नितानि स्थानानि गर्भः । अनुग्रस्य-भावेन स्थितं ५ चिह्नितं यत्नमामाशयः । अन्नं मुखा-द्गलनाड्यागत्यात्र पतति ।

५, ६ चिक्कितार्धोमुखगामिनी नाडी ग्रहणी। अत्र पित्तरसः सूक्ष्मनाड़ीविशेषमार्गेण यकृत आगत्यामाशयागतेनान्नेन सह मिलितः।

५, ६, ७, ८ चिक्काङ्किता वहती नाड़ी क्षुद्रान्त्रम्। तन्मध्ये ५,६ चिक्कितोऽंशो ग्रहणीनाम्नाभिधीयते। ग्रहण्याः परवर्त्ती कियदंशः पक्वाशयनाम्ना कथ्यते। स्थानादस्मात् क्षुद्रान्त्रमतिकुण्डलाकृति भूत्वा स्थितम्। भुक्तद्रव्यमामाशयतः सर्वाणि क्षुद्रान्त्राणि परिवेष्ट्य मिलित्वा च विविधेन पाचकरसेन सह भृशं जीर्य्यति। क्षुद्रान्त्रस्य निम्नवर्त्ती कश्चित् कश्चिदंशो विशिष्टकारणतः कोषादिषु प्रविशति। पौड़ियमन्त्रवृद्धिनाम्नाभिधीयते।

९, १०, ११, १७, १४ चिक्किता नाड़ी स्थूलान्त्रनाम्ना ख्याता। तन्मध्ये ९, ११ चिक्कितोऽंश ऊर्द्धगामि स्थूलान्त्र १७,१४ चिक्कितोऽंशोऽधोगामि स्थूलान्त्रञ्च कथ्यते। एतयोरुभयोर्मध्ये क्षुद्रान्त्रस्योर्द्धस्योऽनुप्रस्थांशोऽनुप्रस्थस्थूलान्त्रमुच्यते। प्रवाहिकादिषु रोगेषु स्थूलान्त्रे विशेषतश्चाधोगामिनि स्थूलान्त्रे क्षतं वेदना च भवति, निःस्रवन्ति च तस्माद्रक्तादीनि वस्तूनि।


१५—चिक्कितो निम्नाभिमुखोऽन्त्रांशो गुदनाम्ना ऋजुनिम्नान्त्रनाम्ना वाभिधीयते। अस्य सर्वनिम्नांशो गुह्यद्वाररूपेण परिणमति। प्रवाहिकादिषु रोगेष्वन्त्राणि क्षतादय उपद्रवा भवन्ति, जायन्ते चास्य गात्रे अर्शाङ्कुराणि।

एतन्निम्नाभिमुखमन्त्रं तस्योर्द्धस्थः स्थूलान्त्रांशश्च

मलाशयनाम्ना कथ्यते । अधोगामी भागः पुरीषनिर्ग-मकः ।

अहो कुण्डलिनी धातुर्महिमा कोऽपमुख्यणः ।
विचित्रविधिना पक्वमन्नं सत्त्वानि जीवयेत् ॥
अन्नयासो रदैः पिष्टो लालाक्लिन्नोऽन्ननाड़िकाम् ।
श्वासरन्ध्रं नसो रन्ध्रञ्चातिक्रम्य सुखं विशेत् ॥
निरुणद्ध्युपजिह्वा सा सर्वथा श्वासनाड़िकाम् ।
जिह्वा प्रयाति पश्चाच्च पाकनाडी ततोऽभितः ॥
किञ्चिदूर्द्ध्वसुखी भूत्वा पिण्डं ग्रसति यत्नतः ।
आशयस्थ्रप्रविष्टं चेदन्नं कासैर्विनिःसरेत् ॥
द्वितीयगं क्षवथुना क्षणेन प्रकृतिर्बलात् ।
अतो नैवातित्वरणं श्रेयः पानान्नकर्म्मणि ॥
अन्नं वै प्राणिनां प्राण इति श्रुतिनिदर्शनतः ।
तदन्नं विधिना सेव्यमदोषं प्राणवर्द्धनम् ॥
अन्नं रसोऽन्नमस्रञ्च मांसमन्नमपि स्मृतम् ।
मेदोऽन्नमन्नमस्थ्यन्नं मज्जान्नं शुक्रमेव च ॥
अन्नं बलमथौजोऽन्नं मनोऽन्नमपि चोच्यते ।
चराचरेषु निखिलाः प्रजास्यान्नसमुद्भवाः ॥
अन्नपानविधिर्यश्च तत्काले चोचिता क्रिया ।
कृता तद्विकृतिर्वक्ष्या सूत्रस्थाने पुरा मया ॥
पुरुषेभ्योऽधिकाश्चान्ये नारीणामाशयास्त्रयः ।
धरागर्भाशयः प्रोक्तः स्तनौ स्तन्याशयौ मतौ ॥
श्लेष्माशयः स्यादुरसि तस्मादामाशयस्त्वधः ।
जङ्घोरुगाशयौ नाभेर्वामभागे व्यवस्थितः ॥

तस्योपरि तिलं ज्ञेयं तद्वत् पवनाशयः ।
मलाशयस्त्वधस्तस्माद्वस्तिर्मूत्राशयस्त्वधः ॥
जीवरक्ताशय उरो ज्ञेयाः सप्ताशयस्त्वमी ॥



अष्टमी प्रतिकृतिः ।

अत्र अष्टमप्रतिकृतौ ङ,ग यकृत् ।
पा आमाशयस्याधोऽंशः ।
पि पित्ताशय ।
उ आमाशयस्याधःस्थिद्रम् ।
घ यकृच्छंशविशेषः ।
क उदरप्रविष्टो धमनीस्कन्धः ।
ख क्लोम तिलयन्त्रं वा ।
ज क्लोममूर्धा ।
ङ क्लोमदेहः ।
न क्लोमपुच्छम् ।
द प्लीहा ।

ण आमाशयस्योर्द्ध्वच्छिद्रम् ।
ग ग उदरवर्त्मव्यवधायिकायाः पेश्याः स्तम्भद्वयम् ।
च मूत्रपित्तप्रणाली ।
श्री श्रीहखातम् ।

त्रयोदशोऽध्यायः ।

अथ मूत्रयन्त्राणि ।

वृक्कौ द्वौ मूत्रनाड्यौ द्वे तथा वस्तिश्च मूत्रणे ।
त्रेयानीमानि यन्त्राणि रन्ध्रमौपस्थिकं तथा ॥
शिम्बीबीजनिभौ वृक्कौ यकृत्प्लोक्नोरधः स्थितौ ।
पश्चादुदरवेष्टन्या. कटिदेशगतौ मतौ ॥
अत्र स्रोतांसि भूयांसि धमन्यस्रादपः सदा ।
गच्छन्ति दोषसहितास्तेनास्रं शुद्धता व्रजेत् ॥
वृक्कफुप्फुसचर्म्मादि धमनीश्रोणितादपः ।
सदोषाः सम्यगादाय शोधयन्त्यनिशं हि तत् ॥
वृक्काङ्गनिःसृते नाड्यौ वस्तिपृष्ठमधो गते ।
वृक्कसञ्चितमूत्राणि वस्तिमानयतः शनैः ॥

वस्तिः ।

कलापेश्यात्मिका वस्तिर्गुदस्य पुरतः स्थिता ।
पश्चादौपस्थिकास्त्रोश्च मूत्राशय इति स्मृता ॥
वस्तेरूर्द्ध्वमुखं रज्ज्वा नाभौ संबद्धमेकया ।

अपराभिर्निबद्धा च वस्ति स्थानेऽवतिष्ठते ॥
स्त्रीषु योनिर्धरा चापि गुदस्य पुरतः स्थिता ।
तयोस्तु पुरतो वस्तिर्विशेषोऽयमुदीरितः ॥
वस्तेः संकुचित निम्नं मुख रन्ध्रेण संयुतम् ।
औपस्थिकेन मूत्रस्य वहिर्निःसरणाय हि ॥
आशये सञ्चितं मूत्रमतिमात्रं यदा भवेत् ।
तदौपस्थिकरन्ध्रेण रंहसा निःसरेद्बहिः ॥

जननेन्द्रियम् ।

जीवस्रोतसि हेतुर्यद्वर्तते तस्य सन्ततिः ।
इन्द्रियं जननाख्यं तदुपस्थेति कथ्यते ॥
उत्पत्तौ जीवसंघस्य द्वारं नान्यद्धि विद्यते ।
बलाद्विहीने तस्मिन्नै जीवोत्पत्तिः खिलीभवेत् ॥
यन्त्रं विचित्रनिर्माणमहो धात्रा वितर्किणा ।
ध्यात्वा ध्यात्वेव रहसि विहितं निपुणेन तत् ॥
अहो यन्त्रस्य शक्तिं तां को वदेत् शक्तिमान् भुवि ।
सम्यग् जानाति विश्वाराट् तत्स्रष्टैव हि तद्गुणम् ॥
यस्य शक्त्या जगत्यस्मिन् पाशैरिव बलीमुखाः ।
नृत्यन्ति जन्तवो नित्यमवशा मुग्धमानसाः ॥
नित्यमानन्दसन्तान उत्साहः करुणा क्षमा ।
शान्तिर्दाक्षिण्यमास्तिक्य मैत्री चेह विराजते ॥
तदिन्द्रियभव जीवा नित्य भुञ्जन्ति यत् सुखम् ।
विचेतना इव स्वर्गं तस्य नास्त्युपमा भुवि ॥
वनालयाश्च मुनयो भूपाः प्रासादवासिनः ।
कुटीरस्था दरिद्राश्च सर्वे तेन जिता ध्रुवम् ॥

पुमांसो निखिला लोके यौवनस्थाः स्त्रियस्तथा ।
जन्तूपशान्तमवशाः कामयन्ते सुखं तु तत् ॥
शान्तौ तदिन्द्रियं हेतुर्विद्वेषे च महत्यपि ।
महिमानमतस्तस्य कः स्वाद्वदितुमीश्वरः ॥
जीवप्रवाहरक्षार्थं शान्तिसंस्थापनाय च ।
इदमेवंगुणं धात्रा विहितं विश्वकर्मणा ॥
शक्तिर्महीयसीयं चेत्र स्यादस्य बलीयसी ।
इयमानन्दनिलयो धन्वेव धरणी भवेत् ॥
आलोच्य भाव निखिलं तदीयं
उन्मीलिताक्षा ननु मूढजीवाः ।
अपास्य सन्देहमहो हि सत्ता
शक्तिं तथेत्वध्वमचिन्त्यशक्तेः ॥
आधाराकारभेदेन पौंस्नः स्त्रैण इति द्विधा ।
विशिष्यतः उपस्थ स चेतनावानिव स्थितः ॥
शिश्नो मेढ्रो व्यङ्गलिङ्गं मेहन शेफशेफसी ।
पुरुषेन्द्रियनामानि ध्वजोपस्थौ च साधनम् ॥
स्त्रीन्द्रियस्य तु नामानि योन्युपस्थौ भगाधरे ।
तत्त्वं वक्ष्यनयोः सम्यगुभयोरप्युपस्थयोः ॥

तत्र पुजननेन्द्रियाणि ।

मेढ्रभूमिः ।

यत्रोपाख्यि समायोगादस्थिनी मिलितं उभे ।
औपस्थिके अधस्तस्मात् पश्चाद्यास्ति गुदासना ॥
दृढ़ा ग्रन्थिनिभा पाण्डुः सवेष्य वस्तिकन्धराम् ।
मूत्रस्रोतोऽन्तरस्थश्च सा मेढ्रो भूमिरुच्यते ॥

कलिकाद्वयम् ।

मेढ्रभूमि समीडे द्वे कलायपरिमण्डले ।
आयुषा ह्रासशीले स्तो गुटिके ते कलायिके ॥

मेढ्रः ।

मेढ्रभूमिं समारभ्य दीर्घः शृङ्गारसाधनः ।
उपस्थास्थ्नोः सकाशाच्च मेढ्रः समभिवर्त्तते ॥
मूलादयमुपस्थास्थ्नो कौषिकेण च चर्म्मणा ।
संसक्तो वेष्टितश्चापि पर मूर्द्धनि केवलम् ॥
आवृतो न च संसक्तस्त्वित्रयीयचर्म्मणि ।
पश्चादाकृष्टे लिङ्गस्य मुण्डं व्यक्तं प्रकाशते ॥
कदलीकुसुमाकार लिङ्गमुण्डं सचेतनम् ।
ततः पश्चाल्लिङ्गसरित्लिङ्गग्रीवा च सोच्यते ॥
तचाग्रान्तं रस पूतिर्निःस्रवेत् चारधर्म्मवान् ।
ततश्चर्म्मसमासक्तं गात्रं लिङ्गस्य वर्त्तते ॥
ततो गुदसमीपे च लिङ्गमूलमवस्थितम् ।
वस्तिर्तो मौत्रिक स्रोतो लिङ्गमुण्डाहहिर्गतम् ॥
मेढ्रोऽहृष्टस्य पुंसः स्याच्छिथिलं स्तम्भवर्त्तुलम् ।
जाते हर्षे स एव स्याद्दृढस्त्रिभुजसन्निभः ॥


अण्डद्वयम् ।

रेतः सूत्रसमावद्धं कोषगर्भेऽवतिष्ठते ।
रेत स्राव्यण्डयुगलं ग्रन्थाभ चाण्डवर्त्तुलम् ॥
भ्रूणस्योदरवेष्ट्यां पश्चादुपरगह्वरे ।
तिष्ठेत् प्राक् स्वर्गनाड्यां कोषमायाति तद्वयम् ।
दक्षिणस्मात् स्थूलतर वामाण्डं निम्नलम्बि च ।

वामं रैतसिकं सूत्रं यतो दीर्घतरं परात् ॥
उपर्य्यधि सस्थानस्तरहन्त्रेण निर्मितः ।
कोषो रैतसिके सूत्रे धत्तेऽण्डयुगलं तथा ॥
तयोराभ्यन्तरो रक्तः सङ्कोचनगुणान्वितः ।
स्तरो वाह्यचर्ममयो लोमभिः कतिभिश्चन ॥
स्तरस्तिरस्करण्यान्तरेकया भिद्यते द्विधा ।
तन्नर्भद्वयमध्यास्ते पुंसोऽण्डयुगलं ननु ॥
उदराद्रेतसः सूत्रे पश्चाङ्गागमधाण्डयोः ।
नियतं समनुप्राप्ते धरास्रायुादिनिर्मिते ॥

वीजकोषौ ।

वस्तिमूलगुदान्तःस्थौ वीजकोषौ नृणां स्मृतौ ।
वीजं धारयतो गर्भजनने मुख्यकारणम् ॥
तद्वीजं तरलं स्थानं शुभ्रं गन्धविशेषवत् ।
चेतनाणु परिव्याप्तं रेतः शुक्रं तदुच्यते ॥
नाड्या शुक्रप्रवाहिण्या फलमागत्य वै ततः ।
औपस्थिकेन रन्ध्रेण वहिर्निर्धुवनात् सरेत् ॥
आहारजः परः सारः शुक्रं प्राणकरं परम् ।
कारणं जीवने प्रोक्तं तत्क्षयान्मरणं ध्रुवम् ॥
अतो रक्ष्यं प्रयत्नेन शुक्रं जीवनकाङ्क्षिणा ।
नित्यं तत्क्षये चापि यतितव्यञ्च सर्वथा ॥
रेतस्युपचितेऽत्यर्थं जायते रमणेच्छता ।
तदा निर्धुवनं कुर्य्यात् प्रियया नाविचारयन् ॥
अव्यवायान्मेहमेदोवृद्धिः शिथिलता तनोः ।
यतः स्यादहितस्तस्मात् कामस्यातिविनिग्रहः ॥



नवमी प्रतिकृतिः।

अत्र नवमप्रतिकृतौ क वस्तिर्मूत्राशयो वा।

ध औपस्थिकास्थिसन्धिः।

ङ,ट मेढ्रभूमिः।

ङ कलाशिका।

फ अण्डकोषः।

घ बीजकोशः, शुक्राशयः।

ङ,ट चिह्नतः ल पर्य्यन्तं विस्तृतो मेढ्रः।

म लिङ्गच्छदः।

य लिङ्गशरीरलिङ्गग्रीवा वा।

ज असंसक्तमयचर्म ।

ट लिङ्गगात्रम् ।

ठ वस्तेरधोदेशः ।

ड मूत्रस्रोतः ।

ढ रेतोनाड़ी, शुक्रवाहिनी ।

ण मूलनाड़ीरन्ध्रम् ।

त त्वक् ।

थ शलाकाव्यवहारस्यावस्था । लिङ्गमेवमाक्षभ्य ऋजु कृत्वा चास्य रन्ध्राभ्यन्तरे शलाकां प्रवेशयति ।

अथ स्त्रीजननेन्द्रियाणि ।

भगमणिर्भगौष्ठौ च भगपद्मद्वयं तथा ।
भगलिङ्गञ्च योनिश्च तथा द्वे च कलायिके ॥
जरायुर्डिम्बवाहिन्यौ डिम्बकोषौ सडिम्बकौ ।
स्तनौ चेतीन्द्रियगणो नारीणां कथितो बुधैः ॥

भगमणिः ।

श्रोणिकास्थ्नोः पुरतस्त्वग्वसापरिनिर्मितः ।
उच्चैः सुकोमलो वृत्तः स्त्रीणां भगमणिः स्मृतः ॥
यदा बाल्यमतिक्रम्य तारुण्यं यान्ति योषितः ।
तदोद्भवन्ति लोमानि समन्तादस्य गात्रतः ॥

भगौष्ठौ ।

भगविवरसंवेष्टौ भगौष्ठौ पीवरौ मृदौ ।
मूलाधाराग्रसीमानं स्थिता यावत्तु तद्द्वयम् ॥
पुंसां कोषद्वयमिव स्मृतं प्रकृतितो बुधैः ।
बहिश्चर्ममयं चान्तः कलावद्यौवने पुनः ॥

लोमभिर्व्रियते स्त्रायुधरागन्यग्रादिसंयुतम् ॥

भगपत्त्री ।

पश्चाङ्गगौष्ठयोरूर्द्ध्वं कलावन्तौ सुकोमलौ ।
लिङ्गमुभयतः पत्त्री किञ्चिन्निम्नं समागतौ ॥

भगलिङ्गम् ।

भगौष्ठयोरूर्द्ध्वसन्धेः प्रायेण द्व्यङ्गुलादधः ।
चेतनं दीर्घदेहञ्च भगलिङ्गमिति स्मृतम् ॥
भगलिङ्गं यथा पुंसां मेढ्रः प्रकृतितो मतम् ॥

सामिचन्द्रः ।

अधस्ताद्योनिरन्ध्रस्य तनुचन्द्रार्द्धसन्निभः ।
कौमारे प्रायशः सामिचन्द्रो नारीषु दृश्यते ॥

कलायिकाद्वयम् ।

योनिरन्ध्रमुभयतः स्त्रीणां पुंवत् कलायिके ।

योनिः ।

योनिः कलामयी नाड़ी वस्तिगर्भे व्यवस्थिता ।
गुदस्य पुरतः पश्चान्मूत्राधारस्य कोमला ॥
आवर्त्तिनी भगौष्ठात्तु जरायुं समुपस्थिता ।
अधस्तान्मूत्ररन्ध्रस्य मुखं योनेरवस्थितम् ॥

जरायुः ।

गुदमूत्राशयान्तःस्थो जरायुर्गर्भमन्दिरम् ।
जरायुपार्श्वे नाड्यौ द्वे डिम्बनाड्यौ प्रकीर्त्तिते ॥
डिम्बकोषद्वयाड्डिम्बं नयतो गर्भकारणम् ।
जरायुकोषं नारीणां जातत्वानां स्वभावतः ॥


स्तनौ ।

स्तनौ द्वौ संख्यया स्यातां स्त्रियाञ्च पुरुषे तथा ।

तारुण्ये तु स्त्रिया पीनौ भवेतां चातिमोहनौ ॥
पर्शुकायास्तृतीयाया यावत षष्ठीमुरोऽस्थितः ।
आकक्षञ्च कृतस्थानावर्द्धवृत्तौ सुकोमलौ ॥
जाते महत्तमौ गर्भे स्यातां चापि पयस्विनौ ।
लम्बमानौ प्रसूताया हृद्यायाः शुष्यतश्च तौ ॥
स्तनयोरुभयोर्म्मध्ये वामः किञ्चिन्महत्तरः ।
चुचूकं स्तनवृन्तं स्याद्दुग्धनाडीभिरन्वितम् ॥

मूलाधारः ।

पायूपस्थान्तरस्थोऽसौ मूलाधारः प्रकीर्त्तितः ।
हर्षोऽस्यापि रिरंसूनामन्याङ्गानां यथा भवेत् ॥



दशमी प्रतिकृतिः ।

अ व दृश्यमप्रतिकृती ङ भगमणिः ।

न भगौष्ठः ।

ध भगपक्षः ।

द भगलिङ्गम् ।

त योनिः स्त्रीन्द्रियविवरं वा ।

ग,ग जरायुर्गर्भशय्या वा ।

य डिम्बकोषः ।

ट सूत्रनाड़ी ।

छ वस्तिर्मूत्राशयो वा ।

प कटुनिम्नाङ्गम् ।

ठ औपस्थिकास्थिसन्धिः ।


ब प्रसस्तरज्जुः ।

फ कटिस्था निम्नकशेरुका ।

च,च,च त्रिकास्थ्न ऊर्द्ध्वांशः ।

व त्रिकास्थ्नो निम्नांशः ।

श,श कलाङ्गतनिम्नाङ्गम् ।



चतुर्दशोऽध्यायः ।

अथ त्वक् ।

त्वचायमखिलः कायः संवृतो विश्वकर्म्मणा ।
बाह्योपद्रवसंघाताद्रक्षितः साधु तिष्ठति ॥
स्पर्शज्ञयवतीयं त्वक् तद्बाह्यत्वर्म्म कथ्यते ।
स्पर्शोऽत्र्यः प्रोच्यतेऽन्तस्त्वग्भूमिः स्पर्शेन्द्रियस्य सा ॥
उपर्य्युपरि विस्तीर्णैस्त्रिसप्तकसंवृतैः ।
एषा त्वगखिला जाता कैश्चिदिति च मन्यते ॥
तोयानिलादिसंकर्षैः स्वेदस्य च विनिर्गमैः ।
दैहिकस्योष्मणो रक्षा त्वचा सम्पाद्यते ध्रुवम् ॥

पञ्चदशोऽध्यायः ।

अथ गर्भोत्पत्तिक्रमः ।

तत्रादावार्त्तवप्रवृत्तिविवरणम् ।
यदा बाल्यमतिक्रम्य तारुण्यं यान्ति योषितः ।
कायश्च मानसो भावस्तदा तासां विवर्त्तते ॥
स्तनौ पीनोन्नतौ स्यातां योनिश्च परिवर्द्धते ।
समुद्भवन्ति लोमानि वस्तिदेशे समन्ततः ॥

जरायुकोषात् तन्वच्छं शोणितच्च प्रवर्त्तते ।
तदार्त्तवं रजश्चेति पुष्पनाम्ना च गद्यते ॥
मासि मासि स्रवेद्रक्तं शशशोणितसन्निभम् ।
लाक्षारसनिभं वापि तद्दोषं विनिर्दिशेत् ॥
तिस्रश्चतस्रो वा पञ्चाप्यनुबध्नाति तन्त्रियाः ।
अतोऽन्यथा रजः स्त्रीणां जानीयाद्दोषबन्धिकम् ॥
अरुग्णानामशोकानां प्रायशश्च प्रवर्त्तते ।
तद्दर्शाद्दादशाद्दूर्द्धं याति पञ्चाशतः क्षयम् ॥
आर्त्तवस्रावदिवसाद्दतुः षोडश रात्रयः ।
गर्भग्रहणयोग्यस्तु स एव समयः स्मृतः ॥
नारीणां प्रकृतेर्भेदाद्दतुकालस्य चान्यथा ।
गर्भग्रहणकालस्य कीर्त्तितं देहवेदिभिः ॥
दिने व्यतीते नियतं सङ्कुचत्यम्बुजं यथा ।
ऋतौ व्यतीते नारीणां योनिः संक्रियते तथा ॥
पुंस्कामा योषितः सर्वा ऋतुकाले भवन्ति हि ।
विज्ञेयो रतिकालः स रतिश्च फलदा तदा ॥
यथा धन्वनि बीजस्य वपनं विफलं भवेत् ।
अनृतौ रमणीसङ्गो ज्ञेयस्तद्वन्निरर्थकः ॥
सम्यग्विश्रान्तयोनीना [redacted]प्रवर्षणाम् ।
रतिर्योग्या नृभिर्योग्यैरपत्य फलदायिनी ॥


भ्रूणजन्मक्रमः ।

यथा भ्रूणस्य जन्म सौमन्त्युदरे नियतं प्रवृद्धिः ।
ततो भूमौ च पतनं तदतो नेखिलेन वक्ष्ये ॥
मदनाविर्भावसुखिनीं स्फुरन्नितम्बस्तनयोनिमाकुलाम् ।

पंस्कामां व्याधिहीनां रमणीं रमेत पुमान् रतिज्ञः ॥
अजातकामां रुग्णां दुःखार्त्तां शोकविकलीकृतचित्ताम् ।
तथान्यवेगाक्रान्तां प्रमदां न रमेत प्रजार्थी ॥

योग्यस्य पुंसः सुरतप्रसङ्गे
जाते रमण्या विधिना गुणिन्या ।
ऋतौ यथा प्राह्यपि बीजमुप्तं
निषिक्तवीर्य्यं फलवद्ध्रुवं स्यात् ॥
सम्यक्कृष्टे यथा क्षेत्रे तोयसिक्ते गुणान्विते ।
उप्तं काले शुभं बीजमङ्कुरः पालितं भवेत् ॥
तथा दोषविरहितं रेतो योनौ समर्पितम् ।
अदोषायामवसरे गर्भो नार्य्या भवेद्ध्रुवम् ॥
पुंवीर्य्यं स्खलितं नार्य्या धरां विशति रंहसा ।
ततो डिम्बाशयं याति तत्र रूपान्तरं व्रजेत् ॥
एकीभूय समायातौ जरायुं डिम्बरेतसौ ।
आवरणावृते तत्र बुद्बुदाभौ निरन्तरम् ॥
आद्यौ विन्दुनिभो जीवः शेते गर्भाशये स्त्रियाः ।
अर्द्धस्थिनिभो मासाच्चतुरस्रस्ततो भवेत् ॥
त्रिपञ्चात् परतः स्याच्च द्विधा भिन्नकलायवत् ।
नासत्रयान्मुखं तस्य नेत्रात्च यथातथम् ॥
मासत्रयाच्च गर्भस्य भवेत् सर्वाङ्गसंस्थितिः ।
ततः षण्मासपर्य्यन्तं पुष्टिर्भवति सन्ततम् ॥
स्यन्दते नियतं भ्रूणः षण्मासात् केशसम्भवः ।
सप्तमे मासि नयनं भवेत् प्रमुदितं ध्रुवम् ॥
मासेऽष्टमे भवेद्गर्भो ननु तिर्य्यग्वस्थितः ।

अधोमूर्द्धोऽङ्गचरणो नवमे मासि जायते ॥
कुक्षावुषित्वा च नव मासान्नवदिनाधिकान् ।
भूमौ ततः पतेद्गर्भो दशमे प्रकृते वशः ॥



एकादशी प्रतिकृतिः ।

अत्रैकादशचित्रवेत्रे [illegible] त्युगङ्गरम् ।
कत,कत,कत,कत अस्थायिनी भ्रूणावरका कला ।
कग,कग अस्थायिनी जरायुवेष्टिका कला ।
कच,कच अस्थायिनी जरायुवेष्टिका डिम्बकला ।
अस्मिन् चित्रवेत्रे जरायुमध्ये भ्रूणस्यावस्थितिः प्रदर्शिता ।

अथ सञ्जातगर्भाया लक्षणम्।

भवत्यात्तँवसंरोधः स्तनौ पीनौ पयस्विनौ।
उत्क्लेशो वमनञ्चापि प्रातर्वाप्यन्यदा भवेत्॥
योनिर्विवर्णा मूत्रस्य भवेद्रूपान्तरं तथा।
प्रसेकश्चोदरस्फोतिरालस्यं बलहीनता॥
मृद्भक्षाम्लाशनप्रेप्सा दौहृदान्तरलिप्सता।
अगुल्मलक्षणः स्पन्दो नीत्याहो रमणे सदा॥
एवं चान्यानि रूपाणि जानीयाद्गर्भजन्मनः।
आसन्नप्रसवा नारी स्रावोभिर्व्यथते मुहुः॥

इत्यायुर्वेदविज्ञाने शारीरस्थान समाप्तम्।

द्रव्यस्थानम् ।

—••—

प्रथमोऽध्यायः ।

अथ हृषवर्गः ।

जीवकर्षभकौ ।

जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ ।
रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ ॥
जीवकः कुर्चकाकार ऋषभो वृषशृङ्गवत् ।
जीवको मधुरः शृङ्गी कृष्णाङ्गः कूर्चशीर्षकः ॥
ऋषभो वृषभो धीरो विषाणी द्वाच इत्यपि ।
जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ ॥
मधुरौ पित्तदाहास्रकार्श्यवातक्षयापहौ ॥

मेदामहामेदे ।

महामेदाभिधः कन्दो मोरङ्गादौ प्रजायते ।
महामेदावनौ मेदा स्यादित्युक्तं मुनीश्वरैः ॥
शुक्लार्द्रकनिभः कन्दो लताजातः सुपाण्डुरः ।
महामेदाभिधो ज्ञेयो मेदालक्षणमुच्यते ॥
शुक्लकन्दो नखच्छेद्यो मेदो धातूनिव स्रवेत् ।
यः स मेदेति विज्ञेयो लिङ्गात्तत्परैर्जनैः ॥
स्वल्पपर्णी मणिच्छिद्रा कैटर्यः रोदोभवा धरा ।
महामेदा वसुच्छिद्रा ऋद्धिर्देवता मणिः ॥

मेदायुगं गुरु स्वादु हृद्यं स्नग्धकफावहम् ।
हृंहणं शीतलं पित्तरक्तवातज्वरप्रणुत् ॥

काकोलीक्षीरकाकल्यौ ।

जायते क्षीरकाकोली महामेदोद्भवस्थले ।
यत्र स्यात् क्षीरकाकोली काकोली तत्र जायते ॥
पीवरीसदृशः कन्दः क्षीरं स्रवति गन्धवान् ।
स प्रोक्ता क्षीरकाकोली काकोलीलिङ्गमुच्यते ॥
यथा स्यात् क्षीरकाकोली काकोल्यपि तथा भवेत् ।
एषा किञ्चिद्भवेत् कृष्णा मेदोऽयमुभयोरपि ॥
काकोली वायसोली च वीरा कायस्थिका तथा ।
सा शुक्ला क्षीरकाकोली वयस्था क्षीरवल्लिका ॥
कथिता क्षीरिणी धारा क्षीरशुक्ला पयस्विनी ।
काकोलीयुगलं शीतं शुक्रलं मधुरं गुरु ॥
हृंहणं वातदाहास्रपित्तश्लेष्मज्वरापहम् ॥

ऋद्धिवृद्धी ।

ऋद्धिर्वृद्धिश्च कन्दौ द्वौ भवतः कोशयामले ।
श्वेतलोमान्वितः कन्दो लताजातः सरन्ध्रकः ॥
स एव ऋद्धिर्वृद्धिश्च मेदमध्ये तयोर्ध्रुवे ।
तूलग्रन्थिसमा ऋद्धिर्वामावर्त्तफला च सा ॥
वृद्धिस्तु दक्षिणावर्त्तफला प्रोक्ता महर्षिभिः ।
ऋद्धिर्योज्यं सिद्धिलक्ष्मीः वृद्धेरभ्याह्वया इमे ॥
ऋद्धिर्बल्या त्रिदोषघ्नी शुक्रला मधुरा गुरुः ।
प्राणैश्वर्यकरी मूर्च्छारक्तपित्तविनाशिनी ॥
वृद्धिर्मेधाप्रदा शीता हृंहणी मधुरा स्मृता ।

द्राक्षा पित्तास्रशमनी क्षतकासक्षयापहा ॥
राज्ञामप्यष्टवर्गस्तु यतोऽयमतिदुर्लभः ।
तस्मादस्य प्रतिनिधिं गृह्णीयात्तद्गुणं भिषक् ॥

अष्टवर्गः ।

जीवकर्षभकौ मेदे काकोल्यौ ऋद्धिवृद्धिके ।
अष्टवर्गोऽष्टभिर्द्रव्यैः कथितस्त्वरकादिभिः ॥
अष्टवर्गो हिमः स्वादु र्बृंहणः शुक्रलो गुरुः ।
भग्नसन्धानकृत् कामबलासबलवर्धनः ॥
वातपित्तास्रदाहज्वरमेहक्षयप्रणुत् ॥

मुद्गपर्णी ।

मुद्गपर्णी काकपर्णी सूर्यपर्ण्यौल्पिका सहा ।
काकमुद्गा च सा प्रोक्ता तथा मार्जारगन्धिका ।
मुद्गपर्णी हिमा रूक्षा तिक्ता स्वादुश्च शुक्रला ।
चक्षुष्या क्षतशोषघ्नी वाहिणी ज्वरदाहनुत् ॥
दोषत्रयहरी लघ्वी ग्रहण्यर्शोऽतिसारजित् ।
वातरक्तं क्षयं कासं नाशयत्यविकल्पतः ॥
अस्या मात्रा ४ माषकाः ।

माषपर्णी ।

माषपर्णी सूर्यपर्णी काम्बोजी हयपुच्छिका ।
पाण्डुलोमशपर्णी च क्षुद्रवल्ली महासहा ॥
माषपर्णी हिमा तिक्ता रूक्षा शुक्रबलासकृत् ।
मधुरा वाहिणी शोषवातपित्तज्वरास्रजित् ॥
मात्रा ४ माषकाः ।

जीवन्ती ।

जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥
जीवन्ती शीतला स्वादु स्निग्धा दोषत्रयापहा ।
रसायनी बलकरी चक्षुष्या ग्राहिणी लघु. ॥
रक्तपित्तं क्षयं हन्ति दाहहृत् स्वरशोधिनी ॥

मात्रा २ माषकी ।

यष्टीमधु ।

यष्टीमधु तथा यष्टीमधुकं क्लीतकं तथा ।
अन्यत क्लीतनकन्तत्तु भवत्युपमधूलिका ॥
यष्टी हिमा गुरु स्वादी चक्षुष्या बलवर्णकृत् ।
स्निग्धा शुक्रला केश्या स्वर्या पित्तानिलास्रजित् ॥
व्रणशोथविषच्छर्दितृष्णाग्लानिक्षयापहा ।
शोषदाहरुचिघ्नी च कासानाशु विनाशयेत् ॥

मात्रा २ माषकी ।

जीवनीयगण ।

अष्टवर्गश्च पर्णिन्यौ जीवन्ती मधुकन्तथा ।
जीवनीयगण प्रोक्तो जीवनस्तु पुनस्तथा ॥

कपिकच्छु: ।

कपिकच्छूराभगुप्ता तथा प्रोक्ता च मर्कटी ।
अजरा कण्डुरा व्यङ्गा दु:स्पर्शा प्रावृषायणी ॥
लाङ्गली शूकशिम्बी च सैव प्रोक्ता महर्षिभि: ।
कपिकच्छुर्भृशं तथा मधुरा बृंहणी गुरु: ॥

तिक्ता वातहरीवल्या कफपित्तास्रनाशिनी ।
व्रणदोषप्रशमनी श्वासकासापनोदिनी ॥
तद्बीज वातशमनं स्मृतं वाजीकरं परम् ॥

अस्या बीजं ग्राह्यं, मात्रा ६ रत्तिकाः ; मूलक्वाथश्च ग्राह्यः, मात्रा ॥० तोलकः ।

मांसरोहिणी ।

मांसरोहिण्यतिरुहा वृत्ता चर्म्मकरी क्षमा ।
प्रहारवल्ली विकशा वीरवत्यपि कथ्यते ॥
स्यान्मांसरोहिणी वृष्या सरा दोषत्रयापहा ॥

मात्रा १ माषकः ।

बलाचतुष्टयम् ।

बला वाट्यालिका वाट्या सैव वाट्यालकाऽपि च ।
महाबला पीतपुष्पा सहदेवी च सा स्मृता ॥
ततोऽन्यातिबला ऋष्यप्रोक्ता कङ्कतिका च सा ।
गाङ्गेरुकी नागबला श्लेष्मा ह्रस्वा गवेधुका ॥
बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत् ।
स्निग्धं वाहि समीरास्रपित्तास्रक्षतनाशनम् ॥
बलामूलत्वचश्चूर्णं पीत सक्षीरशर्करम् ।
मूत्रातिसारं हरति दृष्टमेतन्न संशयः ॥
हरेन्महाबला कृच्छ्रं भवेद्वातानुलोमनी ।
हन्यादतिबला मेह पयसा सितया समम् ॥

मात्रा ४ माषकाः ।

कार्पासी ।

कार्पासी तुण्डकेरी च समुद्रान्ता च कथ्यते ।

कार्पासकी लघु. कोष्णा मधुरा वातनाशिनी ॥
तृष्णादाहारतिभ्रान्तिभ्रान्तिमूर्च्छाप्रणाशिनी ।
तत्पलाशं समीरघ्नं रक्तक्लन्मूत्रवर्द्धनम् ।
तत्क्वाथपीड़कानादपूयास्रावविनाशनम् ॥
तद्बीज स्तन्यदं हृद्यं स्निग्धं कफकरं गुरु ॥
मात्रा २ माषकी ।

वाराहीकन्द. ।

वाराहीकन्द एवान्यैश्चर्म्मकारालूकी मतः ।
आनूपे स भवेद्देशे वराह एव लोमवान् ॥
विदारी स्वादुकन्दा च सा तु क्रोष्ट्री सिता स्मृता ।
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी ॥
वाराहवदना गृष्टिर्वंदरेत्यपि कथ्यते ।
विदारी मधुरा स्निग्धा बृंहणी स्तन्यशुक्रदा ॥
शीता स्वर्या मूत्रला च जीवनी बलवर्णदा ।
गुरुः पित्तास्रपवनदाहान् हन्ति रसायनी ॥
मात्रा ४ माषकाः ।

विदारी ।

क्षीरशुक्लेक्षुगन्धा च क्रोष्ट्री शुक्ला शृगालिका ।
हृष्यकन्दा स्वादुकन्दा विदारी च विदारिका ॥
भूकुष्माण्डी स्वादुलता गजेष्टा वारिवल्लभा ।
हृष्यवल्ली विडाली च सा स्निग्धा मधुरा हिमा ॥
गुर्वी बलाग्निजननी पुष्टिदा वीर्य्यवर्द्धिनी ।
रक्तपित्तभ्रमश्रान्तितृष्णामूर्च्छापनोदिनी ॥

वातपित्तप्रशमनी बल्या वृष्या रसायनी ॥

मात्रा ४ माषकाः ।

अश्वगन्धा ।

गन्धाल्ला वाजिनामादिरश्वगन्धा हयाह्वया ।
वराहकर्णी वरदा बलदा कुष्ठगन्धिनी ॥
अश्वगन्धानिलश्लेष्मक्षितशोथक्षयापहा ।
बल्या रसायनी तिक्ता कषायोष्णातिशुक्ला ॥
आमवात व्रण कासं श्वासक्षाश्च व्यपोहति ।

मात्रा २ माषकौ ।

कौकिलाक्षः ।

कौकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरकः क्षुरः ।
भिक्षुः काण्डेक्षुरप्युक्त इक्षुगन्धेक्षुवालिका ॥
क्षुरकः शीतलो वृष्यः स्वादुश्लक्ष्णः पित्तलस्तथा ।
तिक्तो वातामशोथाश्मवृणारुच्यनिलास्रजित् ॥

मात्रा ४ माषकाः ।

शारिवाद्वयम् ।

कृष्णशारिवा । हिन्दी करियावांसा ।

इयं जम्बूकवत्पत्रा सुगन्धा कलघण्टिका ।
कृष्णा तु शारिवा श्यामा गोपी गोपबधूश्च सा ॥

शुक्लशारिवा । हिन्दी गोयारिया मारु ।

इयमपि जम्बूकवत्पत्रा दुग्धगर्भा व्रततिर्भवति ।
धवला शारिवा गोपी गोपकन्या कृशोदरी ।
स्फोटा श्यामा गोपवल्ली लतास्फोता च चन्दना ॥

श्यामापदेन कृष्णा श्वेतापि शारिवा कथ्यते सा श्वेतेन शारिवापदस्य प्रयुक्तत्वात् ।

द्वयोर्गुणाः ।

सारिवायुगलं स्वादु स्निग्धं शुक्रकरं गुरु ।
अग्निमान्द्यारुचिश्वासकासामविषनाशनम् ॥
दोषत्रयास्रप्रदरज्वरातीसारनाशनम् ।
स्वेदनं मूत्रकृच्छ्रघ्नं परं हृद्यं रसायनम् ॥
औपदंशिकरोगघ्नं सर्वचर्मविकारनुत् ।
आमवातं वातरक्तं सूतरोगांश्च नाशयेत् ॥

मात्रा ४ माषकाः ।

सुधामूली ।

सुधामूलासृतोत्था च वीरकन्दोऽस्त्रियां मतः ।
वीरकन्दोऽग्निजनन. शुक्रलो बलवर्धनः ॥
रक्तदोषहरो हृद्यो मन्मथोद्दीपनश्च सः ।
रसायनः परः हृद्य आयुष्यः पुष्टिदः स्मृतः ॥

मात्रा ४ माषकाः ।

अमरवल्ली ।

कीर्त्तितामरवल्ली च हृष्यवल्ली सुरागिणी ।
हृष्यवल्ली बलकरी परं हृद्या रसायनी ॥
मूत्रकृत् स्वेदजननी पुष्टिदा कार्श्यवारिणी ।
औपदंशिकरोगाश्च रक्तदोषं हरेदियम् ॥

मात्रा ४ माषकाः ।

पातालगरुडी ।

छिलिहिण्टी महामूल. पातालगरुडाह्वयः ।
छिलिहिण्ट पर वृष्यः कफघ्नः पवनापहः ॥
मात्रा २ माषकौ ।

द्वितीयोऽध्यायः ।

अथ रसायनवर्गः ।

आमलकी ।

त्रिष्वामलकमाख्यात धात्री तिष्यफलामृता ।
हरीतकीसमन्धात्रीफलं किन्तु विशेषतः ॥
रक्तपित्तप्रमेहघ्न पर वृष्यं रसायनम् ।
हन्ति वातं तदम्लत्वात् पित्त माधुर्य्यशैत्यत ॥
कफ रूक्षकषायत्वात् फलं धात्र्यास्त्रिदोषजित् ।
मज्जास्य हरति श्रान्तिं तृषा दाह वमिं भ्रमम् ॥
यस्य यस्य फलस्येह वीर्य्यं भवति यादृशम् ।
तस्य तस्यैव वीर्य्येण मज्जानमपि निर्दिशेत् ॥
मात्रा ४ माषकाः ।

चन्द्रशूरम् ।

चन्द्रिका चर्म्महन्त्री च पशुमेहनकारिका ।
नन्दिनी कारवी भद्रा वासपुष्पा सुवासरा ।

चन्द्रशूर हित हिङ्गावातघ्नेषातिसारिणाम् ।
अक्षखातगदद्वेषि बलपुष्टिविवर्द्धनम् ॥

अस्य बीजं ग्राह्यं, मात्रा ४ माषका. ।

चतुर्बीजम् ।

मेथिका चन्द्रशूरश्च कालाजाजी यवानिका ।
एतच्चतुष्टयं युक्तं चतुर्बीजमिति स्मृतम् ॥
तच्चूर्णं भक्षितं नित्यं निहन्ति पवनामयम् ।
अजीर्णं शूलमाध्मानं पार्श्वशूलं कटिव्यथाम् ॥

मात्रा २ माषकौ

चोवचिनी ।

दीपान्तरभवा किञ्चित्तिक्तोष्णा वह्निदीपिका ।
विबन्धाध्मानशूलघ्नी शुक्रमूत्रविशोधिनी ॥
वातव्याधिमपस्मारमुन्मादं तनुवेदनाम् ।
व्यपोहति विशेषेण फिरङ्गामयनाशिनी ॥

मात्रा १ माषक ।

भल्लातकम् ।

भल्लातकं त्रिषु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः ।
तथैवाग्निमुखो भल्लो वीरवृक्षश्च शोफकृत् ॥
भल्लातकफलं पक्वं स्वादुपाकरसं लघु ।
कषायं पाचनं स्निग्धं तीक्ष्णोष्णं छेदि भेदनम् ॥
मेध्यं वह्निकरं हन्तिकफवातव्रणोदरम् ।
कुष्ठार्शोग्रहणीगुल्मशोफानाहज्वरक्रिमीन् ॥
तन्मज्जा मधुरो हृद्यो दृंहणो वातपित्तहा ।
हृत्तमारुष्करं स्वादु पित्तघ्नं केश्यमग्निकृत् ॥

भल्लातकं कषायोष्णं शुक्लो मधुरो लघुः ।
वातश्लेष्मोदरानाहकुष्ठार्शोग्रहणीगदान् ।
हन्ति गुल्मज्वरक्षित्र वह्निमान्द्यक्रिमिव्रणान् ॥

मात्रा ४ रत्तिकाः ।

गुग्गुलुः ।

गुग्गुलुर्देवधूपश्च जटायुः कौशिकः पुरः ।
कुग्गोलुः खलक क्लीवे महिषाक्षः पलङ्कषः ॥
महिषाक्षो महानील कुमुदः पद्म इत्यपि ।
हिरण्यं पञ्चमो ज्ञेयो गुग्गुलोः पञ्च जातयः ॥
भृङ्गाञ्जनसवर्णस्तु महिषाक्ष इति स्मृतः ।
महानीलस्तु विज्ञेयः स्वनामसमलक्षणः ॥
कुमुदः कुमुदाभः स्यात् पद्मो माणिक्यसन्निभः ।
हिरण्याख्यस्तु हेमाभः पञ्चानां लिङ्गमीरितम् ॥
महिषाक्षो महानीलो गजेन्द्राणां हितावुभौ ।
हयानां कुमुदः पद्मः सर्वारोग्यकरौ परौ ॥
विशेषेण मनुष्याणां कनकः परिकीर्त्तितः ।
अभावान्महिषाक्षस्य मतः कैश्चित्तृणानपि ॥
गुग्गुलुर्विशदस्तिक्तो वीर्य्योष्णः पित्तलः सरः ।
भग्नसन्धानकृद्वृष्य कफवातव्रणापचीः ॥
मेदोमेहाश्मवातांश्च क्लेदकुष्ठाममारुतान् ।
पीडिकागण्डिशोफार्शो गण्डमालाक्रिमीन् जयेत् ॥
माधुर्य्याच्च भवेद्वातं कषायत्वाच्च पित्तहा ।
तिक्तत्वात् कफजित्तेन गुग्गुलुः सर्वदोषहा ॥
स नवो व्रणशुद्धिघ्नः पुराणस्त्वतिलेखनः ॥

स्निग्धः काञ्चनसङ्काशः पद्मजम्बूफलोपमः ।
नूतनो गुग्गुलुः प्रोक्तः सुगन्धिर्यस्तु पिच्छिलः ॥
शुष्को दुर्गन्धिकश्चैव त्यक्तप्रकृतवर्णकः ।
पुराणः स तु विज्ञेयो गुग्गुलुर्वीर्य्यवर्जितः ॥
अम्लं तीक्ष्णमजीर्णञ्च व्यवाय श्रममातपम् ।
मद्यं दोषन्त्यजेत् सम्यग् गुणार्थी गुग्गुलुसेवकः ॥
जायन्ते पुरुषादपा मरुभुवि ग्रीष्मेऽर्कसन्तापिताः
ग्रीतार्त्ताः गिरिरेऽपि गुग्गुलुरसं मुञ्चन्ति ते पञ्चधा ।
हेमाभं महिषाक्षतुल्यमपरं सत्पद्मरागोपमं
मङ्गाभं कुमुदद्युतिञ्च विधिना ग्राह्याः परीक्ष्य ततः ॥

वह्नौ ज्वलन्ति तपने विलयं प्रयान्ति
क्लिद्यन्ति कोष्णसलिले पयसः समानाः ।
ग्राह्या शुभाः परिहरेच्चिरकालजाता-
नङ्गारवर्णसमपूयविगन्धवर्णान् ॥

एतस्य निर्य्यासो ग्राह्यः, मात्रा २ माषकौ ।

मुशलीकन्दम् ।

तालमूली तु विज्ञेया मुशली परिकीर्त्तिता ।
सा द्विधा कीर्त्तिता प्राज्ञैः श्वेता चापरसञ्ज्ञिता ।
श्वेता स्वल्पगुणा प्रोक्ता त्वपरा च रसायनी ॥
मुशली मधुरा हृद्या वीर्य्योष्णा दृंहणी गुरुः ।
तिक्ता रसायनी हन्ति गुदजान्यनिलन्तथा ॥

अस्या मूलं ग्राह्यं, मात्रा १ माषकः ।

शतावरी महाशतावरी च ।

शतावरी बहुसुता भीरुरिन्दीवरी वरी ।

नारायणी शतपदी शतवीर्य्या च पीवरी ॥
महाशतावरी चान्या शतमूल्यर्द्धकण्ठिका ।
सहस्रवीर्य्या महती ऋष्यप्रोक्ता महोदरी ॥
शतावरी गुरुः शीता तिक्ता स्वादी रसायनी ।
मेधाग्निपुष्टिदा स्निग्धा नेत्र्या गुल्मातिसारजित् ॥
शुक्रस्तन्यकरी बल्या वातपित्तास्रमेहजित् ।
महाशतावरी मेध्या हृद्या वृष्या रसायनी ॥
शीतवीर्य्या स्निग्धमधुरग्रहणीनयनामयान् ॥
अस्या मूलं ग्राह्यं, मात्रा ४ माषकाः ।

भृङ्गराजः ।

भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
भृङ्गारक' केशराजो भृङ्गार' केशरञ्जन' ॥
भृङ्गार' कटुकस्तीक्ष्णो रूक्षोष्णः कफवातनुत् ।
केश्यस्वच्यः क्रिमिश्वासकासशोथामपाण्डुनुत् ।
दन्त्ये रसायनो बल्यः कुष्ठनेत्रशिरोऽर्त्तिनुत् ॥
अस्य सर्वाङ्गः स्वरसस्य ग्राह्य', मात्रा २ माषकौ ।

काकमाची ।

काकमाची ध्वाङ्क्षमाची काकाह्वा चैव वायसी ।
काकमाची त्रिदोषघ्नी स्निग्धोष्णा स्वरशुक्रदा ॥
तिक्ता रसायनी शीतकुष्ठार्शोज्वरमेहजित् ।
कटुर्नेत्रहिता हिक्काच्छर्द्दिहृद्रोगनाशिनी ॥
अस्या मूलं ग्राह्यं स्वरसस्य ग्रहणीयः मात्रा २ माषकौ ।

ब्रह्मपुष्पी ।

ब्रह्मपुष्पी तु ब्रह्माह्वा माङ्गल्यकुसुमापि च ।

ग्रहपुष्पी सरा मेध्या वृष्या मानसरोगहृत् ॥
रसायनी कषायोष्णा स्मृतिकान्तिबलाग्निदा ।
दोषापस्मार भूतासृक्कुष्ठक्रिमिविषप्रणुत् ॥
अस्या मूल ग्राह्यं स्वरसश्च ग्रहणीयः मात्रा २ माषकौ ।

ब्राह्मी ।

ब्राह्मी कपोतवङ्का च सोमवल्ली सरस्वती ॥

मण्डूकपर्णी ।

मण्डूकपर्णी माण्डूकी खाडी दिव्या महौषधी ।
ब्राह्मी हिमा सरा तिक्ता लघुर्मेध्या च शीतला ॥
कषाया मधुरा स्वादुपाकायुष्या रसायनी ।
स्वर्या स्मृतिप्रदा कुष्ठपाण्डुमेहास्रकासजित् ।
विषशोथज्वरहरी तद्वन्मण्डूकपर्णिनी ॥
अस्या सर्वाङ्गः स्वरसश्च ग्राह्यः मात्रा २ माषकौ ।

शाल्मलि ।

शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च ।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तुलनी ॥
शाल्मली शीतला स्वादी रसे पाके रसायनी ।
श्लेष्मला पित्तवातास्रहारिणी रक्तपित्तजित् ॥
पिच्छिला ग्राहिणी बल्या लघुः शुक्रकरी मता ।
शाल्मलीपुष्पशाकन्तु घृतसैन्धवसाधितम् ।
प्रदरं नाशयत्येव दुःसाध्यञ्च न संशयः ॥
अस्या मूलादिकं ग्राह्यं मात्रा २ माषकौ ॥

——

तृतीयोऽध्यायः ।

अथ वातघ्नवर्गः ।

धान्यकम् ।

धान्यकं धानकं धान्यं धाना धानेयकं तथा ।
कुनटी धेनिका छत्रा कुसुम्भुरु वितुन्नकम् ॥
धान्यक तुवर स्निग्धमहृद्यं मूत्रलं लघु ।
तिक्तं कटूष्णवीर्य्यञ्च दीपनं पाचनं स्मृतम् ॥
ज्वरघ्नं रोचकं ग्राहि स्वादुपाकि विदोषणुत् ।
तृष्णादाहवमिश्वासकासकार्श्यक्रिमिव्रणुत् ॥
आर्द्रन्तु तद्गुणं स्वादु विशेषात् पित्तनाशि तत् ॥
अस्य फलं ग्राह्यं, मात्रा २ माषकौ ।

अतसी ।

अतसी नीलपुष्पी च पार्वती स्वादुमा क्षुमा ।
अतसी मधुरा तिक्ता स्निग्धा पाके कटुर्गुरुः ॥
उष्णा दृक्शुक्रवातघ्नी कफपित्तविनाशिनी ।
कासातिसारहरणी व्रणसंशोधनी मता ॥
अस्या बीजं ग्राह्यं, मात्रा २ माषकौ ।

पाटला ।

पाटला पिच्छिला प्रोक्ता सा स्निग्धा कासवारिणी ।
श्रिश्रयोन्योर्हरेद्दाहं व्रणदाहनिवारणी ॥
अस्या बीजं ग्राह्यं, मात्रा २ माषकौ ।

शीतवीजम् । हिन्दी ईशबगुल ।

शीतवीजं गैरिकीकं शैत्यवीजञ्च गद्यते ।
मूत्रलं शीतवीजं स्याद्दुष्णवातनिवारणम् ॥
वस्तिसंशोधनं प्रोक्तं शुक्रमेहनिवारणम् ।
आध्मानापहरञ्चास्य योज्यः शीतकषायकः ॥
मात्रा २ माषकौ ।

तगरम् ।

कालानुसार्यं तगरं कुटिलं लघु संनतम् ।
अपरं पिण्डतगरं दण्डहस्ती च वर्हिणम् ॥
तगरद्वयमुष्णं स्यात् स्वादु स्निग्धं लघु स्मृतम् ।
विषापस्मारशूलाङ्गिरोगदोषव्रणापहम् ॥
योज्या तगरकाभावे शीतलौ तद्गुणा बुधैः ॥
अनयोर्मूलं ग्राह्यं, मात्रा २ माषकौ ।

स्वर्णवल्ली ।

स्वर्णवल्ली रक्तफला काकायुः काकवल्लरी ।
स्वर्णवल्ली शिरःपीड़ां त्रिदोषान् हन्ति दुग्धदा ॥
अस्याः सर्वांगो ग्राह्यः, मात्रा २ माषकौ ।

गन्धप्रसारणी ।

प्रसारणी राजबला भद्रपर्णी प्रतापनी ।
सरणी सारणी भद्रा बला चापि कटम्भरा ॥
प्रसारणी गुरुर्ष्या बलसन्धानकृत् सरा ।
वीर्योष्णा वातहृत् तिक्ता वातरक्तकफापहा ॥
एतस्याः सर्वांगो ग्राह्यः, मात्रा २ माषकौ ।

चतुर्थोऽध्यायः ।

अथ पित्तघ्नवर्गः ।

वारिपर्णी शैवालञ्च ।

वारिपर्णी कुम्भिका स्याच्छैवालं शैवलञ्च तत् ॥
वारिपर्णी हिमास्लिक्ता लघ्वी स्वादी सरा कटुः ।
दोषत्रयहरी रूक्षा शोणितज्वरशोथहृत् ॥
शैवालं तुवरं तिक्तं मधुरं शीतलं लघु ।
स्निग्धं दाहतृषापित्तरक्तज्वरहरं परम् ॥
अनयो सर्वयो ग्राह्यमात्रा २ माषको ।

कलिङ्गशुण्ठी ।

कलिङ्गशुण्ठी तिक्ता स्याद्बलकफक्लिविर्द्धिनी ।
अजीर्णं निखिलं हन्ति बालातीसारनाशिनी ॥
यवक्षारयुता वान्तिं गर्भिण्याश्चापि संहरेत् ॥
अस्या मूलं ग्राह्यं, मात्रा १ माषकः ।

नाडिकम् ।

नाड़िकं कालशाकञ्च शाडशाकञ्च कालकम् ।
कालशाकं सरं रूच्यं वातरक्तं कफशोथहृत् ॥
बल्यं रुचिकरं मेध्यं रक्तपित्तहरं हिमम् ॥

अपिच,

नाड़ीचशाकं द्विविधं तिक्तं मधुरमेव च ।
रक्तपित्तहरं तिक्तं क्रिमिकुष्ठविनाशनम् ॥

मधुरं पिच्छिलं शीतं विष्टम्भि कफवातहृत् ॥
अस्य पत्रं ग्रहणीयं, मात्रा २ माषकौ ।

पर्पटः ।

पर्पटो वरतिक्तश्च स्मृतः पर्पटकश्च सः ।
कथितः पांशुपर्य्यायस्तथा कवचनामकः ॥
पर्पटो हन्ति पित्तास्रभ्रमतृष्णाकफज्वरान् ।
संग्राही शीतलस्निग्धो दाहनुद्दातलो लघुः ॥
एतस्य सर्वांशो ग्राह्यः, मात्रा २ माषकौ ।

वेतसः ।

वेतसो नम्रकः प्रोक्तो वानीरो वञ्जुलस्तथा ।
अम्बुपुष्पश्च विदुलो रथः शीतश्च कीर्त्तितः ॥
वेतसः शीतलो दाहश्रोथार्शोयोनिरुक्प्रणुत् ।
हन्ति वीसर्पकृच्छ्रास्रपित्ताश्मरीकफानिलान् ॥
अस्य मूलं शाखाग्रञ्च ग्राह्यं, मात्रा १ माषकः ।

जलवेतसः ।

निकुञ्जकः परिव्याधो नादेयो जलवेतसः ।
जलजो वेतसः शीतः कुष्ठहृद्दातकोपनः ॥
अस्य सर्वांशो ग्राह्यः, मात्रा १ माषकः ।

हिज्जलः ।

हिज्जलो हिज्जलश्चापि निचुलश्चाम्बुजस्तथा ।
जलवेतसवद्वेद्यो हिज्जलोऽयं विषापहः ॥
अस्य बीजं ग्राह्यं, मात्रा ६ रक्तिकाः ।

नीलदूर्वा ।

नीलदूर्वा रुहानन्ता भार्गवी शतपर्विका ।
श्यामा सहस्रवीर्य्या च शतवल्ली च कीर्त्तिता ॥
नीलदूर्वा हिमा तिक्ता मधुरा तुवरा हरेत् ।
कफपित्तास्रवीसर्पतृष्णादाहत्वगामयान् ॥

अस्या मात्रा १ माषकः, स्वरसमात्रा च तोलक-स्तोलकद्वयम् ।

श्वेतदूर्वा ।

दूर्वा शुक्ला च गोलोमी शतवीर्य्या च कथ्यते ॥
श्वेता दूर्वा कषाया स्यात् स्वादौ बल्या च जीवनी ।
तिक्ता हिमा विसर्पास्रतृट्पित्तकफदाहहृत् ॥

अस्या मात्रा २ माषकौ, स्वरसमात्रा च तोलैक-स्तोलकद्वयम् ।

गण्डदूर्वा ।

गण्डदूर्वा तु गण्डाली मल्याच्ची शकुलाशकः ।
गण्डदूर्वा हिमा लोहद्राविणी ग्राहिणी लघुः ॥
तिक्ता कषाया मधुरा वातश्लेष्मकटूपाकिनी ।
दाहतृष्णाबलासास्रकृच्छ्रपित्तज्वरापहा ॥

एतस्याः सर्वांशो ग्राह्यः, मात्रा १ माषकः । सदास्या रसोऽपि पानार्थं ग्राह्यः, मात्रा चास्य तोलैकत-स्तोलकद्वयम् ।

हंसपदी ।

हंसपादी हंसपदी कोटमाता त्रिपादिका ॥

हंसपादी गुरुः शीता हन्ति रक्तविषव्रणान् ।
विसर्पदाहातीसारलूताभूताग्निरोहिणीः ॥
अस्या मूलं ग्राह्यं, मात्रा ६ रत्तिकाः ।

भूमिसहः ।

भूमिसहो द्वारदारुर्वरदारुः खरच्छदः ।
भूमिसहस्तु ग्रथिरो रक्तपित्तप्रसादनः ॥
अस्य मूलं ग्राह्यं, मात्रा ६ रत्तिकाः ।

पटोलपत्रम् ।

पटोलपत्रं पित्तघ्नं दीपनं पाचनं लघु ।
स्निग्धं हृद्यं तथोष्णञ्च ज्वरकासकृमिप्रणुत् ॥
मात्रा २माषकौ ।

दुग्धपाषाणः ।

दुग्धपाषाणकः क्षीरी दुग्धाश्मा क्षीरसम्भवः ।
दीप्तिको दुग्धपाषाणो दुग्धी वज्राभ एव च ॥
दुग्धपाषाणको रुच्यो नात्युष्णो ज्वरपित्तहृत् ।
शूलहृद्रोगशमनः कासाध्मानविनाशनः ॥
अस्य सर्वांशो ग्रहणीयः मात्रा २ माषकौ ।

पञ्चमोऽध्यायः ।

अथ कफघ्नवर्गः ।

रास्ना ।

रास्ना युक्तरसा रम्या सुवहा रसना रसा ।
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ॥
रास्नामपाचनी तिक्ता गुरूष्णा कफवातजित् ।
शोथश्वासससमीरास्रवातशूलोदरापहा ॥
कासज्वरविषाशीतिवातिकामयनाशिनी ॥
मात्रा २ माषकौ ।

नाकुली रास्नाभेदः ।

नाकुली सरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सूर्य्याङ्गी विषनाशिनी ॥
नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत् ।
भोगिलूताङ्गिकाखुविषज्वरक्रिमिव्रणान् ॥
अस्याः सर्वांगो ग्राह्यः, मात्रा २ माषकौ ।

मरिचम् ।

मरिचं वेल्लजं कृष्णमूषणं धर्मपत्तनम् ।
मरिचं कटुकं तीक्ष्णं दीपनं कफवातजित् ॥
उष्णं पित्तकरं रूक्षं श्वासशूलक्रिमीन् हरेत् ॥
तदार्द्रं मधुरं पाके नात्युष्णं कटुकं गुरु ।
किञ्चित्तीक्ष्णगुणं श्लेष्मप्रसेकि स्यादपित्तलम् ॥
अस्य बीजमात्रा १ माषकः ।

शुण्ठी ।

शुण्ठी विश्वा च विश्वञ्च नागरं विश्वभेषजम् ।
जघनं कटुभद्रञ्च शृङ्गवेर महौषधम् ॥
शुण्ठी रुच्यामवातघ्नी पाचनी कटुका लघुः ।
स्निग्धोष्णा मधुरा पाके कफवातविबन्धनुत् ॥
हृद्या सर्व्या वह्निश्वासशूलकासहृदामयान् ।
हन्ति श्लीपदशोथार्शआनाहोदरमारुतान् ॥
आग्नेयगुणभूयिष्ठं तोयांशम्मरिशोषि यत् ।
संगृह्णाति मलं तत्तु आहि शुण्ठ्यादयो यथा ॥
विबन्धभेदनी या तु सा कथं ग्राहिणी भवेत् ।
शक्तिर्विबन्धभेदे स्यात् यतो न मलपातने ॥

मात्रा १ माषकः ।

पिप्पलीमूलम् ।

ग्रन्थिकं पिप्पलीमूलमूषणं चटकाशिरः ।
दीपनं पिप्पलीमूलं कटूष्णं पाचन लघु ॥
रूक्षं पित्तकरं भेदि कफवातोदरापहम् ।
आनाहप्लीहगुल्मघ्नं क्रिमिश्वासचयापहम् ॥

मात्रा १ माषकः ।

चव्यम् ।

भवेच्चव्यन्तु चविका कथिता सा तथोषणा ।
कणामूलगुणं चव्यं विशेषात् गुदजापहम् ॥

अस्य लक् ग्राह्या, मात्रा १ माषकः ।

शुक्लरक्तैरण्डः ।

शुक्ल एरण्ड आमण्डश्चिरो गन्धर्वहस्तकः ।

पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डो व्यडम्बकः।
वातारिस्तरुणश्चापि रुवूकश्च निगद्यते॥
रक्तोऽपरो रुवुकः स्यादुरुवूको रुवुस्तथा।
व्याघ्रपुच्छश्च वातारिश्चुरुत्तानपलकः॥
एरण्डयुग्मं मधुरमुष्णं गुरु विनाशयेत्।
शूलशोथकटीवस्तिशिरःपीड़ोदरज्वरान्।
ग्रध्रखासकफानाहकासकुष्ठाममारुतान्॥
एरण्डपत्रं वातघ्नं कफक्रिमिविनाशनम्।
मूत्रकृच्छ्रहरञ्चापि पित्तरक्तप्रकोपनम्॥
वातार्श्यग्रदलं गुल्मवस्तिशूलहरं परम्।
कफवातक्रिमीन् हन्ति हृद्विं सप्तविधामपि॥
एरण्डफलमत्युष्णं गुल्मशूलानिलापहम्।
यकृत्प्लीहोदरार्शोघ्नं कटुकं दीपनं परम्॥
तद्वन्मज्जा च विड्भेदी वातश्लेष्मोदरापहः॥

अस्य मूलं तैलञ्च सदा ग्राह्यं, मूलमात्रा २ माषकौ।

ताम्बूलवल्ली।

ताम्बूलवल्ली ताम्बूली नागिनी नागवल्लरी।
ताम्बूलं विशदं रुच्यं तीक्ष्णोष्णं तुवरं सरम्॥
वश्यं तिक्तं कटुचारं रक्तपित्तकरं लघु।
बल्यं श्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम्॥

अस्याः पत्रं ग्राह्यं पत्ररसञ्च ग्रहणीयः, मात्रा ४ माषकाः।

बिल्वः ।

बिल्वः शाण्डिल्यशैलूषो मालूरश्रीफलावपि ॥
श्रीफलत्रुवरस्थिल्लो ग्राही रूक्षोऽग्निपित्तकृत् ।
वातश्लेष्महरो बल्यो लघुरुष्णश्च पाचनः ॥
अस्य मूलत्वग् ग्राह्या, मात्रा १ माषकः ।

गाम्भारी ।

गाम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ।
काश्मीरी काश्मरी हीरा काश्मर्यः पीतरोहिणी ।
क्षुद्रत्वक्षा मधुरसा महाकुसुमिकापि च ॥
काश्मरी तुवरा तिक्ता वीर्योष्णा मधुरा गुरुः ।
दीपनी पाचनी मेध्या मेदिनी भ्रमशोषजित् ।
दोषत्रयामशूलार्शोविषदाहज्वरापहा ॥
तत्फलं हृद्यं वृष्यं गुरु केश्यं रसायनम् ।
वातपित्तत्रयारक्तक्षयमूत्रविबन्धनुत् ॥
स्वादु पाके हिमं स्निग्धं तुवरास्रविशुद्धिकृत् ।
हन्याद्दाहत्रयावातरक्तपित्तक्षतक्षयान् ॥
अस्य मूलत्वग् ग्राह्या, मात्रा १ माषकः ।

पाटला ।

पाटलिः पाटला मोघा मधुदूती फलेरुहा ।
क्षुद्रत्वक्षा कुबेराक्षी कालस्थाख्यलिवल्लभा ।
ताम्रपुष्पी च कथिता परा स्यात् पाटला सिता ॥
सुष्कको मोचको घण्टापाटलिः काष्ठपाटला ।
पाटला तुवरा तिक्तानुष्णा दोषत्रयापहा ।

अरुचिश्वासयोथास्रच्छर्दिहिक्कातृषाहरी ॥
पुष्यं कषायं मधुरं हिम हृद्यं कफास्रनुत् ।
पित्तातिसारहृत्कण्ठ्यं फलं हिक्कास्रपित्तहृत् ॥

कालिस्थालीत्यत्र काचस्थालीत्यिके ।

अस्या मूलत्वग् ग्राह्या, मात्रा १ माषकः ।
पाटलिपुष्पस्य मात्रा १ माषकः ।

अग्निमन्थः ।

अग्निमन्थो जयः स स्यात् श्रीपर्णी गणिकारिका ।
जया जयन्ती तर्कारी नाडेयी वैजयन्तिका ॥
अग्निमन्थः क्षयश्वासहृद्रोगार्शोघ्नः कफवातहृत् ।
पाण्डुनुत् कटुकस्तिक्तस्तुवरो मधुरोऽग्निदः ॥

अस्या मूलत्वग् ग्राह्या, मात्रा १ माषकः ।

श्योनाकः ।

श्योनाकः शोभणश्च स्यान्नटकट्वङ्गटुण्टुकाः ।
मण्डूकपर्णपत्रोर्णशुकनासकुटन्नटाः ।
दीर्घवृन्तोऽरलुश्चापि पृथुशिम्बः कटम्भरः ॥
श्योनाको दीपनः पाके कटुकस्तुवरो हिमः ।
ग्राही तिक्तोऽनिलश्लेष्मपित्तकासप्रणाशनः ॥
टुण्टुकस्य फलं बाल रूक्षं वातकफापहम् ।
हृद्यं कषाय मधुरं रोचनं लघु दीपनम् ।
गुल्मार्शःक्रिमिहृत् प्रौढ़ गुरुवातप्रकोपनम् ॥

अस्य मूलत्वग् ग्राह्या, मात्रा १ माषकः ।

हृहत् पञ्चमूलम् ।

श्रीफलः सर्वतोभद्रा पाटला गणिकारिका ।

श्योनाकः पञ्चभिश्चैतैः पञ्चमूलं महन्मतम् ॥
पञ्चमूलं महत् तिक्तं कषायं कफवातनुत् ।
मधुरं श्वासकासघ्नमुष्णं लघ्वग्निदीपनम् ॥

शालपर्णी ।

शालपर्णी स्थिरा सौम्या त्रिपर्णी पीवरी गुहा ।
विदारीगन्धा दीर्घाङ्गी दीर्घपत्रांशुमत्यपि ॥
शालपर्णी गरच्छर्दीज्वरश्वासातिसारजित् ।
शोषदोषत्रयहरी हृंहण्युक्ता रसायनी ॥
तिक्ता विषहरी स्वादुः क्षतकासक्रिमिप्रणुत् ॥

अस्या मूलं ग्राह्यं, तदभावे सर्वांगो ग्रहणीयः । मात्रा १ माषकः ।

पृश्निपर्णी ।

पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिपर्ण्यपि ।
क्रोष्टुविन्ना सिंहपुच्छी कलसी धावनिर्गुहा ॥
पृश्निपर्णी त्रिदोषघ्नी हृद्योष्णा मधुरा सरा ।
हन्ति दाहज्वरश्वासरक्तातिसारहृद्भ्रमीः ॥

अस्या मूलं ग्राह्यं, तदभावे सर्वांगो ग्रहणीयः । मात्रा १ माषकः ।

हृहती ।

वार्त्ताकी क्षुद्रभण्टाकी महती हृहती कुली ।
चिङ्गुली राष्ट्रिका सिंही महोष्ट्री दुःप्रधर्षिणी ॥
हृहती ग्राहिणी हृद्या पाचनी कफवातहृत् ।
कटुतिक्तास्यवैरस्यमलारोचकनाशिनी ॥

उष्णा कुष्ठज्वरश्वासशूलकासाग्निमान्द्यजित् ॥

अस्या मूलं ग्राह्यं, मूलाभावे सर्वाङ्गो ग्रहणीयः । मात्रा १ माषकः ।

कण्टकारी ।

कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका ।
कण्टालिका कण्टकिनी धावनी बृहती तथा ॥

उभे च बृहत्यौ । यत आह सुश्रुतः ।
क्षुद्रायां क्षुद्रभण्टेक्ष्वा बृहतीति निगद्यते ॥
श्वेता क्षुद्रा चन्द्रहासा लक्ष्मणा चैत्यदूतिका ।
गर्भदा चन्द्रभा चन्द्री चन्द्रपुष्पा प्रियङ्करी ॥
कण्टकारी सरा तिक्ता कटुका दीपनी लघुः ।
रूक्षोष्णा पाचनी कासश्वासज्वरकफानिलान् ।
निहन्ति पीनसं श्वासपार्श्वपीडाहृदामयान् ॥
तयोः फलं कटुरसे पाके च कटुकं भवेत् ।
शुक्रस्य रेचनं भेदि तिक्तं पित्ताग्निकृल्लघु ॥
हन्यात् कफमरुत्कण्डूकासभेदकृमिज्वरान् ।
वृहत् प्रोक्ता सिता क्षुद्रा विशेषाद्गर्भकारिणी ॥

अस्या मूलं ग्राह्यं, मूलाप्राप्तौ सर्वाङ्गो ग्रहणीय । मात्रा १ माषकः ।

गोक्षुर ।

गोक्षुरः क्षुरकोऽपि स्याच्चिकण्टः स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ।
पलङ्कषाख्यदंष्ट्रा च तथा स्यादिक्षुगन्धिका ॥
गोक्षुरः शीतलः स्वादुर्बलकृद्वस्तिशोधनः ।

मधुरो दीपनो हृद्यः पुष्टिदश्चाग्निरीहरः ।
प्रमेहश्वासकासार्शःकृच्छ्रहृद्रोगवातनुत् ॥
त्रिकण्टयाकं हृद्यं स्यात् तिक्तं स्रोतोविशोधनम् ॥

अस्य मूलं ग्राह्यं, मूलाभावे सर्वांगो ग्रहणीयः । मात्रा १ माषकः ।

लघु पञ्चमूलम् ।

शालपर्णी पृश्निपर्णी वार्त्ताकी कण्टकारिका ।
गोक्षुरः पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम् ॥
पञ्चमूलं लघु स्वादु बल्यं पित्तानिलापहम् ।
नात्युष्णं हृद्यं ग्राहि ज्वरश्वासाग्निरोप्रणुत् ॥

दशमूलम् ।

उभाभ्यां पञ्चमूलाभ्यां दशमूलमुदाहृतम् ॥
दशमूलं त्रिदोषघ्नं श्वासकासग्निरोरुजः ।
तन्द्राशोथज्वरानाहपार्श्वपीडारुचीर्हरेत् ॥

शोभाञ्जन ।

शोभाञ्जनः श्यामः श्वेतो रक्तश्च ।
शोभाञ्जनः शिग्रुतीक्ष्णगन्धकाक्षीवमोचकाः ।
तद्बीजं श्वेतमरिचं मधुशिग्रुः सलोहितः ॥
शिग्रुः कटुः कटुः पाके तीक्ष्णोष्णो मधुरो लघुः ।
दीपनो रोचनो रूक्षः क्षारस्निग्धो विदाहकृत् ॥
संग्राही शुक्रलो हृद्यः पित्तरक्तप्रकोपनः ।
चक्षुष्यः कफवातघ्नो विद्रधिक्षयशुक्रिमीन् ॥
मेदोऽपचीविषप्लीहगुल्मगण्डव्रणान् हरेत् ।
श्वेतः प्रोक्तगुणो ज्ञेयो विशेषाद्दाहकृद्भवेत् ॥

प्लीहानं विद्रधिं हन्ति व्रणघ्नः पित्तरक्तहृत्।
मधुशिग्रुः प्रोक्तगुणो विशेषाद्दीपनः सरः॥
शिग्रुवल्कलपत्राणां स्वरसः परमार्त्तिहृत्।
चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम्॥
अक्षथं कफवातघ्नं तत्स्नेन शिरोऽर्त्तिनुत्॥

अस्य बीजादिकं ग्राह्यं, बीजस्य मात्रा १ माषकः, स्वरसस्य मात्रा २ माषकौ।

चिल्लकः।

चिल्लको वातनिर्हारी श्लेष्मघ्नो धातुपुष्टिकृत्।
आग्नेयो विषवद्यस्य फलं मल्यनिषूदनम्॥

अस्य सर्वांगो ग्राह्यः, मात्रा १ माषकः।

टङ्कारी।

टङ्कारी वातजित्तिक्ता श्लेष्मघ्नी दीपनी लघुः।
शोथोदरव्याधाहन्त्री हितापि च विसर्पिणाम्॥

अस्याः सर्वांगो ग्राह्यः, मात्रा २ माषकौ।

अङ्कोटः।

अङ्कोटो दीर्घकीलः स्यादङ्कोलश्च निकोचकः।
अङ्कोटकः कटुस्तीक्ष्णः स्निग्धोष्णस्तुवरो लघुः॥
रेचनः कृमिशूलामशोफव्रणविषापहः।
विसर्पकफपित्तास्रमूषकादिविषापहः॥
तत्फलं शीतलं स्वादु श्लेष्मघ्नं बृंहणं गुरु।
बल्यं विरेचनं वातपित्तदाहक्षयास्रजित्॥

अस्य मूलत्वग्ग्राह्या, मात्रा २ माषकौ।

भूतृणम् ।

गुच्छबीजन्तु भूतृणं सुगन्धं जम्बुकप्रियम् ।
भूतृणं तु भवेच्छ्रेष्ठा मालातृणकमित्यपि ॥
भूतृण कटुक तिक्तं तीक्ष्णोष्णं रेचनं लघु ।
विदाहि दीपनं रूक्षमनेत्र्यं मुखशोधनम् ।
अहृद्य बहुविट्कञ्च पित्तरक्तप्रदूषणम् ॥

अस्य सर्वांशो ग्रहणीयः, मात्रा २ माषकौ ।

कर्चूरम् ।

कर्चूरं रौहिषं देवजग्धं सौगन्धिकं तथा ।
भूतिकं व्यामपीरञ्च श्यामकं धूमगन्धिकम् ॥
रौहिषं तुवरं तिक्तं कटुपाकं व्यपोहति ।
हृत्कण्ठव्याधिपित्तास्रशूलकासकफज्वरान् ॥

अस्य सर्वांशो ग्राह्यः, मात्रा २ माषकौ ।

मुण्डितिका ।

मुण्डी भिक्षुः परिव्रोक्ता श्रावणी च तपोधना ।
श्रवणाह्वा मुण्डतिका तथा श्रवणशीर्षका ॥
महाश्रावणिकाख्या तु सा स्मृता भूकदम्बिका ।
कदम्बपुष्पिका च स्याद्व्यक्षतितपस्विनी ॥
मुण्डितिका कटुः पाके वीर्य्योष्णा मधुरा लघुः ।
मेध्या गण्डापचीकुष्ठकृमियोन्यर्त्तिपाण्डुनुत् ॥
श्लीपदारुच्यपस्मारप्लीहमेदोगुदार्त्तिहृत ।
महामुण्डी च तत्तुल्या गुणैरुक्ता महर्षिभिः ॥

सर्वांशोऽस्या ग्राह्यः, मात्रा १ माषकः ।

अपामार्गः।

अपामार्गस्तु शिखरी ह्यधःशल्यो मयूरकः।
मर्कटी दुर्ग्रहा चापि किणिही खरमञ्जरी॥
अपामार्गः सरस्तीक्ष्णो दीपनस्तिक्तकः कटुः।
पाचनी रोचनो हृद्यः कफमेदोऽनिलापहः।
निहन्ति हृद्रुजाध्मार्शःकण्डूशूलोदरापचीः॥

अस्य मूलं ग्राह्यं, तदभावे सर्वांगो ग्रहणीयः। मात्रा १ माषकः।

रक्तापामार्गः।

रक्तोऽन्यो वसिरो हस्तफलो धामार्गवोऽपि च।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली॥
अपामार्गोऽरुणो वातविष्टम्भी कफकृत् हिमः।
रूक्षः पूर्वगुणैर्न्यूनः कथितो गुणवेदिभिः॥
अपामार्गफलं स्वादु रसे पाके च दुर्जरम्।
विष्टम्भि वातलं रूक्षं रक्तपित्तप्रसादनम्॥

मात्रा १ माषकः।

श्वेतपुनर्नवा।

पुनर्नवा श्वेतमूला शोथघ्नो दीर्घपत्रिका।
कटुः कषायानुरसा पाण्डुघ्नो दीपनो गुरुः।
शोथानिलगरश्लेष्महरी ब्रह्मोदरप्रणुत्।
कामहृद्रोगदुर्नामशूलानिलनिकृन्तनी॥

अस्याः सर्वांगो ग्राह्यः, मात्रा २ माषकौ।

रक्तपुष्पा पुनर्नवा।

पुनर्नवापरा रक्ता रक्तपुष्पा मिलाटिका।

शोथघ्नः क्षुद्रवर्षाभूर्वकेतुः कपिलकः ॥
पुनर्नवाकषाया तिक्ता कटुपाका हिमा लघुः ।
वातला ग्राहिणी श्लेष्मपित्तरक्तविनाशिनी ॥
सर्वांशोऽस्या ग्राह्यः, मात्रा २ माषकौ ।

वन्दा ।

वन्दा वृक्षादनी वृक्षभक्षा वृक्षरुहापि च ।
वन्दाकः स्वादिमस्तिक्तः कषायो मधुरो रुचे ॥
माङ्गल्यः कफवातास्रकृच्छ्रव्रणविषापहः ।
पित्तदाहश्रमहरो बल्यो वृष्यो रसायनः ॥
अस्याः सर्वांशो ग्राह्यः, मात्रा १ माषकः

अलम्बुषा (लज्जालुभेदः) ।

अलम्बुषा खरत्वक् च तथा भेदोगला स्मृता ।
अलम्बुषा लघुः स्वादुः क्रिमिपित्तकफापहा ।
सर्वांशोऽस्या ग्राह्यः, मात्रा १ माषकः ।

दुग्धिका ।

दुग्धिका स्वादुपर्णी स्यात् क्षीरा विक्षीरिणी तथा ।
दुग्धिकोष्णा गुरू रूक्षा वातला गर्भकारिणी ॥
स्वादु क्षीरा कटुस्तिक्ता सृष्टसूत्रमला पटुः ।
मृदुर्विष्टम्भिनी वृष्या कफकुष्ठक्रिमिव्रणुत् ॥
अस्याः सर्वांशो ग्राह्यः, मात्रा १ माषकः ।

द्रोणपुष्पी ।

द्रोणा च द्रोणपुष्पी च फलपुष्पा च कीर्तिता ।
द्रोणपुष्पी गुरुः स्वादू रूक्षोष्णा वातपित्तकृत् ॥
सतीक्ष्णलवणा स्वादुपाका कट्वी च भेदिनी ।

कफामकामलामोघतमकघ्नासजन्तुजित् ॥
अस्याः सर्वाश्चो ग्रहणीय', मात्रा १ माषकः ।

आदित्यभक्ता ।

सुवर्चला सूर्यभक्ता वरदा वदरापि च ।
सूर्यावर्त्ता रविप्रीताऽपरा ब्रह्मसुदुर्लभा ॥
सुवर्चला हिमा रूक्षा स्वादुपाका सरा गुरुः ।
अपित्तला कटुः क्षारा विष्टम्भकफवातजित् ॥
अन्या तिक्ता कषायोष्णा सरा रूक्षा लघुः कटुः ।
निहन्ति कफपित्तास्रश्वासकासारुचिज्वरान् ।
विस्फोटकुष्ठमेहास्रयोनिरुक्क्रिमिपाण्डुताः ॥
अस्याः पचाङ्गिकं ग्राह्यं, मात्रा १ माषकः ।

बन्याकर्कोटकी ।

बन्याकर्कोटकी देवी कन्या योगीश्वरीति च ।
नागारिर्नक्रदमनी विषकण्टकिनी तथा ॥
बन्याकर्कोटकी लघ्वी कफनुद्व्रणरोपिनी ।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी ॥
सर्वाश्चोऽस्या ग्रहणीय', मात्रा २ माषकौ ।

तुलसी शुक्ला कृष्णा च ।

तुलसी सुरसा ग्राम्या सुलभा बहुमञ्जरी ।
अपेतराक्षसी गौरी शूलघ्नी देवदुन्दुभिः ॥
तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत् ।
दीपनी कुष्ठकृच्छ्रास्रपार्श्वरुक्कफवातजित् ॥
शुक्ला कृष्णा च तुलसी गुणैस्तुल्या प्रकीर्त्तिता ॥

अस्या पत्ररसो ग्राह्य, मूलादिकञ्च ग्रहणीयम्।
मात्रा २ माषकौ ।

वर्वरी ।

वर्वरी तुवरी तुङ्गी खरपुष्पाजगन्धिका ।
पर्णाख्यस्तत्र कृष्णे तु कठिल्लककुठेरकौ ॥
तत्र शुक्लोऽर्जकः प्रोक्तो वटपत्रस्ततोऽपरः ।
वर्वरीत्रितय रूक्ष शीतं कटु विदाहि च ॥
तीक्ष्णं रुचिकरं हृद्यं दीपन लघुपाकि च ।
पित्तास्र कफवातास्रकण्डूक्रिमिविषापहम् ॥

वर्वरीत्रयस्य पत्ररसो ग्राह्य, मात्रा २ माषकौ ।

भूर्जपत्रः ।

भूर्जपत्र. स्मृतो भूर्जश्चर्मी बहुत्वक्तलः ।
भूर्जो बलकर श्लेष्मकर्णरुक्पित्तरक्तजित् ।
कषाय कटुरुष्णश्च मेदोविषहर परः ॥

अस्य त्वग्ग्राह्या, मात्रा १ माषक ।

कटभी ।

कटभी स्वादुः पुष्पश्च मधुरेणु कटम्बरः ॥
कटभी तु प्रमेहार्शोनाड़ीव्रणविषक्रिमीन् ।
हन्त्युष्णा कफकुष्ठघ्नी कटू रूक्षा च कीर्त्तिता ॥
तत्फल तुवर श्लेष्म विशेषात् कफशुक्रहृत् ॥

अस्याः सर्वांशो ग्राह्य., मात्रा १ माषकः ।

तिनिशः ।

तिनिशः स्यन्दनो नेमी रथद्रुर्वञ्जुलस्तथा ॥
तिनिशः श्लेष्मपित्तास्रमेदःकुष्ठप्रमेहजित् ।

तुवरः श्वित्रदाहघ्नो व्रणपाण्डुक्रिमिप्रणुत् ।
उष्णो रक्तातिसारघ्नो वातामयविनाशनः ॥
अस्य त्वग् ग्राह्या, मात्रा १ माषकः ।

काकजङ्घा ।

काकजङ्घा नदीकान्ता काकतिक्ता सुलीमशा ।
पारावतपदी दासी काकी चापि प्रकीर्त्तिता ॥
काकजङ्घा हिमा तिक्ता कषाया कफपित्तजित् ।
निहन्ति ज्वरपित्तास्रज्वरकण्डूविषक्रिमीन् ॥
अस्या मूल ग्राह्यं, मात्रा ६ रत्तयः ।

पुत्रजीवः ।

पुत्रजीवो गर्भकरी यष्टीपुष्पोऽर्थसाधकः ॥
पुत्रजीवो गुरुर्वृष्यो गर्भदः श्लेष्मवातहृत् ।
स्रष्टमूत्रमलो रूक्षो हिमः स्वादुः पटुः कटुः ॥
अस्य त्वग्ग्राह्या, मात्रा १ माषकः ।

शाकवृक्षः ।

शाकः क्रकचपत्रः स्यात् स्थिरसारो गृहद्रुमः ।
खरपत्रः श्रेष्ठकाष्ठः शरपत्रोऽर्जुनोपमः ॥
शाकवृक्षः सरः स्वादुर्दाहपित्तश्रमापहः ।
कषायः कफवृद्धूत्तो बल्यो ज्वरहरो मतः ॥
अस्य त्वग्ग्राह्या, मात्रा २ माषकौ ।

समुद्रफेनः ।

समुद्रफेनः फेनश्च डिण्डीरोऽब्धिकफस्तथा ॥
समुद्रफेनश्चक्षुष्यो लेखनः शीतलश्च सः ।

कषायो विषपित्तघ्नः कर्णरुक्फहृल्लघुः ॥

अस्या मात्रा ६ रक्तयः ।

षष्ठोऽध्यायः ।

अथ वमनोपगवर्गः ।

मदनफलम् ।

मदनस्कुर्दनः पिण्डी नटः पिण्डीतकस्तथा ।
करहाटी मरुवकः शाल्यकी विषपुष्पकः ॥
मदनो मधुरस्तिक्तो वीर्य्योष्णो लेखनो लघुः ।
वान्तिकृद्विद्रधिहरः प्रतिश्यायव्रणान्तकः ।
रूक्षः कुष्ठकफानाहशोथगुल्मव्रणापहः ॥

मात्रा २ माषकौ ।

अर्कमूलत्वक् ।

वल्या त्वगर्कमूलस्य स्वेदनी च रसायनी ।
वामनी हन्त्यतीसारव्रणकुष्ठाममारुतान् ॥

अस्या मात्रा बलसञ्जननार्थं ५ रत्तिकाः, वमनार्थं २ माषकौ ।

अन्तमलः ।

मलान्तोऽन्तमलः पूतिरण्डपर्णश्च लोमशः ।
वामनः स्वेदजननः कफनिर्हरणस्तथा ॥

अस्य पत्रं ग्राह्यं, मात्रा स्वेदनार्थे २ रत्तिके, वमनार्थं १ माषकः ।

सुखदर्शनः ।

वामनः स्वेदनः प्रोक्तो वीर्य्योष्णः सुखदर्शनः ॥

अस्य मूलस्वरसो ग्राह्यः, तन्मात्रा २ माषको ।

ज्योतिष्मती ।

ज्योतिष्मती स्यात्कटभी ज्योतिष्का कङ्गनीति च ।
पारावतपदी पर्णा लता प्रोक्ता कलुन्दनी ॥
ज्योतिष्मती कटुस्तिक्ता सरा कफसमीरजित् ।
अत्युष्णा वामनी तीक्ष्णा वह्निबुद्धिस्मृतिप्रदा ॥

अस्या मूलं ग्राह्यं, तदभावे सर्वाङ्गो ग्रहणीयः । मात्रा १ माषकः ।

गणपुष्पी ।

गणपुष्पी स्मृता घण्टा गणपुष्पसमाकृतिः ।
गणपुष्पी कटुस्तिक्ता वामनी कफपित्तजित् ॥

अस्याः फलादिकं ग्राह्यं, मात्रा ६ रत्तयः ।

देवदाली । हिन्दी सोनैया ।

खखसावत् फलव्रततिः ।

देवदाली तु वेणी स्यात्कर्कटी च गरा गरी ।
देवताण्डी वृत्तकोषस्तथा जीमूत इत्यपि ॥
पीतापरा खरस्पर्शा विषघ्नी गरनाशिनी ॥
देवदाली रसे तिक्ता कफार्शःश्लीपदापहा ।
नाशयेत् वामनी तिक्ता जयहिक्काक्रिमिज्वरान् ॥
देवदालीफलं तिक्तं क्रिमिश्लेष्मविनाशनम् ।

स्रंसनं गुल्मशूलघ्नमर्शोघ्नं वातजित्वरम् ॥

अस्याः फलादिकं ग्राह्यं, मात्रा १ माषकः ।

कटुतुम्बी ।

कटुतुम्बी तिक्तबीजा राजपुत्री नृपात्मजा ।

तुम्बिनी कटुकालाबुरिक्ष्वाकु कटुतिक्तका ॥

तुम्बिनी कटुकोष्णा च वान्तिकृत्कफवातनुत् ।

कासशोथव्रणश्वासविषपाण्डुकृमीन् हरेत् ॥

मात्रा २ माषकौ ।

काकनासा ।

काकनासा तु काकाङ्घ्री काकतुण्डफला च सा ॥

काकनासा कषायोष्णा कटुका रसपाकयोः ।

कफघ्नी वामनी तिक्ता शोथार्शःश्वित्रकुष्ठहृत् ॥

अस्या मूलादिकं ग्राह्यं, मात्रा १ माषकः ।

सप्तमोऽध्यायः ।

अथ विरेचनीयवर्गः ।

हरीतकी ।

हरीतक्यभया पथ्या कायस्था पूतनामृता ।

हैमवत्यव्यथा चापि चेतकी श्रेयसी शिवा ॥

वयस्था विजया चापि जीवन्ती रोहिणीति च ।

विजया रोहिणी चैव पूतना चामृताभया ॥
जीवन्ती चेतकी चेति पथ्यायाः सप्त जातयः ।
अलाबुवृत्तविजया वृत्ता सा रोहिणी स्मृता ॥
पूतनास्थिमती सूक्ष्मा कथिता मांसलास्मृता ।
पञ्चरेखाभया प्रोक्ता जीवन्ती स्वर्णवर्णिनी ॥
चेतकी चासिता क्षुद्रा सप्तानामियमाकृतिः ।
विजया सर्वरोगेषु रोहिणी व्रणरोहिणी ॥
प्रलेपे पूतना योज्या शोधनार्थेऽमृता हिता ।
अक्षिरोगेऽभया प्रस्था जीवन्ती सर्वरोगहृत् ॥
चूर्णार्थे चेतकी प्रस्था यद्यायुक्तं प्रयोजयेत् ।
सप्तानामपि जातीनां प्रधाना विजया स्मृता ॥
सुखप्रयोगा सुलभा सर्वरोगेषु प्रस्यते ।
हरीतकी पञ्चरसा लवणा तुवरा परम् ॥
रूक्षोष्णा दीपनी मेध्या स्वादुपाका रसायनी ।
चक्षुष्या लघुरायुष्या ब्रंहणी वातलोमिनी ॥
श्वासकासप्रमेहार्शःकुष्ठशोथोदरक्रिमीन् ।
वैस्वर्य्यग्रहणीरोगविबन्धविषमज्वरान् ॥
गुल्माध्मानव्रणच्छर्दिहिक्काकण्डूहृदामयान् ।
कामला शूलमानाहं प्लीहानञ्च यकृत्तथा ॥
अश्मरीं मूत्रकृच्छ्रञ्च मूत्राघातञ्च नाशयेत् ।
स्वादुतिक्तकषायत्वात् पित्तहृत् कफहृत् तु सा ॥
कटुतिक्तकषायत्वात्कफत्वाद्वातहृच्छिवा ।
पित्तकृत् कटुकाम्लत्वाद्वातकृन्न कथं शिवा ॥
पथ्यावा मज्जति स्वादुः स्नायुमज्जौ व्यवस्थितः ।

ब्रह्मे तिक्तस्त्वचि कटुरस्थि तु तुवरो रस: ॥
लघ्वी स्निग्धा घना वृत्ता गुर्वी विप्ता च चाम्भसि ।
निमज्जेत् सा प्रशस्ता च कथितातिगुणप्रदा ॥
लघ्वादिगुणयुक्तत्वं तत्रैकत्र द्विकर्षता ।
हरीतक्या: फले यत्र हयं तच्छ्रेष्ठमुच्यते ॥
चर्विता वह्निदीप्त्यग्निं पेषिता मलशोधिनी ।
स्विन्ना संग्रहिणी पथ्या भृष्टा प्रोक्ता त्रिदोषनुत् ॥
उन्मीलिनी बुद्धिबलेन्द्रियाणां
निर्मूलिनी पित्तकफानिलानाम् ।
विसर्जिनी मूत्रशकृन्मलानां
हरीतकी स्यात्सह भोजनेन ॥
अन्नपानकृतान् दोषान् वातपित्तकफोद्भवान् ।
हरीतकी हरत्याशु भुक्तस्योपरि योजिता ॥
लवणेन कफं हन्ति पित्तं हन्ति सशर्करा ।
घृतेन वातजान् रोगान् सर्वरोगान् गुडान्विता ॥
त्रिफलात्रिकटुत्रिजातकाभिधानामधुगुडै: क्रमात् ।
वर्षादिष्वभया प्राश्या रसायनगुणैषिणा ॥
अम्लातिस्निग्धा बलवर्जितस्य
रूक्षा क्षयो लङ्घनकर्षितस्य ।
पित्ताधिको गर्भवती च नारी
विसृक्करक्तस्वभयां न खादेत् ॥
पथ्यामला तु चतुर्थो वातपित्तहरो गुरु: ॥
हरीतकीनां फलं ग्राह्यं, मात्रा ४ माषका: ।
विख्याती विजया हिमाचलभवा स्याद्वेतकी पूतना

सिन्धौ स्यादथ रोहिणी तु विजया जाता प्रतिस्थानके ।
चम्पायामसृताभया च जनिता देशे सुराष्ट्राह्वये ।
जीवन्तीति हरीतकी निगदिता सा सप्तभेदा बुधैः ॥

स्वर्णपत्रिका ।

कल्याणी हेमपत्री च रेचनी स्वर्णपत्रिका ।
विट्सङ्गं वह्निमान्द्यञ्च यकृद्दाल्युदरं तथा ॥
प्लीहोदरं व्रणगुदमजीर्णं विषमज्वरम् ।
कामलां पाण्डुरोगञ्च कल्याणी च व्यपोहति ॥

अस्य मात्रा २ माषकौ ।

आरग्वधः ।

आरग्वधो राजवृक्षः सम्याकायतपुष्पकः ।
आरेवतो व्याधिघातः कृतमालः सुवर्णकः ।
कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः ॥
आरग्वधो गुरुः स्वादुः शीतलः स्रंसनो गुरुः ।
ज्वरच्छर्दिरोगपित्तास्रवातोदावर्त्तशूलनुत् ॥
तत्फलं स्रंसनं रुच्यं कुष्ठपित्तकफापहम् ।
ज्वरे तु सतत पथ्यं क्षीणशुद्धिकरं परम् ॥

अस्य फलनिर्यासो ग्रहणीयः, मात्रा ४ माषकाः

यवासशर्करा । हिन्दी सोरखेम्बा ।

यवासशर्करा ज्ञेया लंघनी पित्तहारिणी ।
ज्वरच्छर्दिघ्नी शीता रेचनी सा पुरातनी ॥
नार्याश्चापत्रसत्त्वाया दुर्बलस्य तथा शिशोः ।
रेचनार्थं प्रयोज्येयं क्षीणस्य स्थविरस्य च ॥

अस्या मात्रा १ कर्षः ।

इन्द्रवारुणी । हिन्दी इन्द्रारुण ।

ऐन्द्रीन्द्रवारुणी चित्रा गवाची च गवादनी ।
वारुणी च पराप्युक्ता सा विशाला महाफला ।
श्वेतपुष्पा मृगाक्षी च मृगैर्वारुर्गादनी ॥
गवादिनीद्वयं तिक्तं पाके कटु सरं लघु ।
वीर्योष्णं कामलापित्तकफप्लीहोदरापहम् ॥
श्वासकासापहं कुष्ठगुल्मार्शोव्रणप्रणुत् ।
प्रमेहमूढ़गर्भामगण्डामयविषापहम् ॥

अस्या मूलं ग्राह्यं, मात्रा ५ रक्तिकाः ।

श्यामबीजम् । हिन्दी कालादाना ।

उक्तं श्यामलबीजञ्च श्यामबीजं सुमेचकम ।
रेचनं श्यामबीजं स्याच्छोथोदरविनाशनम् ॥
ज्वते पुरीषसङ्गे च दारुणे शिरसो गदे ।
उदावर्त्ते तथानाहे बुधैरेतत् प्रयुज्यते ॥

मात्रा २ माषकौ ।

कटुरोहिणी ।

कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा ।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी ॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी ।
कट्वी तु कटुका पाके तिक्ता रूक्षा हिमा लघुः ॥
भेदिनी दीपनी हृद्या कफपित्तज्वरापहा ।
प्रमेहश्वासकासास्रदाहकुष्ठक्रिमिप्रणुत् ॥

अस्या मूलं ग्राह्यं, मात्रा २ माषकौ ।

कटुपर्णी चोकम्।

कटुपर्णी हैमवती हैमचीरी हिमावती।
हैमाह्वा पीतदुग्धा च तन्मूलञ्चोकमुच्यते॥
हैमाह्वा रेचनी तिक्ता भेदिन्युत्क्लेशकारिणी।
क्रिमिकण्डूविषानाहकफपित्तास्रकूठनुत्॥
मात्रा १ माषकः।

पीतमूली। हिन्दी रेओचिनि।

गन्धिनी पीतमूली च बल्या सा मृदुरेचनी।
हृल्यजीर्णमतीसारं वह्निमान्द्यमरोचकम्।
विट्सङ्गं श्वेतपित्तञ्च दुष्टव्रणविरोहिणी॥
अस्या मूलं ग्राह्यं, मात्रा १० रक्तिकाः।

शुक्लरक्तार्कौ।

अलर्को गणरूपः स्यान्मन्दारो वसुकोऽपि च।
श्वेतपुष्पः सदापुष्पः स बालर्कः प्रतापसः॥
रक्तोऽपरोऽर्कनामा स्यादर्कपर्णी विकीरणः।
रक्तपुष्पः शुक्लफलस्तथा स्फोटः प्रकीर्त्तितः॥
अर्कद्वयं सरं वातकुष्ठकण्डूविषव्रणान्।
निहन्ति प्लीहगुल्मार्शःश्लेष्मोदरमरुत्क्रिमीन्॥
अलर्ककुसुमं हृद्यं लघु दीपनपाचनम्।
अरोचकप्रसेकार्श्म कासश्वासनिवारणम्॥
रक्तार्कपुष्पं मधुरं सतिक्तं
कुष्ठक्रिमिघ्नं कफनाशनञ्च।
अर्शोविषं हन्ति च रक्तपित्तं
संग्राहि गुल्मे श्वयथौ हितं तत्॥

क्षीरमर्कस्य तिक्तोष्णं स्निग्धं सलवणं लघु ।
कुष्ठगुल्मोदरहरं श्रेष्ठमेतद्विरेचनम् ॥
अर्कमूल कफोत्क्लारि स्वेदन वामनं तथा ।
श्वासकासप्रतीश्यायानतीसारं प्रवाहिकाम् ॥
रक्तपित्तं श्वेतपित्तं ग्रहणीञ्चाप्यसृग्दरम् ।
नाशयेत् कफजान् रोगान् विषं कीटसमुद्भवम् ॥

अस्य निर्य्यासस्य मात्रा १० विन्दवः, मूलत्वचो वमनार्थं २ माषकौ, वमनवेगस्वेदजननार्थं २ रत्तिके ।

सेहुण्डः । सुही ।

सेहुण्डः सिंहतुण्डः स्यादज्री वज्रद्रुमोऽपि च ।
सुधा समन्तदुग्धा च स्रक् स्त्रियां स्यात् स्नुही गुड़ा ॥
सेहुण्डो रेचनस्तीक्ष्णो दीपनः कोटुको गुरुः ।
शूलमष्ठीलिकाध्मानकफगुल्मोदरानिलान् ॥
उन्मादमोहकुष्ठार्शःश्वोथमेदोऽश्मपाण्डुताः ।
व्रणश्वोथज्वरप्लीहविषदूषीविषं हरेत् ॥
उष्णवीर्य्यं स्नुहीचीरं स्निग्धञ्च कटुकं लघु ।
गुल्मिनां कुष्ठिनाञ्चापि तथैवोदररोगिणाम् ।
हितमेतद्विरेकार्थं ये चान्ये दीर्घरोगिणः ॥

स्नुह्या मूलत्वङ्निर्य्यासौ ग्राह्यौ, मात्रा २ माषकौ ।

शातला सेहुण्डभेदः ।

शातला अनेनैव नाम्ना प्रसिद्धा ।
शातला सप्तला मारा विमला विदुला च सा ।
तथा निगदिता भूरिफेना चर्म्मकषेत्यपि ॥
शातला कटुका पाके वातला शीतला लघुः ।

तिक्ता शोथकफानाहपित्तोदावर्त्तरक्तजित् ॥
अस्य मूलनिर्य्यासौ ग्राह्यौ, मात्रा १ माषकः ।

श्वेता त्रिवृत् ।

श्वेता त्रिवृत् त्रिभण्डी स्यात् त्रिवृता त्रिपुटापि च ।
सर्वानुभूतिः सरला निशोत्था रेचनीति च ॥
श्वेता त्रिवृद्रेचनी स्यात् स्वादुरुष्णा समीरहृत् ।
रूक्षा पित्तज्वरश्लेष्मपित्तशोथोदरापहा ॥
अस्या मूलत्वक् ग्राह्या, मात्रा २ माषकौ ।

श्यामा त्रिवृत् ।

त्रिवृत् श्यामार्द्धचन्द्रा च पालिन्दी च सुषेणिका ।
मसूरविदला कोलकेषिका कालमेषिका ॥
श्यामा त्रिवृत् ततो हीनगुणा तीव्रविरेचनी ।
मूर्च्छादाहमदभ्रान्तिकण्ठोत्क्लेषणकारिणी ॥
अस्या मूलत्वग् ग्रहणीया, मात्रा १ माषकः ।

लघुदन्ती ।

लघुदन्ती विशल्या च स्वादुदुस्वरपर्ण्यपि ।
तथैरण्डफला शोभ्रा श्वेतघण्टा घुणप्रिया ॥
वाराहाढ्या च कथिता निकुम्भश्च मकूलकः ।
क्षुद्रदन्तीफलन्तु स्यान्मधुरं रसपाकयोः ।
शीतलं सृष्टविन्मूत्रं गरशोथकफापहम् ॥
लघुदन्त्या मूल बीजञ्च ग्राह्यं, मात्रा ६ रत्तिकाः ।

बृहद्दन्ती ।

एरण्डपत्रविटपा ।
द्रवन्ती सा वरी चिचा प्रत्यक्पर्ण्यर्कपर्ण्यपि ।

चिरोपचिरा न्यग्रोधी प्रेत्यश्रेण्याखुकर्ण्यपि ॥
जयपाले दन्तीबीजं विख्यातस्तत् तिलीफलम् ।
जयपालो गुरुः स्निग्धो रेची पित्तकफापहः ॥
अस्या बीजं ग्राह्यं, मात्रा पादरत्तिका ।
दन्तीद्वयं सरं पाके रसे च कटु दीपनम् ।
गुदाङ्गरामशूलास्रकण्डूकुष्ठविदाहजुत् ।
तीक्ष्णोष्णं हन्ति पित्तास्रकफशोथोदरक्रिमीन् ॥

नीली ।

नीली तु नीलिनी तूली कालदोला च नीलिका ।
रञ्जनी स्त्रीफली तुच्छा ग्रामीणा मधुपर्णिका ।
क्षीतका कालकेशी च नीलपुष्पा च सा स्मृता ॥
नीलिनी रेचनी तिक्ता केश्या मोहभ्रमापहा ।
कृमी हल्लुदरप्लीहवातरक्तकफानिलान् ।
आमवातमुदावर्त्तं मदं च विषमुद्धतम् ॥

मूलमस्या ग्राह्यं तदभावे सर्वांगो ग्रहणीयः, मात्रा २ माषकौ ।

अरपुङ्खः । हिन्दी अरफाखा ।

अरपुङ्खः प्लीहघ्नो नीलीवच्चाक्षतिक्त सः ॥
अरपुङ्खो यकृत्प्लीहगुल्मव्रणविषापहः ।
तिक्तः कषायः कासास्रश्वासज्वरहरो लघुः ॥

मात्रा २ माषकौ ।

यवासो दुरालभा च ।

यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ॥
दुरालभा दुरालम्भा ससुद्धाला च रोदिनी ।

गान्धारी कच्छुरानन्ता कषाया हरविग्रहा ॥
श्वासः स्वादुः सरस्तिक्तस्तुवरः शीतलो लघुः।
कफमेदोमदभ्रान्तिपित्तास्रकुष्ठकासजित् ॥
तृष्णाविसर्पवातास्रवमिज्वरहरः स्मृतः।
यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा ॥
मात्रा १ माषकः।

कुमारी।

कुमारी गृहकन्या च कन्या घृतकुमारिका ॥
कुमारी मेदिनी शीता तिक्ता नेत्रया रसायनी।
मधुरा वृहणी बल्या तृष्णा वातविषप्रणुत् ॥
गुल्मप्लीहयकृत्पित्तविकफज्वरहरी हरेत्।
गृध्र्यग्निदग्धविस्फोटपित्तरक्तत्वगामयान् ॥
अस्या निर्य्यासो ग्राह्यः, मात्रा २ माषकौ।

त्रायमाणा।

बलभद्रा त्रायमाणा त्रायन्ती गिरिसानुजा।
त्रायन्ती तुवरा तिक्ता सरा पित्तकफापहा।
ज्वरवृद्रोगगुल्मार्शोभ्रमशूलविषप्रणुत् ॥
मात्रा २ माषकौ।

भूमिवल्ली। हिन्दी भुइखखसा।

मार्कण्डिका भूमिवल्ली मार्कण्डी मृदुरेचनी ॥
मार्कण्डिका कुष्ठहरी जङ्घाधःकायशोधिनी।
विषदुर्गन्धकासघ्नी गुल्मोदरविनाशिनी ॥
वल्ली भूमिप्रसरणशीला, अस्या मात्रा ४ माषकाः।

कूटशाल्मलिः ।

कुत्सित शाल्मलिः प्रोक्तो रोचनः कूटशाल्मलिः ॥
कूटशाल्मलिकस्निग्धः कटुकः कफवातनुत् ।
मेद्युष्णः प्लीहजठरयकृद्गुल्मविषापहः ।
भूतानाहविबन्धास्रमेदःशूलकृमापहः ॥

अस्या बीजं ग्राह्यं, मात्रा १ माषकः ।

करीरः । हिन्दी ढट्कांटार ।

करीरः क्रकरः पक्वो ग्रन्थिलो मरुभूरुहः ॥
करीरः कटुकस्तिक्तः स्वेद्युष्णो भेदनः स्मृतः ।
दुर्नामकफवातामगरसोथव्रणप्रणुत् ॥

अस्यास्त्वग् ग्राह्या, मात्रा २ माषकौ ।

अष्टमोऽध्यायः ।

अथ संग्राहिवर्गः ।

अहिफेनम् ।

ज्ञेयं खसफलचीरमाफूकमहिफेनकम् ।
आफूक मोचनं ग्राहि श्लेष्मघ्नं वातपित्तलम् ॥
आक्षेपशमनं निद्राजननं मदकारि च ।
स्वेदन वेदनाहृच्च मूलातीसारनुत् परम् ॥
कासश्वासातिसारघ्नं शोणितस्रुतिवारणम् ।
तथा खसफलोद्भूतवल्कलप्रायमित्यपि ॥

मात्रा पादरक्तिका ।

खोखस ।

तिलभेदः खसतिल. खाखसश्चापि स स्मृतः ॥
स्यात् खाखसफलोद्भूतं वल्कलं शीतलं लघु ।
ग्राहि तिक्तं कषायञ्च वातकृत् कफकासहृत् ॥
वातूना शोधकं रूक्षं मदकृद्वाग्विवर्धनम् ।
मूत्रमीहकरं रूक्षं सेवनात् पुंस्त्वनाशनम् ॥

मात्रा १० रक्तिकाः । कफघ्नत्वाच्छोषकत्वाच्चास्य क्वाथस्वेदो वेदनास्थाने परमोपकारी ।

खाखसबीजम् ।

कथ्यते खसबीजानि ते खाखसतिला अपि ॥
खसबीजानि बल्यानि हृद्यानि सुगुरूणि च ।
शमयन्ति कफं तानि जनयन्ति समीरणम् ॥

मात्रा १ माषक ।

धातकी ।

धातकी धातुपुष्पी च ताम्रपुष्पी च कुब्जरा ।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता ॥
धातकी कटुका शीता मदकृत् तुवरा लघु ।
तृष्णातिसारपित्तास्रविषक्रिमिविसर्पजित् ॥

तिन्दुकफलम् ।

तिन्दुकस्य फलं ग्राहि कषायं लघु शीतलम् ।
शमयेत् हन्त्यतीसारं पित्तमेहमसृग्दरम् ॥
जनयेन्मिक्षमेहञ्च घोररूपां प्रवाहिकाम् ।
पक्वन्तु तत्फलं वातव्रणघ्नं गुरु दुर्जरम् ॥
स्निग्धं श्लेष्मकरं पित्तप्रमेहास्रविनाशनम् ।

आमाग्नयोग्रतां हन्ति तत्सारं चिररोगजित् ॥

माचिका ।

माचिका ग्रन्थिकाम्बष्ठा तथा चाम्बालिकाम्बिका ।
मयूरविदला केशी सहस्रा बालमूलिका ॥
माचिकास्त्रा रसे पाके कषाया शीतला लघुः ।
पक्वातीसारपित्तास्रकफकण्ठामवापहा ॥

अस्याः सर्वांशो ग्राह्यः, मात्रा २ माषकौ ।

मज्जफलम् ।

कोटावासो मज्जफल ग्राहि बल्यं ज्वरापहम् ।
शोणितस्रुतिहृद्धन्ति मुखदन्तगतान् गदान् ॥
श्वेतप्रदरमर्शांसि योनिकन्दं सुदारुणम् ।
अतीसारं महाघोर ग्रहणीं सप्रवाहिकाम् ॥

मात्रा १ माषकः ।

पलाशनिर्य्यासः ।

पलाशभवनिर्य्यासो ग्राही स क्षपयेद्ध्रुवम् ।
ग्रहणीं मुखजान् व्याधीन् कासान् स्वेदातिनिर्गमम् ॥

मात्रा १ माषकः ।

सप्तपर्णः ।

सप्तपर्णो विशालत्वक् शारदो विषमच्छदः ।
मणिच्छदो गुच्छपुष्पो दृढत्वग् बहुपर्णकः ॥
सप्तपर्णस्त्रिदोषघ्नो वीर्य्योष्णोऽग्निप्रदीपनः ।
मदगन्धिर्व्रणहरस्त्वक्कः क्रिमिविनाशनः ॥
कुष्ठं जीर्णज्वरं श्वासं गुल्मञ्च ग्रहणीं तथा ।
प्रवाहिका सरक्ताञ्च वातरक्तं विनाशयेत् ॥

अस्य त्वग्ग्राह्या, मात्रा १ माषकः ।

बिल्वपेशी।

बिल्वपेशी लघुर्बल्या ग्राहिणी कफनाशिनी।
प्रवाहिकामतीसारं निहन्याद्व्रणीमपि॥
शुष्का बिल्वपेशीव्यवह्रियते सदा, मात्रा २माषकौ।

इन्द्रयवम्।

शक्र कुटजबीजन्तु यवमिन्द्रयवं तथा।
कलिङ्गापि कालिङ्गं तथा भद्रयव स्मृतम्॥
क्वचिदिन्द्रस्य नामैव भवेत्तदभिधायकम्॥
इन्द्रयवं त्रिदोषघ्नं संग्राहि कटु शीतलम्।
तिक्तं दाहहरं हन्ति रक्तपित्तं प्रवाहिकाम्॥
ज्वरातिसाररक्तार्शःकृमिवीसर्पकुष्ठनुत्।
दीपनं गुदकीलास्रशातास्रघ्नं शूलजित्॥
मात्रा १ माषकः।

आम्रबीजम्।

आम्रबीजं कषायं स्याच्छर्दतीसारनाशनम्।
ईषदम्लञ्च मधुरं तथा हृदयदाहनुत्॥
मात्रा १ माषकः।

खदिरः।

खदिरो रक्तसारश्च गायत्री दन्तधावनः।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः॥
खदिरः शीतलो दन्त्यः कण्डूकासारुचिप्रणुत्।
तिक्तः कषायो मेदोघ्नः क्रिमिमेहज्वरव्रणान्॥
श्वित्रशोथामपित्तास्रपाण्डुकुष्ठकफामयान्।
बह्निमान्द्यमतीसारं प्रदरञ्च विनाशयेत्॥

खदिरकाष्ठस्य मात्रा २ माषकौ, निर्य्यासस्य ६ रक्तिकाः ।

श्वेतखदिरः ।

खदिरः श्वेतसारोऽन्यः कदरः सोमवल्कलः ।
कदरो विग्रहो वर्ष्यो मुखरोगकफास्रजित् ॥
खदिरोऽयमुत्कृष्टगुणः, मात्रा चास्य ६ रक्तिकाः ।

उक्तास्त्रिविधः खदिरः संग्राहको रक्तरोधकश्च, यतोसारार्शोरक्तपित्तप्रदरत्वगादिरोगशान्त्यर्थं व्यवह्रियते ।

इरिमेदः ।

इरिमेदो विट्खदिरः कालस्कन्धोऽरिमेदकः ॥
इरिमेदः कषायोष्णो मुखदन्तगदास्रजित् ।
हन्ति कण्डूविषस्फोटकृमिकुष्ठविषव्रणान् ।
शोथातिसारकासांश्च विसर्पंचाप्यसृग्दरम् ॥

अस्य वल्कलादिकं ग्राह्यं, मात्रा १ माषकः ।

लोध्रः ।

लोध्रस्तिरीटकश्चैव शावरो मालवस्तथा ।
द्वितीयः पट्टिका लोध्रः क्रमुकः स्थूलवल्कलः ।
जीर्णपत्री दृढत्वक्कः पट्टीलाचाप्रसादनः ॥
लोध्रो ग्राही लघुः शीतस्त्रणशोथकफपित्तहृत् ।
कषायो रक्तपित्तास्रगतीसारशोथहृत् ।

अधिकन्तु विषघ्नोऽयम् । अस्य त्वग् ग्राह्या, मात्रा १ माषकः ।

प्रियङ्गुर्गन्धप्रियङ्गुश्च ।

प्रियङ्गुः फलिनी श्यामा लता च महिलाह्वया ।

गुन्द्रा गुन्द्रफला श्यामा विष्वक्सेनाङ्गनाप्रिया ॥
प्रियङ्गुः शीतला तिक्ता तुवरानिलपित्तहृत् ।
रक्ताभियोगदौर्गन्ध्यस्वेददाहज्वरापहा ॥
वान्तिभ्रान्त्यतिसारघ्नी वल्लजाऽविनाशिनी ।
गुल्मलट्विषमोहघ्नी तद्वन्प्रियङ्गुका ॥
तत्फलं मधुरं रूक्षं कषायं शीतलं गुरु ।
विबन्धाध्मानबलकृत् संग्राही कफपित्तजित् ॥

अस्यास्त्वचो मात्रा १ माषकः, फलस्य ६ रत्तिकाः । फलमेवास्याः सदा व्यवह्रियते ।

कुटजः । हिन्दी कोरैया ।

कुटजः कूटजः कोटी वत्सको गिरिमल्लिका ।
कालिङ्गः शुक्रशाखी च मल्लिकापुष्प इत्यपि ।
इन्द्र यवफलः प्रोक्तो दन्तकः पाण्डुरद्रुमः ॥
कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः ।
तिक्तः संग्राहकः प्रोक्तस्त्वग्दोषज्वरनाशनः ।
अर्शोऽतिसारपित्तास्रकफव्रणामकुष्ठनुत् ॥

अस्य त्वग्बीजादिकं ग्राह्यं, त्वचो मात्रा १ माषकः । अस्यैव बीजमिन्द्रयवनाम्नाभिधीयते । तन्मात्रागुणादिकमिन्द्रयवशब्दे द्रष्टव्यम् ।

पाठा ।

पाठाम्बष्ठाम्बष्ठिका च प्राचीना पायचेल्लिका ।
एकष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका ॥
पाठोष्णा कटुका तीक्ष्णा वातश्लेष्महरी लघुः ।
तिक्ता रुचिकरी चोक्ता भग्नसन्धानकारिणी ॥

हन्ति शूलज्वरच्छर्दिकुष्ठातीसारहृद्रुजः ।
दाहकण्डूविषश्वासक्रिमिगुल्मगरव्रणान् ॥

अस्या मूलादिकं ग्राह्यं, मात्रा १ माषकः ।

आकाशवल्ली । हिन्दी अमरवेला ।

आकाशवल्ली तु बुधैः कथिता मरवल्लरी ।
खवल्ली ग्राहिणी तिक्ता पिच्छिला श्लेष्मपित्तहा ॥
तुवराग्निकरी हृद्या पित्तश्लेष्मनाशिनी ॥

अस्याः सर्वांगो ग्राह्यः, मात्रा ४ रत्तिकाः ।

मत्स्याक्षी । हिन्दी मछेछी ।

मत्स्याक्षी वाह्लिका मत्स्यगन्धा मत्स्यादनीति च ।
मत्स्याक्षी ग्राहिणी शीता कुष्ठपित्तकफास्रजित् ।
लघुस्निग्धा कषाया च स्वादौ कटुविपाकिनी ॥

अस्याः सर्वांगो ग्राह्यः, मात्रा ६ रत्तिकाः ।

जलपिप्पली । हिन्दी पनिसगा ।

जलपिप्पल्यभिहिता शारदी शकुलादनी ।
मत्स्यादनी मत्स्यगन्धा लाङ्गलीत्यपि कीर्त्तिता ॥
जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघुः ।
संग्राहिणी हिमा रूक्षा रक्तदाहव्रणापहा ।
कटुपाकरसा रूक्षा कषाया वह्निवर्द्धिनी ॥

अस्याः सर्वांगो ग्राह्यः मात्रा २ माषकौ ।

वीरतरुः ।

वेलन्तरो जगति वीरतरुः प्रसिद्धः
श्वेतासितारुणविलोहितनीलपुष्पः ।
स्याज्जातितुल्यकुसुमः शमिसूक्ष्मपत्रः

स्यात् कण्टकी विजलदेशज एष वृक्षः ॥
वैलान्तरो रसे पाके तिक्तस्तृष्णाकफापहः ।
मूत्राघातश्मजिद्ग्राही योनिमूत्रानिलार्त्तिजित् ॥
अस्य त्वग्ग्राह्या, मात्रा १ माषकः ।

मयूरशिखा ।

मयूराचशिखा प्रोक्ता सहस्राहिमंधुच्छदा ।
नीलकण्ठशिखा लघ्वी पित्तश्लेष्मातिसारजित् ॥
तस्याः सर्वांगो ग्राह्यः, मात्रा १ माषकः ।

पद्मबीजम् ।

पद्मबीजन्तु पद्माच्च गालोद्यं पद्मकर्कटी ॥
पद्मबीजं हिमं स्वादु कषायं तिक्तकं गुरु ।
विष्टम्भि हृद्यं रूक्षञ्च गर्भस्थापकं परम् ।
कफवातकरं बल्यं ग्राहि पित्तास्रदाहनुत् ॥
मात्रा ८ माषकाः ।

वटः ।

वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
चीरी वैश्रवणो वासो बहुपादो वनस्पतिः ॥
वटः शीतो गुरुर्ग्राही कफपित्तव्रणापहः ।
वर्ण्यो विसर्पदाहघ्नः कषायो योनिदोषहृत् ॥
स्वादुस्तृषापहो मूर्च्छामेहास्रक्षयनाशनः ॥

प्लक्षः । हिन्दी पाकरी ।

प्लक्षो जटी पर्करी च पर्कटी च स्त्रियामपि ॥
प्लक्षः कषायः शिशिरो व्रणयोनिरुजापहः ।
दाहपित्तकफास्रघ्नः शोथहा रक्तपित्तहृत् ।

रक्तदोषहरो मूर्च्छाप्रलापभ्रमनाशनः ॥

अस्य त्वग्ग्राह्या, मात्रा २ माषकौ ।

बब्बूलः ।

बब्बूलः किङ्किरातः स्यात् किङ्किराटः स पीलकः
स एव कथितस्तज्ज्ञैराभा षट्पदमोदिनी ॥
बब्बूलः कफनुद्ग्राही कुष्ठकृमिविषापहः ॥

अस्य निर्य्यासत्वगादिकं ग्राह्यं, मात्रा २ माषकौ ।

अस्य निर्य्यासगुणाः ।

बब्बूलस्य तु निर्य्यासो ग्राही पित्तानिलापहः ।
रक्तातीसारपित्तास्रमेहप्रदरनाशनः ।
भग्नसन्धायकः शीतः शोणितस्तुतिवारणः ॥

जिङ्गिनी । हिन्दी जिङ्गनिया ।

जिङ्गिनी झिङ्गिनी झिण्टी सुनिर्य्यासा प्रमोदिनी ॥
जिङ्गिनी मधुरा शीता कषाया व्रणशोधिनी ।
कटुका व्रणदोषवातातीसारहृत् कटुः ॥

अस्याः सर्वांशो ग्रहणीयः, मात्रा २ माषकः ।

तूणी ।

तूणी तुन्नक आपीनसुषिकः कच्छकस्तथा ।
कुटेरकः कान्तलको नन्दिवृक्षश्च नन्दकः ॥
तुण्डिरक्तः कटुः पाके कषायो मधुरो लघुः ।
तिक्तो ग्राही हिमो हृद्यो व्रणकुष्ठास्रपित्तजित् ॥

अस्या त्वग् ग्राह्या, मात्रा २ माषकौ ।

मोचरसः ।

निर्य्यासः शाल्मलेः पिच्छा शाल्मलीवेष्टकोऽपि च ।

मोचास्रावो मोचरसो मोचनिर्य्यास इत्यपि ॥
मोचास्रावो हिमो ग्राही स्निग्धो हृद्यः कषायकः ।
प्रवाहिकातिसारामकफपित्तास्रदाहनुत् ॥
अस्य मात्रा १ माषकः ।

लज्जालुः ।

लज्जालुः स्यात् शमीपत्रा समङ्गा जलकारिका ।
रक्तपादी नमस्कारी नाम्ना खदिरिकेत्यपि ॥
लज्जालुः शीतला तिक्ता कषाया कफपित्तजित् ।
रक्तपित्तमतीसारं योनिरोगान् विनाशयेत् ॥
अस्याः सर्वांगो ग्राह्यः, मात्रा २ माषकौ ।

नवमोऽध्यायः ।

अथ स्वेदोपगवर्गः ।

दारुहरिद्रा ।

दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च ।
कटंकटेरी पीता च भवेत् सैव पचम्यचा ॥
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च ।
पीतद्रु हरिद्रु च पीतदारु कपीतकम् ॥
एषोष्णा कटुका तिक्ता नेत्रकर्णास्यरोगनुत् ।
मेहकण्डूविसर्पघ्नी व्रणदोषव्रणानिनी ।

विषघ्नो स्वेदनो पित्तकफयोथविनाशिनी ॥
अस्याः काष्ठं व्यवहार्यं, मात्रा ६ रत्तिकाः ।

रसाञ्जनम् । हिन्दी रसवत् ।

दार्व्याक्काथसमं क्षीरं हृयं पक्वा यथाघनम् ।
तदा रसाञ्जनाख्यं तत् नेत्रयोः परमं हितम् ॥
रसाञ्जनं तार्क्ष्यशैलं रसगर्भञ्च तार्क्ष्यजम् ।
रसाञ्जनं कटु स्नेष्मविषनेत्रविकारनुत् ।
उष्णं रसायनं तिक्तं छेदनं व्रणदोषहृत् ।
अस्य मात्रा २ माषकौ ।

अर्कमूलत्वक् ।

वमनोपगवर्गेलिखिता ।

मण्डूकपर्णी ।

रसायन वर्गे लिखिता ।

दशमोऽध्यायः ।

अथ शिरोविरेचनीयवर्गः ।

छिक्कनी ।

छिक्कनी चक्षुश्चीक्ष्या छिक्किका घ्राणदुःखदा ॥
छिक्कनी कटुका रुच्या तीक्ष्णोष्णा वह्निपित्तकृत् ।
वातरक्तहरी कुष्ठकृमिवातकफापहा ।
शिरोविरेचनी प्रोक्ता चोर्द्ध्वजत्रुविकारनुत् ॥

कलञ्जः ।

शिरोगदच्छित् च्यवनः कलञ्जो
वम्यो विषं विश्वविषस्य हन्ता ।
कलञ्जसंवेष्टनधूमपानात्
स्याद्दन्तशुद्धिर्मुखरोगहानिः ॥

गुञ्जाफलम् ।

गुञ्जाफलं च्यवकरं शिरोऽर्त्तिश्रमनं मतम् ॥

महाज्यषा । हिन्दी भूतराज ।

जैमी महाज्यवा श्लेष्मा च्यवनी श्लेष्मवारिणी ।
वीर्य्योष्णाच्छिरःकर्णरुग्हन्त्री नस्ययोगतः ॥

जालिनीफलम् ।

शिरःपाण्डुर्त्तिश्रमनं च्यवन जालिनीफलम् ॥

एकादशोऽध्यायः ।

अथ मूत्रविरेचनीयवर्गः

स्थलपद्मम् ।

पद्मचारिण्यतिचराब्यया पद्मा च शारदा ॥
पद्मानुष्णा कटुस्तिक्ता कषाया कफवातजित् ।
मूत्रकृच्छ्राश्मगूलघ्नो श्वासकासविषापहा ॥

अस्य त्वक्पत्ररसा ग्राह्याः, त्वक्पत्रयोर्मात्रा १ माषकः, स्वरसस्य तोलकद्वयम् ।

पाषाणभेदकः ।

पाषाणभेदकोऽश्मघ्नो गिरिभिद्विन्नयाजनी ॥
अश्मभेदी हिमस्तिक्तः कषायो वस्तिशोधनः ।
भेदनो वस्तिदोषार्शोगुल्मकृच्छ्राश्मभृद्गुजः ।
योनिरोगान् प्रमेहांश्च प्लीहशूलव्रणानि च ॥

अस्य मूलं ग्राह्यं, मात्रा १ माषकः ।

सुरप्रियम् । हिन्दी धौतलचिनि ।

सुरप्रियं वृक्षफलं तद्वायुघ्नमनं मतम् ।
श्लेष्मोत्सारणमाध्मेयं मूत्रवृद्धिकरं तथा ॥
श्वेतप्रदरमर्शांसि कृच्छ्रान्यपि विनाशयेत् ॥

मात्रा २ माषकौ ।

कुशद्वयम् ।

कुशः ।

कुशो दर्भस्तथा बर्हिः सूच्यग्रो यज्ञभूषणः ॥

कुशभेदः । हिन्दी डाभ ।

ततोऽन्यो दीर्घपत्रः स्यात् क्षुरपत्रस्तथैव च ॥
दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमम् ।
मूत्रकृच्छ्राश्मरीतृष्णावस्तिरुक्प्रदरास्रजित् ॥

अनयोर्मूलं ग्राह्यं, मात्रा २ माषकौ ।

काशः ।

काशः काशेक्षुरुद्दिष्टः स स्यादिक्षुरसस्तथा ।
इक्ष्वालिकेक्षुगन्धा च तथा पोटगलः स्मृतः ॥
काशः स्वादुमधुरस्तिक्तः स्वादुपाकी हिम. सरः ।

मूत्रकृच्छ्राश्मदाहास्रक्षयपित्तज्वरोगजित्।
लघ्वग्निदः शुक्रलो बल्यो रुचिकृच्छ्रामयौषहृत्॥

अस्य मूलं ग्राह्यं, मात्रा ४ माषकाः।

भद्रमुञ्जः।

भद्रमुञ्जः शरो बाणस्तेजनश्चत्वेष्टनः॥

मुञ्जः।

मुञ्जो मुञ्जातको बाणः स्थूलदर्भः सुमेखलः॥
मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा।
दाहतृष्णाविसर्पामसूत्रकृच्छ्राक्षिरोगजित्।
दोषत्रयहरं ह्यस्य मेखलासूपयुज्यते॥

अस्य मूलं ग्राह्यं, मात्रा २ माषकौ।

वीरणम्।

स्यादीरणं वीरतरु वीरश्च बहुमूलकम्॥
वीरणम्माचनं शीतं वान्तिहृल्लघुतिक्तकम्।
स्तम्भनं ज्वरनुद्वान्तिमदजित् कफपित्तहृत्।
तृष्णास्रविषवीसर्पकृच्छ्रदाहव्रणापहम्॥

अस्य सर्वांशो ग्राह्याः, मात्रा २ माषकौ।

उशीरम्।

वीरणस्य तु मूलं स्यादुशीरं नलदञ्च तत्।
अमृणालञ्च सेव्यञ्च समगन्धिकमित्यपि॥
उशीरम्माचन शीतं स्तम्भन लघु तिक्तकम्।
मधुरं ज्वरहृद्वान्तिमदनुत् कफपित्तहृत्।
तृष्णास्रविषवीसर्पदाहकृच्छ्रव्रणापहम्॥

अस्य मात्रा २ माषकौ।

कृष्णेक्षुमूलम् ।

कृष्णेक्षुमूल शीत स्यान्मूत्रलं पित्तरोगनम् ।
वातानुलोमनं मेध्यं दाहकृच्छ्रनिकृन्तनम् ॥

गोक्षुरबीजम् ।

बीजं गोक्षुरकं शीतं मूत्रल शोथवारणम् ।
हृद्यमायुष्करं शुक्रमेहनुत् कृच्छ्रनाशनम् ॥

वंशमूलम् ।

त्वचि सारयिका क्षीरा मूलकृच्छ्रोथवारिणी ॥

उलूकम् ।

उलूकं स्थूलको दर्भः सूच्यग्रश्च खरच्छदः ।
उलपश्चीलुपस्तत् स्यान्मूत्रलं शोथसंहरम् ॥

लामज्जकम् ।

लामज्जकमुशीरवत् पीतच्छविस्तृणविशेषः ।
लामज्जकं सुनालं स्यादसृणालं लघं लघुः ।
इष्टकापथकं सेव्यं नलदच्छावदातकम् ॥
लामज्जकं हिमं तिक्तं लघु दोषत्रयास्रजित् ।
व्रणामयस्वेदकृच्छ्रदाहपित्तास्रशेषनुत् ॥
अस्य मूलं ग्राह्यं, मात्रा १ माषकः ।

नलः ।

नलः पोटगलः शून्यमध्यश्च धमनस्तथा ।
नलस्तु मधुरस्तिक्तः कषायः कफरक्तजित् ।
उष्णो हृद्वस्तियोन्यर्त्ति दाहपित्तविसर्पहृत् ॥
अस्य मूलं ग्राह्यं, मात्रा २ माषकौ ।

गुन्द्रः ।

गुन्द्र पटरकोऽच्छः स्यात् गुन्द्रवेराभमूलकः ॥
गुन्द्र कषायो मधुरः शिशिरः पित्तरक्तजित् ।
मूत्रशुक्रार्जोमूत्रशोधनो मूत्रकृच्छ्रहृत् ॥

अस्य मूल ग्राह्य, मात्रा २ माषकौ ।

एरका । हिन्दी मोथी ।

एरका गुन्द्रमूला च शिविगुन्द्रा शरीति च ॥
एरका शिशिरा हृद्या चक्षुष्या वातकोपिनी ।
मूत्रकृच्छ्राश्मरीदाहपित्तशोणितनाशिनी ॥

अस्या मूल गृहणीय मात्रा २ माषकौ ।

शार्दूलकन्दः ।

शार्दूलकन्दः शोथघ्नो ज्ञेयोऽरण्यपलाण्डुकः ।
मूत्रविरेचनः श्लेष्महरणोऽत्युग्र एव च ॥
मात्रातिरेकाद्भवति वान्तिकृन्मलभेदनः ।
अतिमात्रः प्रयुक्तोऽसौ विषवन्मारयेन्नरम् ॥
शोथे श्वासे च कासे च मूत्रमङ्गे प्रयुज्यते ।
ज्वरे दाहेऽतिसारे च गृहण्यां नापि शस्यते ॥

अस्य मात्रा १ रत्तिका ।

नागदमनी ।

विज्ञेया नागदमनी बलामोटा विषापहा ।
नागपुष्पी नागपत्रा महायोगेश्वरीति च ॥
बलामोटा कटुस्तिक्ता लघु पित्तकफापहा ।
मूत्रकृच्छ्रव्रणहरा क्षारा वातकफापहा ॥
उदरामानशमनी कोष्ठशोधनकारिणी ।

सर्वगृहप्रशमनी निःशेषविषनाशिनी ॥
जय सर्वत्र कुरुते वनदा सुमतिप्रदा ॥
अस्याः पत्रं ग्राह्यं मात्रा ६ रक्तिकाः ।

पटपलक् ।

पटपलक् प्रमेहघ्नी योनिमेढ्रप्रदाहनुत् ।
मूत्रदोषप्रशमनी शीता पित्तानिलापहा ॥

श्रीवाससारः । हिन्दी गन्धविरोजा ।

श्रीवाससारः कफतुण्डमूत्रलो ज्वरसंहरः ।
शोथविस्रापनो लेपात् क्रिमिदूदेनापहः ॥

वरुणः ।

वरुणो वरुणः सेतुस्तिक्तशाक. कुमारकः ॥
वरुणः पित्तलो भेदी श्लेष्मकामलमारुतान् ।
निहन्ति गुल्मवातास्रक्रिमीञ्शोषोऽग्निदीपनः ॥
कषायो मधुरस्तिक्तः कटुको रूक्षको लघुः ।
अश्मरीं मूत्रकृच्छ्रञ्च विद्रधिञ्च विनाशयेत् ।

वटपत्री ।

वटपत्रामरा प्रोक्ता व्रणसन्धायिनी हिमा ।
मूत्रविरेचनी ज्ञेया शोणितस्रुतिवारिणी ॥
अस्याः स्वरसो ग्राह्यः, तस्य मात्रा १ कर्षः ।

पिच्छिला ।

पिच्छिला पिच्छिलफलं योनिशिश्नप्रदाहनुत् ।
विषदोषप्रमेहास्रपित्तहृद्बलपुष्टिकृत् ॥

मात्रा १ तोलकः ।

द्वादशोऽध्यायः ।

अथ मूत्रसंग्रहणीयवर्गः ।

उदुम्बरः ।

उदुम्बरो जन्तुफलो यज्ञाङ्गी हेमदुग्धकः ॥
उदुम्बरो हिमो रूक्षो गुरुः पित्तकफास्रजित् ।
मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः ॥
मूर्च्छादाहास्रपित्तघ्नो मूत्रातीसारनाशनः ।
कषाया शीतला तृष्या त्वगस्य व्रणनाशिनी ॥
अस्य फलादिकं ग्राह्यं, मात्रा १ माषकः ।

काकोदुम्बरः । हिन्दी गुलार ।

काकोदुम्बरिका फल्गुर्मलपूर्जघनेफला ॥
मलपूः स्तम्भकृत् स्वादी शीतला तुवरा जयेत् ।
कफपित्तव्रणश्वित्रकुष्ठपाण्ड्वर्शःकामलाः ॥
गुणाश्चोदुम्बरस्येव किन्तु हीनास्ततो मताः ॥
मात्रा २ माषकौ ।

धवः ।

धवो धटो नन्दितरुः स्थिरो गौरो धुरन्धरः ॥
धवः शीतः प्रमेहार्शः पाण्डुपित्तकफापहः ।
मधुरस्तुवरस्तस्य फलञ्च मधुरं मनाक् ॥
अस्य त्वक्निर्य्यासौ ग्राह्यौ, मात्रा १ माषकः ।

कोषातकीफलम् ।

कोषातकीफलं शीतमाध्मानापहरं मतम् ।
वातपित्तकफघ्नञ्च बहुमूत्रनिवारणम् ॥

त्रयोदशोऽध्यायः ।

अथ आर्त्तवप्रवर्त्तकवर्गः ।

सहासारः ।

वीरास्रावः सहासारः कुमारीरससम्भवः ॥
सहासारोऽग्निजननः पित्तनिर्हरणो मतः ।
बलशुक्रप्रदः पुष्पजननो गर्भपातनः ॥
विट्सङ्गे क्रिमिरोगे च सन्यासेऽपस्मृतौ तथा ।
लुप्ते रजसि नारीणां शीतपित्ते शिरोरुजि ॥
ज्वरे श्लेष्मोद्भवे शीघ्रं मन्देऽग्नौ च प्रयुज्यते ॥
अर्शसस्तं न सेवेत नात्तवघ्नो न पुष्पिणी ।
नचाशुद्धरिणी नापि यकृद्दाल्यादिरोगवान् ॥

अस्य मात्रा २ रक्तिके ।

रेणुका ।

रेणुका राजपुत्री च नन्दिनी कपिला हिला ।
भस्मगन्धा पाण्डुपुत्री स्मृता कौन्ती हरेणुका ॥
रेणुका कटुका पाके तिक्तानुष्णा कटुर्लघुः ।

पित्तला दीपनी मेध्या पाचनी गर्भपातिनी ।
बलासवातकृद्वैव वट्कण्डूविषदाहनुत् ॥
अस्या मात्रा ६ रत्तिका ।

लाङ्गली ।

कलिहारी तु हलिनी लाङ्गली शुक्रपुष्प्यपि ।
विशल्याग्निशिखानन्ता वह्निवक्त्रा च गर्भनुत् ॥
कलहारी सरा कुष्ठशोफार्शोव्रणशूलजित् ।
सक्षारा श्लेष्मजित् तिक्ता कटुका तुवरापि च ।
तीक्ष्णोष्णा क्रिमिहृल्लघ्वी पित्तला गर्भपातिनी ॥
अस्या मूलं ग्राह्यं, मात्रा ६ रत्तिकाः ।

टङ्गनः ।

टङ्गनो वह्निकृद्ग्ल्यो व्रणघ्नः कफनाशनः ।
स्त्रीपुष्पजननो रूक्षो मूढ़गर्भविकर्षणः ॥
मात्रा ६ रत्तिकाः ।

पीवरी । हिन्दी श्रीलटकम्बल ।

पीवरी योषिणी सा स्यादयोनिव्यापहारिणी ।
रजोदोषप्रशमनी प्रदरार्शोनिवारिणी ॥
मूलमस्या ग्राह्यं, मात्रा १ मासकः ।

स्राविका । हिन्दी धन्वजिया ।

सर्षपी पाटला रौद्री स्राविका धन्वजापि सा ।
रजःप्रवर्त्तिनी रौद्री मूढ़गर्भविकर्षिणी ॥
गर्भपातानन्तरीत्थयोनितस्रुतिवारिणी ।
वारयेच्छोणितोद्भान्तिं रक्तमूत्रादिकं तथा ॥
श्वेतप्रदरमेकाङ्गं शुक्रमेहञ्च दारुणम् ।

मात्रातिरेकाद्विषवत् क्रियां संजनयेदभ्रुवम् ॥

मात्रा ६ रक्तिकाः ।

अरिष्टकः ।

अरिष्टकस्तु गाङ्ग्यः कृष्णवर्णोऽर्थसाधनः ।

रक्तबीजः पीतफेनः फेनिलो गर्भपातनः ॥

अस्य फलं गाङ्ग्यं, मात्रा १ माषकः ।

चतुर्दशोऽध्यायः ।

अथ आर्त्तवसंग्राहिवर्गः ।

अशोकः ।

अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ।

कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥

अशोकः शीतलस्तिक्तो ग्राही वर्ण्यः कषायकः ।

दोषापचिदृषादाहक्रिमिमेोषविषास्रजित् ॥

अस्य त्वग् गाह्या, मात्रा १ माषकः ।

लाक्षा ।

लाक्षा पलङ्कषालक्तो यावो द्रुक्षामयो जतु: ॥

लाक्षा वर्ष्या हिमा बल्या स्निग्धा च तुवरा लघुः ।

अनुष्णा कफपित्तास्रहिक्काकासज्वरप्रणुत् ।

व्रणोरःक्षतवीसर्पक्रिमिकुष्ठगदापहा ॥

अलक्तको गुणैस्तद्वदिशेषाद्व्रणनाशनः ॥

मात्रा १ माषकः ।

अलक्तकः ।

अलक्तको रजोरोधी रक्तपित्तक्षयापहः ।
प्रदरघ्नाप्यतीसारं सरक्तं चपयेद्ध्रुवम् ॥

कुसुम्भम् ।

स्यात् कुसुम्भं वह्निशिखं वस्त्ररञ्जकमित्यपि ॥
कुसुम्भं मधुरं रूक्षं वह्निकृद्दोषनं मतम् ।
विष्मूत्रदोषशमन कटुष्णं गुरु पित्तलम् ।
क्रिमिघ्नहातलं कृच्छ्ररक्तपित्तकफापहम् ॥

मात्रा १ माषकः ।

लक्ष्मणा ।

पुच्छकाकारा रक्ताल्पबिन्दुभिर्लाञ्छिता सदा ।
लक्ष्मणा पुच्छजननी वस्तगन्धाकृतिर्भवेत् ॥
दीपघ्नी मधुरा शीता तृष्णा बल्या रसायनी ।
कथिता पुच्छदाश्वं लक्ष्मणा मुनिपुङ्गवैः ॥

अस्या मूलं ग्राह्यं, मात्रा २ माषकौ ।

रक्तोत्पलमूलम् ।

मूलं रक्तोत्पलस्य स्याद्रजोरोध्यस्रपित्तनुत् ।
शीतवीर्यं प्रमेहघ्नं वातपित्तप्रणाशनम् ।

मात्रा ४ माषकाः ।

तण्डुलीयकमूलम् ।

तण्डुलीयकमूलं स्यादुष्णं श्लेष्मविनाशनम् ।
रजोरोधकरं रक्तपित्तप्रदरसंहरम् ॥

मात्रा २ माषकौ ।

पीतचन्दनम् ।

कालीयकन्तु कालीयं पीताभं हरिचन्दनम् ।
हरिप्रियं कालसारं तथा कालानुसार्यकम् ॥
कालीयकं रक्तगुणं विशेषाद्दाहनाशनम् ॥
अस्य काष्ठं ग्राह्यं, मात्रा १ माषक ।

रक्तचन्दनम् ।

रक्तचन्दनमाख्यात रक्ताङ्गं क्षुद्रचन्दनम् ।
तिलपर्णं रक्तसारं तत् प्रवालफलं मतम् ॥
रक्तं शीतं गुरु स्वादु छर्दिदृष्णास्रपित्तहृत् ।
तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहम् ॥
मात्रा १ माषकं ।

पत्तङ्गम् ।

पत्तङ्गं रक्तसारञ्च सुरङ्गं रञ्जनं तथा ।
पट्टरञ्जकमाख्यातं पत्तूरञ्च कुचन्दनम् ॥
पत्तङ्गं मधुरं शीतं पित्तश्लेष्मव्रणास्रनुत् ।
हरिचन्दनवद्देयं विशेषाद्दाहनाशनम् ॥
चन्दनानि तु सर्वाणि सदृशानि रसादिभिः ।
गन्धेन तु विशेषोऽस्ति पूर्वः श्रेष्ठतमो गुणैः ॥
मात्रा १०माषकः ।

शाखोटः ।

शाखोटः पीतफलको भूतावासः खरच्छदः ।
शाखोटो रक्तपित्तार्शोवातश्लेष्मातिसारजित् ॥
अस्य पत्रं तत्स्वरसश्च ग्राह्यते, मात्रा १ माषकः

कुकुन्दरः ।

कुकुन्दरः पीतपुष्पः कुक्कुरदुर्भेदुच्छदः ॥
कुकुन्दरः कटुस्तिक्तो ज्वररक्तकफापहः ।
रक्तपित्तमतीसारं दाहं घोरं निहन्ति च ॥

अस्य सर्वाङ्गं ग्राह्यं, मात्रा २ माषकौ ।

जवा विसन्ध्या च ।

जपापुष्पञ्जवा चाथ विसन्ध्या सारुणा सिता ॥
जवा सग्राहिणी केश्या विसन्ध्या कफवातजित् ।
इन्द्रलुप्तमतीसारं प्रमेहान् विषमिति हरेत् ॥

मात्रा २ माषकौ ।

अश्वत्थः ।

बोधिद्रुः पिप्पलोऽश्वत्थश्चलपत्रो गजाशनः ॥
पिप्पलो दुर्जरः शीतः पित्तश्लेष्मव्रणास्रजित् ।
गुरुस्तुवरको रूक्षो वर्ष्यो योनिविशोधनः ॥
अश्वत्थस्य फलं पक्वं योनिदोषहरं हिमम् ।
छर्दिमोषारुचिहरं विषघ्नं रक्तपित्तनुत् ॥

अस्य त्वचो मात्रा १ माषकः, पक्वफलस्यश्च ४ माषकाः ।

नन्दीवृक्षः ।

नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः ।
स्थालीवृक्षः क्षयतरुः क्षीरी च स्यादनश्वतिः ॥
नन्दीवृक्षो लघुः स्वादुस्तिक्तस्तुवर उष्णकः ।
कटुपाकरसो ग्राही विषपित्तकफास्रजित् ॥

अस्य त्वग् ग्राह्या, मात्रा १ माषकः ।

विशल्यकरणी ।

विशल्यकरणी बल्या व्रणसन्धानकारिणी ।
वारयेच्छोणितस्राव रक्तातिसारमुल्बणम् ॥

अस्याः पत्रं ग्राह्यं, मात्रा २ माषकौ ।

ग्राम्यलीपुष्पम् ।

ग्राम्यलीपुष्पशाकन्तु घृतसैन्धवसाधितम् ।
प्रदरं नाशयत्येव दुःसाध्यञ्च न संशयः ॥
रसे पाके च मधुरं कषायं शीतलं गुरु ।
कफपित्तास्रजिद्ग्राहि वातलञ्च प्रकीर्त्तितम् ॥

कच्चटम् ।

पानीयतण्डुलीयन्तु कच्चटं समुदाहृतम् ।
कच्चटं तिक्तकं रक्तपित्तानिलहरं लघु ॥
जलतण्डुलीयं ग्राम्ये कच्चटमिति प्रसिद्धम् ।
चवराद्यभेदः । मात्रा २ माषकौ ।

पञ्चदशोऽध्यायः ।

अथ दीपनपाचनवर्गः ।

आर्द्रकम् ।

आर्द्रकं शृङ्गवेरं स्याट्कटुभद्रं तथार्द्रिका ।
आर्द्रिका भेदिनी गुर्वी तीक्ष्णोष्णा दीपनी मता ॥

कटूका मधुरा पाके रूक्षा वातकफापहा ।
ये गुणाः कथिता शुण्ठ्यास्तेऽपि सन्त्यार्द्रकेऽखिलाः ॥
भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणम् ।
अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम् ॥
कुष्ठपाण्ड्वामये कृच्छ्रे रक्तपित्ते व्रणे ज्वरे ।
दाहे निदाघशरदोर्नैव पूजितमार्द्रकम् ॥

अस्य मूलं ग्राह्यं, मात्रा २ माषकौ ।

गजपिप्पली ।

चविकायाः फलं प्राज्ञैः कथिता गजपिप्पली ।
कपिवल्ली कोलवल्ली श्रेयसी वशिरश्च सा ॥
गजकृष्णा कटुर्वातश्लेष्महृद्दक्षिवर्द्धिनी ।
उष्णा निहन्त्यतीसारं श्वासकण्ठामयक्रिमीन् ॥

मात्रा ६ रत्तिकाः ।

चित्रकः ।

चित्रकोऽनलनामा च पीठो व्यालस्तथोषणः ॥
चित्रकः कटुकः पाके वह्निकृत्पाचनो लघुः ।
रूक्षोष्णो ग्रहणीकुष्ठगोदार्शःक्रिमिकासनुत् ॥
वातश्लेष्महरो ग्राही वातार्शःश्लेष्मपित्तहृत् ।
प्लेपाच्चित्रकवत् स्याद्दाहिनी व्रणकारिणी ॥

अस्य मूलं ग्राह्यं, मात्रा ४ रत्तिकाः ।

यमानी ।

यवानिकोग्रगन्धा च वह्निदर्भाऽजमोदिका ।
सैवोक्ता दीप्यका दीप्या तथा स्याद्यवसाह्वया ॥
यवानी पाचनी रूक्षा तीक्ष्णोष्णा कटुका लघुः ।

दीपनी च तथा तिक्ता पित्तला वान्तिशूलहृत्।
वातश्लेष्मोदरानाहगुल्मप्लीहकृमिप्रणुत्॥

मात्रा २ माषकौ।

अजमोजा।

अजमोदा खराश्वा च मयूरो दीप्यकस्तथा।
तथा ब्रह्मकुशा प्रोक्ता कारवी च समस्तका॥
अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत्।
उष्णा विदाहिनी हृद्या हृद्या बलकरी लघुः।
नेत्रामयकफच्छर्दिहिक्कावस्तिरुजो हरेत्॥

बीजमस्या गृह्यते, मात्रा २ माषकौ।

पारसीकममानी।

पारसीकयमानी तु यमानीसदृशी गुणैः।
विशेषात् पाचनी रुच्या ग्राहिणी मादिनी गुरुः॥

मात्रा २ माषकौ।

शतपुष्या मिश्रेया च।

शतपुष्या शताह्वा च मधुरा कारवी मिसिः।
अतिलब्धो सितच्छत्रा सहिता कृमिकापि च॥
छत्रा शालेयशालीनो मिश्रेया मधुरा मिसिः।
शतपुष्या लघुस्तीक्ष्णा पित्तकृद्दीपनी कटुः॥
उष्णा ज्वरानिलश्लेष्मव्रणशूलाक्षिरोगहृत्।
मिश्रेया तद्गुणा प्रोक्ता विशेषाद्योनिशूलनुत्॥
अग्निमान्द्यहरी हृद्या बडविट्कृमिशूलहृत्।
रूक्षोष्णा पाचनी कासवमिश्लेष्मानिलान् हरेत्॥

अनर्यामात्रा माषकौ।

हिङ्गु ।

सहस्रवेधि जतुकं वाह्लीक हिङ्गु रानठम् ।
हिङ्गूषं पाचनं रुच्यं तीक्ष्णं वातकफापहम् ॥
शूलगुल्मोदरानाहकृमिघ्नं पित्तवर्द्धनम् ।
स्त्रीपुंष्पजननं बल्यं मूर्च्छापस्मारहृत्परम् ॥

मात्रा ४ रत्तिकाः ।

हवुषाद्वयम् ।

तन्मध्ये प्रथमं फलं मत्स्यसदृशं विस्रगन्धम् ।
द्वितीयमश्वत्थफलसदृशं मत्स्यगन्धं तयोर्नामानि शुभानि ॥
हवुषा वपुषा विस्रा पराश्वत्थफला मता ।
मत्स्यगन्धा प्लीहहन्त्री विषघ्नी श्वासनाशिनी ॥
हवुषा दीपनी तिक्ता मधुरा तुवरा गुरुः ।
पित्तोदरसमीराशोंग्रहणीगुल्मशूलहृत् ॥
परास्येतद्गुणा प्रोक्ता रूपभेदो द्वयोरपि ।
हवुषाया अलाभे तु चविका तत्र युज्यते ॥

सदा हवुषानाम्ना यद्विक्रियते तत्र हवुषा, तत्तु सुरप्रियं मरिचसदृशं वा ।

तेजवती । तेजवल्फल इति च ।

तेजस्विनी तेजवती तेजोह्वा तेजनी तथा ॥
तेजस्विनी कफश्यामकामास्यामयवातहृत् ।
पाचन्युष्णा कटुस्तिक्ता रुचिवह्निप्रदीपनी ॥

मात्रा १ माषकः ।

बालम् ।

बालं श्रीवेरवर्हिष्ठोदीच्येष्वम्बुनाम च ॥

बालकं शीतलं रूक्षं लघुदीपनपाचनम् ।
हृल्लासारुचिविसर्पहृद्रोगामातिसारजित् ॥

मात्रा १ माषकः ।

हिङ्गुपत्री ।

हिङ्गुपत्री तु कवरी पृथ्विका पृथुका पृथुः ॥
हिङ्गुपत्री भवेदुष्णा तीक्ष्णोष्णा पाचनी कटुः ।
हृद्वस्तिरुग्विबन्धार्शःश्लेष्मगुल्मानिलापहा ।

मात्रा २ माषकौ ।

वंशपत्री ।

वंशपत्री वेणुपत्री पिण्डा हिङ्गुशिवाटिका ।
हिङ्गुपत्रीगुणा विज्ञैर्वंशपत्री च कीर्त्तिता ॥

चाङ्गेरी ।

चाङ्गेरी चुक्रिका दन्तशठाम्लवेतसिका ।
अम्लवल्ली शफरी पिमली चाम्लपत्रकः ॥
चाङ्गेरी दीपनी रुच्या रूक्षोष्णा कफवातनुत् ।
पित्तलास्रा ग्रहण्यर्श कुष्ठातीसारनाशिनी ॥

मात्रा ४ माषकाः ।

रोचनी ।

रोचनी वह्निजननी वक्त्रजाड्यनिसूदनी ।
कफवातहरी बल्या रुच्या रोचकवारिणी ॥

मात्रा २ माषकौ ।

षोड़शोऽध्यायः ।

अथ समुत्तेजनीयवर्गः ।

कुपीलुः ।

सतिन्दुकश्च कथितो जलदो दीर्घपत्रकः ।
कुपीलुः कुलकः कालस्तिन्दुकः कालपीलुकः ॥
काकेन्दुर्विषतिन्दुश्च तथा मर्कटतिन्दुकः ।
कुपीलु शीतलं तिक्तं वातलं मदकृल्लघु ॥
परं व्यथाहरं ग्राहि कफपित्तास्रनाशनम् ।
सूत्रप्रवर्त्तनं वल्यं वह्निकृत् कामदीपनम् ॥
शूलमेकाङ्गरोगञ्च शुक्रमेहलपस्मृतिम् ।
ग्रहणीमतिसारञ्च गुदभ्रंशं मदात्ययम् ।
सर्वाङ्गकम्पं दौर्बल्यं न चिरेण विनाशयेत् ॥

अस्य बीजं ग्राह्यं, मात्रा २ रत्तिके ।

भङ्गा

भङ्गा पत्रा मातुलानी मादिनी विजया जया ।
भङ्गा कफहरी तिक्ता ग्राहिणी पाचनी लघुः ॥
तीक्ष्णोष्णा पित्तला मोहमद्वाग्वह्निवर्द्धिनी ।
मदनोद्दीपनी निद्राजननी हर्षदायिनी ॥
धनुस्तम्भं जलत्रासं विसूचीञ्च मदात्ययम् ।
प्रवृत्तिं रजसो बह्नीं हन्त्यपत्यप्रसूतिकृत् ।

मात्रा ४ रत्तिका ।

संविदामञ्जरी । हिन्दी गङ्गा ।

संविदामञ्जरी चोग्रा मादिनी हर्षिणी तथा ।
आग्नेयी हर्षिणी वल्या मन्मथोद्दीपनी च सा ॥
निद्रासञ्जननी गर्भपातिनी च विकाशिनी ।
वेदनाक्षेपहरणी ज्ञेया च मदकारिणी ॥
श्वसृगालादिदंशोत्थं लोयातङ्कं निवारयेत् ।
वाह्यासयान्तरामयौ विसूचीमपि दारुणाम् ॥
मदात्ययं महाघोरं शूलञ्चैवास्रपित्तकम् ।
अग्निमान्द्यं हरेच्चापि रजोऽस्रमतिसंस्रुतम् ॥
ज्ञेयश्च संविदासारो हर्षिणीसदृशो गुणैः ।
तथाच हर्षिणीस्थाने योजयेदेनमेव च ॥

अस्याः सारमात्रादिरत्तिका ।

धुस्तूर ।

धुस्तूरधूर्त्तधुस्तूरा उन्मत्तः कनकाह्वयः ।
देवता कितवस्तूरी महामोहो शिवप्रियः ।
मातुलो मदनश्चास्य फले मातुलपुत्रकः ॥
धुस्तूरो मदवर्णाग्निवातकृच्छ्वरकुष्ठनुत् ।
कषायो मधुरस्निग्धो यूकालिक्षाविनाशकः ॥
उष्णो गुरुर्व्रणश्लेष्मकण्डूक्रिमिविषापहः ।
वेदनाहरणो निद्राजननो मूत्रवर्द्धनः ॥
समन्ततः प्रलेपेन नेत्रताराप्रसारणः ।
धुस्तूरधूमपानेन श्वासस्तूर्णं प्रशाम्यति ॥

अस्य मूलपत्रादिकं ग्राह्यं, मात्रा १ रत्तिका ।

वोलम् ।

वोलं गन्धरसः प्राणपिच्छगोपरसाः समाः ॥
वोलं रक्तहरं शीतं मेध्यं दीपनपाचनः ।
मधुरं कटुतिक्तञ्च ग्रहस्वेदविदोषजित् ।
ज्वरापस्मारकुष्ठघ्नो गर्भाशयविशुद्धकृत् ॥

मात्रा १ माषकः ।

शाखिमूलः ।

शाखिमूलो मलयभूरध्यिद्वचोऽपि स स्मृतः ।
बल्यो वातबलासघ्नो ज्वरहृच्छीतवारणः ॥

अस्य मूलत्वक् ग्राह्या, मात्रा १ माषकः ।

धूनराजः । हिन्दी रुमिमस्तकी ।

धूनराजः पीतरसो भङ्गुरा गन्धीन स्त्रियाम् ॥
मूत्रलो धूनराजः स्याद्वातहृत् कफनाशकः ।
दन्तरोगहरो बल्यो मेहास्रग्दरशातनः ॥

मात्रा २ माषकौ ।

म्लेच्छफलम् । हिन्दी काशीया ।

क्लीवे म्लेच्छफलं प्रोक्तमतन्त्री च स्त्रिया मता ।
अतन्त्री कफनुद्बल्या निद्रातन्द्राविघातिनी ॥
स्नायूनां बलदा प्रोक्ता श्वासकासज्वरामयान् ।
अङ्गावभेदकं आध्मतोसारञ्च नाशयेत् ॥

अस्य फाण्टः सैन्धवूर्णमपि व्यवह्रियते ।

कटुवीरा । हिन्दी लङ्कामिरिच ।

कटुवीरोज्ज्वला तीक्ष्णा तीव्रशक्त्यजडे तथा ।
कटुवीराग्निजननी बलासघ्नी च दाहिनी ॥

हृत्यजीर्णं विसूचीञ्च वर्णं क्लीबं सुदारुणम् ।
तन्द्रां मोहं प्रलापञ्च स्वरभेदमरोचकम् ॥
नरं लुप्तधरं क्षीणं सन्निपातनिपीडितम् ।
नष्टेन्द्रियगणं तीक्ष्णा मृत्योराकृष्य जीवयेत् ॥
अस्याः फलं ग्राह्यं, मात्रा १ रत्तिका ।

सप्तदशोऽध्यायः ।

अथ गन्धवर्गः ।

कस्तूरी ।

मृगनाभिर्मृगमदः कथितस्तु सद्भिभिः ।
अक्षूरिका च कस्तूरी वेधमुख्या च सा स्मृता ॥
कामरूपोद्भवा कृष्णा नैपाली नीलवर्णयुक् ।
काश्मीरी कपिलच्छाया कस्तूरी त्रिविधा स्मृता ॥
कामरूपोद्भवा श्रेष्ठा नैपाली मध्यमा भवेत् ।
काश्मीरदेशसम्भूता कस्तूरी ह्यधमा मता ॥
कस्तूरिका कटुस्तिक्ता चारोष्णा शुक्रला गुरुः ।
कफवातविषच्छर्दिशीतदौर्गन्ध्यशोषहृत् ॥
वाजीपकरणः स्वेदजननः कामदीपनः ।
हिक्काघ्नो मूत्रलो बल्यः किञ्चिन्मदकरः स्मृतः ॥
मात्रा २ रत्तिके ।

कर्पूरम् ।

पुंसि क्लीवे च कर्पूरः सिताभ्रो हिमवालुकः ।
घनसारश्चन्द्रसंज्ञ हिमनामापि स स्मृतः ॥
कर्पूरः शीतलो हृद्यश्चक्षुष्यो लेखनो लघुः ।
सुरभिर्मधुरस्तिक्तः कफपित्तविषापहः ॥
दाहतृष्णास्यवैरस्यमेदोदौर्गन्ध्यनाशकः ।
श्रान्तिश्रमनो निद्राजननो घर्मवर्धनः ।
वेदनाहारकः कामशान्तिकृच्छुक्रमेहहृत् ॥
कर्पूरो द्विविधः प्रोक्तः पक्वापक्वप्रभेदतः ।
पक्वात् कर्पूरतः प्राहुरपक्वं गुणवत्तरम् ॥
मात्रा ४ रत्तिकाः ।

चीनकर्पूरम् ।

चीनाकसंज्ञः कर्पूरः कफक्षयकरः स्मृतः ।
कुष्ठकण्डूवमिहरस्तथा तिक्तरसश्च सः ॥

कुङ्कुमम् ।

कुङ्कुमं घुसृणं रक्तं काश्मीरं पीतकं वरम् ।
सङ्कोचं पिशुनं धीरं वाह्लीकं शोणिताभिधम् ॥
काश्मीरदेशजे क्षेत्रे कुङ्कुमं यद्भवेद्धि तत् ।
सूक्ष्मकेशरसारक्तं पद्मगन्धि तदुत्तमम् ॥
वाह्लीकदेशमञ्जातं कुङ्कुमं पाण्डुरप्रभम् ।
केतकीगन्धयुक्तं तन्मध्यम सूक्ष्मकेशरम् ॥
कुङ्कुमप्यारसीके यन्मधुगन्धि तदीरितम ।
ईषत्पाण्डुरवर्णं तदधमं स्थूलकेशरम् ॥
कुङ्कुमं कटुकं स्निग्धं शिरोरुग्व्रणजन्तुजित् ।

तिक्तं वमिहरं वर्ण्यं व्यङ्गदोषत्वयापहम् ॥

मात्रा ६ रक्तिकाः ।

चन्दनम् ।

श्रीखण्डं चन्दनं न स्त्री भद्रश्रीस्तैलपर्णिकः ।
गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः ॥
स्वादे तिक्तं कषे पीतं छेदे रक्तं ततो सितम् ।
ग्रन्थिकीठरसंयुक्तं चन्दनं श्रेष्ठमुच्यते ॥
चन्दनं शीतलं रूक्षं तिक्तमाह्लादनं लघु ।
श्रमशोषविषश्लेष्मतृष्णापित्तास्रदाहनुत् ॥

अस्य काष्ठं ग्राह्यं, मात्रा ६ रक्तिका. ।

अगुरु ।

अगुरु प्रवरं लोहं राजार्हं योगजं तथा ।
वंशिकं क्रिमिजं वायि क्रिमिजग्धमनार्य्यकम् ॥
अगुरूणं कटु त्वच्य तिक्तं तीक्ष्णञ्च पित्तलम् ।
लघु कर्णाक्षिरोगघ्नं शीतवातकफप्रणुत् ॥
कृष्णं गुणाधिकं तत्तु लोहवद्वारि मज्जते ।
अगुरूपभवः स्नेहः कृष्णागुरुसमः स्मृतः ॥

अस्य काष्ठं ग्राह्यं, मात्रा ६ रक्तिकाः ।

श्रीवासः ।

श्रीवासः सरलः स्राव श्रीवेष्टो हृच्छधूपक ॥
श्रीवासो मधुरस्तिक्तः स्निग्धोष्णस्तुवरः सरः ।
पित्तलो वातमूर्द्धाक्षिस्वररोगकफापहः ॥
रक्तोग्रः स्वेददौर्गन्ध्यक्रिमिकण्डूव्रणप्रणुत् ।
स्वेदनश्च कफोत्क्लारी शोणितस्तुतिवारणः ॥

आक्षेपहरणो मूत्रजननो ज्वरनाशनः ।
वेदनाशमनो बल्य आमवातप्रशान्तिकृत् ॥

मात्रा १ माषकः ।

स्थूलैला ।

एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च ।
भद्रैला बृहटैला च चन्द्रबाला च निष्कुटिः ॥
स्थूलैला कटुका पाके रसे चानलकृल्लघुः ।
रूक्षोष्णा श्लेष्मपित्तास्रकण्डूश्वासव्रणापहा ।
हृल्लासविषवस्त्यास्यशिरोरुग्वमिकासनुत् ॥

अस्या बीजं ग्राह्यं, मात्रा १ माषकः ।

सूक्ष्मैला ।

सूक्ष्मोपकुञ्चिका तुच्छा कोरङ्गी द्राविडी त्रुटिः ॥
एला सूक्ष्मा कफश्वासकासार्शोमूत्रकृच्छ्रहृत् ।
रसे तु कटुका शीता लघ्वी वातहरी मता ॥

अस्या बीजं ग्रहणीयं, मात्रा १ माषकः ।

त्वक्पत्रम् । हिन्दी तज् ।

त्वक्पत्रञ्च वराङ्गं स्याद्गुङ्गं चोदस्थोत्कटम् ॥
त्वच लघूष्णं कटुक स्वादु तिक्तञ्च रूक्षकम् ।
पित्तलं कफवातघ्नं कण्ड्वामरुचिनाशनम ।
हृद्हस्तिरोगवातार्शःक्रिमिपीनसशुक्रहृत् ॥

त्वक् ।

त्वक् त्वाढी तु गुडत्वक् स्यात्तथा दारुसिता मता ॥
उक्ता दारुसिता स्वाढी तिक्ता चानिलपित्तहृत् ।
सुरभि शुक्ला वर्ष्या मुखशोषव्रणापहा ॥

जातीफलम् ।

जातीफलं जातिकोषं मालतीफलमित्यपि ॥
जातीफल रसे तिक्तं सोष्णोष्णं रोचनं लघु ।
कटुकं दीपनं ग्राहि स्वर्य्यं श्लेष्मानिलापहम् ॥
निहन्ति मुखवैरस्य मलदौर्गन्ध्यकृष्णताः ।
क्रिमिकासवमिश्वासमयोषपीनसहृद्रुजः ॥

लवङ्गम् ।

लवङ्गं देवकुसुमं श्रीसङ्गं श्रीप्रसूनकम् ।
लवङ्गं कटुकं तिक्तं लघु नेत्रहितं हिमम् ।
दीपनं पाचनं रूक्षं कफपित्तास्रनाशकृत् ॥
तृष्णां छर्दिं तथाध्मानं शूलमाशु विनाशयेत् ।
कासं श्वासञ्च हिक्काञ्च क्षयं क्षपयति ध्रुवम् ॥
मात्रा १ माषकः ।

जटामांसी ।

जटामांसी भूतजटा जटिला च तपस्विनी ॥
मांसी तिक्ता कषाया च मेध्या वान्तिबलप्रदा ।
स्वादो हिमा त्रिदोषास्रदाहापस्मारकुष्ठनुत् ।
लेपनाद्भूचता हन्ति ज्वर चर्मोद्भवं गदम् ॥
अस्या मूलं ग्रहणीयं, मात्रा ६ रत्तिकाः ।

मुरामांसी ।

मुरा गन्धकटी देव्या सुरभिः शालपर्णिका ॥
मुरा तिक्ता हिमा स्वादो लघ्वी पित्तानिलापहा ।
ज्वरास्रभूतरक्षोघ्नी कुष्ठकासविनाशिनी ॥
मात्रा ६ रत्तिकाः ।

कर्चूर ।

कर्चूरो वेधमुख्यश्च द्राविड कल्यक: शठो ॥
कर्चूरो दीपनो रुच्यः कटुकस्तिक्त एव च ।
सुगन्धिः कटुपाकः स्यात् कुष्ठार्शोव्रणकासनुत् ॥
उष्णो लघुः हरेच्छ्वास गुल्मवातकफक्रिमीन् ।
गलगण्ड गण्डमालामपचीं मुखजाञ्जहृत् ॥
अस्या मूल ग्राह्यं, मात्रा ६ रत्तिकाः ।

पलाशीशठी ।

गन्धपलाशी सुगन्धद्रव्यमिदं
काश्मीरे प्रसिद्धम् ।
शटीपलाशी षड्ग्रन्था सुव्रता गन्धमूलिका ।
गन्धारिका गन्धबधूर्बधू पृथुपलाशिका ॥
भवेद्गन्धपलाशी तु कषाया ग्राहिणी लघुः ।
तिक्ता तीक्ष्णा च कटुकानुष्णास्यमलनाशिनी ।
शोथकासव्रणश्वासशूलहिक्काग्रहापहा ॥
अस्या मूलं ग्रहणीयं, मात्रा ६ रत्तिकाः ।

जातीपत्री ।

जातीफलस्य त्वक् प्रोक्ता जातीपत्री भिषग्वरैः ॥
जातिपत्री लघुः स्वादु कटूष्णा रुचिवर्णकृत् ।
कफकासवमिश्वासतृष्णाक्रिमिविषापहा ।
वह्निवैशद्यजननी तिक्ता दौर्गन्ध्यहारिणी ॥
मात्रा ४ रत्तिकाः ।

कक्कोलम् ।

कक्कोल कोलक प्रोक्तं तथा कोषफलं स्मृतम् ॥

कक्कोलं लघु तीक्ष्णोष्णं तिक्तं हृद्यं रुचिप्रदम् ।
श्वासदौर्गन्ध्यहृद्रोगकफवातामयान्जयेत् ॥

मात्रा ६ रत्तिकाः ।

गन्धकोकिला गन्धमालती च ।

स्निग्धोष्णा कफहृत् तिक्ता सुगन्धा गन्धकोकिला ।
गन्धकोकिलया तुल्या विज्ञेया गन्धमालती ॥

मात्रा ४ रत्तिका. ।

पत्रकम् ।

पत्रन्तमालपत्रञ्च तथा स्यात् पत्रनामकम् ।
पत्रक मधुर किञ्चित्तीक्ष्णोष्ण पिच्छिल लघु ।
निहन्ति कफवातार्शोहृल्लासारुचिपीनसान् ॥

मात्रा १ माषकः ।

लताकस्तूरिका ।

लताकस्तूरिका तिक्ता स्वादी हृद्या हिमा लघुः ।
चक्षुष्या केदिनी श्लेष्मतृष्णावस्त्यास्यरोगहृत् ॥

अस्या बीज ग्राह्यं, मात्रा ६ रत्तिकाः ।

खट्टायो ।

गन्धमार्जारवीर्य्यन्तु वीर्य्यकृत् कफवातहृत ।
कण्डूकुष्ठहरं नेत्र्यं सुगन्धं खेटगन्धनुत् ॥

अस्या अभ्यन्तरस्थो रेणुर्मृगनाभिरभावे तु प्रयुज्यते ।
मात्रा ४ रत्तिकाः ।

यक्षकर्दमनिर्य्यासः । हिन्दी कुन्दुरखोटी ।

कुन्दुरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि ॥
कुन्दुरुर्मधुरस्तिक्तस्तीक्ष्णस्वच्यः कटुर्हरेत् ।

ज्वरस्वेदग्रहालक्ष्मीमुखरोगकफानिलान् ।
दाहप्रदरपित्तार्त्तीर्लेपनाच्छैत्यदः स्मृतः ॥

मात्रा ६ रक्तिकाः ।

देवदारु ।

देवदारु स्मृतं दारु भद्रदार्विन्द्रदारु च ।
मस्तदारु द्रुकिलिमं किलिमं सुरभूरुहः ॥
देवदारु लघु स्निग्धं तिक्तोष्णं कटुपाकि च ।
विबन्धाध्मानशोथामतन्द्राश्लिक्काज्वरास्रजित् ।
प्रमेहपीनसश्लेष्मकासकण्डूममीरनुत् ॥

अस्य काष्ठं ग्राह्यं, मात्रा ६ रक्तिकाः ।

तुम्बुरुफलम् ।

तुम्बुरु सौरभः सौरो वनज मानुजोऽम्बकः ॥
तुम्बुरु प्रथितं तिक्तं कटु पाकेऽपि तत्कटु ।
रूक्षोष्णं दीपनं तीक्ष्णं रुच्यं लघु विदाहि च ॥
वातश्लेष्मार्त्तिकर्णौष्ठशिरोरुग्गुरुनाक्रिमीन् ।
कुष्ठशूलारुचिश्वासप्लीहकृच्छ्राणि नाशयेत् ॥

अस्य बीजं ग्राह्यं, मात्रा १ माषकः ।

नखम् ।

नखं व्याघ्रनखं व्याघ्रायुधत्वक्चक्रकारकम् ।
नखं खलं नखी प्रोक्ता हनुर्हट्टविलासिनी ॥
नखदयं ग्रहश्लेष्मवातास्रज्वरकुष्ठहृत् ।
लघुष्णं शुक्लं वर्ण्यं स्वादव्रणविषापहम् ।
अलक्ष्मीमुखदौर्गन्ध्यहृत् पाकरसयोः कटुः ॥

मात्रा २ रक्तिके । अस्याभ्यन्तरिकः प्रयोगोऽपि अति-विरलः ।

मुस्तकं नागरमुस्तकञ्च ।

मुस्तकं न स्त्रियां मुस्तं विषु वारिदनामकम् ।
कुरुविन्दश्च संख्यातोऽपरः क्रोडकसेरुकः ॥
भद्रमुस्तश्च गुन्द्रा च तथा नागरमुस्तकः ॥
मुस्तं कटु हिमं ग्राहि तिक्तं दीपनपाचनम् ।
कषायं कफपित्तास्रज्वरातिसारजन्तुहृत् ॥
आनूपदेशे यज्जातं मुस्तकं तत् प्रशस्यते ।
तत्रापि मुनिभिः प्रोक्तं वरं नागरमुस्तकम् ॥

अस्य मूलं ग्राह्यं, मात्रा १ माषक ।

मेथिका वनमेथिका च ।

मेथिका मेथिनी मेथी दीपनी बह्वपत्रिका ।
बोधिनी बहुबीजा च जातिर्गन्धफला तथा ॥
वल्लरी च कामसत्या मिश्रपुष्पा च कैरवी ।
कुक्षिका बहुपर्णी च पित्तजित् वायुनुत् हिधा ॥
मेथिका वातशमनी श्लेष्मघ्नी ज्वरनाशिनी ।
रुचिप्रदा दीपनी च रक्तपित्तप्रकोपिनी ॥
ततः स्वल्पगुणा बल्या वाजिनां सा तु पूजिता ॥

अनयोर्बीजं ग्राह्यं, मात्रा २ माषकौ ।

शुक्लजीरः कृष्णजीरः कालाजाजी च ।
जीरको जरणोऽजाजी कणा स्यादीर्घजीरकः ।
कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः ॥
कालाजाजी तु सुषवी कालिका चोपकालिका ।

पृथ्वीका कारवी पृथ्वी पृथुकृष्णोपकुञ्चिका।
उपकुञ्ची च कुञ्ची च हृद्गन्धीरक इत्यपि ॥
जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु ।
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत् ॥
ज्वरघ्नं पाचनं हृद्यं बल्यं रुच्यं कफापहम् ।
चक्षुष्यं पवनाध्मानगुल्मच्छर्त्यतिसारहृत् ॥
अस्य बीजं ग्राह्यं, मात्रा २ माषकौ ।

सिल्हकः ।

सिल्हकस्तु तुरुष्कः स्याज्जातो यवनदेशतः ।
कपिलैलश्च संख्यातस्तथा च कपिनामकः ॥
सिल्हकः कटुकः स्वादुः स्निग्धोष्णः शुक्रकान्तिकृत् ।
हृद्यः कण्ठ्यः स्वेदकुष्ठज्वरदाहग्रहापहः ।
मूत्रघाताश्मरीमूत्रकृच्छ्रकण्डूविनाशनः ॥
निर्य्यासस्यास्य मात्रा ४ रत्तिकाः ।

शैलेयकम् ।

शैलेयन्तु शिलापुष्पं हृद्यं कालानुसार्य्यकम् ॥
शैलेयं शीतलं हृद्यं कफपित्तहरं लघु ।
कण्डूकुष्ठाश्मरीदाहविषहृद्रुग्रक्तहृत् ॥

सरलः ।

सरलः पीतहृच्छः स्यात्तथा सुरभिदारुकः ॥
सरलो मधुरस्तिक्तो कटुपाकरसो लघुः ।
स्निग्धोष्णः कर्णकण्ठाक्षिरोगरुचोहरः स्मृतः ।
कफानिलस्वेददाहकासमूर्च्छाव्रणापहः ॥

नागकेशरः ।

नागपुष्पः स्मृतो नागः केशरो नागकेशरः ।
चाम्पेयो नागकिञ्जल्कः कथितः काञ्चनाह्वयः ॥
नागपुष्पं कषायोष्णं रूक्षं लघ्वामपाचनम् ।
ज्वरकण्डूतृषास्रेदच्छर्दिहृल्लासनाशनम् ।
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम् ॥

ग्रन्थिपर्णम् ।

ग्रन्थिपर्णी ग्रन्थिकश्च काकपुच्छश्च गुच्छकम् ।
नीलपुष्पं सुगन्धश्च कथितं तैलपर्णकम् ॥
ग्रन्थिपर्णं तिक्तशीतं कटूष्णं दीपनं लघु ।
कफवातविषश्वासकण्डूदौर्गन्ध्यनाशनम् ॥

स्थौणेयकम् ।

द्रव्यमिदं ग्रन्थिपर्णस्यैव भेद ईषत्सुगन्धश्च
थुनेर इति लोके प्रसिद्धम् ।
स्थौणेयकं बर्हिबर्हं शुकबर्हश्च कुक्कुरम् ।
शीर्णरोम शुकच्छापि शुकपुष्पं शुकच्छदम् ॥
स्थौणेयकं कटु स्वादु तिक्तं स्निग्धं त्रिदोषनुत् ।
मेधाशुक्रकरं रुच्यं रक्तोष्णं ज्वरजन्तुजित् ।
हन्ति कुष्ठास्रदद्रूदाहदौर्गन्ध्यतिलकालकान् ॥

कितवः ।

ग्रन्थिपर्णस्यैव भेदः, भटेउर इति
नेपालदेशे भवति ।
निग्राचरो धनहरः कितवो गणहासकः ।
रोचको मधुरस्निग्धः कटुः पाके कटुर्लघुः ॥

तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठकण्डूकफानिलान्
रक्तोशीरे दमोदोऽस्रज्वरगन्धविषव्रणान् ॥

पर्पटी ।

पर्पटी इति पद्मावती इति
च प्रसिद्धम् उत्तरदेशे सुगन्धि द्रव्यम् ।
पर्पटी रञ्जना कृष्णा जतुका जननी जनी ।
जतुकृष्णाग्निसंस्पर्शा जतुकृच्चक्रवर्त्तिनी ॥
पर्पटी तुवरा तिक्ता शिशिरा वर्णकृल्लघुः ।
विषव्रणहरी कण्डूकफपित्तास्रकुष्ठनुत् ॥

नलिका ।

नलिका उत्तरपथे प्रसिद्धा, सुगन्धा प्रवाला-
कृतिर्यवानी इति च क्वचित् प्रसिद्धा ।
नलिका विद्रुमलता कपोतचरणा नटी ।
धमन्यञ्जनकेशी च निर्मध्या सुषिरा नली ॥
नलिका शीतला लघ्वी चक्षुष्या कफपित्तहृत् ।
कृच्छ्राश्मवाततृष्णास्रकुष्ठकण्डूज्वरापहा ॥

प्रपौण्डरीकम् ।

प्रपौण्डरीकं सुगन्धद्रव्यं, पुण्डेरी इति
लोके प्रसिद्धम् ।
प्रपौण्डरीकं पौण्ड्यं चतुष्यं पौण्डरीयकम् ॥
पौण्ड्यं मधुरं तिक्तं कषायं शुक्रलं हिमम् ।
चतुष्यं मधुरं पाके वर्ण्यं पित्तकफप्रणुत् ॥

स्फूर्का ।

स्फूर्का सुगन्धि द्रव्यं, शाकभेदो लघूदक-
पुरीति लोके प्रसिद्धा ।
स्फूर्कास्फक् ब्राह्मणी देवी मरुन्माला लता लघुः ।
समुद्रान्ता मधूः कोटिर्वर्षाभूश्चायिकेत्यपि ॥
स्फूर्का स्वादौ हिमा तृष्या तिक्ता निखिलदोषनुत् ।
कुष्ठकण्डूविषस्वेददाहास्रज्वररक्तकृत् ॥

अष्टादशोऽध्यायः ।

ज्वरघ्नवर्गः ।

निम्बः ।

निम्बः स्यात् पिचुमर्दश्च पिचुमन्दश्च तिक्तकः ।
अरिष्टः पारिभद्रश्च हिङ्गुनिर्य्यास इत्यपि ॥
निम्बः रूक्षः कटुर्भेदी कटुपाकोऽग्निवातनुत् ।
अरुच्यः श्रमलट्कासज्वरारुचिक्रिमिव्रणुत् ।
व्रणपित्तकफच्छर्दिकुष्ठतृष्णासमेहनुत् ॥
निम्बपत्रं स्मृतं नेत्र्यं क्रिमिपित्तविषव्रणुत् ।
वातलं कटुपाकञ्च सर्वारोचककुष्ठनुत् ॥
निम्बफलं रसे तिक्तं पाके तु कटु भेदनम् ।
स्निग्धं लघूष्णं कुष्ठघ्नं गुल्मार्शःक्रिमिमेहनुत् ॥
अस्य त्वगादिकं ग्राह्यं, मात्रा १ मासकः ।

किरातत्तिक्तः ।

किरातत्तिक्तः कैरातः कटुत्तिक्तः किरातकः ।
काण्डतिक्तो नार्य्यतिक्तो भूनिम्बो रामसेनकः ॥
किरातकोऽन्यो नैपालः सोऽर्द्धतिक्तो ज्वरान्तकः ॥
किरातः सारको रूक्षः शीतलस्तिक्तको लघुः ।
सन्निपातज्वरश्वासकफपित्तास्रदाहनुत् ।
कासशोथव्रणाकुष्ठज्वरव्रणकृमिप्रणुत् ॥

मात्रा १ माषकः ।

गुडूची ।

गुडूची मधुपर्णी स्यादमृताऽमृतवल्लरी ।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च ॥
जीवन्ती तन्द्रिका सोमा सोमवल्ली च कुण्डली ।
चक्रलक्षिका धीरा विशल्या च रसायनी ।
चन्द्रहासा वयस्था च मण्डली देवनिर्मिता ॥
गुडूची कटुका तिक्ता स्वादुपाका रसायनी ।
संग्राहिणी कषायोष्णा लघ्वी बल्याग्निदीपनी ॥
दोषत्रयामवड्दाहमेहकासांश्च पाण्डुताम् ।
कामलाकुष्ठवातास्रज्वरकृमिविषमीन् हरेत् ।
प्रमेहश्वासकासार्शःकृच्छ्रवीसर्पवातनुत् ॥

मात्रा २ माषकौ ।

अतिविषा ।

विषा त्वतिविषा विश्वा शृङ्गी प्रतिविषारुणा ।
शुक्लकन्दा घोषविषा भङ्गुरा घुणवल्लभा ॥
विषा सोष्णा कटुस्तिक्ता पाचनी दीपनी हरेत् ।

जीर्णज्वरातिसारामपित्तकासकफक्रिमीन् ॥

अस्या मूलं ग्राह्यं, मात्रा १ माषकः ।

रोहितकः ।

रोहीतको रोहितको रोही दाडिमपुष्पकः ॥

रोहीतकः प्लीहघाती रुच्यो रक्तप्रसादनः ।

कषायः शीतलः स्निग्धो यकृद्दुल्लहरो मतः ।

नेत्ररोगप्रशमनः क्रिमिघ्नो व्रणनाशनः ॥

अस्य मूलत्वग्ग्रहणीया, मात्रा १ माषकः ।

श्वेतपुष्पा नीलपुष्पा च अपराजिता ।

आस्फोता गिरिकर्णी स्यादिष्णुक्रान्तापराजिता ॥

अपराजिते कटू मेध्ये शीते कण्ठ्ये सुदृष्टिदे ।

कुष्ठशूलविदोषामशोथव्रणविषापहे ।

कषाये कटुके पाके तिक्ते च स्मृतिवर्द्धिते ॥

अनयोर्मूलं ग्रहणीयं, मात्रा ४ रत्तिकाः ।

सिन्दुवारः ।

सिन्धुवारः श्वेतपुष्पः सिन्धुकः सिन्दुवारकः ।

नीलपुष्पी तु निर्गुण्डी सेफाली सुवहा च सा ॥

सिन्दुकः स्मृतिदस्तिक्तः कषायः कटुको लघुः ।

केश्यो नेत्रहितो हन्ति शूलशोथाममारुतान् ॥

क्रिमिकुष्ठारुचिस्रेष्मज्वरान्नीलापि तद्विधा ।

सिन्दुवारदलं जन्तुवातस्रेष्महरं लघु ॥

अस्य मूलादिकं ग्राह्यं, मात्रा १ माषकः ।

यवतिक्ता ।

यवतिक्ता महातिक्ता सान्निकृष्टवर्द्धनी ।

तिक्ता ज्वरातिसारघ्नी बालानां शुभदा सदा ॥

अस्याः स्वरसो ग्राह्यः, मात्रा १ तोलकः ।

चम्पकः ।

चम्पकः स्वर्णपुष्पश्च चाम्पेयो हेमपुष्पकः ।
टोपपुष्पो भृङ्गमोही सुरभिर्भ्रमरातिथिः ॥
वनदीपः पीतपुष्पो हेमाङ्गः शीतलच्छदः ।
सुभगः स्थिरगन्धश्च सुकुमारोऽतिगन्धकः ॥
चम्पकः शीतलः स्वादुः कटुस्तिक्तः कषायकः ।
वल्यो विषकृमिहरः कफपित्तप्रणाशनः ।
दाहदातास्रकण्डूश्च ज्वरांश्च निखिलान् जयेत् ॥

अस्य त्वक्स्वरसादिकं ग्राह्यं, मात्रा त्वचः १ माषकः, स्वरसस्य च १ तोलकः ।

महातिक्ता । मिस्मितिता इतिलोके ।

भद्रतिक्ता महातिक्ता रसे तिक्ताग्निवर्द्धिनी ।
ज्वरघ्नी पित्तहृद्ध्या श्लेष्माणमपि नाशयेत् ॥

अस्या मात्रा ६ रत्तिकाः ।

ऊनविंशोऽध्यायः ।

कासघ्नवर्गः ।

विभीतकः ।

विभीतकस्त्रिलिङ्गः स्याद्बाह्यः कर्षफलस्तु सः ।
कलिद्रुमो भूतवासस्तथा कलियुगालयः ॥
विभीतकं स्वादुपाकं कषायं कफपित्तनुत् ।
उष्णवीर्यं हिमस्पर्शं भेदनं कासनाशनम् ।
रूक्षं नेत्रहितं केश्यं क्रिमिवैस्वर्यनाशनम् ॥
विभीतमज्जा लघ्वर्हिकफवातहरो लघुः ।
कषायो मदकृच्चाथ धात्रीमज्जापि तद्गुणः ॥

अस्य फलं तन्मज्जा च गृह्यते । मात्रा २ माषकौ ।

पिप्पली ।

पिप्पली मागधी कृष्णा वैदेही चपला कणा ।
उपकुल्योषणा शौण्डी कोला स्यात् तीक्ष्णतण्डुला ॥
पिप्पली दीपनी वृष्या स्वादुपाका रसायनी ।
अनुष्णा कटुका स्निग्धा वातश्लेष्महरी लघुः ॥
पिप्पली रेचनी हन्ति श्वासकासोदरज्वरान् ।
कुष्ठप्रमेहगुल्मार्शःप्लीहशूलाममारुतान् ॥
आर्द्रा कफप्रदा स्निग्धा शीतला मधुरा गुरुः ।
पित्तप्रशमनी सा तु शुष्का पित्तप्रकोपिणी ॥
पिप्पली मधुसंयुक्ता मेदःकफविनाशिनी ।

श्वासकासज्वरहरा वृष्या मेध्याग्निवर्द्धिनी ॥
जीर्णज्वरेऽग्निमान्द्ये च प्रस्थते गुडपिप्पली ।
कासाजीर्णारुचिश्वासहृत्पाण्डुक्रिमिरोगनुत् ॥
द्विगुणपिप्पलीचूर्णादुगुडोऽत्र भिषजा मतः ॥
पिप्पलीफलस्य मात्रा १ माषकः ।

वंशरोचना ।

स्याद्वंशरोचना वांशी तुगाक्षीरी तुगा शुभा ।
त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी च वैणवी ॥
वंशजा दृहणी वृष्या बल्या स्वादौ च शीतला ।
रूक्षा कषाया पित्तघ्नी दुष्टस्रोणितशोधिनी ॥
तृष्णाकासज्वरश्वासक्षयपित्तास्रकामलाः ।
हरेत् कुष्ठं व्रण पाण्डुं दाहलुद्दातरक्तजित् ॥
अस्या मात्रा ६ रत्तिकाः ।

कर्कटशृङ्गी ।

शृङ्गी कर्कटशृङ्गी च स्यात् क्षीरविषाणिका ।
अजशृङ्गी च वक्रा च कर्कटाख्या च कीर्त्तिता ॥
शृङ्गी कषाया तिक्तोष्णा कफवातक्षयज्वरान् ।
श्वासोर्द्धवातहृट्कासहिक्कारुचिवमीन् हरेत् ॥
अस्याः फलं ग्राह्यं, मात्रा १ माषकः ।

कटफलः ।

कटफलः सोमवल्कश्च कैटर्य्यः कुम्भिकाऽपि च ।
श्रीपर्णिका कुसुदिका भद्रा भद्रवतीति च ॥
कटफलस्त्वरस्तिक्तः कटुर्वातकफज्वरान् ।

हन्ति श्वासप्रमेहार्शं कासकण्डूमयारुचीः ॥

अस्य त्वग्ग्राह्या, मात्रा ६ रक्तिकाः ।

भार्गी ।

भार्गी शृगुभवा पद्मा फञ्जी ब्राह्मणयष्टिका ।

ब्राह्मणङ्गारवल्ली च खरशाका च हण्डिका ॥

भार्गी रूक्षा कटुस्तिक्ता रुच्योष्णा पाचनी लघुः ।

दीपनी तुवरा गुल्मरक्तनुन्नाग्नयेदुध्रुवम् ।

श्वोथकासकफश्वासपीनसज्वरमारुतान् ॥

सर्वांशोऽस्या ग्राह्यं, मात्रा १ माषक. ।

वासकः ।

वासको वासिका वासा भिषङ्माता च सिंहिका ।

सिंहास्यो वाजिदन्तः स्याद्वाटरूषोऽटरूषकः ।

अटरूषो वृषस्तास्रः सिंहपर्णश्च स स्मृतः ॥

वासको वासकृत् स्वर्य्यः कफपित्तास्रनाशनः ।

तिक्तश्चुवरको हृद्यो लघुः शीतस्तृहर्त्तिहृत् ॥

श्वासकासज्वरच्छर्दिमेहकुष्ठक्षयापहः ॥

अस्य मूलत्वग्ग्राह्या, मात्रा १ माषकः ।

मेषशृङ्गी ।

मेषशृङ्गी विषाणी स्यान्मेषवल्लाजशृङ्गिका ॥

मेषशृङ्गी रसे तिक्ता वातला श्वासकासहृत् ।

रूक्षा पाके कटुस्तिक्ता व्रणश्लेष्मार्शिशूलनुत् ॥

मेषशृङ्गीफलं तिक्तं कुष्ठमेहकफप्रणुत् ।

दीपनं स्रंसनं कामक्रिमिव्रणविषापहम् ॥

अस्याः फलं ग्राह्यं, मात्रा १ माषकः ।

भूम्यामलकी ।

भूम्यामलकिका प्रोक्ता जिवा तामलकीति च ।
बहुपत्रा बहुफला बहुवीर्यैजटाधि च ॥
मूधात्री वातकृत् तिक्ता कषाया कटुका हिमा ।
पिपासाकामपित्तास्रकफकण्डूव्रणापहा ॥
सर्वांगोऽस्या ग्राह्यं, मात्रा १ क्वाथ्यः ।

अमी ।

अमी अक्षफला तुङ्गा वैद्यहस्तफला जिवा ।
मङ्ल्या च तथा लक्ष्मीः अमीरा अक्षिनाशनी मृता ॥
अमी तिक्ता कटुः शीता कषाया पित्तशोणितम् ।
कफकासश्वासकुष्ठार्शःक्रिमिजित् रुचिकृत् ॥
अस्या मूलत्वग् ग्राह्या, मात्रा १ क्वाथ्यः ।

वचा ।

वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विणी ।
क्षुद्रपत्री च मङ्ल्या जटिलोग्रा च लोमशा ॥
वचोग्रगन्धा कटुका तिक्तोष्णा वान्तिविरेचनी ।
विबन्धाध्मानशूलघ्नी अक्षम्यूत्रविशोधिनी ।
अपस्मारकफोन्मादभूतजन्त्वनिलान् हरेत् ॥

पारसीकवचा ।

पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा ।
हैमवत्युदिता तद्वद्गुणान् हन्ति विशेषतः ॥

सुगन्धा वचा ।

यस्य स्त्रीभिः कुलिङ्गस्य पुष्पं नासान्तरम् ।
सुगन्धाभ्युदितं च विशेषात् कफकासजित् ।

सुखरत्करी रुचा हृत्कण्ठमुखशोधिनी ॥
स्थूलग्रन्थिः यस्या लोके महावरी इति नाम।
स्थूलग्रन्थिः क्रमश्चा स्यात् ततो हीनगुणा स्मृता ॥
सर्वासां मात्रा १ माषकः ।

कुष्ठम् ।

कुष्ठरोगाहृयं वाप्यं पारिभद्र्यन्तशोत्पलम् ॥
कुष्ठमुष्णं कटु स्वादु शुक्रलं तिक्तकं लघु ।
हन्ति वातास्रवीसर्पकासकुष्ठमरुत्कफान् ॥

कुष्ठभेदः पुष्करमूलम् ।

उक्तं पुष्कर तु पौष्करं पुष्करञ्च तत् ।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगुः ॥
पौष्करं कटु कक्तिक्तमुष्णं वातकफज्वरान् ।
हन्ति शोथार्तिश्वासान् विशेषात् पार्श्वशूलनुत् ॥
अनयोर्मूलं ग्राह्यं मात्रा ६ रत्तिकाः ।

श्यामपर्णी । चा इति लोके ।

श्लेष्मारिर्गिरिभिच्छ्यामपर्णं तन्द्री स्त्रियामुभे ॥
श्लेष्मारिपत्रं कफहृत् स्वेदनं बलवर्द्धनम् ।
प्रतिश्यायहरं प्रोक्तं ज्वरघ्नं कामदीपनम् ॥
कासंहरणं वह्नेर्दीपनं जाड्यनाशनम् ।
फाण्टोऽस्य सितया युक्तः सेव्यो नैरुज्यमिच्छता ॥

तालीशम् ।

तालीशमुक्तं पत्राढ्यं धात्रीपत्रञ्च तत् स्मृतम् ॥
तालीशं लघु तीक्ष्णोष्णं श्वासकासकफानिलान् ।

लिहन्त्यरुचिगुल्मार्शवस्तिमान्द्यक्षयामयान् ॥
पत्रस्यास्य मात्रा १ माषकः ।

विंशोऽध्यायः ।

कण्डूघ्नवर्गः ।

चक्रमर्दः ।

चक्रमर्दः प्रपुन्नाटो दद्रुघ्नो मेषलोचनः ।
पप्पाटः स्यादेड़गजश्चक्रो पुन्नाट इत्यपि ॥
चक्रमर्दो लघुः स्वादू रूक्षः पित्तानिलापहः ।
हृद्यो हिमः कफश्वासकुष्ठदद्रुक्रिमीन् हरेत् ॥
हन्त्युष्णं सत्फलं कुष्ठकण्डूदद्रुविषानिलान् ।
गुल्मकासक्रिमिश्वासनाशनं कटुकं स्मृतम् ॥

महानिम्बः ।

वकादन इति लोके प्रसिद्धः ।
महानिम्बः स्मृतो नेता रम्यको विषमुष्टिकः ।
केशमुष्टिर्निम्बकश्च कार्मुको जीव इत्यपि ॥
महानिम्बो हिमो रूक्षस्तिक्तो ग्राही कषायकः ।
कफपित्तभ्रमच्छर्दिकुष्ठहृल्लासरक्तजित् ।
प्रमेहश्वासगुल्मार्शोमूषिकाविषनाशनः ॥

मञ्जिष्ठा ।

मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी ॥
मञ्जिष्ठा मधुरा तिक्ता कषाया स्वरवर्णकृत् ।
गुरुरुष्णा विषस्फोटशोथयोन्यर्शिकर्णकृक् ।
रक्तातीसारकुष्ठास्रवीसर्पव्रणमेहनुत् ॥

मात्रा १ माषकः ।

हरिद्रा ।

हरिद्रा काञ्चनी पीता निशाख्या वरवर्णिनी ।
क्रिमिघ्नी हलदी योषित्प्रिया हट्टविलासिनी ॥
हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत् ।
वर्ण्या त्वग्दोषमेहास्रशोथपाण्डुव्रणापहा ॥

मात्रा २ माषकौ ।

वनहरिद्रा आम्रगन्धिहरिद्रा च ।
अरण्यहलदीकन्दः कुष्ठवातास्रनाशनः ॥
आम्रगन्धिहरिद्रा या सा पीता वातला मता ।
पित्तहृन्मधुरा तिक्ता सर्वकण्डूविनाशिनी ॥

अनयोर्मात्रा २ माषकौ ।

पद्मकम् ।

पद्मकं पद्मगन्धि स्यात्तथा पद्माह्वयं स्मृतम् ॥
पद्मकन्तुवरन्तिक्तं शीतलं वातलं लघु ।
वीसर्पदाहविस्फोटकुष्ठस्रे रक्तपित्तनुत् ।

गर्भसंस्थापनं रुच्यं वमिनाशनदाहप्रणुत् ॥

काष्ठमस्य त्वक्, मात्रा १ माषकः ।

गोरोचना ।

गोरोचना तु सङ्ख्या बन्ध्या गौरी च रोचना ॥

गोरोचना हिमा तिक्ता वश्या मङ्गलकान्तिदा ।

विषालक्ष्मीपहोन्मादगर्भस्रावत्वतास्रहृत् ॥

एलवालुकम् ।

एलवालुकमैलेयं सुगन्धि हरिवालुकम् ।

एलवालुकमेलालु कपित्थपत्रगौरितम् ॥

एलालु कटुकं पाके कषायं शीतलं लघु ।

हन्ति कण्डूव्रणच्छर्दिहृल्लासारुचिहृद्रुजः ।

बलासविषपित्तास्रकुष्ठमूत्रगदक्रिमीन् ॥

मात्रा १ माषकः ।

कुटन्नटम् ।

गुडत्वजी इति च ख्यस्तु वितुन्नकनामको

वृक्षस्य त्वक् मुस्ताकृतिः ।

कुटन्नटं दाशपूरं बालेयं परिपेलवम् ।

प्लवगोपुरगोनर्दकैवर्त्तमुस्तकानि च ॥

मुस्तावत् पेलवपुटं शुक्लाभं स्यादितुन्नकम् ॥

वितुन्नकं हिमं तिक्तं कषायं कटु कान्तिदम् ।

कफपित्तास्रवीसर्पकुष्ठकण्डूविषप्रणुत् ॥

मात्रा १ माषकः ।

कुष्ठवैरी । हिन्दी चालमुगरा ।

कुष्ठवैरी शैलरोही महागन्धो सकीलकः ।

वैवस्वतद्रुमः स स्याद्वल्लक्षश्च रसायनः ॥
पामाविचर्चिकाकण्डूसिध्मोदर्दविषादिकाः ।
हल्लासवातं वातास्रं कुष्ठानि च विशेषतः ॥

अस्य फलस्य बीजं तत्तैलञ्च ग्रहणीयं, बीजस्य मात्रा ६ रत्तिकाः, तैलस्य ४ विन्दवः ।

अगदः ।

अगदो दद्रुमर्दी स्यात् क्षीटारिर्वाडसुन्दरः ।
दद्रुमर्दी हरेद्दद्रुपामाकण्डूविचर्चिकाः ॥

श्वेता रक्ता च गुञ्जा ।

श्वेता गुञ्जा घटा प्रोक्ता कृष्णला चापि सा स्मृता ॥
रक्ता सा काकचिञ्ची स्यात् काकनक्षे च रत्तिका ।
काकादनी काकपीलुः सा स्मृता काकवल्लरी ।
गुञ्जाद्वयन्तु श्रेष्ठं स्यात् मासोपेक्षञ्चरा अहम् ।
मुखयोषभ्रमखासतृष्णामदविनाशनम् ॥
नेत्रामयहरं हृद्यं बल्यं कण्डूघ्नं हरेत् ।
क्रिमीन्द्रलुप्तकुष्ठानि रक्ता च धवलापि च ॥

श्वेतो रक्तश्च करवीरः ।

करवीरः श्वेतपुष्पः श्वेतकुम्भोऽश्वमारकः ।
त्रिदोषो रक्तपुष्पश्च चण्डातो लगुडस्मरः ।
करवीरद्वयं तिक्तं कषायं कटुकञ्च तत् ।
व्रणलाषवकृमे चक्षीपकुष्ठव्रणापहम् ॥
वीर्य्योष्णं क्रिमिकण्डूघ्नं भक्षितं विषयन्त्रणम् ॥

उभयोर्मूलं ग्राह्यम् । मात्रा पाइरत्तिका ।

काञ्चनारः कोविदारश्च ।

काञ्चनारः काञ्चनको गण्डारिः श्वेतपुष्पकः ॥
कोविदारश्च मरिकः कुद्दालो युग्मपत्रकः ।
कुण्डली ताम्रपुष्पाश्मन्तकः स्वल्पकेशरी ॥
काञ्चनारो हिमो ग्राही तुवरः श्लेष्मपित्तनुत् ।
क्रिमिकुष्ठगुदभ्रंशगण्डमालाव्रणापहः ॥
कोविदारोऽपि तद्वत् स्यात्तयोः पुष्पं लघु स्मृतम् ।
रूक्षं संग्राहि पित्तास्रप्रदरत्रयकासनुत् ॥

उभयोस्वग्ग्राह्या, मात्रा १ माषकः ।

शिरीषः ।

शिरीषो भण्डिलो भण्डो भण्डीरश्च कपीतनः ।
शुकपुष्पः शुकतरुर्मृदुपुष्पः शुकप्रियः ॥
शिरीषो मधुरोऽनुष्णस्तिक्तश्च तुवरो लघुः ।
दोषगोथविसर्पघ्नः कासव्रणविषापहः ॥

अस्य बीजं ग्राह्यं, मूलत्वग् च गृहणीया, मात्रा १ माषकः ।

शिरीषिका ।

शिरीषिका टिण्टिरिका दुर्बलाम्बुशिरीषिका ।
त्रिदोषविषकुष्ठार्शोहरी वाशिशिरीषिका ॥

सर्वांगोऽस्या ग्राह्यः, मात्रा १ माषकः ।

शालः ।

शालस्तु सर्जकश्चाश्वकर्णिका शस्यसञ्चयः ॥
अश्वकर्णः कषायः स्याद्व्रणस्वेदकफक्रिमीन् ।

व्रणविद्रधिबाधिर्य्ययोनि - °गदान् हरेत् ॥
त्वगस्य गुह्यते, म[illegible] माषकौ ॥

तमाल: ।

तमाल: शालयष्टी वो [illegible] वल्कोटकृत् पुन: ॥

सर्जक: ।

सर्जकोऽजकर्ण: स्याच्छाला मरिचपत्रक: ॥
अजकर्ण: कटुस्तिक्त: कषायोष्णो व्यपोहति ।
कफपाण्डुकृमिगदान् मेहकुष्ठविषव्रणान् ॥

त्वगस्य गृह्या, मात्रा २ माषकौ ।

शल्लकी । हिन्दी शलाइ ।

शल्लकी गजभक्ष्या च सुवहा सुरभी रसा ।
महिषाणा कुन्दुरुकी वल्लकी च बहुत्वचा ॥
शल्लकी तुवरा शीता पित्तश्लेष्मातिसारजित् ।
रक्तपित्तव्रणहरी पुष्टिकृत् समुदीरिता ॥

अस्या मूलत्वग् गृह्या, मात्रा २ माषकौ ।

शिंशपा ।

शिंशपा पिच्छिला श्यामा कृष्णसारा च सारुष: ।
कपिला सैव मुनिभिर्भस्मगर्भेति कीर्त्तिता ॥
शिंशपा कटुका तिक्ता कषाया दोषहारिणी ।
उष्णवीर्य्या हरेन्मेद:कुष्ठश्वित्रवमिक्रिमीन् ।
वस्तिरुग्व्रणदाहास्रवलासान् गर्भपातिनी ॥

अस्या त्वग्गृह्या पत्रञ्च गृह्यणीयं, मात्रा १ माषक: ।

असन: ।

वीजक: पीतसारश्च पीतशालक इत्यपि ।

वल्मूकपुष्पः प्रियकः सर्जकक्षासनः स्मृतः ॥
बीजकः कुष्ठकीसर्पक्षित्रमेहगुदकृमीन् ।
हन्ति श्लेष्मास्रपित्तांश्च त्वच्यः केश्यो रसायनः ॥
अस्य मूलत्वग्ग्राह्या, मात्रा २ माषकौ ।

इङ्गुदः ।

इङ्गुदोऽङ्गारवृक्षश्च तिक्तकस्तापसद्रुमः ॥
इङ्गुदः कुष्ठभूतादिगुल्मव्रणविषकृमीन् ।
हन्त्युष्णः श्वित्रशूलघ्नस्तिक्तकः कटुपाकवान् ॥
अस्य मूलत्वग्ग्राह्या, मात्रा १ मांषकः ।

एकविंशोऽध्यायः।

क्रिमिघ्नवर्गः।

विड्ङ्गः।

पुंसि क्लीबे विड्ङ्गः स्यात् क्रिमिघ्नो जन्तुनाशनः ।
तण्डुलश्च तथा वेल्लसंज्ञौ चित्रतण्डुलौ ॥
विड्ङ्गं कटु तीक्ष्णोष्णं रूक्षं वह्निकरं लघु ।
आनिलं विषसंहारी भ्रान्तिदोषनिकृन्तनम् ।
शूलाध्मानोदरश्लेष्मकृमिवातविबन्धनुत् ॥
अस्य फलं ग्राह्यं, मात्रा २ माषकौ ।

पारिभद्रः।

पारिभद्रो निम्बतरुर्मन्दारः पारिजातकः॥
पारिभद्रोऽनिलश्लेष्मशोथमेदःक्रिमिप्रणुत्।
तत्त्वक् पित्तरोगघ्नं कर्णव्याधिविनाशनम्॥

अस्य त्वक्चूर्णादिकं ग्राह्यं, मात्रा त्वक्चूर्णस्य ६ रत्तिकाः पत्रादिस्वरसस्य च ४ माषकाः।

सोमराजी।

अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका।
अग्निलेखा सूर्यफला सोमा पूतिफलीति च।
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता॥
वाकुची मधुरा तिक्ता कटुपाका रसायनी।
विष्टम्भहृत् हिमा रुच्या सरा श्लेष्मपित्तनुत्।
रूक्षा हृद्या श्वासकुष्ठमेहज्वरक्रिमिप्रणुत्॥
तत्फलं पित्तलं कुष्ठकफानिलहरं कटु।
कोष्ठं त्वचं वमिश्वासकासशोथामपाण्डुनुत्॥

अस्या बीजं ग्राह्यं, मात्रा १ माषकः।

काम्पिल्लः।

काम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनोऽपि च॥
काम्पिल्लः कफपित्तास्रकृमिमेहगुल्मोदरव्रणान्।
हन्ति रेचनो कटूष्णश्च मेहानाहविषाश्मनुत्॥

अस्य मात्रा ६ रत्तिकाः।

सर्पाक्षी। हिन्दी सरहटी। गण्डिनी।

सर्पाक्षी स्यात् गण्डाली तथा नाड़ीकपालकः॥
सर्पाक्षी कटुका तिक्ता सोष्णा क्रिमिनिलव्रणी।

दद्रुकोन्दुरसर्षाणां विषघ्नी व्रणरोपिणी ॥
सर्वांशोऽस्या ग्राह्यः, मात्रा २ रक्तिके ।

अर्कपुष्पी ।

अर्कपुष्पी क्रूरकर्मा पयस्या जलकामुका ।
अर्कपुष्पी क्रिमिश्लेष्मेहपित्तविकारजित् ॥
सर्वांशोऽस्या ग्राह्यः, मात्रा १ माषकः ।

मुसाकर्णी ।

आखुकर्णी खाखुकर्णः पर्णिका भूदरीभवा ॥
आखुकर्णी कटुस्तिक्ता कषाया शीतला लघुः ।
विपाके कटुका मूत्रकफामयक्रिमिप्रणुत् ॥
सर्वांशोऽस्या ग्रहणीयः, मात्रा १ माषकः ।

पलाशः ।

पलाशः किंशुकः पर्णी याज्ञिको रक्तपुष्पकः ।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः ॥
पलाशो दीपनो वृष्य सरोष्णः व्रणशुल्मजित् ।
कषायः कटुकस्तिक्तः स्निग्धो गुदजरोगजित् ।
अस्रसन्धानकृद्दोषग्रहण्यर्शःक्रिमीन् हरेत् ॥
तत्पुष्पं स्वादु पाके तु कटु तिक्तं कषायकम् ।
वातलं कफपित्तास्रकृच्छ्रजिद्ग्राहि शीतलम् ।
हृद्दाहशमकं वातरक्तकुष्ठहरं परम् ॥
फलं लघूष्णं मेहार्शःक्रिमिवातकफापहम् ।
विपाके कटुकं रूक्षं कुष्ठगुल्मोदरप्रणुत् ॥

अस्य त्वग्बीजादिकं ग्राह्यं मात्रा १ माषकः ।
क्रिमिरोगे बीजमेवास्य सदा व्यवह्रियते ।

द्वाविंशोऽध्यायः ।

सन्धानीयवर्गः ।

धनुर्वृक्षः ।

धन्वङ्गस्तु धनुर्वृक्षो गोत्रवृक्षः सुतेजनः ॥
धन्वङ्गः कफपित्तास्रकासहृत्तुवरो लघुः ।
व्रणो बलक्षयश्वः सन्धिक्षतव्रणरोपणः ॥
अस्य लग् गृहणीया, मात्रा १ माषकः ।

अर्जुनः ।

ककुभोऽर्जुननामा च नदीसर्जश्च कीर्त्तितः ।
इन्द्रदुर्वीरवृक्षश्च वीरश्च धवलः स्मृतः ॥
ककुभः शीतलो हृद्यः क्षतक्षयविषास्रजित् ।
मेदोमेहव्रणान् हन्ति तुवरः कफपित्तहृत् ।
कोपनो वायुरोगस्य भग्नसन्धायको मतः ॥
अस्य लग् गृहणीया, मात्रा २ माषकौ ।

अस्थिसंहारकः ।

गुन्द्रिमानस्थिसंहारी वज्राङ्गी वास्थिशृङ्खला ॥
अस्थिसंहारकः प्रोक्तो वातश्लेष्महरोऽस्थियुक् ।
उष्णः सरः क्रिमिघ्नश्च दुर्नामव्रणोऽस्थिरोगजित् ।
रूक्षः स्वादुर्लघुर्ग्राही पाचनः पित्तलः स्मृतः ॥
काण्डं खण्डितमस्थिशृङ्खलाया
माषार्द्धं द्विदलमकण्टुकं तदर्द्धम् ।

सम्पिष्टं तदनु ततस्तिलस्य तैले
मस्मक्तं वटकमतीव वातहारि ॥
अस्या लताया सर्वांगो ग्राह्यः, मात्रा १ माषकः ।

रालः ।

रालस्तु शालनिर्य्यासस्तथा सर्जरसः स्मृतः ।
देवधूपो यक्षधूपस्तथा सर्वरसश्च सः ॥
रालो हिमो गुरुस्तिक्तः कषायो ग्राहको हरेत् ।
दोषास्रखेदवीसर्पव्रणविषादिकाः ।
यक्षभग्नाग्निदग्धास्थिशूलातीसारनाशनः ॥

मात्रा ६ रत्तिकाः ।

त्रयोविंशोऽध्यायः ।

चतुष्पवर्गः ।

श्वेतैरण्डः ।

स्याच्छुक्लः काननैरण्डः श्वेतैरण्डो व्यडम्बनः ॥
श्वेतैरण्डः कटुस्तिक्तो वीर्य्योष्णः कफरोगनुत् ।
शूलवायुकफध्वंसी शुक्लं मूलमस्य तु ॥
निर्य्यासः क्षतक्षु[illegible]त्तामयविनाशनः ।
आमवातञ्च वि[illegible]त्वाङ्गि सुदारुणम् ।
निहन्ति कफजं [illegible] वामनभेदनम् ॥
अध्यायश्च [illegible] यद्विशिष्टे विवृतः ।

चतुर्विंशोऽध्यायः ।

पुष्पवर्गः ।

पद्मम् ।

वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ॥
पङ्केरुहत्वामरसं सारसं सरसीरुहम् ।
विसप्रसूनराजीवपुष्कराम्भोरुहाणि च ॥
कमल शीतल वर्ण्यं मधुरं कफपित्तजित् ।
दृष्णादाहास्रविस्फोटविषवीसर्पनाशनम् ॥
विशेषतः सित पद्मं पुण्डरीकमिति स्मृतम् ।
रक्त कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम् ॥
धवलं कमलं शीतं मधुरं रक्तपित्तजित् ।
तस्मादल्पगुणं किञ्चिदन्यद्रक्तोत्पलादिकम् ॥

पद्मिनी ।

मूलनालदलोत्फुल्ला फलैः समुदिता पुनः ।
पद्मिनी प्रोच्यते प्राज्ञैर्विसिन्यादि च सा स्मृता ॥
पद्मिनी शीतला गुर्वी मधुरा लवणा च सा ।
पित्तास्रकफनुद्वृष्या वातविष्टम्भकारिणी ॥

आदिशब्दाम्बलिनी कमलिनीत्यादि ।

पद्मस्य नवपत्रादि ।

संवर्त्तिका नवदलं बीजकोषस्तु कर्णिका ।

किञ्जल्कः केशरः प्रोक्तो मकरन्दो रसः स्मृतः ॥
पद्मनालं मृणालं स्यात्तथा विसमिति स्मृतम् ॥
संवर्त्तिका हिमा तिक्ता कषाया दाहतृट्प्रणुत् ।
मूत्रकृच्छ्रगुदव्याधिरक्तपित्तविनाशिनी ॥
पद्मस्य कर्णिका तिक्ता कषाया मधुरा हिमा ।
मुखवैशद्यकृल्लघ्वी तृष्णास्रकफपित्तनुत् ॥
किञ्जल्कः शीतलो वृष्यः कषायो ग्राहकोऽपि सः ।
कफपित्तत्वषादाहरक्तार्शोविषशोथजित् ॥
मृणालं शीतलं वृष्यं पित्तदाहास्रजिद् गुरु ।
दुर्जरं स्वादुपाकञ्च स्नन्यानिलकफप्रदम् ।
संग्राहि मधुरं रूक्षं शालूकमपि तद्गुणम् ॥

कुमुदम् ।

श्वेतं कुवलयं प्रोक्तं कुमुदं कैरवं तथा ।
कुमुदं पिच्छिलं स्निग्धं मधुरं च्छर्दि शीतलम् ॥

कुमुदिनी ।

कुमुदती कैरविका तथा कुमुदिनीति च ।
सा तु मूलादिसर्वाङ्गैरुक्ता समुदिता बुधैः ॥
पद्मिन्या ये गुणाः प्रोक्ताः कुमुदिन्याश्च ते स्मृताः ॥

सेवती ।

शतपत्री तरुण्युक्ता कर्णिका चारुकेशरा ।
महाकुमारी गन्धाढ्या लाक्षापुष्पातिमञ्जुला ॥
शतपत्री हिमा हृद्या ग्राहिणी शुक्रला लघुः ।
दोषत्रयास्रजिद्वर्ण्या तिक्ता कट्वी च पाचनी ॥

वासन्ती ।

नेपाली कथिता तज्ज्ञैः सप्तला नवमालिका ।
वासन्ती शीतला लघ्वी तिक्ता दोषत्रयापहा ॥

जाती स्वर्णजाती च ।

जातिर्जाती च सुमना मालती राजपुत्रिका ।
चेतिका हृद्यगन्धा च सा पीता स्वर्णजातिका ॥
जातीयुगं तिक्तमुष्णं व्रणकुष्ठानिलापहम् ।
शिरोऽक्षिमुखदन्तार्त्तिविषकुष्ठानिलापहम् ॥

यूथिका स्वर्णयूथिका च ।

यूथिका गणिका स्वहा सा पीता हेमपुष्पिका ॥
यूथियुगं हिमं तिक्तं कटु पाकरसे लघु ।
मधुरं तुवरं हृद्यं पित्तघ्नं कफवातलम् ।
व्रणास्रमुखदन्ताक्षिशिरोरोगविषापहम् ॥

चम्पकः ।

चाम्पेयश्चम्पकः प्रोक्तो हेमपुष्पश्च स स्मृतः ।
एतस्य कलिका गन्धकलीति कथिता बुधैः ॥
चम्पकः कटुकस्तिक्तः कषायो मधुरो हिमः ।
विषक्रिमिहरः कृच्छ्रकफवातास्रपित्तजित् ॥

वकुलः ।

वकुलो मधुगन्धश्च सिंहकेशरकस्तथा ॥
वकुलस्तुवरोऽतुष्णः कटुपाकरसे गुरुः ।
कफपित्तविषश्वित्रक्रिमिदन्तगदापहः ॥

शिवमल्ली ।

बृहद्वकुल इत्यस्या नामान्तरम् ।

शिवमल्ली पाशुपत एकाष्ठीलो वुको वसुः ॥
वुकोऽनुष्णः कटुस्तिक्तः कफपित्तविषापहः ।
योनिशूलव्रणादाहकुष्ठगोथास्रनाशनः ॥

कदम्बः ।

कदम्बः प्रियको नीपो वृत्तपुष्पो हलिप्रियः ॥
कदम्बो मधुरः शीतो कषायो लवणो गुरुः ।
सरो विष्टम्भकृद्वृत्तः कफस्तन्यानिलप्रदः ॥

वार्षिको ।

शीपदी षट्पदानन्दा वार्षिकी सुकवन्धना ॥
वार्षिकी शीतला लघ्वी तिक्ता दोषत्रयापहा ।
कर्णोक्षिमुखरोगघ्नी तत्तैलं तद्गुणं स्मृतम् ॥

मल्लिका ।

मल्लिका मदयन्ती च शीतभीरुश्च भूपदी ॥
मल्लिकोष्णा लघुर्वृष्या तिक्ता च कटुका हरेत् ।
वातपित्तास्रदृग्व्याधिकुष्ठारुचिविषव्रणान् ॥

माधवी ।

माधवी स्यात्तु वासन्ती पुण्ड्रको मण्डकोऽपि च ।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः ॥
माधवी मधुरा शीता लघ्वी दोषत्रयापहा ॥

केतकः सुवर्णकेतकी च ।

केतकः सूचिकापुष्पो जम्बुकः क्रकचच्छदः ।
सुवर्णकेतकी ख्याता लघुपुष्पा सुगन्धिनी ॥

केतकः कटुकः स्वादुर्लघुस्तिक्तः कफापहः ।
उष्णा तिक्तरसा श्लेष्मा चक्षुष्या हैमकेतकी ॥

किङ्किरातः ।

किङ्किरातो हेमगौरः पीतकः पीतभद्रकः ॥
किङ्किरातो हिमस्तिक्तः कषायश्च हरेदसौ ।
कफपित्तपिपासास्रदाहशोषवमिक्रिमीन् ॥

कर्णिकारः ।

कर्णिकारः परिव्याधः पादपोत्तुल इत्यपि ॥
कर्णिकारः कटुस्तिक्तस्तुवरः शोधनो लघुः ।
रक्तनः सुखदः शोथश्लेष्मास्रव्रणकुष्ठजित् ॥

अक्षाटनः ।

गौरादिदेशेऽप्य मागधपुष्पनाम्ना प्रसिद्धः ।
अक्षातोऽक्षाटनः प्रोक्तस्तथाक्षातक इत्यपि ।
कुरण्टको वर्णपुष्पः स एवोक्तो महासहः ॥
अक्षाटनः कषायोष्णः स्निग्धः स्वादुश्च तिक्तकः ॥

कुन्दम् ।

कुन्दन्तु कथितं मान्यं सदापुष्पश्च तत् स्मृतम् ।
कुन्दं शीतं लघु श्लेष्मशिरोरुग्विषपित्तहृत् ॥

सुषुकुन्दः ।

सुषुकुन्दः कचक्षत्तसिक्तकः प्रतिविष्णुकः ।
सुषुकुन्दः शिरःपीडापित्तास्रविषनाशनः ॥

तिलकः ।

तिलकः सुरकः श्रीमान् सुपुष्पस्थलपुष्पकः ॥

तिलकः कटुकः पाके रसे चोष्णो रसायनः ।
कफकुष्ठक्रिमीन् वस्तिमुखदन्तगदान् हरेत् ॥

बन्धूकः ।

बन्धूको बन्धूजीवश्च रक्तो माध्याह्निकोऽपि च ।
बन्धूकः कफजिद्ग्राही वातपित्तहरो लघुः ॥

अगस्तिः ।

अथागस्तिर्वङ्गसेनो मुनिपुष्पो मुनिद्रुमः ॥
अगस्तिः पित्तकफजिच्चातुर्थकहरो हिमः ।
रूक्षो वातकरस्तिक्तः प्रतिश्यायनिवारणः ॥

सिन्दूरी । हिन्दी सिन्दुरिया ।

सिन्दूरी रक्तबीजा च रक्तपुष्पा सुकोमला ।
सिन्दूरी विषपित्तास्रतृष्णावान्तिहरी हिमा ॥

कुब्जकः । हिन्दी कूजा ।

कुब्जको भद्रतरुणिर्बृहत्पुष्पोऽतिकेसरः ।
महासहा कण्टकाढ्या नीलालिकुलसङ्कुला ॥
कुब्जकः सुरभिः स्वादुः कषायानुरसः सरः ।
त्रिदोषशमनो हृद्य शीतहर्त्ता च स स्मृतः ॥

सैरेयकत्रयम् ।

सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका ।
सहाचरः सहचरः स च भिन्नापि कथ्यते ॥
कुरण्टकोऽथ पीते स्याद्रक्ते कुरबकः स्मृतः ।
नीलवर्णो बुधैरक्तो दास आर्त्तगलश्च सः ॥
सैरेयः कुष्ठवातास्रकफकण्डूविषापहः ।

तिक्तोष्णो मधुरो दन्त्यः सुस्निग्धः केशरञ्जनः ॥
एतेषां सर्वाणि गृह्यते, मात्रा २ माषकौ ।

पञ्चविंशोऽध्यायः ।

फलवर्गः ।

आम्रः ।

आम्रः प्रोक्तो रसालश्च सहकारोऽतिसौरभः ।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥
आम्रपुष्पमतीसारकफपित्तप्रमेहनुत् ।
असृग्दुष्टिहरं शीतं रुचिकृद्वाहि वातलम् ॥
आम्रं बालं कषायाम्लं रुच्यं मारुतपित्तनुत् ।
तरुणन्तु तदत्यम्लं रूक्षं दोषत्रयास्रकृत् ॥
आम्रमामं त्वचा हीनमातपेऽतिविशोषितम् ।
अम्लं स्वादु कषायं स्याद्वह्निदं कफवातजित् ॥
फलन्तु मधुरं हृद्यं स्निग्धं बलसुखप्रदम् ।
गुरु वातहरं हृद्यं वर्ण्यं शीतमपित्तलम् ॥
कषायानुरसं वह्निस्ते अशुक्रविबर्हणम् ।
तदेव वृक्षसंपक्वं गुरु वातहरं परम् ।
मधुराम्लरसं किञ्चिद्भवेत् पित्तप्रकोपनम् ॥
आम्रं रुचिमपक्वञ्च तद्भवेत् पित्तनाशनम् ।

रसस्याम्लस्य हीनत्वात् माधुर्य्याच्च विशेषतः ॥
ईषितं तत् परं रुच्यं बल्यं वीर्य्यकरं लघु ।
शीतलं शीघ्रपाकि स्यात् वातपित्तहरं सरम् ॥
तद्रसो गलितो बल्यो गुरुर्वातहरः सरः ।
अहृद्यस्तर्पणोऽतीवबृंहणः कफवर्द्धनः ॥
तस्य खण्डं गुरु परं रोचनं चिरपाकि च ।
मधुरं बृंहणं बल्यं शीतलं वातनाशनम् ॥
वातपित्तहरं रुच्यं बृंहणं बलवर्द्धनम् ।
हृद्यं वर्ण्यकरं स्वादु दुग्धाम्लं गुरु शीतलम् ॥
मन्दानलत्वं विषमज्वरत्वं
रक्तामयं वङ्गुदोदरत्वं ।
आम्रातियोगो जनयामयं वा
करोति तस्मादति तानि नाद्यात् ॥
एतदम्लाम्रविषयं मधुराम्लपरं न तु ।
मधुरस्य परं नैव हिताम्लाद्या गुणा यतः ॥
शुण्ठ्याभसीऽनुपान स्यादाम्राणामतिभक्षणे ।
जीरकं वा प्रयोक्तव्यं सह सौवर्चलेन च ॥

आम्रावर्त्तः ।

पक्वस्य सहकारस्य घटे विस्रावितो रसः ।
घर्मयुक्तो मुहूर्त्तं स आम्रावर्त्त इति स्मृतः ॥
आम्रावर्त्तस्तृषाच्छर्दिवातपित्तहरः सरः ।
रुच्यः सूर्य्यांशुभिः पाकाल्लघुश्च स हि कीर्त्तितः ॥

नवपल्लवम् ।

आम्रस्य पल्लवं रुच्यं कफपित्तविनाशनम् ॥

राजाम्लः ।

राजाम्लष्टङ्क आम्लातः कामाह्वो राजपुत्रकः ॥
राजाम्लन्तुवरं स्वादु विशदं शीतलं गुरु ।
याहि रूक्षं विबन्धाध्मवातकृत् कफपित्तनुत् ॥

पणसः ।

पणसः कण्टकिफलः पनसोऽतिबृहत्फलः ॥
पणसं शीतलं पक्वं स्निग्धं पित्तानिलापहम् ।
तर्पणं बृंहणं स्वादु मांसलं श्लेष्मलं भृशम् ।
बल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतव्रणान् ॥
आमं तदेव विष्टम्भि वातलं तुवरं गुरु ।
दाहकृन्मधुरं बल्यं कफमेदोविवर्द्धनम् ॥
पणसोद्भूतबीजानि वृष्याणि मधुराणि च ।
गुरूणि बद्धविट्कानि सृष्टमूत्राणि संवदेत् ॥

अन्यच्च । मज्जा पणसजो वृष्यो वातपित्तकफापहः ।
विशेषात् पणसो वर्ज्यः गुल्मिभिर्मन्दवह्निभिः ॥

लकुचः ।

लकुचः क्षुद्रपणसो लकुचो डहरित्यपि ॥
आमं लकुचमुष्णञ्च गुरु विष्टम्भकृत्तथा ।
मधुरञ्च तथाम्लञ्च दोषत्रितयरक्तकृत् ।
शुक्राग्निनाशनं वापि नेत्रयोरहितं स्मृतम् ॥
सुपक्वन्त्वत्ति मधुरमम्लञ्चानिलपित्तहृत् ।
कफवह्निकरं रुच्यं वृष्यं विष्टम्भकञ्च तत् ॥

कोशाम्रः कोशश्च इति च ।

कोशाम्र उक्तः क्षुद्राम्रः क्रिमिघ्नः सुकोशकः ।

कोशाम्रः कुष्ठशीतास्रपित्तव्रणकफापहः ॥
तत्फलं ग्राहि वातघ्नमल्पोष्णं गुरु पित्तलम् ।
पक्वन्तु दीपनं रुच्यं लघूष्णं कफवातनुत् ॥

कालिन्दम् ।

कालिन्दं कृष्णबीजं स्यात् कालिङ्गञ्च सुवर्त्तुलम् ।
कालिन्दं ग्राहि दृक्पित्तशुक्रहृच्छीतलं गुरु ।
पक्वन्तु सोष्णं सञ्चार पित्तलं कफवातजित् ॥

खर्बुजम् ।

दृग्राङ्गुलन्तु खर्बुजं कथ्यते तद्गुणा अथ ।
खर्बुजं मूत्रलं बल्यं कोष्ठशुद्धिकरं गुरु: ॥
स्निग्धं स्वादुतरं शीतं हृद्यं पित्तानिलापहम् ।
तेषु यच्चाम्लमधुरं सञ्चारच्च रसाङ्गवेत् ।
रक्तपित्तकरं तत्तु मूत्रकृच्छ्रकरं परम् ॥

त्रपुषम् ।

त्रपुषं कण्टकिफलं सुधावासः सुशीतलम् ॥
त्रपुषं लघु नीलच्च नवं वृष्यमदाहजित् ।
स्वादु पित्तापहं शीतं रक्तपित्तहरं परम् ॥
तत् पक्वमम्लमुष्णं स्यात् पित्तल कफवातनुत् ।
तद्बीजं मूत्रलं शीतं रूक्षं पित्तास्रकृच्छ्रजित् ॥

चिर्भिटम् ।

चिर्भिटं धेनुदुग्धच्च तथा गोरक्षकर्कटी ॥
चिर्भिटं मधुरं रूक्षं गुरु पित्तकफापहम् ।
अनुष्णं ग्राहि विष्टम्भि पक्वं तूष्णच्च पित्तलम् ॥

गुवाकः ।

घोरण्टः पूगी पूगश्च गुवाकः क्रमुकोऽस्य तु ।
फलं पूगीफलं प्रोक्तमुद्देगश्च तदीरितम् ॥
पूगं गुरु हिमं रूक्षं कषायं कफपित्तजित् ।
मोहनं दीपनं रुच्यमास्यवैरस्यनाशनम् ॥
आर्द्रं तद्वद्वमिष्यन्दि वह्निदृष्टिहरं स्मृतम् ।
स्निग्धं दोषत्रयच्छेदि दृढ़मध्यन्तदुत्तमम् ॥

तालम् ।

तालस्तु लेखपत्रः स्यात् तृणराजो महोन्नतः ॥
पक्वं तालफलं पित्तरक्तश्लेष्मविषदूनम् ।
दुर्जरं बद्धमूत्रञ्च तन्द्राभिष्यन्दशुक्रदम् ॥
तालमज्जा तु तरुणः किञ्चिन्मदकरो लघुः ।
श्लेष्मलो वातपित्तघ्नः स स्नेही मधुरः सरः ॥

तालजतोयम् ।

तालजं तरुणं तोयमतीवमदकृन्मतम् ।
अम्लीभूतं तदा तु स्यात् पित्तकृद्वातदोषजित् ॥

कपित्थम् ।

कपित्थस्तु दधित्थः स्यात् तथा पुष्पफलः स्मृतः ।
कपिप्रियो दधिफलस्तथा दन्तशठोऽपि च ॥
कपित्थमाम संग्राहि कषायं लघु लेखनम् ।
पक्वं गुरु तृषाहिक्काश्मनं वातपित्तजित् ।
स्वादम्लं तुवरं कण्ठशोधनं ग्राहि दुर्जरम् ॥

जम्बुः ।

क्षुद्रजम्बुः स्थूलपत्रा नादेयी जलजम्बुका ।

जम्बुः संग्राहिणी रूक्षा कफपित्तास्रदाहजित् ॥

राजजम्बूः।

फलेन्द्रा कथितानन्दी राजजम्बूर्महाफला।
तथा सुरभिपत्रा च महाजम्बूरपि स्मृता ॥
राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम् ॥

बदरः।

पुंसि स्त्रियाञ्च कर्कन्धुर्बदरी कोलमित्यपि।
फेनिलं कुवलं घोटा सौवीरं बदरं महत्।
अजप्रिया कुहा कोली विषमोभयकण्टका ॥

तत्र बदरविशेषाणां लक्षणानि

गुणाश्च।

पच्यमानं सुमधुरं सौवीरं बदरं महत् ॥
सौवीरं बदरं शीतं भेदनं गुरु शुक्रलम्।
ह्रंहणं पित्तदाहास्रक्षयतृष्णानिवारणम् ॥
सौवीरं लघु सम्यक्कं मधुरं कोलमुच्यते ॥
कोलन्तु बदरं ग्राहि रूक्षमुष्णञ्च वातलम्।
कफपित्तकरञ्चापि गुरु सारकमीरितम् ॥
कर्कन्धुः क्षुद्रबदरं कथितं पूर्वसूरिभिः ॥
अम्लं स्यात् क्षुद्रबदरं कषायं मधुरं मनाक्।
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् ॥
शुष्कं भेद्यग्निकृत् सर्वं लघु तृष्णाक्लमास्रजित् ॥

लवली।

सुगन्धमूला लवली पाण्डुः कोमलवल्कला ॥
लवलीफलमम्लाग्र्यं कफपित्तहरं गुरु।

विशदं रोचनं रूक्षं स्वादुस्वल्पतुवरं रसे ॥

करमर्दः ।

करमर्दः सुषेणः स्यात् क्षणपाकफलस्तथा ।
तस्यास्वल्पफला या तु सा ज्ञेया करमर्दिका ॥
करमर्दद्वयं स्वाममम्लं गुरु तृषाहरम् ।
तृष्णं रुचिकरं प्रोक्तं रक्तपित्तकफप्रदम् ।
तत् पक्वं मधुरं रुच्यं लघु पित्तमपोरजित् ॥

पियालम् ।

पियालस्तु खरस्कन्धश्चारो बहुलवल्कलः ।
राजादनस्तापसेष्टः सन्नकद्रुर्धनुष्पटः ॥
चारः पित्तकफास्रघ्नस्तत्फलं मधुरं गुरु ।
स्निग्धं सरं मरुत्पित्तदाहज्वरतृषापहम् ॥
पियालमज्जा मधुरो हृद्यः पित्तानिलापहः ।
हृद्योऽतिदुर्जरः स्निग्धो विष्टम्भी वामवर्धनः ॥

राजादनः ।

राजादनः फलाध्यक्षो राजन्या क्षीरकापि च ॥
क्षीरिकायाः फलं हृद्यं बल्यं स्निग्धं हिमं गुरु ।
तृष्णामूर्च्छामदभ्रान्तिक्षयदोषव्रयापहम् ॥

विकङ्कतः ।

विकङ्कतः सुवाह्वक्षो ग्रन्थिलः स्वादुकण्टकः ।
स एव यत्तद्वृक्षस्य कण्टको व्याघ्रपादपि ॥
विकङ्कतफलं पक्वं मधुरं सर्वदोषजित् ॥

मधूकः ।

मधूकः गुडपुष्पः स्यान्मधुपुष्पो मधुस्रवा ।

वानप्रस्थो मधुष्ठीलो जलजोऽथ मधूलकः ॥
मधूकपुष्पं मधुर शीतलं गुरु हृंहणम् ।
बलशुक्रकरं प्रोक्तं वातपित्तविनाशनम् ॥
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तनुत् ।
अक्षय्यं हन्ति तृष्णामदाहश्वासक्षतक्षयान् ॥

परूषकम् ।

परूषकन्तु परूषमल्यास्थि च परापरम् ॥
परूषकं कषायाम्लमामं पित्तकरं लघु ।
तत् पक्वं मधुरं पाके शीतं विष्टम्भि हृंहणम् ।
हृद्यन्तु पित्तदाहासृग्ज्वरक्षयसमीरहृत् ॥

तूतः ।

तूतः स्थूलस्य पूगस्य क्रमुको ब्रह्मदारु च ॥
तूतं पक्वं गुरु स्वादु हिमं पित्तानिलापहम् ।
तदेवामं गुरु सरमस्रीष्णं रक्तपित्तकृत् ॥

दाडिमः ।

दाडिमः करको दन्तबीजो लोहितपुष्पकः ।
तत्फलं त्रिविधं स्वादु स्वाद्म्लं केवलाम्लकम् ॥
तत्तु स्वादु त्रिदोषघ्नं तृड्दाहज्वरनाशनम् ।
हृत्कण्ठमुखरोगघ्नं तर्पणं शुक्रलं लघु ॥
कषायानुरसं ग्राहि स्निग्धं मेधाबलावहम् ।
स्वाद्म्लं दीपनं रुच्यं किञ्चित् पित्तकरं लघु ॥
अम्लन्तु पित्तजनकमम्लं वातकफापहम् ॥

बहुवारः ।

बहुवारस्तु शीतः स्वादुर्हालो बहुवारकः ।

शेलुः श्लेष्मातकस्यापि पिच्छिलो भूतवृक्षकः ॥
बहुवारो विषस्फोटत्रणवीसर्पकुष्ठनुत् ।
मधुरस्तुवरस्तिक्तः केश्यश्च कफपित्तहृत् ॥
फलमामन्तु विष्टम्भि रूक्षं पित्तकफास्रजित् ।
तत् पक्वं मधुरं स्निग्धं श्लेष्मलं शीतलं गुरु ॥

कतकः ।

पयःप्रसादि कतकं कतकं तत्फलञ्च तत् ।
कतकस्य फलं नेत्र्यं जलनिर्मलताकरम् ।
वातश्लेष्महरं शीतं मधुरं तुवरं गुरु ॥

क्षुद्रखर्जूरी पिण्डखर्जूरी क्षीहारा च ।
भूमिखर्जूरिका स्वादी दुरारोहा मृदुच्छदा ।
तथा स्वल्पफला काककर्कटी स्वादुमस्तका ॥
पिण्डखर्जूरिका त्वन्या स्वादेशे पश्चिमे भवेत् ॥
खर्जूरी गोस्तनाकारा परद्वीपादिहागता ।
जायते पश्चिमे देशे स्याच्छोहारेति कीर्त्यते ॥
खर्जूरीत्रितयं शीतं मधुरं रसपाकयोः ।
स्निग्धं रुचिकरं हृद्यं चतुष्टयहरं गुरु ॥
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भशुक्रदम् ।
कोष्ठमारुतहृद्बल्यं वान्तिवातकफापहम् ॥
ज्वरातिसारक्षुत्तृष्णाकासश्वासनिवारकम् ।
मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत् ॥
महतीभ्यां गुणैरल्पा स्वल्पखर्जूरिका स्मृता ॥
खर्जूरीतरुतोयन्तु मदपित्तकरं भवेत् ।
वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत् ॥

सुलेमानी पिण्डखर्जूरीभेदः ।

सुलेमानी तु मृदुला दलहीनफला च सा ।
सुलेमानी श्रमभ्रान्तिदाहमूर्च्छास्रपित्तहृत् ॥

द्राक्षा ।

द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसापि च ।
गुच्छिका हारहूरा च गोस्तनी चापि कीर्त्तिता ॥
द्राक्षा पक्का सरा शीता चक्षुष्या हृंहणी गुरुः ।
स्वादुपाकरसा स्वर्य्या तुवरा मृदुमूत्रविट् ॥
कोष्ठमारुतकृद्दृष्या कफपुष्टिरुचिप्रदा ।
हन्ति तृष्णाज्वरश्वासवातवातास्रकामलाः ॥
कृच्छ्रास्रपित्तसंमोहदाहशोषमदात्ययान् ।
आमा स्वल्पगुणा गुर्व्वी सैवाम्ला रक्तपित्तकृत् ॥
हृष्या स्वाद्वोस्तनीद्राक्षा गुर्वी च कफपित्तनुत् ।
अबीजान्या स्वल्पतरा गोस्तनीसदृशी गुणैः ॥
द्राक्षा पर्वतजा याहक् तादृशी करमर्दिका ॥

गोस्तनी मुनक्का इति लोके । अबीजा दैवहीजा किसिमिस इति लोके । पर्वतजा वहावीर इति लोके । करमर्दिका करौंदी इति लोके ।

अमृतफलम् ।

यत् वदक्सानकाविलप्रभृतिषु देशेषु नामरातीति प्रसिद्धम् ।

अमृतफलं लघु हृद्यं सुस्वादु त्रीन् हरेत् दोषान् ।
देशेषु सुदुर्लभ्यं बहुल मल्पं खलोकेषु ॥

सेवम् ।

मुष्टिप्रमाणं बदरं सेवं सिवितिकाफलम् ॥
सेवं समीरपित्तघ्नं हृद्यं कफकफापहम् ।
रसे पाके च मधुरं शिशिरं रुचिशुक्रकृत् ॥

प्राचीनामलकम् ।

प्राचीनामलकं लोके पानीयामलकं स्मृतम् ।
प्राचीनामलकं दोषत्रयजिज्ज्वरघाति च ॥

वातादः ।

वातादो वातवैरी स्याद्बिल्वोपमफलस्तथा ।
वातादः उष्णः सुस्निग्धो वातघ्नः शुक्रकफकृत् ॥
वातादमज्जा मधुरो हृद्यः पित्तानिलापहः ।
स्निग्धोष्णः कफकृन्नेष्टो रक्तपित्तविकारिणाम् ॥

पीलुः ।

पीलुर्गुलफलः स्वंसी तथा शीतफलोऽपि च ॥
पीलुः श्लेष्मसमीरघ्नं पित्तलं भेदि गुल्मनुत् ।
स्वादु तिक्तञ्च यत् पीलु तद्बालुष्णं त्रिदोषकृत् ॥

अचोटः ।

पीलुः शैलभवोऽचोटः कर्परालश्च कीर्त्तितः ।
अचोटकोऽपि वातादसदृशः कफपित्तकृत् ॥

निम्बुः ।

निम्बुः स्त्री निम्बुकं क्लीवे निम्बूकमपि कीर्त्तितम् ।
निम्बूकमम्लं वातघ्नं दीपनं पाचनं लघु ॥
अन्यच्च । निम्बूकं क्रिमिसमूहनाशनं
तीक्ष्णमम्लमुदरग्रहापहम् ।

वातपित्तकफशूलिने हितं
कष्टनष्टरुचिरोचनं परम् ॥
त्रिदोषवह्निक्षयवातरोग-
निपीड़तानां विषविह्वलानाम् ।
मन्दानले बद्धगुदे प्रदेयं
विसूचिकायां मुनयो वदन्ति ॥

मिष्टनिम्बु ।

मिष्टनिम्बुफलं स्वादु गुरुमारुतपित्तनुत् ।
गररोगविषध्वंसि कफोत्क्लेशि च वह्निकृत् ।
शोषारुचिहृद्व्याच्छर्दिहरं बल्यञ्च दीपनम् ॥

बीजपूरः ।

बीजपूरो मातुलुङ्गो रुचकः फलपूरकः ॥
बीजपूरफलं स्वादु रसेऽम्ल दीपनं लघु ।
रक्तपित्तहरं कण्ठजिह्वाहृदयशोधनम् ।
श्वासकासारुचिहरं हृद्यं तृष्णाहरं स्मृतम् ॥

मधुकर्कटिका ।

बीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी ॥
मधुकर्कटिका स्वादी रोचनी शीतला गुरुः ।
रक्तपित्तक्षयश्वासकासहिक्काज्वरापहा ॥

जम्बीरद्वयम् ।

स्याज्जम्बीरो दन्तशठो जम्भजम्बीरजम्बलाः ॥
जम्बीरमुष्णं गुर्वम्लं वातश्लेष्मविबन्धनुत् ।
शूलकासकफोत्क्लेशच्छर्दितृष्णामदोषजित् ।
आस्यवैरस्यकृत्पीड़ावह्निमान्द्यक्रिमीन् हरेत् ॥

स्वल्पजम्बीरिका तद्वत् तृष्णाच्छर्दिनिवारणी ॥

हृच्चाङ्गम् । हिन्दी महादा ।

हृच्चाङ्गं तिन्तिड़ीकञ्च चुक्रं स्यादम्लहृच्चकम् ॥
हृच्चाङ्गमाममम्लोष्णं वातघ्नं कफपित्तलम् ।
पक्वन्तु गुरु संग्राहि कटूकन्तुवर लघु ॥
अम्लोष्णं रोचनं रूक्षं दीपन कफवातजित् ।
तृष्णार्शोग्रहणीगुल्मशूलहृद्रोगजन्तुजित् ॥

अम्लवेतसः ।

स्यादम्लवेतसयुक्तं शतवेधि सहस्रनुत् ॥
अम्लवेतसमत्यम्लं भेदनं लघु दीपनम् ।
हृद्रोगशूलगुल्मघ्नं पित्तलं लोमहर्षणम् ॥
रूक्ष विष्मूत्रदोषघ्नं प्लीहोदावर्त्तनाशनम् ।
हिक्कानाहारुचिश्वासकासाजीर्णवमिप्रणुत् ॥
कफवातामयध्वंसि छागमांसद्रवत्वकृत् ।
अम्लकाम्लगुणं ज्ञेय लौहसूचीद्रवत्वकृत् ॥

चतुरम्लपञ्चाम्लयोर्लक्षणम् ।

अम्लवेतसहृच्चाम्लहृच्चजम्बीरनिम्बुकैः ।
चतुरम्लं हि पञ्चाम्लं बीजपूरयुतैर्भवेत् ॥

तिन्तिड़ी ।

अम्लिका चुक्रिकाम्लो च चुक्रा दन्तशठापि च ।
अम्ला च विचिका चिञ्चा तिन्तिड़ीका च तिन्तिड़ी ।
अम्लिकाम्ला गुरुर्वातहरी पित्तकफास्रकृत् ।
पक्वा तु दीपनी रूक्षा सरोष्णा कफवातनुत् ॥

कर्म्मरङ्गम् ।

कर्म्मरङ्गं हिमं ग्राहि स्वादम्लं कफवातकृत् ॥

षड्विंशोऽध्यायः ।

अथ शाकवर्गः ।

शाकम् ।

पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरम् ॥
प्रायशाकानि सर्वाणि विष्टम्भीनि गुरूनि च ।
रूक्षाणि बहुवर्चांसि सृष्टविण्मारुतानि च ॥
शाकं भिनत्ति वपुरस्थि निहन्ति नेत्रम् ।
वर्णं विनाशयति रक्तमथापि शुक्रम् ॥
प्रज्ञाक्षयञ्च कुरुते पलितञ्च नूनम् ।
हन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञाः ॥
शाकेषु सर्वेषु वसन्ति रोगा-
स्ते हेतवो देहविनाशनाय ।
तस्माद्बुधः शाकविवर्जनन्तु
कुर्य्यात्तथाश्लेषु स एव दोषः ॥
एतानि शाकनिन्दकानि वचनानि सामान्यानि ।
अथ शाकेषु विशिष्टानि वचनानि ।

पत्रशाकानि ।

वास्तुकद्वयम् ।

वास्तूक वास्तुकश्च स्यात् क्षारपत्रश्च शाकराट् ।
तदेव तु हरित्पत्र रक्तं स्याद्गोवास्तुकम् ॥
प्रायशो यवसाध्ये स्याद्यवशाकमतः स्मृतम् ।
वास्तूकद्वितयं स्वादु क्षारं पाके कटूदितम् ॥
दीपनं पाचनं रुच्यं लघु शुक्र बलप्रदम् ।
सरं श्लीहास्रपित्तार्शःक्रिमिदोषत्रयापहम् ॥

पोतकी ।

पोतक्युपोदिका सा तु मालवामृतवल्लरी ॥
पोतकी शीतला स्निग्धा श्लेष्मला वातपित्तनुत् ॥
अकण्ठ्या पिच्छिला निद्रा शुक्रदा रक्तपित्तजित् ।
बलदा रुचिकृत् पथ्या हृद्या दृष्टिकारिणी ॥

मारिषः ।

मारिषो वाष्यको मार्षः क्षेतो रक्तश्च स स्मृतः ॥
मारिषो मधुरः शीतो विष्टम्भी पित्तनुद्गुरुः ।
वातश्लेष्मकरो रक्तपित्तनुद्विषमाग्निजित् ॥
रक्तमार्षो गुरुर्नाति सक्षारो मधुरः सरः ।
श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः ॥

तण्डुलीयः ।

तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः ।
भण्डीरस्तण्डुलीबीजो विषघ्नश्चाल्पमारिषः ॥
तण्डुलीयो लघुः शीतो रूक्षः पित्तकफास्रजित् ।
दृष्टिमूत्रमलो रुच्यो दीपनो विषहारकः ॥

पलक्या ।

पलक्या वासुकाकारा छुरिका चीरितच्छदा ॥
पलक्या वातला शीता श्लेष्मला मेदिनी गुरुः ।
विष्टम्भिनी मदश्वासपित्तरक्तकफापहाः ॥

नारिकम् ।

नाडिकं कालशाकञ्च शाडशाकञ्च कालकम् ॥
कालशाकं मरु रुच्यं वातकृत् कफशोथ हृत् ।
बल्यं रुचिकरं मेध्यं रक्तपित्तहरं हिमम् ॥

षट्शाक ।

षट्शाकस्तु नाडीको नाडीशाकश्च स स्मृतः ।
नाड़िको रक्तपित्तघ्नो विष्टम्भी वातकोपनः ॥

कलम्बी ।

कलम्बी शतपर्वी च कथ्यन्ते तद्गुणा अथ ।
कलम्बी स्तन्यदा प्रोक्ता मधुरा शुक्रकारिणी ॥

लोणी ह्रस्वलोणी च ।

लोणा लोणी च कथिता ह्रस्वलोणी तु घोटिका ॥
लोणी रूक्षा स्मृता गुर्वी वातश्लेष्महरी पटुः ।
अर्शघ्नी दीपनी चाम्ला मन्दाग्निविषनाशिनी ॥
घोटिकाम्ला सरा चोष्णा वातकृत् कफपित्त हृत् ।
वाग्दोषव्रणगुल्मघ्नी श्वासकासप्रमेहनुत् ।
शोथे नेत्ररोगे च हिता तज्ज्ञैरुदाहृता ॥

चुक्रिका ।

चुक्रिका स्यात् तु पत्राम्ला रोचिनी श्रुतबोधिनी ॥
चुक्रा स्वल्पतरा स्वादो वातघ्नी कफपित्तकृत् ।

रुच्या लघुतरा पाके कट्वी च नाति रोचनी ॥

चिञ्चा । नाडीचवत् ।

चिञ्चा चञ्चुश्चुकी च दीर्घपत्रा सतिक्तता ॥

चञ्चुः शीता रसा रुच्या स्वादी दोषत्रयापहा ।

धातुपुष्टिकरी बल्या मेध्या पिच्छिलका च सा ॥

हिलमोचिका ।

ब्राह्मी शङ्खधरा चारी ब्राह्मी च हिलमोचिका ।

शोथं कुष्ठं कफं पित्तं हरते हिलमोचिका ॥

शितिवारः ।

शितिवारः शितिवरः स्वस्तिकः सुनिषण्णकः ।

ओवारकः सूचिपत्रः पर्णकः कुक्कुटः शिखी ॥

चाङ्गेरीसदृशः पत्रैश्चतुर्दल इतीरितः ।

शाको जलान्विते देशे चतुःपत्रीति चोच्यते ॥

सुनिषण्णो हिमो ग्राही मोहदोषत्रयापहः ।

अविदाही लघुः स्वादुः कषायो रूक्षदीपनः ।

व्रण्यो रुच्यो ज्वरश्वासमेहकुष्ठभ्रमप्रणुत् ॥

मूलकपत्रम् ।

पाचनं लघु रुच्योष्णं पत्रं मूलकजं नवम् ।

स्नेहसिद्धं त्रिदोषघ्नमसिद्धं कफपित्तकृत् ॥

द्रोणपुष्पीपत्रम् ।

द्रोणपुष्पीदलं स्वादु रूक्षं गुरु च पित्तकृत् ।

भेदनं कामलाशोथमेहज्वरहरं कटु ॥

यवानीपत्रम् ।

यवानीशाकमाग्नेयं रुच्यं वातकफप्रणुत् ।

उष्णं कटु च तिक्तं च पित्तलं लघु शूलहृत् ॥

चक्रमर्दः ।

दद्रुघ्नपत्रं दोषघ्नमामवातकफापहम् ।
कण्डूकासक्रिमिश्वासदद्रुकुष्ठप्रणुल्लघु ॥

सेहुण्ड ।

सेहुण्डस्य दलं तीक्ष्णं दीपनं रोचनं हरेत् ।
आध्मानाष्ठीलिकागुल्मशूलशोथोदराणि च ॥

पर्पटः ।

पर्पटो हन्ति पित्तास्रज्वरतृष्णाकफभ्रमान् ।
संग्राही शीतलस्तिक्तो दाहनुद्दातलो लघुः ॥

गोजिह्वा । हिन्दी गोजिया शाक ।

गोजिह्वा कुष्ठमेहास्रकच्छ्वज्वहरी लघुः ॥

पटोलपत्रम् ।

पटोलपत्रं पित्तघ्नं दीपनं पाचनं लघु ।
स्निग्धं वृष्यं तथोष्णं च ज्वरकासक्रिमिप्रणुत् ॥

गुडूचीपत्रम् ।

गुडूचीपत्रमाग्नेयं सर्वज्वरहरं लघु ।
कषायं कटु तिक्तं च स्वादुपाकं रसायनम् ॥
बल्यमुष्णं च संग्राहि हन्यादोषत्रयं तथाम् ।
दाहप्रमेहवातास्रकामलाकुष्ठपाण्डुताः ॥

कासमर्द ।

कासमर्दोऽरिमर्दश्च कासारिः कर्कशस्तथा ॥
कासमर्ददलं रुच्यं वृष्यं कासविषास्रनुत् ।
मधुरं कफवातघ्नं पाचनं कण्ठशोधनम् ।

त्रिग्रीवतः कासहरं पित्तघ्नं ग्राहकं लघु ॥

चक्राकपत्रम् ।

कुक्षणकशाकं स्याद्दुर्जरं कफवातकृत् ।
अम्लं विष्टम्भजनकं पित्तनुद्दन्तशोथहृत् ॥

कलायपत्रम् ।

कलायशाकं मेदि स्यान्मधु तिक्तं त्रिदोषजित् ॥

सर्षपपत्रम् ।

कटुकं सार्षपं शाक रूक्षमूत्रमल गुरु ।
अम्लपाकं विदाहि स्यादुष्णं रूक्ष त्रिदोषजित् ॥
सक्षारं लवण तीक्ष्णं स्वादु शाकेषु निन्दितम् ।

अथ पुष्पशाकानि ।

अगस्तिपुष्पम् ।

अगस्तिकुसुमं शीतं चातुर्थकनिवारणम् ।
त्रिदोषघ्नमाग्नेयं तिक्तं कषाय कटुपाकि च ।
पीनसश्लेष्मपित्तघ्न वातघ्नं मुनिभिर्मतम् ॥

कदलीपुष्पम् ।

कदल्याः कुसुमं स्निग्धं मधुरं तुवरं गुरु
वातपित्तहरं शीतं रक्तपित्तक्षयव्रणत् ।
बहुमूत्रापहं हृद्यं शुक्रकृद्बलवर्धनम् ॥

शोभाञ्जनपुष्पम् ।

शिग्रोः पुष्पन्तु कटुकं तीक्ष्णोष्णं स्वादुशोथहृत् ।
क्रिमिघ्नं कफवातघ्नं विद्रधिग्रीहगुल्मजित् ॥
मधुशिग्रोस्त्वचिहितं रक्तपित्तप्रसादनम् ॥

अथ फलशाकानि ।

कुष्माण्डम् ।

कुष्माण्डं स्यात् पुष्पफलं पीतपुष्पं बृहत्फलम् ॥
कुष्माण्डं हृद्यं हृद्यं गुरु पित्तास्रवातनुत् ।
बालं पित्तापहं शीतं मध्यमं कफकारकम् ॥
वृद्धं नातिहिमं स्वादु सक्षारं दीपनं लघु ।
वस्तिशुद्धिकरं चेतोरोगहृत् सर्वदोषजित् ॥

कुष्माण्डी ।

कुष्माण्डी तु भृशं लघ्वी कर्कारुरपि कीर्त्तिता ॥
कर्कारुर्ग्राहिणी शीता रक्तपित्तहरा गुरुः ।
पक्का तिक्ताग्निजननी सक्षारा कफवातनुत् ॥

पीतकुष्माण्डम् ।

अपरं पीतकुष्माण्डं गुरु पित्तकरं परम् ।
अग्निमान्द्यकरं स्वादु श्लेष्मघ्नं वातकोपनम् ॥

अलाबुः ।

अलाबुः कथिता तुम्बी द्विधा दीर्घा च वर्त्तुला ।
मिष्टतुम्बी फलं हृद्यं पित्तश्लेष्मापहं गुरु ।
हृद्यं रुचिकरं प्रोक्तं धातुपुष्टिविवर्द्धनम् ॥

इक्ष्वाकुः ।

इक्ष्वाकुः कटुतुम्बी स्यात् सा तुम्बी च महाफला ॥
कटुतुम्बी हिमा हृद्या पित्तकासविषापहा ।
तिक्ता कटुर्विपाके च वातपित्तज्वरान्तकृत् ॥

एर्वारुः ।

एर्वारुः कर्कटी प्रोक्ता कथ्यन्ते तद्गुणा अथ ॥

कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः ।
रूक्षा पित्तहरा सामा पक्वा दृष्णाग्निपित्तलुत् ॥

चिचिण्डः ।

चिचिण्डः श्वेतराजिः स्यात् सुदीर्घो गुच्छकूलकः ॥
चिचिण्डो वातपित्तघ्नो बल्यः पथ्यो रुचिप्रदः ।
शीर्षिणोऽतिहितः किञ्चिद्गुरुर्न्यूनः पटोलतः ॥

कारवेल्लं कारवेल्ली च ।

कारवेल्लं कठिल्लं स्यात् कारवेल्ली ततो लघुः ॥
कारवेल्लं हिमं भेदि लघु तिक्तमवातलम् ।
ज्वरपित्तकफास्रघ्नं पाण्डुमेहकृमीन् हरेत् ॥
तद्गुणा कारवेल्ली स्यादग्निशोषाहीपनी लघुः ॥

महाकोषातकी ।

महाकोषातकी प्रोक्ता हस्तिघोषा महाफला ।
धामार्गवी घोषकश्च हस्तिपर्णश्च स स्मृतः ॥
महाकोषातकी स्निग्धा रक्तपित्तानिलापहा ॥

राजकोषातकी ।

धामार्गवः पीतपुष्पो जालिनी क्रतवेधना ।
राजकोषातकी चेति तथोक्ता राजिमत्फला ॥
राजकोषातकी शीता मधुरा कफवातला ।
पित्तघ्नी दीपनी श्वासज्वरकासक्रिमिप्रणुत् ॥

पटोलः ।

पटोलः कुलकस्तिक्तः पाण्डुकः कर्कशच्छदः ।
राजीफलः पाण्डुफलो राजेयश्चामृताफलः ।
बीजगर्भः प्रतीकश्च कुष्ठहा कासभञ्जनः ॥

पटोलं पाचनं हृद्यं हृद्यं लघ्वग्निदीपनम् ।
स्निग्धोष्णं हन्ति कासास्रज्वरदोषत्रयकृमीन् ॥
पटोलस्य भवेन्मूलं विरेचनकरं सुखात् ।
नालं श्लेष्महरं पत्रं पित्तहारि फलं पुनः ।
दोषत्रयहरं प्रोक्तं तदत्तिक्ता पटोलिका ॥

विम्बी ।

विम्बी रक्तफला तुण्डी तुण्डिकेरी च विम्बिका ।
ओष्ठोपमफला प्रोक्ता पीलुपर्णी च कथ्यते ॥
विम्बीफलं स्वादु शीतं गुरु पित्तास्रवातजित् ।
स्तम्भनं लेखनं रुच्यं विबन्धाध्मानकारकम् ॥

शिम्बीद्वयम् ।

शिम्बीः शिम्बी पुस्तशिम्बी तथा पुस्तकशिम्बिका ॥
शिम्बीद्वयञ्च मधुरं रसे पाके हिमं गुरु ।
बल्यं दाहकरं प्रोक्तं श्लेष्मलं वातपित्तजित् ॥

कोलशिम्बिः ।

कोलशिम्बिः कृष्णफला तथा पर्य्यङ्कपट्टिका ॥
कोलशिम्बिः समीरघ्नी गुर्व्युष्णा कफपित्तकृत् ।
शुक्राग्निसादकृद्वृष्या रुचिकृद्वन्यविड्गुरुः ॥

शोभाञ्जनफलम् ।

शोभाञ्जनफलं स्वादु कषाय कफपित्तनुत् ।
शूलकुष्ठक्षयश्वासगुल्महृद्दीपनं परम् ॥

वार्त्ताकु. ।

वृन्ताकं स्त्री तु वार्त्ताकुर्भण्टाकी भण्टिकापि च ॥
वृन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलम् ।

जूरवातबलाश्लघ्नं दीपनं शुक्रलं लघु ॥
तद्वालं कफपित्तघ्नं वृद्धं पित्तकरं लघु ।
वृन्ताकं पित्तलं किञ्चिदङ्गारपरिपाचितम् ॥
कफमेदोऽनिलामघ्नमत्यर्थं लघु दीपनम् ।
तदेव हि गुरु स्निग्धं सतैलं लवणान्वितम् ॥
अपरं श्वेतवृन्ताकं कुक्कुटाण्डसमं भवेत् ।
तदर्शःसु विशेषेण हितं हीनञ्च पूर्वतः ॥

डिण्डिशः ।

डिण्डिशो रोमशफलो मुनिनिर्म्मित इत्यपि ॥
डिण्डिशो रुचिकृद्वृष्यो पित्तश्लेष्मापहः स्मृतः ।
सुशीतो वातलो रूक्षो मूत्रलश्चाश्मरीहरः ॥

पिण्डारम् ।

जलशाकविशेषः ।

पिण्डारं शीतलं बल्यं पित्तघ्नं रुचिकारकम् ।
पाके लघु विशेषेण विषशान्तिकरं स्मृतम् ॥

कर्कोटिका ।

कर्कोटिका पीतपुष्पा महाजालीति चोच्यते ॥
कर्कोटी मलहृत् कुष्ठकृमिकासरुचिनाशिनी ।
श्वासकासज्वरान् हन्ति कटुपाका च दीपनी ॥

डोडिका ।

डोडिका विषदृष्टिश्च डोडीत्यपि सुमुष्टिका ॥
डोडिका पुष्टिदा हृद्या रुच्या वह्निप्रदा लघुः ।
हन्ति पित्तकफार्शांसि क्रिमिशुल्मविषामयान् ॥

कण्टकारीफलम् ।

कण्टकारीफलं तिक्तं कटुकं दीपनं लघु ।
रूक्षोष्णं श्वासकासघ्नं ज्वरानिलकफापहम् ॥

अथ नालशाकानि ।

सर्षपनालम् ।

तीक्ष्णोष्णं सार्षपं नालं वातश्लेष्मव्रणापहम् ।
कण्डूविमिहरं दद्रुकुष्ठघ्नं रुचिकारकम् ॥

अथ कन्दशाकानि ।

सूरणः ।

सूरणः कन्द ओलश कन्दलोऽर्शोघ्न इत्यपि ॥
सूरणो दीपनो रूक्षः कषायः कण्डुकृत् कटुः ।
विष्टम्भी विशदो रुच्यः कफार्शःक्रिमनो लघुः ॥
विशेषादर्शसे पथ्यः प्लीहगुल्मविनाशनः ।
सर्वेषां कन्दशाकानां सूरणः श्रेष्ठ उच्यते ॥
दद्रूणां रक्तपित्तानां कुष्ठिनां न हितो हि सः ।
सन्धानयोगं सम्प्राप्तः सूरणो गुणवत्तरः ॥

आलुकम् ।

आलुकमप्यालुकं तत् कथितम् ।
काष्ठालुकमङ्गालुकहस्त्यालुकानि कथ्यन्ते ।
पिण्डालुकसप्तालुकरक्तालुकानि चोक्तानि ॥
आलुकं शीतलं सर्वं विष्टम्भि मधुरं गुरु ।
मूत्रमलं रूक्षं दुर्जरं रक्तपित्तनुत् ।
कफानिलकरं बल्यं हृद्यं रूक्ष्याग्निवर्धनम् ॥

आलुकी ।

रक्तालुकभेदे पाटिया तन्वी च ग्रथितालुकी ॥
आलुकी बलकृत् स्निग्धा गुर्वी हृत्कफनाशिनी ।
विष्टम्भकारिणी तैले लालितातिरुचिप्रदा ॥

लशुनः ।

लशुनस्तु रसोनः स्यादुग्रगन्धी महौषधम् ।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः ॥
पञ्चभिश्च रसैर्युक्तो रसेनाम्लेन वर्जितः ।
तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः ॥
कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः ।
नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः ।
बीजे तु मधुरः प्रोक्तो रसस्तद्गुणवेदिभिः ॥
रसोनो हृद्धृणो हृद्यः स्निग्धोष्णः पाचनः सरः ।
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः ॥
भग्नसन्धानकृत् कण्ठ्यो गुरुः पित्तासृग्दूषितः ।
बलवर्णकरो मेध्यो हितो नेत्र्यो रसायनः ॥

हृद्रोगजीर्णज्वरकुक्षिशूल-
विबन्धगुल्मारुचिकासशोफान् ।
दुर्नामकुष्ठानलसादजन्तु-
समीरणश्वासकफांश्च हन्ति ॥

मद्यं मांसं तथाम्लञ्च हितं लशुनसेविनाम् ।
व्यायामातपं रोषमतितीक्ष्णं पर्युषितं गुडम् ।
रसोनमश्नन् पुरुषस्त्यजेदेतान्निरन्तरम् ॥

पलाण्डुः ।

पलाण्डुर्वृंहनेष्टश्च दुर्गन्धो मुखदूषकः ।
पलाण्डुस्तु गुणैर्न्यूनो रसोनस्तदृशो गुणैः ॥
स्वादुः पाके रसेऽनुष्णः कफकृन्नातिपित्तलः ।
हरते केवलं वातं बलवीर्यकरो गुरु ॥

मूलकम् ।

मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम् ।
शालमर्कटकं विस्रं शालेयं मरुसम्भवम् ॥
चाणक्यमूलकं तीक्ष्णं तथा मूलकपोतिका ।
नैपालमूलकं चान्यत् तद्भवेत् गजदन्तवत् ॥
लघुमूलं कटूष्णं स्याद्रुच्यं लघु च पाचनम् ।
दोषत्रयहरं स्वर्यं ज्वरश्वासविनाशनम् ॥
नासिकाकण्ठरोगघ्नं नयनामयनाशनम् ।
महत्तदेव रूक्षोष्णं गुरु दोषत्रयप्रदम् ॥
स्नेहसिद्धं तदेव स्याद्दोषत्रयविनाशनम् ॥

गाजरम् ।

गाजरं गृञ्जनं प्रोक्तं तथा नारङ्गवर्णकम् ॥
गाजरं मधुरं तीक्ष्णं तिक्तोष्णं दीपनं लघु ।
सद्यो हि रक्तपित्तार्शोग्रहणीकफवातजित् ॥

कदलीकन्दः ।

शीतलः कदलीकन्दो बल्यः केश्योऽम्लपित्तजित् ।
वह्निदाहहरो च मधुरो रुचिकारकः ॥

मानकः ।

मानकः स्यान्महापत्रः कथ्यते तद्गुणा अथ ।

मानकः शीतलश्छीत पित्तरक्तहरो लघुः ॥

वाराहीकन्दः ।

वाराही पित्तला बल्या कट्वी तिक्ता रसायनी ।
आयुःशुक्राग्निकृन्मेहकफकुष्ठानिलापहा ॥

हस्तिकर्णी ।

गजकर्णा तु तीक्ष्णोष्णा तथा वातकफाञ्जयेत् ।
शीतज्वरहरी स्वादु. पाके तस्यास्तु कन्दकः ॥
पाण्डुशोथक्रिमिप्लीहगुल्मानाहोदरापहः ।
ग्रहण्यर्शोविकारघ्नो वनसूरणकन्दवत् ॥

केसुंकम् ।

केसुकं कटुकं पाके तिक्तं ग्राहि हिमं लघु ।
दीपनं पाचनं हृद्यं कफपित्तज्वरापहम् ।
कुष्ठकासप्रमेहास्रनाशनं वातलं कटु ॥

कसेरुद्वयम् ।

कसेरु द्विविधं तत्तु महद्राजकसेरुकम् ।
मुस्ताकृति लघु स्याद्यत्तद्विचोडमिति स्मृतम् ॥
कसेरुकद्वयं शीतं मधुरं तुवरं गुरु ।
पित्तशोणितदाहघ्नं नयनामयनाशनम् ।
ग्राहि शुक्रानिलघ्नं मरुचिस्तन्यकरं स्मृतम् ॥

पद्मादिकन्दः ।

पद्मादिकन्दः शालूकं करहाटश्च कथ्यते ।
मृणालमूल मिस्याण्डं शालूकं तत् प्रकथ्यते ॥
शालूकं शीतलं हृद्यं पित्तदाहास्रतृड्हरम् ।
दुर्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम् ॥

सद्यो हि मधुरं रूक्षं भिन्नाण्डमपि तद्गुणम् ।
बालं क्षुनाशंव जीर्णं व्याधितं क्रिमिभक्षितम् ॥
कन्दं विवर्जयेत् सर्वं यद्वाग्न्यादिविदूषितम् ।
अतिजीर्णमकालोत्थं रूक्षं सिन्धुप्रदेशजम् ॥
कर्कशं कोमलं चातिशीतव्यालादिदूषितम् ।
संशुष्कं सकलं शाकं नाश्नीयान्मूलकं विना ॥

संस्वेदजम् ।

उक्तं संस्वेदजं शाक भूमिच्छत्रं शिलीन्ध्रकम् ।
क्षितिगोमयकाष्ठेषु क्षुवादिषु तदुद्भवेत् ॥
सर्वे सस्वेदजाः शीता दोषला पिच्छलाश्च ते ।
गुरवश्छर्द्यतीसारज्वरश्लेष्मामयप्रदाः ॥
क्षेताः शुभ्रस्थलीकाष्ठवप्रगोव्रजसम्भवाः ।
नातिदोषकरास्ते स्युः शेषास्तेभ्यो विगर्हिताः ॥

सप्तविंशोऽध्यायः ।

अथ धान्यवर्गः ।

तत्र धान्यानां भेदाः ।

शालिधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकम् ।
शिम्बीधान्यं क्षुद्रधान्यमित्युक्तं धान्यपञ्चकम् ॥
शालयो रक्तषष्ट्याद्या व्रीहयः षष्टिकादयः ।

यवादिकं शूकधान्यं मुद्गाद्य शिम्बिधान्यकम् ।
कङ्गादिकं क्षुद्रधान्यं तृणधान्यञ्च तत् स्मृतम् ॥

तत्र शालिधान्यस्य लक्षणं गुणाश्च ।

कण्डनेन विना शुक्ला हैमन्ता: शालय: स्मृता: ॥

तत्र शालीनां नामानि ।

रक्तशालि: स कलम: पाण्डुक: शकुनाहृत: ।
सुगन्धक: कर्दमको महाशालिश्च दूषक: ॥
पुष्पाण्डक: पुण्डरीकस्तथा महिषमस्तक: ।
दीर्घशूक काञ्चनको हायनो लोध्रपुष्पक: ॥
इत्याद्या: शालय: सन्ति बहवो बहुदेशजा: ।
ग्रन्थविस्तरभीतेस्ते समस्ता नात्र भाषिता: ॥

तेषां गुणा: ।

शालयो मधुरा: स्निग्धा बल्या बल्यास्त्ववर्चस: ।
कषाया लघवो रूक्षा: स्वर्या हृद्याश्च ह्रदृणा: ॥
श्लेष्मानिलकफा: शीता: पित्तघ्ना मूत्रलास्तथा ।
शालयो दग्धमृज्याता: कषाया लघुपाकिन: ॥
हृष्टमूत्रपुरीषाश्च रूक्षा: श्लेष्मापकर्षणा: ।
कैदारा (१) वातपित्तघ्ना गुरव: कफशुक्रला: ॥
कषाया अल्पवर्चस्का मेध्याश्चैव बलावहा: ।
स्थलजा: (२) स्वादव: पित्तकफघ्ना वातपित्तदा: ॥
किञ्चित् तिक्ता कषायाश्च विपाके कटुका अपि ।
वापिता मधुरा हृद्या बल्या: पित्तप्रणाशना: ॥

---

(१) कैदारा हृष्टक्षेत्रजा उप्ता: ।

(२) वापिता: हृष्टक्षेत्रे अहृष्टक्षेत्रे च ।

स्वेऽलाश्वाल्पवर्चस्काः कषाया गुरवो हिमाः ।
वापितेभ्यो (१) गुणैः किञ्चिद्धीनाः प्रोक्ता अवापिताः ॥
रोपितास्तु नवा हृद्याः पुराणा लघवः स्मृताः ।
तेभ्यस्तु रोपिता भूयः शीघ्रपाका गुणाधिकाः ॥
क्षिप्तरूढ़ा हिमा रूक्षा बल्याः पित्तकफापहाः ।
बल्यविट्काः कषायाश्च लघवश्चाल्पतिक्तकाः ॥

रक्तशालिः ।

रक्तशालिर्वरस्तेषु बल्यो वर्ण्यस्त्रिदोषजित् ।
चक्षुष्यो मूत्रलः स्वर्यः शुक्रलस्तृड्ज्वरापहः ॥
विषव्रणश्वासकासदाहनद्धक्षिपुष्टिदः ।
तस्मादल्पान्तरगुणाः शालयो महदादयः ॥

रक्तशालिः दाउदखानि इति लोके मगधदेशे प्रसिद्धः ।

व्रीहिधान्यम् ।

वार्षिकाः कण्डिताः शुक्ला व्रीहयश्चिरपाकिनः ।
कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि ॥
शालामुखो जतुमुख इत्याद्या व्रीहयः स्मृताः ।
कृष्णव्रीहिः स विज्ञेयो यः कृष्णतुषतण्डुलः ॥
पाटलः पाटलापुष्पवर्णको व्रीहिरुच्यते ।
कुक्कुटाण्डाकृतिर्व्रीहिः कुक्कुटाण्डक उच्यते ॥
शालामुखः कृष्णशूकः कृष्णतण्डुल उच्यते ।
लाजावर्णं मुखं यस्य ज्ञेयो जतुमुखस्तु सः ॥
व्रीहयः कथिताः पाके मधुरा वीर्यतो हिमाः ।

(१) अवर्षजे अजलसेचने वा ।

अल्पाभिष्यन्दिनो बहुवर्चस्का: षष्टिकै: समा: ;
कणश्रीहिर्वरस्तेषां तस्मादल्पगुणा: परे ॥

षष्टिका ।

गर्भस्था एव ये पाकं यान्ति ते षष्टिका मता: ।
षष्टिक: शतपुष्पश्च प्रमोदकमुकुन्दकौ ॥
महाषष्टिक इत्याद्या: षष्टिका: समुदाहृता: ।
एतेऽपि व्रीहय: प्रोक्ता व्रीहिलक्षणदर्शनात् ॥
षष्टिका मधुरा: शीता लघवो बहुवर्चस: ।
वातपित्तप्रशमना: शालिभि: सदृशा गुणै: ॥
षष्टिका प्रवरा तेषां लघ्वी स्निग्धा विदोषजित् ।
स्वादी मृदी ग्राहिणी च बलदा ज्वरहारिणी ।
रक्तशालिगुणैस्तुल्या तत: स्वल्पगुणा: परे ॥

षष्टिका साठी इति लोके ।

क्षुद्रधान्यम् ।

क्षुद्रधान्यं क्षुधान्यञ्च तृणधान्यमिति स्मृतम् ॥
क्षुद्रधान्यमनुष्णं स्यात् कषायं लघु लेखनम् ।
मधुरं कटुकं पाके रूक्षञ्च क्लेदशोषकम् ।
वातकृद्वर्चविट्कञ्च पित्तरक्तकफापहम् ॥

कङ्गु: । हिन्दी कङ्गनी ।

स्त्रियां कङ्गुप्रियङ्गू द्वे कृष्णा रक्ता सिता तथा ।
पीता चतुर्विधा कङ्गुस्तासां पीता वरा स्मृता ॥
कङ्गु: शुष्कसन्धानवातकृद्ग्राहणी गुरु: ।
रूक्षा क्षेप्फहरालोऽ वालिनां गुणकृद्वरम् ॥

चीनक. । हिन्दी चाना ।

चीनकः कङ्गुभेदोऽस्ति स ज्ञेयः कङ्गुवद्गुणैः ॥

श्यामाकः ।

श्यामाकः शोषणो रूक्षो वातलः कफपित्तहृत् ॥

कोद्रवः ।

कोद्रवः कीरदूषः स्यादुद्दालो वनकोद्रवः ॥
कोद्रवो वातलो ग्राही हिमः पित्तकफापहः ।
उद्दालस्तु भवेदुष्णो ग्राही वातकरो भृशम् ॥

चारुकः ।

चारुकः शरबीजं स्यात् कथ्यन्ते तद्गुणा अथ ॥
चारुको मधुरो रूक्षो रक्तपित्तकफापहः ।
शीतलो लघुरुष्णश्च कषायो वातकोपनः ॥

वंशबीजम् ।

यवा वंशभवा रूक्षाः कषायाः कटुपाकिनः ।
बद्धमूत्राः कफघ्नाश्च वातपित्तकराः सराः ॥

शूकधान्यम् ।

यवः ।

यवस्तु सितशूकः स्यान्निःशूकोऽतियवः स्मृतः ।
तोक्मस्तद्वत् स हरितस्तत. खल्वश्च कीर्त्तितः ॥
यवः कषायो मधुरः शीतलो लेखनो मृदुः ।
व्रणेषु तिलवत् पथ्यो रूक्षो मेधाग्निबद्धनः ॥
कटुपाकोऽनभिष्यन्दी स्वर्य्यो बलकरो गुरुः ।
बहुवातमलो वर्ण्यः श्लेष्मकारी च पिच्छिलः ॥
कण्ठत्वगामयश्लेष्मपित्तमेदःप्रणाशनः ।

पीनसश्वासकासोरुस्तम्भलोहितदूषणत् ।
तस्मादतियवो न्यूनस्तोक्यो न्यूनतरस्ततः ॥

गोधूमः ।

गोधूमः सुमनोऽपि स्यात् त्रिविधः स च कीर्त्तितः ।
महागोधूम इत्याख्यः पञ्चाहेशात् समागतः ॥
मधूली तु ततः किञ्चिदल्पा सा मध्यदेशजा ।
निःशूको दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः ॥
गोधूमो मधुरः शीतो वातपित्तहरो गुरुः ।
कफपित्तप्रदो बल्यः स्निग्धः सन्धानकृत् सरः ।
जीवनो हृंहणो वर्ण्यो ब्रण्यो रुच्यः स्थिरत्वकृत् ॥
कफप्रदो नवीनो नतु पुराणः पुराणयवगोधूमचौद्र-
जाङ्गलशूल्यमृगिति वाग्भटेन वसन्ते ग्रहीतत्वात् ।
मधूली शीतला स्निग्धा पित्तघ्नी मधुराम्बु लघुः ।
शुक्ला हृंहणी ख्यातदन्नन्दीमुखः स्मृतः ॥

शिम्बीधान्यम् ।

शमीजाः शिम्बिजाः शिम्बीभवाः सूर्य्याश्च वैदलाः ॥
वैदला मधुरा रूक्षाः कषायाः कटुपाकिनः ।
वातलाः कफपित्तघ्ना बद्धमूत्रमला हिमाः ।
ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारिणः ॥

मुद्गमसूरयोराध्मानकारित्वमन्यवैदलापेक्षया नतु सर्वथा एतयोरपि किञ्चिदाध्मानकारित्वात् ।

मुद्गः ।

मुद्गो रूक्षो लघुर्ग्राही कफपित्तहरो हिमः ।

स्वादुरम्लानिलो नेत्रमे जुरघ्नो वनजस्तथा ॥
मुद्गो बहुविधः श्यामो हरितः पीतकस्तथा ।
श्वेतो रक्तश्च तेषान्तु पूर्वः पूर्वो लघुः स्मृतः ।
सुश्रुतेन पुनः प्रोक्तो हरितः प्रवरो गुणैः
चरकादिभिरप्युक्त एष एव गुणाधिकः ॥

माषः ।

माषो गुरुः स्वादुपाकः स्निग्धो रुच्योऽनिलापहः ।
स्रंसनस्तर्पणो बल्यः शुक्रलो हृंहणः परः ॥
भिन्नमूत्रमलस्तन्यो मेदःपित्तकफप्रदः
गुदकीलार्दितश्वासपक्षिगूलानि नाशयेत् ॥
कफपित्तकरा माषाः कफपित्तकरं दधि ।
कफपित्तकरा मस्या दुल्लाकं कफपित्तजित ॥

राजमाषः ।

वीडा यस्य च वैरातरा लोबिया
इत्यादयो भेदाः ।

राजमाषो महामाषश्चपलश्चवलः स्मृतः ॥
राजमाषो गुरुः स्वादुस्तुवरस्तर्पणः सरः ।
रूक्षो वातकरो रुच्यः स्तन्यभूरिबलप्रदः ।
श्वेतो रक्तस्तथा कृष्णस्त्रिविधः स प्रकीर्त्तितः ।
यो महांस्तेषु भवति स एवोक्तो गुणाधिकः ॥

निष्पावः ।

स तु राजगिब्बो वीजं भेटवासु इति लोके ।
निष्पावो राजगिम्बिः स्याद्वल्लकः श्वेतगिम्बिकः ॥
निष्पावो मधुरो रूक्षो विपाकेऽल्पो गुरुः सरः ।

कषायः स्वन्यपित्तास्रमूववातविबन्धकृत् ।
विदाह्युष्णो विषश्लेष्मशोथहृच्छुक्रनाशनः ॥

मकुष्टकः ।

मकुष्टो वनमुद्गः स्यान्मकुष्ठकमकुष्टको ॥
मकुष्टो वातलो ग्राही कफपित्तहरो लघुः ।
वान्तिजिन्मधुरः पाके कृमिकुज्वरनाशनः ॥
तथा कषायत्वं रक्तपित्तहरत्वं पथ्यत्वञ्चाप्यस्य गुणाः ।

मसूरः । हिन्दी मसूरी ।

मङ्ग्ल्यको मसूरः स्यान्मङ्ग्ल्या च मसूरिका ॥
मसूरो मधुरः पाके संग्राही शीतलो लघुः ।
कफपित्तास्रजिद्रूक्षो वातलो ज्वरनाशनः ॥

आढ़की । हिन्दी रहरी ।

आढ़की तुवरी चापि सा प्रोक्ता शणपुष्पिका ॥
आढ़की तुवरा रूक्षा मधुरा शीतला लघुः ।
ग्राहिणी वातजननी वर्ष्या पित्तकफास्रजित् ॥

चणकः ।

चणको हरिमन्थः स्यात् सक्तुप्रिय इत्यपि ॥
चणकः शीतलो रूक्षः पित्तरक्तकफापहः ।
लघुः कषायो विष्टम्भी वातलो ज्वरनाशनः ॥
स चाङ्कारेण संयुक्तस्त्रैलवणेन लघुः ।
आर्द्रश्लेष्मो बलकरो रोचनश्च प्रकीर्त्तितः ॥
शुष्कश्लेष्मातिरूक्षश्च वातकुष्ठप्रकोपणः ।
सिद्धः पित्तजमर्शं हन्यात् सूपः क्षेमकरो मतः ॥
आर्द्रोऽतिकोमलो रूक्षः पित्तरक्तहरो हिमः ।

कषायो वातलो ग्राही कफपित्तहरो लघुः ॥

कलायः ।

कलायो वर्त्तुलः प्रोक्तः स तिलश्च हरेणुकः ।
कलायो मधुरः स्वादुः पाके रूक्षश्च शीतलः ॥

त्रिपुटः ।

त्रिपुटः खण्डिकोऽपि स्यात् कथ्यते तद्गुणा अथ ।
त्रिपुटो मधुरस्निग्धसुवरो रूक्षणो गुरुः ॥
कफपित्तहरो रुच्यो ग्राहकः शीतलस्तथा ।
किन्तु खञ्जखपङ्गुखकारो वातातिकोपनः ॥

कुलत्थः ।

कुलत्थिका कुलत्थश्च कथ्यते तद्गुणा अथः ॥
कुलत्थः कटुकः पाके कषायः पित्तरक्तकृत् ।
लघुर्विदाही वीर्य्योष्णः श्वासकासकफानिलान् ॥
हन्ति हिक्काश्मरीशुक्रदाहानाहान् सपीनसान् ।
स्वेदसंग्राहको मेदोज्वरकृमिहरः परः ॥

कुसुम्भबीजम् ।

कुसुम्भबीजं वरटा सेव प्रोक्ता वरट्टिका ॥
वरटा मधुरा स्निग्धा रक्तपित्तकफापहा ।
कषाया शीतला गुर्वी स्वादुव्यानिजापहा ॥

गवेधुका ।

गवेधुका तु विज्ञेया गवेधुः कथिता स्त्रियाम् ।
गवेधुः कटुका स्वादौ कषायेऽल्पं कफानिलौ ॥

तिलः ।

तिलः कृष्णः सितो रक्तः स तैलीऽलितिलः स्मृतः ॥

तिलो रसे कटुस्निग्धो मधुरस्तुवरो गुरुः
विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तनुत् ।
बल्यः केश्यो हिमस्पर्शस्त्वच्यः स्तन्यो व्रणे हितः ।
दन्त्योऽल्पमूत्रकृद्ग्राही वातघ्नोऽग्निमतिप्रदः ॥
कृष्णः श्रेष्ठतमस्तेषु शुक्लो मध्यमः सितः ।
अन्ये होनतराः प्रोक्तास्तज्ज्ञै रक्तादयस्तिलाः ॥

अतसी ।

अतसी नीलपुष्पी च पार्वती स्वादुमा क्षुमा ।
अतसी मधुरा तिक्ता स्निग्धा पाके कटुर्गुरुः ।
उष्णा दृक्शुक्रवातघ्नी कफपित्तविनाशिनी ॥

सर्षपः ।

सर्षपः कटुकस्नेहस्तुम्बुरुश्च कदम्बकः ।
गौरस्तु सर्षपः प्राज्ञैः सिद्धार्थ इति कथ्यते ॥
सर्षपस्तु रसे पाके कटुः स्निग्धः स तिक्तकः ।
तीक्ष्णोष्णः कफवातघ्नो रक्तपित्ताग्निवर्धनः ॥
रूक्षो हरेद्व्रणं कण्डूं कुष्ठकोठक्रिमिग्रहान् ।
यथा रक्तस्तथा गौरः किन्तु गौरो वरो मतः ॥

राजिका ।

राजी तु राजिका तीक्ष्णगन्धा कृष्णनिकासुरी ।
अवः क्षुताभिजनकः क्रिमिघ्नश्च कृष्णसर्षपः ।
राजिका कफपित्तघ्नी तीक्ष्णोष्णा रक्तपित्तकृत् ।
किञ्चिद्दृष्ट्यग्निदा कण्डूकुष्ठकोठक्रिमीन् हरेत् ।
अतितीक्ष्णा विशेषेण तद्वत् कृष्णापि राजिका

नूतनपुरातनधान्यानां गुणाः।

धान्यं सर्वं नवं स्वादु गुरु श्लेष्मकरं स्मृतम्।
तत्तु वर्षोषितं पथ्यं यतो लघुतरं हि तत्॥
वर्षोषितं सर्वधान्यं गौरवं परिमुञ्चति।
न तु त्यजति वीर्यं स्वं क्रमान्मुञ्चत्यतः परम्॥
एतेषु यवगोधूमतिलमाषा नवा हिताः।
पुराणा विरसा रूक्षा न तथा गुणकारिणः॥

पुराणा वर्षद्वयादुपरिस्थिताः। यवादयो नवाः स्वस्थान् प्रति हिताः। पथ्यागमिनस्तु पुराणा हिताः।

निवारः। हिन्दी तीनी।

प्रसाधिका तु नीवारस्तृणान्नमिति च स्मृतम्।
नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत्॥

पवनालः।

पवनालो हिमः स्वादुर्लोहितः श्लेष्मपित्तजित्।
अङ्गस्थसुवरी रूक्षः क्लेदकृत् कथितो लघुः॥

लाजाः।

येषां स्युस्तण्डुलास्तानि धान्यानि सतुषाणि च।
भृष्टानि स्फुटिन्याद्यैर्लाजानिति मनीषिणः॥
लजाः स्युर्मधुराः शीता लघवो दीपनाश्च ते।
स्वल्पमूत्रमला रूक्षा बल्या पित्तकफच्छिदः।
छर्दितीसारदाहास्रमेहमेदस्तृषापहाः॥

चिपिटकः।

शालयः सतुषा आर्द्रा भृष्टा अस्फुटिताश्च तत्।
कुट्टिताश्चिपिटाः प्रोक्तास्ते स्मृताः पृथुका अपि॥

पृथुका गुरवो वातनाशनाः श्लेष्मला अपि ।
सक्षीरा इक्षवो हृद्या बल्याः संग्राहिणश्च ते ॥

अष्टाविंशोऽध्यायः ।

अथ मांसवर्गः ।

मांसं तु पिशितं क्रव्यमामिषं पललं पलम् ॥
मांसं वातहरं सर्वं हृंहणं कफपुष्टिकृत् ।
प्रीणनं गुरु हृद्यञ्च मधुरं रसपाकयोः ॥

जाङ्गलाः ।

मांसवर्गोऽत्र जाङ्गला विलस्थाश्च गुहाशयाः ।
तथा पर्णमृगा ज्ञेया विष्किरा प्रतुदोऽपि च ।
प्रसहा अथ च ग्राम्या अष्टौ जाङ्गलजातयः ॥
जाङ्गला मधुरा रूक्षास्तुवरा लघवस्तथा ।
बल्यास्ते हृंहणा हृद्या दीपना दोषहारिणः ॥
मूकता मिन्मिनत्वं च गद्गदत्वादितं तथा ।
वाधिर्यमरुचिच्छर्दिप्रसेकान् मुखजान् गदान् ।
स्रोपदंशं गलगण्डञ्च नाशयत्यनिलामयान् ॥

आनूपाः ।

कूलेचराः प्लवाश्चापि कोशस्थाः पादिनस्तथा ।
मत्स्या एते समाख्याताः पञ्चधानूपजातयः ॥
आनूपा मधुराः स्निग्धा गुरवो बद्धविसादनाः ।

श्लेष्मला पित्तलाश्चापि मांसपुष्टिप्रदा मृगम् ।
तथाभिष्यन्दिनस्ते हि प्रायःपथ्यतमा स्मृता ॥

जाङ्गलाः ।

हरिणैनकुरङ्गर्श्यपृषतन्यङ्कुसम्बराः ।
राजीवोऽपि च मुण्डी चेत्याद्या जङ्गालसंज्ञकाः ॥
हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः ।
कुरङ्ग एष ताम्रः स्यादेणतुल्याकृतिर्महान् ॥
ऋष्यो नीलाण्डको लोके सरोरुहेति कीर्त्तितः ।
पृषतश्चन्द्रबिन्दुः स्यादरिणात् किञ्चिदल्पकः ॥
न्यङ्कुर्बहुविषाणोऽथ सम्बरो गवयाकृतिः ।
राजीवस्तु मृगः श्रेयो राजिभिः परितोवृतः ।
यो मृगः शृङ्गहीनः स्यात् स मुण्डीति निगद्यते ॥
जाङ्गलाः प्रायशः सर्वे पित्तश्लेष्महराः स्मृताः ।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः ॥

विलेशयाः ।

गोधाशयशशजङ्गाखुशल्याद्या विलेशयाः ॥
विलेशया वातहरा मधुरा रसपाकयोः ।
स्निग्धा बृंहणमूत्रा वीर्य्योष्णाश्च प्रकीर्त्तिताः ॥

गुहाशयाः ।

सिंहव्याघ्रर्क्षकाः ऋक्षतरक्षुद्वीपिनस्तथा ।
बभ्रूजम्बुकमार्जारा इत्याद्याः स्युर्गुहाशयाः ॥
स्थूलपुच्छो रक्तनेत्रो बभ्रूभेदः स नाकुलः ॥
गुहाशया वातहरा गुरुष्णा मधुराश्च ते ।
स्निग्धा बल्या हिता नित्यं नेत्रगह्वविकारिणाम् ॥

पर्णमृगाः ।

वनौकोदृक्षमार्जारदृक्षमर्कटिकादयः ।
एते पर्णमृगाः प्रोक्ताः सुश्रुताद्यैर्महर्षिभिः ॥
स्मृताः पर्णमृगा दृष्यास्तृष्याः श्रोषिणि हिताः ।
श्वासार्शःकासशमनाः स्रष्टमूत्रपुरीषकाः ॥

विष्किराः ।

वर्त्तकालावतित्तिरकपिञ्जलकतित्तिराः ।
कुलिङ्गकुक्कुटाद्याश्च विष्किराः समुदाहृताः ॥
विकीर्य भक्षयन्त्येते यस्मात्तस्मादि विष्किराः ।
कपिञ्जल इति प्राज्ञैः कथिता गौरतित्तिरिः ॥
विष्किरा मधुराः शीताः कषायाः कटुपाकिनः ।
बल्या दृष्याक्षिदोषघ्नाः पथ्यास्ते लघवः स्मृताः ॥

प्रतुदाः ।

हारीतो धवलः पाण्डुश्चित्रपत्रो दृढच्छुकः ।
पारावतः खञ्जरीटः पिकाद्याः प्रतुदाः स्मृताः ॥
प्रतुद्य भक्षयन्त्येते तुण्डेन प्रतुदास्ततः ॥
प्रतुदा मधुराः पित्तकफघ्नास्तुवरा हिमाः ।
लघवो बलवर्चस्काः किञ्चिद्वातकराः स्मृताः ॥

प्रसहाः ।

काको गृध्र उलूकश्च चिल्लश्च शशघातकः ।
चासो भासश्च क्रुरव इत्याद्याः प्रसहाः स्मृताः ॥
प्रसहाः कीर्त्तिता एते प्रसह्याच्छिद्य भक्षणात् ॥
प्रसहाः खलु वीर्य्योष्णास्तन्मांसं भक्षयन्ति ये ।
ते शीघ्रभक्षकोन्मादशक्रक्षीणा भवन्ति हि ॥

ग्राम्याः ।

छागमेषवृषाश्वाद्या ग्राम्याः प्रोक्ता महर्षिभिः ॥
ग्राम्या वातहराः सर्वे दीपनाः कफपित्तलाः ।
मधुरा रसपाकाभ्यां हृद्या बलवर्धनाः ॥

कूलेचराः ।

लुलायगण्डवाराहचमरीवारणादयः ।
एते कूलचराः प्रोक्ताः यतः कूले चरन्त्यपाम् ॥
कूलेचरा मरुत्पित्तहरा हृद्या बलावहाः ।
धुराश्च शीतलाः स्निग्धा मूत्रलाः श्लेष्मवर्धनाः ॥

प्लवाः ।

हंससारसकारण्डवककक्रौञ्चशरारिकाः ।
नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः ।
प्लवन्ति सलिले यस्मादेते तस्मात् प्लवाः स्मृताः ॥
स्थूला कठोरवृत्ता च यस्याश्चञ्चूपरिस्थिता ।
गुटिका जम्बुसदृशी प्रोक्ता नन्दीमुखीति सा ॥
प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः ।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः ॥

कोषस्थाः ।

शङ्खशुक्तिनखाश्चापि शुक्तिगण्डूककर्कटाः ।
जीवा एवंविधाश्चान्ये कोषस्थाः परिकीर्त्तिताः ॥
कोषस्था मधुराः स्निग्धा वातपित्तहरा हिमाः ।
हृद्या बलवर्चस्का हृद्याश्च बलवर्धनाः ॥

पादिनः ।

कुम्भीरकूर्मनक्राश्च गोधाभकरभद्रवः ।

धनिष्ठक. शिशुमारशेल्लादय: पार्दिन: स्मृता: ॥
पार्दिनोऽपि च ये ते तु कोषस्थानां गुणै: समा: ॥

मत्स्य: ।

मत्स्यो मीनो विसारश्च रूपी वैयारिणोऽण्डज: ।
शकुलो पृथुरोमा च स सुदर्शन इत्यपि ।
रोहिताद्यास्तु ये जीवास्ते मत्स्या: परिकीर्त्तिता: ॥
मत्स्या: स्निग्धोष्णमधुरा गुरव: कफपित्तला: ।
वातघ्ना हंहणा हृद्या रोचका बलवर्द्धना: ॥
मद्यव्यवायसक्तानां दीप्ताग्नीनाञ्च पूजिता: ।

अथ जाङ्गलादीनां नामानि गुणाश्च ।

हरिण: ।

हरिण श्रीतलो बद्धविण्मूत्रो दीपनो लघु: ।
रसे पाके च मधुर: सुगन्धि: सन्निपातहा ॥

एण: ।

एण: कषायो मधुर: पित्तासृक्कफवातहृत् ।
संग्राही रोचनो बल्यो ज्वरप्रशमन: स्मृत: ॥

कुरङ्ग: ।

कुरङ्गो हंहणो बल्य: शीतल: पित्तहृद्गुरु: ।
मधुरो वातहृद्ग्राही किञ्चित्कफकर: स्मृत: ॥

ऋष्य: । हिन्दी रोउ ।

ऋष्यो नीलाण्डकश्चापि गवयो रोउ इत्यपि ।
गवयो मधुरो बल्य: स्निग्धोष्ण: कफपित्तल: ॥

पृषत: । हिन्दी चित्तरि ।

पृषतस्तु भवेत् स्वादुर्मांहक: शीतलो लघु: ।

दीपनो रोचनः श्वासज्वरदोषत्रयास्रजित् ॥

न्यङ्कुः । हिन्दी वाराहसिङ्गा ।

न्यङ्कुः स्वादुर्लघुर्बल्यो हृद्यो दोषत्रयापहः ॥

सावरम् ।

सावरं पललं स्निग्धं शीतलं गुरु च स्मृतम् ।

रसे पाके च मधुरं कफदं रक्तपित्तहृत् ॥

राजीवः ।

राजीवस्तु गुणैर्ज्ञेयः पृषतेन समो जनैः ॥

मुण्डी ।

मुण्डी तु ज्वरकासास्रत्रयश्वासापहो हिमः ॥

विलेशयाः ।

शशः ।

लम्बकर्णः शशः शूली लामकर्णो विलेशयः ॥

शशः शीतो लघुर्ग्राही रूक्षः स्वादुः सदा हितः ।

वह्निकृत् कफपित्तघ्नो वातसाधारणः स्मृतः ।

ज्वरातिसारदुष्टास्रश्वासामयहरश्च सः ॥

शल्यकः ।

सेधा तु शल्यकः श्वावित् कथ्यते तद्गुणा अथ ।

शल्यकः श्वासकासास्रयोषदोषत्रयापहः ॥

अथ पक्षिणां नामानि गुणाश्च ।

पक्षी खगो विहङ्गश्च विहगश्च विहङ्गमः ।

शकुनिर्विः पतत्री च विष्किरो विकिरोऽण्डजः ॥

वान्यचित्रचरा येऽत्र तेषां मांसं लघूत्तमम् ।

आनूपं बलकृन्मांसं स्निग्धं गुरुतरं स्मृतम् ॥

वर्त्तक ।

वर्त्तीको वर्त्तकश्चित्रस्तोऽन्या वर्त्तका स्मृता ॥
वर्त्तकोऽग्निकर श्रीतो ज्वरदोषत्रयापहः ।
सुरुच्यः शुक्रदो बल्यो वर्त्तकाल्पगुणा ततः ॥

लावाः ।

लावा विष्किरवर्गेषु ते चतुर्था मता बुधैः ।
पांशुलो गौरकोऽन्यस्तु पौण्ड्रको दर्भरस्तथा ॥
लावा वह्निकराः स्निग्धा गरघ्ना ग्राहिका हिताः ।
गौरो लघुतरो रूक्षो वह्निकारी त्रिदोषजित् ॥
पौण्ड्रकः पित्तकृत् किञ्चिन्मधुर्वातकफापहः ।
दर्भरो रक्तपित्तघ्नो हृद्यमग्निहरो हिमः ॥

वर्त्तिचटकाः ।

वार्त्तीको वर्त्तिचटको वार्त्तीकश्चैव ते स्मृताः ।
वार्त्तीको मधुरः शीतो रूक्षश्च कफपित्तनुत् ॥

कृष्णतित्तिरिः गौरतित्तिरिश्च ।

तित्तिरिः कृष्णवर्णः स्याद्विज्ञेयोऽन्यो गौरतित्तिरिः ॥
तित्तिरिर्बलदो ग्राही हिक्कादोषत्रयापहः ।
श्वासकासज्वरहरस्तस्मान्नोरोऽधिको गुणैः ॥

चटकः ।

चटकः कलविङ्कः स्यात् कुलिङ्गः कालकण्ठकः ।
कुलिङ्गः शीतलः स्निग्धः स्वादुः शुक्रकफप्रदः ।
सन्निपातहरो वेश्मचटकश्चापि शुक्रलः ॥

कुक्कुटवनकुक्कुटौ ।

कुक्कुटः ककराकुः स्यात् कलज्वशरणायुधः ।

ताम्रचूडस्तथा दक्षः प्रातर्बोधी शिखण्डिकः ॥
कुक्कुटो हृद्यहृष्य. स्निग्धो वीर्योष्णोऽनिलहृद्गुरुः ।
चक्षुष्य. शुक्रकफकृद्बल्यो हृष्यः कषायकः ॥
अरण्यकुक्कुटः स्निग्धो हृद्यहृष्यः श्लेष्मलो गुरुः ।
वातपित्तक्षयवर्मिविषमज्वरनाशनः ॥

प्रतुदपक्षाः ।

हारीतः । हिन्दी हारील् ।

हारीतो रक्तकण्ठः स्याद्धरितोऽपि स कथ्यते ॥
हारीतो रूक्ष उष्णश्च रक्तपित्तकफापहः ।
स्वेदस्वरकरः प्रोक्त ईषद्वातकरश्च सः ॥

पाण्डुधवलपाण्डू ।

पाण्डुस्तु द्विविधो ज्ञेयश्चित्रपक्षः कलध्वनिः ।
द्वितीयो धवल प्रोक्तः स कपोतः स्फुटस्वनः ॥
चित्रपक्षः कफहरो वातघ्नो ग्रहणीप्रणुत् ।
धवलः पाण्डुरुद्दिष्टो रक्तपित्तहरो हिमः ॥

मयूरः ।

मयूरश्चन्द्रकी केकी मेघनादी भुजङ्गभुक् ।
शिखी शिखावलो बर्ही शिखण्डी नीलकण्ठकः ॥
शुक्लोपाङ्गः कलापी च मेघनादानुलास्यपि ।
रसे पाके च मधुरः संग्राही वातशान्तिकृत् ॥

पारावतः ।

पारावतः कलरवः कपोतो रक्तवर्त्मनः ॥
पारावतो गुरुः स्निग्धो रक्तपित्तानिलापहः ।
संग्राही शीतलस्तज्ज्ञैः कथितो वीर्यवर्धनः ॥

पञ्चखण्डस्य गुणाः ।

नातिस्निग्धानि वृष्याणि स्वादुपाकरसानि च ।
वातघ्न्यतिशुक्राणि गुरुण्यण्डानि पक्षिणाम् ॥

ग्राम्याः ।

छागः ।

छागलो वर्करश्छागो वस्तोऽजश्छेलकः शुभः ।
अजा छागी शुभा चापि छेलिका च गलस्तनी ॥
छागमांसं लघु स्निग्धं स्वादुपाकं त्रिदोषनुत् ।
नातिशीतमदाहि स्यात् स्वादु पीनसनाशनम् ॥
परं बलकरं रुच्यं बृंहणं वीर्यवर्द्धनम् ।
अजाया अप्रसूता या मांसं पीनसनाशनम् ॥
शुष्ककासेऽरुचौ शोषे हितमग्नेश्च दीपनम् ।
अजासुतस्य बालस्य मांसं लघुतरं स्मृतम् ॥
हृद्यं ज्वरहरं श्रेष्ठं सुखदं बलदं भृशम् ।
मांसं निष्काशिताण्डस्य छागस्य कफकृद्गुरु ॥
स्रोतःशुद्धिकरं बल्यं मांसदं वातपित्तनुत् ।
हृद्यस्य वातलं रुच्यं तथा व्याधिमृतस्य च ॥
जङ्घाजचुविकारघ्नं छागमुण्डं रुचिप्रदम् ।
शुक्लाक्षकोषाः स्युर्यस्यैचक्षितं मतम् ॥

मेढ्रः ।

मेढ्री मेढ्रो हुड्डो मेष उरणोऽप्येडकोऽपि च ।
अविर्दृष्टिस्तथोर्णायुः कथ्यन्ते तद्गुणा अथ ॥
मेषस्य मांसं पुष्टी स्यात् पित्तश्लेष्मकरं गुरु ।
तस्यैवाण्डविहीनस्य मांसं किञ्चिल्लघु स्मृतम् ॥

एड़क' । हिन्दी दुम्बा ।

एड़कः पृथुशृङ्ग' स्यान्मेदःपुच्छस्तु दुम्बकः ।
एड़कस्य पलं ज्ञेयं मेषामिषसमं गुणैः ॥
मेद.पुच्छोद्भवं मांसं हृद्यं हृष्यं श्रमापहम् ।
पित्तश्लेष्मकरं किञ्चिद्वातव्याधिविनाशनम् ॥

बलीवर्दः ।

बलीवर्दस्तु वृषभऋषभश्च तथा वृषः ।
अनड्वान् सौरभेयश्च गौरुक्षा भद्र इत्यपि ॥
सुरभिः सौरभेयी च माहेयी गौरुदाहृता ॥
गोमांसन्तु गुरु स्निग्धं पित्तश्लेष्मविवर्द्धनम् ।
हृद्यं हृष्यं वातहृद्बल्यमपथ्यं पीनसप्रणुत् ॥

घोटकः ।

घोटकः पीतितुरगतुरङ्गाश्च तुरङ्गमः ।
वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः ॥
अश्वमांसन्तु तुवरं वह्निकृत् कफपित्तलम् ।
वातहृद्वृंहणं बल्यं चक्षुष्यं मधुरं लघु ॥

खेचरवर्गः ।

महिष' ।

महिषो घोटकारिः स्यात् कासरश्च रजस्वलः ।
पीनस्कन्धः कृष्णकायो लुलायो यमवाहनः ॥
महिषस्यामिषं स्वादु स्निग्धोष्णं वातनाशनम् ।
निद्राशुक्रप्रदं बल्यं तनुदार्ढ्यकरं गुरु ।
हृष्यञ्च सृष्टविण्मूत्रं वातपित्तास्रनाशनम् ॥

मण्डूकः ।

मण्डूकः प्लवगो भेको वर्षाभूर्दर्दुरो हरिः ।
मण्डूकः श्लेष्मलो नातिपित्तलो बलकारकः ॥

कच्छपः ।

कच्छपो गूढपात् कूर्मः कमठो दृढपृष्ठकः ।
कच्छपो बलदो वातपित्तनुत् पुंस्त्वकारकः ॥

सद्योहतस्य मांसम् ।

सद्योहतस्य मांसं स्यात् व्याधिघाति यथामृतम् ।
वयस्थं दृढगं साम्यमन्यथा तद्विवर्जयेत् ॥

स्वयंमृतस्य मांसम् ।

स्वयं मृतस्य चाबल्यमतीसारकरं गुरु ॥

वृद्धबालमांसम् ।

वृद्धानां दोषलं मांसं बालानां बलद लघु ॥

विषादिहतस्य मांसम् ।

सर्पदष्टस्य मांसञ्च शुष्कमांसं त्रिदोषजित् ।
व्यालदष्टञ्च दुष्टञ्च शुष्क शूलकर परम् ।
विषाम्बुकृष्णमृतस्यैतन्मृत्युदोषरुजाकरम् ।
क्लिन्नमुत्क्लेशजनकं क्लम वातप्रकोपनम् ।
तोयपूर्णगिराजाल मृतमप्सु त्रिदोषकृत् ॥
विहङ्गेषु पुमान् श्रेष्ठः स्त्रीचतुष्पदजातिषु ।
परार्द्धं लघु पुंसां स्यात् स्त्रीणां पूर्वार्द्धमादिशेत् ॥
देहमध्य गुरुप्रायं सर्वेषां प्राणिना स्मृतम् ।
पक्षदेपादिहङ्गानां तदेव लघु कथ्यते ॥
गुरुण्यङ्गानि सर्वेषां गुर्व्वी ग्रीवा च पक्षिणाम् ।

शर स्कन्धोदर कुक्षौ पादौ पाणी कटी तथा ॥
पृष्ठत्वग्यकृदन्त्राणि गुरूणीह यथोत्तरम् ।
लघुवातकरं मांसं खगानां धान्यचारिणाम् ॥
मत्स्याशिना पित्तकरं वातघ्नं गुरु कीर्त्तितम् ।
फलाशिनां श्लेष्मकरं लघु रूक्षमुदीरितम् ॥
हंसस्य गुरु वातघ्नं तेषामेव फलाशिनाम् ।
तृणजातिष्वल्पदेहा महादेहेषु पूजिताः ।
अल्पदेहेषु गण्यन्ते तथैव स्थूलदेहिनः ॥

मत्स्यवर्गः ।

रोहितः ।

रक्तोदरो रक्तमुखो रक्ताक्षो रक्तपत्रितः ।
कृष्णपृष्ठो ऋषभ्रेष्ठो रोहितः कथितो बुधैः ॥
रोहितः सर्वमत्स्यानां वरो हृद्योऽर्दितार्त्तिजित् ।
कषायानुरसः स्वादुर्वातघ्नो नातिपित्तकृत् ।
अर्हुजचुगतान्रोगान् हन्याद्रोहितमुण्डकम् ॥

शिलीन्ध्रः ।

शिलीन्ध्रः श्लेष्मलो बल्यो विपाके मधुरो गुरुः ।
वातपित्तहरो हृद्य आमवातकरश्च सः ॥

भङ्गूरमत्स्य ।

भङ्गूरो मधुरः शीतो हृद्यः श्लेष्मकरो गुरुः ।
विष्टम्भजनकश्चापि रक्तपित्तहरः स्मृतः ॥

मोचिका ।

मोचिका वातहृद्या हृद्या मधुरा गुरुः ।
पित्तहृत् कटुकटुका हृद्या दीप्ताग्नये हिता ॥

पाठीन: ।

पाठीन. श्लेष्मलो बल्यो निद्रालु: पिशितामय: ।
दूषयेद्रुधिरं पित्तकुष्ठरोगं करोति च ॥

शृङ्गी ।

शृङ्गी तु वातशमनो स्निग्धा श्लेष्मप्रकोपनी ।
रसे तिक्ता कषाया च लघ्वी रुच्या स्मृता बुधै ॥

इक्षिय: ।

इक्षियो मधुर' स्निग्धो रोचनो बलवर्द्धन: ।
कफपित्तकरो हृद्यो दुर्जरस्त्वनिलापह: ॥

शष्कुली ।

शष्कुली ग्राहिणी हृद्या मधुरा तुवरा स्मृता ॥

गर्गर: ।

वर्गर: पित्तल. किञ्चिद्वातजित् कफकोपन: ॥

कविका ।

कविका मधुरा स्निग्धा कफघ्ना रुचिकारिणी ।
किञ्चित् पित्तकरो वातनाशिनो वह्निवर्द्धनी ॥

वर्म्मिमत्स्य. ।

वर्म्मिमत्स्यो हरेद्वात पित्त रुचिकरो लघु: ॥

दण्डमत्स्य' ;

दण्डमत्स्यो रसे तिक्त: पित्तरक्त' कफ हरेत् ।
वातसाधारण. प्रोक्त: शुक्रलो बलवर्द्धन: ॥

एरङ्ग: ।

एरङ्गो मधुर: स्निग्धो विष्टम्भी शीतलो लघु: ॥

महाशफरी ।

महाशफरसंज्ञस्तु तिक्तः पित्तकफापहः ।
शिशिरो मधुरो रुच्यो वातमाधारणः स्मृतः ॥

गरघ्नी ।

गरघ्नी मधुरा तिक्ता तुवरा वातपित्तहृत् ।
कफघ्नी रुचिकृल्लघ्वी दीपनी बलवीर्यकृत् ॥

मद्गुरः ।

मद्गुरो वातहृद्बल्यो हृद्यः कफकरो लघुः ॥

सपादमत्स्यः ।

सपादमत्स्यो मेधाकृन्मेदश्चयकरश्च सः ।
वातपित्तकरश्चापि रुचिकृत् परमो मतः ॥

सफरी ।

प्रोष्ठी तिक्ता कटुः स्वादुः शुक्रघ्नी कफवातजित् ।
स्निग्धास्यकण्ठरोगघ्नी रोचनी च लघुः स्मृतः ॥

क्षुद्रमत्स्याः ।

क्षुद्रा मत्स्याः स्वादुरसा दोषत्रयविनाशनाः ।
लघुपाका रुचिकरा बलदास्ते हिता मताः ॥

अतिक्षुद्रमत्स्याः ।

अतिसूक्ष्माः पुंस्त्वहरा रुच्याः कासानिलापहाः ॥

मत्स्याण्डः ।

मत्स्यगर्भो भृशं हृद्यः स्निग्धः पुष्टिकरो लघुः ।
कफमेदःप्रदो बल्यो ग्लानिक्लमे हनाशनः ॥

शुष्कमत्स्याः ।

शुष्कमत्स्या हिता न स्युर्दुर्जरा विड्विबन्धिनः ॥

दुग्धमत्स्य ।

दुग्धमत्स्यो गुणै श्रेष्ठ पुष्टिकृद्बलवर्द्धन ॥

कूपजादिमत्स्यगुणाः ।

कूपमत्स्या शुक्रमूत्रकृच्छ्रश्लेष्मविवर्द्धनाः ।
सरोजा मधुरा स्निग्धा बल्या वातविनाशनाः ॥
नादेया हृद्या मत्स्या गुरवोऽनिलनाशनाः ।
रक्तपित्तकरा हृद्याः स्निग्धोष्णा रूक्षवर्द्धनाः ॥
चौद्या पित्तकरा स्निग्धा मधुरा लघवो हिमाः ।
तडागा गुरवो हृद्याः शीतला बलमूत्रदाः ॥
तडागवन्निर्झरजा बलायुर्मतिदृक्कराः ॥

ऋतुविशेषे मत्स्यविशेष ।

हैमन्ते कूपजा मत्स्या गिरिरे सारसा हिताः ।
वसन्ते तु नादेया ग्रीष्मे चौद्यसमुद्भवाः ॥
तडागजाता वर्षासु तास्वपथ्या नदीभवाः ।
मैझराः शरदि श्रेष्ठा विशेषोऽयमुदाहृतः ॥

जनचिंशोऽध्यायः ।

दुग्धवर्गः ।

दुग्धं क्षीरं पयः स्तन्यं बालजीवनमित्यपि ।
दुग्धं सुमधुरं स्निग्धं वातपित्तहरं सरम् ॥
सद्यः शुक्रकरं शीतं साम्लं सर्वशरीरिणाम् ।

जीवनं बृंहणं वल्यं मेध्यं वाजिकरं परम् ॥
वयःस्थापनमायुष्यं सन्धिकारि रसायनम् ।
विरेकवान्तिवस्तीनां तुल्यमोजोविवर्द्धनम् ॥
जीर्णज्वरे मनोरोगे दोषमूर्च्छाभ्रमेषु च ।
ग्रहण्यां पाण्डुरोगे च दाहे तृषि हृदामये ॥
शूलोदावर्त्तरोगेषु वस्तिरोगे गुदाङ्कुरे ।
रक्तपित्तेऽतिसारे च योनिरोगे श्रमे क्लमे ।
गर्भस्रावे च सततं हितं मुनिवरैः स्मृतम् ॥
बालवृद्धक्षतक्षीणाः क्षुद्व्यायामकृशाश्च ये ।
तेभ्यः सदातिशयित हितमेतदुदाहृतम् ॥

गोदुग्धस्य गुणाः ।

गव्यं दुग्धं विशेषेण मधुरं रसपाकयोः ।
शीतलं स्नेह्यकृत् स्निग्धं वातपित्तास्रनाशनम् ॥
दोषधातुमलस्रोतः किञ्चित् क्लेदकरं गुरु ।
जरासमस्तरोगाणां शान्तिकृत् सेविनां सदा ॥

वर्णविशेषेण गुणविशेषाः ।

कृष्णाया गोर्भवेद्दुग्धं वातहारि गुणाधिकम् ।
पीताया हरते पित्तं तथा वातहरं भवेत् ।
श्लेष्मलं गुरु शुक्लाया रक्तपित्तास्रवातहृत् ॥

धेनोर्बालवत्साया विवत्सायाश्च गुणाः ।

बालवत्साविवत्सानां गवां दुग्धं त्रिदोषकृत् ॥

वस्कयिनी ।

वस्कयिन्यास्त्रिदोषघ्नं तर्पणं बलकृत् पयः ॥

देशविशेषचरणाद्गुणविशेषः ।

जङ्गलानूपगेषु चरन्तीनां यथोत्तरम् ।
पयो गुरुतरं स्नेहो यथाहारं प्रवर्त्तते ॥
आहारविशेषेण गुणविशेषः ।

स्वल्पान्नभक्षणाज्जातं क्षीरं गुरु कफप्रदम् ।
तत्तु बल्यं परं वृष्यं स्वस्थानां गुणदायकम् ।
पलाण्डुलशुनकार्पासबीजजातं गुणैर्हितम् ॥
महिषीदुग्धम् ।

माहिषं मधुरं गव्यात् स्निग्धं शुक्रकरं गुरु ।
निद्राकरमभिष्यन्दि क्षुधाधिक्यकरं हिमम् ॥
छागीदुग्धम् ।

छागं कषायं मधुरं शीतं ग्राहि तथा लघु ।
रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम् ॥
अजानामल्पकायत्वात् कटुतिक्तनिषेवणात् ।
स्तोकाम्बुपानाद्व्यायामात् सर्वरोगापहं पयः ॥
मृगीदुग्धम् ।

मृगीणां जङ्गलोत्थानामजाक्षीरगुणं पयः ॥
मेषीदुग्धम् ।

आविकं लवणं स्वादु स्निग्धोष्णञ्चाश्मरीप्रणुत् ।
अहृद्यं तर्पणं वृष्यं शुक्रपित्तकफप्रदम् ।
गुरु कासेऽनिलोद्भूते केवले चानिले वरम् ॥
घोटकीदुग्धम् ।

रूक्षोष्णं वडवाक्षीरं बल्यं श्लेष्मानिलापहम् ।
अम्लं पटु लघु स्वादु सर्वमेकशफं तथा ॥

उष्ट्रीदुग्धम् ।

औष्ट्रं दुग्धं लघु स्वादु लवणं दीपनं तथा ।
क्रिमिकुष्ठकफानाहगुल्मोदरहरं सरम् ॥

हस्तिनीदुग्धम् ।

हैंहणं हस्तिनीदुग्धं मधुरं तुवरं गुरु ।
हृद्यं बल्यं हिमं स्निग्धं चक्षुष्यं स्थिरकारकम् ॥

नारीदुग्धम् ।

नार्य्या लघु पयः शीतं दीपनं वातपित्तजित् ।
चक्षुःशूलाभिघातघ्नं नस्याद्योतनयोर्वरम् ॥

धारोष्णादिदुग्धगुणाः ।

धारोष्णं गोपयो बल्यं लघु शीतं सुधासमम् ।
दीपनञ्च त्रिदोषघ्नं तद्वाग्निग्निरं त्यजेत् ॥
धारोष्णं ग्रस्यते गव्यं धारायीतन्तु माहिषम् ।
मृतोष्णमाविकं पथ्यं मृतशीतमजापयः ॥
आम क्षीरमभिष्यन्दि गुरु श्लेष्मामवर्द्धनम् ।
त्रेयं सर्वमपथ्यन्तु गव्यमाहिषवर्ज्जितम् ॥
नारीक्षीरं त्वाममेव हितं नतु मृतं हितम् ।
मृतोष्णं कफवातघ्नं मृतं शीतन्तु पित्तनुत् ॥
अर्द्धोदकं क्षीरशिष्टमामाल्पतरं पयः ।
जलेन रहित दुग्धमतिपक्वं यथा यथा ।
तथा तथा गुरु स्निग्धं हृद्यं बलविवर्द्धनम् ॥

पेयूषकिलाटक्षीरयाकृतक्रूपिण्ड-
मोरटानां लक्षणानि गुणाश्च ।

क्षीरं तत्कालसूताया घनं पेयूषमुच्यते ।

नष्टदुग्धस्य पक्वस्य पिण्डः प्रोक्तः किलाटकः ॥
अपक्वमेव यन्नष्टं चीरशाकं हि तत् पयः ।
दध्ना तक्रेण वा नष्टं दुग्धं बन्धं सुवाससा ॥
द्रवभागेन रहितं तक्रपिण्डः स उच्यते ।
नष्टदुग्धभवन्नीरं मोरटश्चेज्जडोऽब्रवीत् ॥
पेयूषश्च किलाटश्च चीरशाकं तथैव च ।
तक्रपिण्ड इमे हृद्या हृद्या बलवर्धनाः ॥
गुरवः श्लेष्मला हृद्या वातपित्तविनाशनाः ।
दीप्ताग्नीनां विनिद्राणां विद्रधौ चाभिपूजिताः ॥
सुखशोषलघादाहरक्तपित्तज्वरप्रणुत् ।
लघुर्बलकरो रुच्यो मोरटः स्यात्सितायुतः ॥

सन्तानिका ।

सन्तानिका गुरुः शीता हृद्या पित्तास्रवातनुत् ।
तर्पणी हृंहणी स्निग्धधा बलासबलशुक्रला ॥

खण्डादियुक्तदुग्धगुणाः ।

खण्डेन सहितं दुग्धं कफकृत् पवनापहम् ।
सिता सितोपलायुक्तं शुक्रलं श्लेष्मलापहम् ॥
गुडं मूत्रकृच्छ्रघ्नं पित्तश्लेष्मकरं परम् ॥

प्रभातादिभवं दुग्धम् ।

रात्रौ चन्द्रगुणाधिक्याद्दायामाकरणात्तथा ।
प्राभातिकं तदा प्रायः प्रादोषाद्गुरु शीतलम् ॥
दिवाकरकराघातात् व्यायामानलसेवनात् ।
प्राभातिकात्तु प्रादोषं लघु वातकफापहम् ॥

दुग्धसेवनसमयविशेषेण गुणमाह ।

हृद्यं हृंहणमग्निदीपनकरं पूर्वाह्णकाले पयो
मध्याह्ने तु बलावहं कफहरं पित्तापहं दीपनम् ।
बाले हृद्धिकरं च्यवच्यवकरं हृद्येषु रेतोवहं
रात्रौ पथ्यमनेकदोषशमनं क्षीरं सदा सैव्यते ॥

वदन्ति पेयं निशि केवलं पयो
भोज्यं न तेनेह सहौदनादिकम् ।
भवत्यजीर्णं न भयं तथा सर्वथा
क्षीरस्य पीतस्य न शेषमुत्सृजेत् ॥

विदाह्यन्नपानानि दिवा भुङ्क्ते हि यन्नरः ।
तद्विदाहप्रशान्त्यर्थं रात्रौ क्षीरं सदा पिबेत् ॥
दोषानले क्षये पुंसि बाले वृद्धे पथःप्रिये ।
मतं हिततमं पथ्यं सद्यः शुक्रकरं यतः ॥

मथितस्य दुग्धस्य गुणाः ।

क्षीरगव्यमथाजं वा कोष्णं दण्डाहतं पिबेत् ।
लघु हृद्यं ज्वरहरं वातपित्तकफापहम् ॥

दुग्धफेनगुणाः ।

गोदुग्धप्रभवं किंवा छागीदुग्धसमुद्भवम् ।
भवेत् फेनं विदोषघ्नं रोचनं बलवर्धनम् ॥
बस्तिहृद्धिकरं हृद्यं सद्यस्तृप्तिकरं लघु ।
अतीसारेऽग्निमान्द्ये च ज्वरे जीर्णे प्रशस्यते ॥

निन्दितं दुग्धम् ।

विवर्णं विरसं चास्रं दुर्गन्धं ग्रथितं पयः ।
वर्ज्ययेदम्लवर्णयुक्तं बुद्धा दिहृद्यतः ॥

त्रिंशोऽध्यायः ।

अथ दधिवर्गः ।

दध्नो गुणाः ।

दध्युष्णं दीपनं स्निग्धं कषायानुरसं गुरु ।
पाकेऽम्लं श्वासपित्तास्रयोथमेदःकफप्रदम् ॥
मूत्रकृच्छ्रे प्रतिश्याये शीतगे विषमे ज्वरे ।
अतिसारेऽरुचौ कार्श्ये शस्यते बलशुक्रकृत् ॥

दधिभेदाः ।

आदौ मन्दं ततः स्वादु स्वाद्वम्लं च ततः परम् ।
अम्लं चतुर्थमत्यम्लं पञ्चमं दधि पञ्चधा ॥

मन्दादीनां लक्षणानि गुणाश्च ।

मन्दं दुग्धवदव्यक्तरसं किञ्चिद्घनं भवेत् ।
मन्दं स्यात् सृष्टविण्मूत्रं दोषत्रयविदाहकृत् ॥
यत्सम्यग् घनतां यातं व्यक्तस्वादुरसं भवेत् ।
अव्यक्ताम्लरसं तत्तु स्वादु त्रिदोषनुदाहृतम् ॥
स्वादु स्वादत्वभिष्यन्दि हृद्यं मेदःकफावहम् ।
वातघ्नं मधुरं पाके रक्तपित्तप्रसादनम् ॥
स्वाद्वम्लं सान्द्रमधुरं कषायानुरसं भवेत् ।
स्वाद्वम्लस्य गुणा ज्ञेयाः सामान्यदधिवर्जनैः ॥
यत्तिरोहितमाधुर्यं व्यक्ताम्लत्वं तदम्लकम् ।
अम्लन्तु दीपनं पित्तरक्तश्लेष्मविवर्धनम् ॥

तदत्यम्लं दन्तरोमहर्षकण्ठादिदाहकृत्।
अत्यम्लं दीपनं रक्तवातपित्तकरं परम्॥

गोदधिगुणाः।

गव्यं दधि विशेषेण स्वादम्लञ्च रुचिप्रदम्।
पवित्रं दीपनं हृद्यं पुष्टिकृत् पवनापहम्।
उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम्॥

माहिषदधिगुणाः।

माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तजित्।
स्वादुपाकमभिष्यन्दि हृद्यं गुर्वम्लदूषकम्॥

छागोदधि।

आजं दध्युत्तमं ग्राहि लघु दोषत्रयापहम्।
अस्रते श्वासकासार्शःक्षयकार्श्येषु दीपनम्॥

पक्वदुग्धदधि।

पक्वदुग्धभवं रुच्यं दधिस्निग्धं गुणोत्तमम्।
पित्तानिलापहं सर्वधात्वग्निबलवर्द्धनम्॥

निःसरदुग्धदधि।

असारं दधि संग्राहि शीतलं वातलं लघु।
विष्टम्भि दीपनं रुच्यं ग्रहणीरोगनाशनम्॥

मालितदधि।

गालितं दधि सुस्निग्धं वातघ्नं कफकृन्नृप।
बलपुष्टिकरं रुच्यं मधुरं नातिपित्तकृत्॥

शर्करादिसहितदधि।

सशर्करं दधि श्रेष्ठं तृष्णापित्तास्रदाहजित्।
सगुड़ं वातनुद्धृद्यं बृंहणं तर्पणं गुरु॥

रात्रौ दधिभोजननिषेध ।

न नक्तं दधि भुञ्जीत न चाप्यघृतशर्करम् ।
नामुद्गयूषं नाचौद्रं नोष्णमामलकैर्विना ॥

तथा च । शस्यते दधिनो रात्रौ शस्तशाम्बुघृतान्वितम् ।
रक्तपित्तकफोत्थेषु विकारेषु तु नैव तत् ॥

ऋतुविशेषेण विधिनिषेधौ ।

हेमन्ते शिशिरे चापि वर्षासु दधि शस्यते ।
शरद्ग्रीष्मवसन्तेषु प्रायशस्तद्विगर्हितम् ॥

अविधिना दधिसेवने दोषमाह ।

ज्वरासृक्पित्तवीसर्पकुष्ठपाण्वामयभ्रमान् ।
प्राप्नुयात् कामलाशोथौ विधिं हित्वा दधिप्रियः ॥

सरमस्तु ।

दध्नस्तूपरि यो भागो घनः स्नेहसमन्वितः ।
स लोके सर इत्युक्तो दध्नो मण्डस्तु मस्विति ॥

सरः स्वादुर्गुरुर्बल्यो वातवह्निप्रणाशनः ।
स्नेह्यो वस्तिप्रशमनः पित्तश्लेष्मविवर्धनः ॥

मस्तु क्लमहरं बल्यं लघु भक्ताभिलाषकृत् ।
स्रोतोविशोधनं स्निग्धं कफहृन्निलयापहम् ।
अत्यर्थं प्रीणनं शीघ्रं भिनत्ति मलसञ्चयम् ॥

एकविंशोऽध्यायः ।

अथ तक्रवर्गः ।

तक्रम् ।

घोलन्तु मथितं तक्रमुदश्वित्छच्छिकापि च ।
ससरं निर्जलं घोलं मथितं त्वसरोदकम् ॥
तक्रं पादजलं प्रोक्तमुदश्वित् त्वर्धवारिकम् ।
छच्छिका सारहीना स्यात् स्वच्छा प्रचुरवारिका ॥
घोलन्तु शर्करायुक्तं गुणैर्न्यूनं रसालवत् ।
वातपित्तहरं ह्लादि मथितं कफपित्तनुत् ॥
तक्रं त्वाहि कषायाम्लं स्वादुपाकरसं लघु ।
वीर्योष्णं दीपनं हृद्यं प्रीणनं वातनाशनम् ॥
ग्रहण्यादिमतां पथ्यं भवेत् सग्राहि लाघवात् ।
किञ्च स्वादु विपाकित्वान्न च पित्तप्रकोपनम् ।
कषायोष्णविपाकित्वाद्दोषाचापि कफापहम् ॥

न तक्रसेवी व्यथते कदाचित्
न तक्रदग्धाः प्रभवन्ति रोगाः ।
यथा सुराणाम् अमृतं सुखाय
तथा नराणां भुवि तक्रमाहुः ॥

उदश्वित् कफकृदल्पमारुतं परमं मतम् ।
छच्छिका शीतला लघ्वी पित्तश्रमतृषाहरी ॥
वातनुत् कफकृत् सा तु दीपनी लवणान्विता ।

समुद्धृतं घृतं तक्रं पथ्यं लघु विशेषतः ॥
स्तोकोद्धृतघृतं तस्माद्गुरु ह्रस्वं कफावहम् ।
अनुद्धृतघृतं साम्ल गुरु पुष्टिकफप्रदम् ॥
वातेऽम्लं भस्यते तक्रं शुण्ठीसैन्धवसंयुतम् ।
पित्ते खादु सितायुक्तं सव्योषमधिके कफे ॥
हिङ्गुजीरयुतं घोलं सैन्धवेन च संयुतम् ।
तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च ॥
पीनसश्वासकासादौ पक्वमेव प्रयुज्यते ।
भवेदतीववातघ्नमग्नौ तीक्ष्णं परम् ॥
रुचिदं पुष्टिदं बल्यं वस्तिशूलविनाशनम् ।
मूत्रकृच्छ्रे तु सगुडं पाण्डुरोगे सचित्रकम् ॥

तक्रसेवनविधिः ।

शीतकालेऽग्निमान्द्ये च तथा वातामयेषु च ।
अरुचौ स्रोतसां रोधे तक्रं स्यादमृतोपमम् ॥
तत्तु हन्ति गरच्छर्दिप्रसेकविषमज्वरान् ।
पाण्डुमेदोग्रहण्यर्शोमूत्रग्रहभगन्दरान् ॥
मेहगुल्ममतीसारं शूलप्लीहोदरारुचीः ।
क्षिप्रकोठगतव्याधीन् कुष्ठशोथक्रिमीन् ॥
नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्बले ।
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपित्तजे ॥
शरदुक्तानि दध्नोऽष्टौ तद्गुणं तक्रमादिशेत् ॥

द्वाविंशोऽध्यायः ।

नवनीतवर्गः ।

नवनीतम् ।

स्निग्धं सरजं वैयङ्गवीनं नवनीतकम् ॥
नवनीतं हितं गव्यं हृद्यं वर्ण्यबलाग्निकृत् ।
संग्राहि वातपित्तास्रकृच्छ्रयाम्योऽर्दितकासहृत् ।
तद्धितं बालके वृद्धे विशेषादमृतं त्रिशोः ॥

महिषनवनीतकम् ।

नवनीतं महिष्यास्तु वातश्लेष्मकरं गुरु ।
दाहपित्तश्रमहरं मेदःशुक्रविवर्धनम् ॥

अयसो नवनीतकम् ।

दुग्धोत्थं नवनीतं तु चक्षुष्यं रक्तपित्तनुत् ।
हृद्यं बल्यमतिस्निग्धं मधुरं ग्राहि शीतलम् ॥

सद्यःसमुद्धृतनवनीतम् ।

नवनीतन्तु सद्यस्कं स्वादु ग्राहि हिमं लघु ।
मेध्यं किञ्चित्कषायास्रमीषत्तक्रांशसक्रमात् ॥

चिरन्तननवनीतम् ।

सञ्चारकटुकास्रत्वाच्छर्दीर्शःकुष्ठकारकम् ।
श्लेष्मलं गुरु मेदस्यं नवनीतं चिरन्तनम् ॥

त्रयस्त्रिंशोऽध्यायः ।

घृतवर्गः ।

घृतम् ।

घृतमाज्यं हविः सर्पिः कथ्यन्ते तद्गुणा अथ ॥
घृतं रसायनं स्वादु चक्षुष्यं वह्निदीपनम् ।
शीतवीर्यं विषालक्ष्मीपापपित्तानिलापहम् ॥
अल्पाभिष्यन्दि कान्त्योजःस्मृतिमेधाबलायुषाम् ।
स्वरसृतिकरं मेध्यमायुष्यं बलकृद्गुरु ॥
उदावर्त्तज्वरोन्मादशूलानाहव्रणान् हरेत् ।
स्निग्धं कफकरं रूक्षं क्षयवीसर्परक्तनुत् ॥

गव्यघृतम् ।

गव्यं घृतं विशेषेण चक्षुष्यं वृष्यमग्निकृत् ।
स्वादुपाकरसं शीतं वातपित्तकफापहम् ॥
मेधालावण्यकान्त्योजस्स्मृतिबुद्धिकरं परम् ।
अलक्ष्मीपापरक्षोघ्नं वयसः स्थापकं गुरु ॥
बल्यं पवित्रमायुष्यं सुमङ्गल्यं रसायनम् ।
सुगन्धं रोचनं चारु सर्वाज्येषु गुणाधिकम् ॥

माहिषघृतम् ।

माहिषन्तु घृतं स्वादु पित्तरक्तानिलापहम् ।
शीतलं श्लेष्मलं वृष्यं गुरु स्वादु विपच्यते ॥

छागीघृतम् ।

आजमाज्यं करीत्यग्निं चक्षुष्यं बलवर्द्धनम् ।

कासे श्वासे क्षये चापि हितं पाके भवेत्कटुः ॥

उष्ट्रीघृतम् ।

औष्ट्रं कटु घृतं पाके शोषकृमिविषापहम् ।
दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम् ॥

आविकघृतम् ।

पाके लघ्वाविकं सर्पिः सर्वरोगविनाशनम् ।
हृद्यं करोति चाग्नेयीनामश्मरीशर्करापहम् ।
चक्षुष्यमग्निध्रुषणं वातदोषनिवारणम् ॥

नारीघृतम् ।

कफेऽनिले योनिदोषे पित्ते रक्ते च तद्धितम् ।
चक्षुष्यमाज्यं स्त्रीणां वा सर्पिः स्यादमृतोपमम् ॥

अश्वीघृतम् ।

हृद्यं करोति देहाग्नेर्लघु पाके विषापहम् ।
तर्पणं नेत्ररोगघ्नं दाहनुद्दृढ्वाघृतम् ॥

दुग्धघृतम् ।

घृतं दुग्धभवं ग्राहि शीतलं नेत्ररोगहृत् ।
निहन्ति पित्तदाहास्रमदमूर्च्छाभ्रमानिलान् ॥

छागलदधिजघृतम् ।

हविच्छागलदुग्धोत्थं तत् स्याद्वैयङ्गवीनकम् ॥
वैयङ्गवीनं चक्षुष्यं दीपनं रुचिकृत् सरम् ।
बलकृद्दृद्यं हृष्यं विशेषाज्ज्वरनाशनम् ॥

पुराणघृतम् ।

वर्षादूर्ध्वं भवेदाज्यं पुराणं तद्विदोषनुत् ।
मूर्च्छाकुष्ठविषोन्मादापस्मारतिमिरापहम् ॥

यथा यथाऽखिलं सर्पिः पुराणमधिकं भवेत् ।
तथा तथा गुणैः खैरधिकं तदुदाहृतम् ॥
नूतनघृतस्य विषयाः ।
योजयेन्नवमेवाज्यं भोजने तर्पणे शमे ।
बलक्षये पाण्डुरोगे कामलानेत्ररोगयोः ॥
घृतप्रयोगस्य विषयाः ।
राजयक्ष्मणि बाले च वृद्धे क्षीणक्षते गदे ।
रोगे सामे विसूच्याञ्च विबन्धे च मदात्यये ।
ज्वरे च दृढने मन्दे न सर्पिर्बहु मन्यते ॥

चतुस्त्रिंशोऽध्यायः ।

अथेक्षुवर्गः ।
इक्षुः ।
इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूमिरसोऽपि च ।
गुडमूलोऽसिपत्रश्च तथा मधुरसः स्मृतः ॥
इक्षवो रक्तपित्तघ्ना बल्या वृष्या कफप्रदा ।
स्वादुपाकरसाः स्निग्धा गुरवो मूत्रला हिमाः ॥
इक्षुभेदाः ।
पौण्ड्रको भीरुकश्चापि वंशकः शतपोरकः ।
कान्तारस्तापसेक्षुश्च काण्डेक्षुः सूचिपत्रकः ॥

नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकः ।
इत्येता जातयस्तेषां कथयामि गुणानपि ॥

पौण्ड्रको भीरुकश्च ।

वातपित्तप्रशमनो मधुरो रसपाकयोः ।
सुशीतो हृंहणो बल्यः पौण्ड्रको भीरुकस्तथा ॥

कोशकारः ।

कोशकारो गुरुः शीतो रक्तपित्तक्षयापहः ॥

कान्तारः ॥

कान्तारेक्षुर्गुरुर्हृद्यः श्लेष्मलो हृंहणः सरः ॥

दीर्घपोरो वंशकश्च ।

दीर्घपोरः सुकठिनः सचारो वंशकः स्मृतः ॥

शतपोरः ।

शतपर्वा भवेत् किञ्चित् कोशकारगुणान्वितः ।
विशेषात् किञ्चिदुष्णश्च सचारः पवनापहः ॥

तापसेक्षुः ।

तापसेक्षुर्भवेन्मृद्वी मधुरा श्लेष्मकोपनी ।
तर्पणी रुचिकृच्चापि हृद्या च बलकारिणी ॥

काण्डेक्षुः ।

एवंगुणैस्तु काण्डेक्षुः स तु वातप्रकोपनः ॥

सूचीपत्रनैपालदीर्घपत्रनील-
पोरकाणां गुणाः ।

सूचीपत्रो नीलपोरो नैपालो दीर्घपत्रकः ।
वातला कफपित्तघ्ना कषाया च विदाहिनः ॥

मनोगुप्ता ।

मनोगुप्ता वातहरी तृष्णामयविनाशिनी ।
सुपीता मधुरातीव रक्तपित्तप्रणाशिनी ॥

बालयुवावृद्धेक्षुगुणाः ।

बाल इक्षुः कफं कुर्य्यान्मेदोमेहकरस्स सः ।
युवा तु वातहृत् स्वादुरोषत्तीक्ष्णश्च पित्तनुत् ।
रक्तपित्तहरो वृद्धः क्षतक्षयबलवीर्य्यकृत् ॥

अङ्गभेदेन भेदः ।

मूले तु मधुरोऽत्यर्थं मध्येऽपि मधुरः स्मृतः ।
अग्रे ग्रन्थिषु विज्ञेय इक्षुः षट्‌रसो जनैः ॥

दन्तपीड़ितेक्षुरसस्य गुणाः ।

दन्तनिष्पीडितस्येक्षो रसः पित्तास्रनाशनः ।
शर्करासमवीर्य्यः स्यादविदाही कफप्रदः ॥

यन्त्रनिष्पीड़ितेक्षुरसस्य गुणाः ।

मूलाग्रजन्तुग्रन्थ्यादिपीड़नान्मलसङ्करात् ।
किञ्चित् कालं विधृत्या च विकृतिं याति यान्त्रिकः
तस्माद्विदाही विष्टम्भी गुरुः स्याद्यान्त्रिको रसः ॥

पर्य्युषितेक्षुरसस्य गुणाः ।

रसः पर्य्युषितो नेष्टो ह्यम्लो वातापहो गुरुः ।
कफपित्तकरः शोषी भेदनश्चातिमूत्रलः ॥

पक्वस्येक्षुरसस्य गुणाः ।

पक्वो रसो गुरुः स्निग्धः सुतीक्ष्णः कफवातनुत् ।
गुल्मानाहप्रशमनः किञ्चित् पित्तकरः स्मृतः ॥

इक्षुरसस्य विकाराणां गुणाः ।

इक्षोर्विकारास्तृड्दाहमूर्च्छापित्तास्रनाशनाः ।
गुरवो मधुरा बल्या स्निग्धा वातहरा सराः ।
हृद्या मोहहराः शीता हृंहणा विषहारिणः ॥

फाणितः ।

इक्षो रसस्तु यः पक्वः किञ्चिद्गाढो बहुद्रवः ।
स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया ॥
फाणितं गुर्वभिष्यन्दि हृंहणं कफशुक्रकृत् ।
वातपित्तश्रमान् हन्ति मूत्रवस्तिविशोधनम् ॥

मत्स्यण्डी ।

इक्षो रसो यः सम्यक्को घनः किञ्चिद्द्रवान्वितः ।
मन्दं यत् स्यन्दते तस्मात् स मत्स्यण्डो निगद्यते ॥
मत्स्यण्डो मेदिनी बल्या लघुः पित्तानिलापहा ।
मधुरा हृंहणी हृद्या रक्तदोषापहा स्मृता ॥

गुड ।

इक्षो रसो यः सम्यक्को जायते लोष्टवद्दृढः ।
स गुडो गौडदेशे तु मत्स्यण्डीव गुडो मतः ॥
गुडो हृद्यो गुरुः स्निग्धो वातघ्नो मूत्रशोधनः ।
नातिपित्तहरो मेदःकफकृिमिबलप्रदः ॥

पुरातनो गुडः ।

गुडो जीर्णो लघुः पथ्योऽनभिष्यन्द्यपि पुष्टिकृत् ।
पित्तघ्नो मधुरो हृद्यो वातघ्नोऽसृक्प्रसादनः ॥

नवीनो गुडः ।

गुडो नवः कफश्यामकृिमिकारीक्षिलक्षच सः ॥

श्लेष्माणमाशु विनिहन्ति सदार्द्रकेण
पित्तं निहन्ति च तदेव हरीतकीभिः ।
शुण्ठ्या समं हरति वातमशेषमित्थं
दोषत्रयघ्नकराय नमो गुड़ाय ॥

खण्डम् ।

खण्डन्तु मधुरं हृद्यं चक्षुष्यं दृंहणं हिमम् ।
वातपित्तहरं स्निग्धं बल्यं वान्तिहरं परम् ॥

सिता ।

खण्डन्तु सिकतारूपं सुखेत शर्करा सिता ।
सिता सुमधुरा रुच्या वातपित्तास्रदाहहृत ।
मूर्च्छाच्छर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी ॥

सितात्रयम् ।

भवेत् पुष्पसिता शीता रक्तपित्तहरी लघुः ।
सितोपमा सरा लघ्वी वातपित्तहरी हिमा ॥

मधुशर्करा ।

मधुजा शर्करा रूक्षा कफपित्तहरी गुरु. ।
छर्दितीसारतृड्दाहरक्तहृत्तुवरा हिमा ॥
यदा यथेषा नैश्चल्य मधुरत्व तथा तथा ।
स्नेहलाघवशैत्यादि सरत्वञ्च तथा तथा ॥

———

पञ्चत्रिंशोऽध्यायः ।

अथ मधुवर्गः ।

मधु ।

मधु माक्षीकमाध्वीकं क्षौद्र सारघमौरितम् ।
माक्षिका वरटीभृङ्ग वान्तं पुष्परसोद्भवम् ॥
मधु शीतं लघु स्वादु रूक्षं ग्राहि विलेखनम् ।
चक्षुष्यं दीपनं स्वर्य्य व्रणशोधनरोपणम् ॥
मौक्षमार्ध्यकरं सूक्ष्मं परं स्रोतोविशोधनम् ।
कषायानुरसं क्षारि प्रसादजनकं परम् ॥
बल्यं मेधाकरं वृष्यं विशद दीपनं हरेत् ।
कुष्ठार्शःकासपित्तास्रकफमेहकृमक्लिमोन् ॥
मेदस्तृष्णावमिश्वासहिक्कातीसारविड्ग्रहान् ।
दाहक्षतक्षयांस्तत् तु योगवाह्यल्यवातलम् ॥

मधुभेदाः ।

माक्षिक भ्रामर क्षौद्रं पौत्तिकं छात्रमित्यपि ।
आर्घ्यमौद्दालक दालमित्यष्टौ मधुजातयः ॥

माक्षिकम् ।

माक्षिकाः पिङ्गवर्णास्तु महतो मधुमक्षिकाः ।
ताभिः कृतं तैलवर्णं माक्षिक परिकीर्त्तितम् ॥
माक्षिकं मधुषु श्रेष्ठं नेत्रामयहरं लघु ।
कामलार्शःक्षतश्वासकासक्षयविनाशनम् ॥

भ्रामरम् ।

किञ्चित्सूक्ष्मैः प्रसिद्धेभ्यः षट्पदेभ्योऽलिभिश्चितम् ।
निर्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम् ॥
भ्रामरं रक्तपित्तघ्नं मूत्रजाड्यकरं गुरु ।
स्वादुपाकमभिष्यन्दि विशेषात् पिच्छिलं हिमम् ॥

क्षौद्रम् ।

मक्षिका' कपिला' सूक्ष्माः क्षुद्राख्यास्तत्कृतं मधु ।
मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात् कपिलं भवेत् ॥
गुणैर्माक्षिकवत् क्षौद्रं विशेषान्मेहनाशनम् ॥

पौत्तिकम् ।

कृष्णा वा मशकोपमा लघुतरा प्रायो महापौड़िका
वल्लानास्तरुकोटरान्तरगता' पुष्पासव कुर्वते ।
तास्तज्जैरिह पौत्तिका निगदितास्ताभि' कृतं मर्षिका
तुल्य यत् मधु तद्वनेचरजनैः सकीर्त्तितं पौत्तिकम् ॥
पौत्तिकं लघु रूक्षोष्ण पित्तदाहास्रवातकृत् ।
विद्याद्धि मेहकृच्छ्रघ्नं ग्रन्थ्याक्षिक्षतशोषि च ॥

छात्रम् ।

बरटा' कपिलाः पीता' प्रायो हिमवतो वने ।
कुर्वन्ति छत्रकाकार तज्ज्ञैः छात्रं मधु स्मृतम् ॥
छात्रं कपिलपीत स्यात्पिच्छिल शीतल गुरु ।
स्वादुपाक क्रिमिहरं रक्तपित्तप्रमेहजित् ।
भ्रमतृण्मोहविषहृत् तर्पणञ्च गुणाधिकम् ॥

आर्घ्यम् ।

मधूकद्रुनिर्य्यासं जरत्कार्वोश्रमोद्भवम् ।

स्रवन्त्यार्द्रन्तदा ख्यातं खेतकं मालवे पुनः ॥
तीक्ष्णतुण्डास्तु या पीताः मक्षिकाः षट्पदोपमाः ।
आर्घ्यास्तास्तत्कृतं यदार्घ्यमित्यपरे जगुः ॥
आर्घ्यं मधुत्रितुष्यं कफपित्तहरं परम् ।
कषायं कटुकं पाके तिक्तञ्च बलपुष्टिकृत् ॥

औद्दालकम् ।

प्रायोवल्मीकमध्यस्थाः कपिलाः स्वल्पवीटकाः ।
कुर्वन्ति कपिलं स्वल्पं तत् स्यादौद्दालकं मधु ॥
औद्दालकं रुचिकरं स्वर्य्यं कुष्ठविषापहम् ।
कषायमुष्णमम्लञ्च कटुपाकञ्च पित्तकृत् ॥

दालम् ।

संस्तृत्य पतितं पुष्पाद्यत्तु पत्रोपरिस्थितम् ।
मधुराम्लकषायञ्च तद्दालं मधु कीर्त्तितम् ॥
दालं मधु लघु प्रोक्तं दीपनीयं कफापहम् ।
कषायानुरसं रूक्षं रुच्यं क्वर्हिप्रमेहजित् ।
अधिकं मधुरं स्निग्धं हृद्यं गुरुभारिकम् ॥

नवपुराणमधुगुणाः ।

नवं मधु भवेत् पुष्ट्यै नातिश्लेष्महरं सरम् ।
पुराणं श्लेष्मकं रूक्षं मेदोघ्नमतिलेखनम् ॥
मधुनः शर्करायाश्च गुड़स्यापि विशेषतः ।
एकसंवत्सरोऽतीते पुराणत्वं स्मृतं बुधैः ॥

मधुनः शीतस्य गुणाधिक्य-
मुष्णताया निषेधः ।

विषपुष्पादपि रसं सर्विषा भ्रमरादयः ।

गृहीत्वा मधु कुर्वन्ति तच्छौतं गुणवन्मधु ॥
विषान्वयात्तदुष्णन्तु द्रव्ये नोष्णेन वा सह ।
उष्णात्तं स्योष्णकाले च स्मृतं विषसमं मधु ॥

मधूच्छिष्टम् ।

मधनन्तु मधूच्छिष्टं मधुशेषञ्च सिक्थकम् ।
मदनं मृदु सुस्निग्धं भूतघ्नं व्रणरोपणम् ।
भग्नसन्धानकृद्वातकुष्ठवीसर्परक्तजित् ॥

षट्त्रिंशोऽध्यायः ।

अथ वारिवर्गः ।

जलम् ।

पाणीयं सलिल नीरं कीलालञ्जलमम्बु च ।
आपो वार्वारि कत्तीयं पयः पाथस्तथोदकम् ।
जीवनं वनमक्षोऽर्णोऽमृत घनरसोऽपि च ॥
पाणीयं शमनाग्नेयं क्लमहरं मूर्च्छापिपासापहं
तन्द्राकृद्विबन्धहृद्बलकरं निद्राहरं तर्पणम् ॥
हृद्यं गुरुरसं ह्यजीर्णशमकं नित्यं हितं शीतलम्।
लघ्वच्छ रसकारणं निगदितं पीयूषवज्जीवनम् ॥

तस्य भेदाः ।

पाणीयं मुनिभिः प्रोक्तं दिव्यं भौममिति द्विधा ।

दिव्यं चतुर्विधं प्रोक्तं धराजं करकाभवम्।
तौषारञ्च तथा हैमन्तेषु धारं गुणाधिकम्॥

धारं जलम्।

धाराभिः पतितं तोयं गृहीतं स्फीतवाससा।
शिलायां वा सुधायां वा धौतायां पतितञ्च तत्॥
सौवर्णे राजते ताम्रे स्फाटिके काचनिर्म्मिते।
भाजने मृण्मये वापि स्थापितं धारमुच्यते॥
धारं नीरं त्रिदोषघ्नमनिर्देश्यरसं लघु।
सौम्यं रसायनं बल्यं तर्पणं हृद्यं जीवनम्॥
पाचनं मतिकृन्मूर्च्छातन्द्रादाहश्रमक्लमान्।
तृष्णां हरति तत् पथ्यं विशेषात् प्रावृषि स्थितम्॥

धाराजलस्य भेदाः।

धाराजलन्तु द्विविधं गाङ्गसामुद्रभेदतः।

तत्र गाङ्गसामुद्रजलम्।

गाङ्गमाश्वयुजे मासि प्रायो वर्षति वारिदः।
सर्वथा तज्जलन्देयं तथैव धरके वचः॥
स्थापिते हैमजे पात्रे राजते मृण्मयेऽपि वा।
शाल्यन्नं येन संसिक्तं भवेद्दुग्धेन्दिवर्णवत्।
तद्गाङ्गं सर्वदोषघ्नं ज्ञेयं सामुद्रमन्यथा।
तत्तु सक्षारलवणं शुक्रदृष्टिबलापहम्।
विस्रञ्च दोषलन्तीक्ष्णं सर्वकर्म्मसु गर्हितम्॥
सामुद्रन्त्वाश्विने मासि गुणैर्गाङ्गवदादिशेत्।
यतोऽगस्त्यस्य दिव्यर्षेः स्रवत्यं सकलं जलम्।
निर्म्मलं निर्विषं स्वादु शुक्रलं स्वाद्दोषलम्॥

अनेवजलम् ।

अनार्त्तवं प्रसुवन्ति वारि वारिधरास्तु यत् ।
तत् त्रिदोषाय सर्वेषा देहिनां परिकीर्त्तितम् ॥

अनार्त्तव पौषादिमासचतुष्टयविषयम् ।

करकाजलम् ।

दिव्यवायुग्निसंयोगात् संहता: खात्पतन्ति या: ।
पाषाणखण्डवच्छापस्ता: कारिक्षोऽस्तोपमा: ॥
करकाजञ्जलं रूक्षं दिग्धदं गुरु च स्थिरम् ।
दारुण शीतलं सान्द्रं पित्तहृत् कफवातकृत् ॥

तौषारजलम् ।

अपिनद्या: समुद्रान्ते वह्निरापस्तदुद्भवा: ।
धूमावयवनिर्मुक्तास्तुषाराख्यास्तुता: स्मृता: ।
अपथ्या: प्राणिनां प्राय: भूरुहाणान्तु नाहिता: ॥
तुषाराम्बु हिमं रूक्षं स्याद्वातलमपित्तलम् ।
कफोरुस्तम्भकण्ठाग्निमेहगण्डादिरोगनुत् ॥

आपनद्या: समुद्रान्ते वह्निर्नदीमारभ्य समुद्रपर्य्यन्ते वह्निरास्ते तदुद्भवा: । वह्निभवा धूमावयवनिर्मुक्ता: धूमांशरहिता: । आपस्तुषाराख्या:, शिशिर इति लोके, तुषार इति च ।

हैमजलम् ।

हिमवच्छिखरादिभ्यो द्रवीभूयाभिवर्षति ।
यत्तदेवं हिमं हैमं जलमाहुर्मनीषिण: ॥
हिमाम्बु शीतं पित्तघ्नं गुरु वातविवर्द्धनम् ।
हिमन्तु शीतलं रूक्षं दारुणं सूक्ष्ममित्यपि ।

न तद्दूषयते वातं न च पित्तं न वा कफम् ॥

भौमजलम् ।

भौममम्भो निगदितं प्रथमं त्रिविधं बुधैः ।
जाङ्गलं परमानूपन्ततः साधारणं क्रमात् ॥
अल्पोदकोऽल्पवृक्षश्च पित्तरक्तामयान्वितः ।
ज्ञातव्यो जाङ्गलो देशस्तत्रत्यञ्जाङ्गलं जलम् ॥
बहुस्वबहुवृक्षश्च वातश्लेष्मामयान्वितः ।
देशोऽनूप इति ख्यात आनूपं तद्भवं जलम् ॥
मिश्रचिह्नस्तु यो देशः स हि साधारणः स्मृतः ।
तस्मिन्देशे यदुदकं तत्तु साधारणं स्मृतम् ॥
जाङ्गलं सलिलं रूक्षं लवणं लघु तत्तनु ।
वह्निकृत् कफकृत् पथ्यं विकारान् कुरुते बहून् ॥
आनूपं वार्यभिष्यन्दि स्वादु स्निग्धं घनं गुरु ।
वह्निकृत् कफकृद्दृष्यं विकारान् हरते बहून् ॥
साधारणन्तु मधुरं दीपनं शीतलं लघु ।
तर्पणं रोचनं तृष्णादाहदोषत्रयप्रणुत् ॥

भौमानामेव नादेयादीनां
लक्षणानि गुणाश्च ।

नादेयम् ।

नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम् ।
नादेयमुदकं रूक्षं वातलं लघु दीपनम् ॥
अनभिष्यन्दि विशदं कटुकं कफपित्तनुत् ।
नद्यः शीघ्रवहा लघ्व्यः सर्वा याश्चामलोदकाः ॥
गुर्व्यः शैवलसंच्छन्ना मन्दगाः कलुषाश्च याः ।

हिमवत्प्रभवाः सर्वाः नद्योऽश्माहतपाथसः ॥
गङ्गायतट्टसरयूयमुनाद्या गुणोत्तमाः ।
सह्यप्रभवा नद्यो वेणागोदावरीमुखाः ॥
कुर्वन्ति प्रायशः कुष्ठमीषद्वातकफावहाः ॥
नदीसरस्तडागस्थे कूपप्रस्रवणादिजे ।
उदके देशभेदेन गुणान् दोषाश्च लक्षयेत् ॥

औद्भिदजलम् ।

विदार्य्य भूमिं निस्सृतं यन्महत्या धारया स्रवेत् ।
तत्तोयमौद्भिदं नाम वदन्तीति महर्षयः ॥
औद्भिदं वारि पित्तघ्नमविदाह्यतिशीतलम् ।
ग्रीष्मे मधुरं बल्यमीषद्वातकरं लघु ॥

नैर्झरजलम् ।

शैलसानुस्रवद्वारि प्रवाहे निर्झरो झरः ।
स तु प्रस्रवणश्चापि तत्रत्यं नैर्झरं जलम् ॥
नैर्झरं रुचिकृन्नीरं कफघ्नं दीपनं लघु ।
मधुरं कटुपाकञ्च वातलं स्यादपित्तलम् ॥

सारसजलम् ।

नद्याः शैलादिरुद्धायाः यत्र सस्तुत्य तिष्ठति ।
तत्सरो जलसञ्छन्नं तदम्भः सारसं स्मृतम् ॥
सारसं सलिलं श्रेष्ठं दृष्णाघ्नं मधुरं लघु ।
रोचनन्तुवरं रूक्षं बहुमूत्रमलं स्मृतम् ॥

तडागजलम् ।

प्रशस्तभूनिभागस्थो बहुसंवत्सरोषितः ।
जलाशयस्तडागः स्यात्तडागं तज्जलं स्मृतम् ॥

तडागमुदकं स्वादु कषाय कटुपाकि च ।
वातलं बडविच्चमस्रक्पित्तकफापहम् ॥

वाप्यजलम् ।

पाषाणैरिष्टकाभिर्वा बद्धकूपा बृहत्तरा ।
सस्रोपाना भवेद्यापी तज्जलं वाप्यमुच्यते ॥
वाप्यं वारि यदि क्षारं पित्तकृत् कफवातहृत् ।
तदेव मिष्टं कफजद्वातपित्तहरं भवेत् ॥

कौपजलम् ।

भूमौ खातोऽल्पविस्तारो गम्भीरो मण्डलाकृतिः ।
बद्धोऽबद्धः स कूपः स्यात्तदम्भः कौपमुच्यते ॥
कौप पथ्यो यदि स्वादु त्रिदोषघ्नं हितं लघु ।
तत् क्षारं कफवातघ्न दीपनं पित्तकृत् परम् ॥

चौद्यजलम् ।

शिलाकीर्णे क्षय यस्मं नीलाच्छनसमोदकम् ।
लताविताननंच्छन्नं चौद्यमित्यभिधीयते ॥
अश्वादिभिरबद्धं यत्तच्चौद्यमिति चापरे ।
तत्त्वल्पमुदकं चौद्यं मुनिभिः समुदाहृतम् ॥
चौद्यं वह्निकरं नीरं रूक्षं कफहर लघु ।
मधुरं पित्तनुद्वृष्यं पाचनं विशदं स्मृतम् ॥

पाल्वलजलम् ।

अल्पं सरः पल्वलं स्याद्यत्र चन्द्रार्कगे रवौ ।
न तिष्ठन्ति जलं किञ्चित्तत्स्यं वारि पाल्वलम् ॥
पाल्वल वार्य्यभिष्यन्दि गुरु स्वादु त्रिदोषकृत् ॥

विकिरजलम् ।

नद्यादिनिकटे भूमिर्या भवेद्बालुकामयी ।
उद्धार्यते ततो यत्तु तज्जलं विकिरं विदुः ॥
विकिरं शीतलं स्वच्छं निर्दोषं लघु च स्मृतम् ।
तुवरं स्वादु पित्तघ्नं क्षारं तत् पित्तलं मनाक् ॥

कैदारजलम् ।

केदारं क्षेत्रमुद्दिष्टं कैदारं तज्जलं स्मृतम् ।
कैदारं वार्य्यभिष्यन्दि मधुरं गुरु दोषकृत् ॥

वृष्टिजलम् ।

वार्षिकं तदहर्दृष्टं भूमिस्थमहितं जलम् ।
त्रिरात्रमुषितं तत्तु प्रसन्नममृतोपमम् ॥

हैमन्तादिकालविशेषे विहितजल-
विशेषः ।

हैमन्ते सारसन्तोयं ताड़ागं वा हितं स्मृतम् ।
हैमन्ते विहितं तोयं शिशिरेऽपि प्रशस्यते ॥
वसन्तग्रीष्मयोः कौपं वाप्यं वा नैर्झरं जलम् ।
नादेयं वारि नादेयं वसन्तग्रीष्मयोर्बुधैः ॥
विषवद्दनदुच्छाणा पवाद्यैर्दूषितं यतः ।
औद्विदं वान्तरीक्षं वा कौपं वा प्रावृषि स्मृतम् ॥
शस्तं शरदि नादेयं नीरमंशूदकं परम् ।
दिवा रविकरैर्जुष्टं निशि शीतकरांशुभिः ॥
क्षेयमंशूदकनाम स्निग्धं दोषत्रयापहम् ।
अनभिष्यन्दि निर्दोषमान्तरीक्षजलोपमम् ।
बल्यं रसायनं मेध्यं शीतं लघु सुधासमम् ॥

हृद्यश्चन्द्रतलम् । पौषे वारि सरोजातं माघे तत्तु तडागजम् ।
फाल्गुने कूपसम्भूतं चैत्रे चौद्धं हितं मतम् ॥
वैशाखे नैर्झरं नीरं ज्यैष्ठे प्रस्रवणोद्भिदम् ।
आषाढ़े प्रस्रवे कौपं श्रावणे दिव्यमेव च ॥
भाद्रे कौपं पयः प्रस्रमाश्विने चौद्धमेव च ।
कार्त्तिके मार्गशीर्षे च जलमात्रं प्रशस्यते ॥

जलग्रहणकालः ।

सौम्यामभ्रसां प्रायो ग्रहणं प्रातरिष्यते ।
शीतत्वं निर्मलत्वञ्च यत्रैषां मतो गुणः ॥

जलस्य पानविधिः ।

अत्यम्बुपानाच्च विपच्यतेऽन्नं
नाम्बुपानाच्च स एव दोषः ।
तस्मात्तरी वह्निविवर्द्धनाय
मुहुर्मुहुर्वारि पिबेदभूरि ॥

शीतजलपानस्थलम् ।

मूर्च्छायां पित्तोषदाहेषु विषे रक्ते बलास्रये ।
श्रमे भ्रमे विदर्घेऽर्के तमके वमथौ तथा ।
अजीर्णे रक्तपित्ते च शीतमम्बु प्रशस्यते ॥

शीतलजलस्य पाननिषेधः ।

पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे ।
आध्माने स्तिमिते कोष्ठे सद्यःशुद्धौ नवज्वरे ॥
अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ ।
हिक्कायां क्षीहपाने च शीताम्बु परिवर्जयेत् ॥

अल्पजलपानस्य विषयाः ।

अरोचके प्रतिश्याये मन्देऽग्नौ श्वयथौ क्षये ।
मुखप्रसेके जठरे कुष्ठे नेत्रामये ज्वरे ।
व्रणे च मधुमेहे च पिबेत् पानीयमल्पकम् ॥

जलपानस्यावश्यकता ।

जीवनं जीविनां जीवो जगत् सर्वन्तु तन्मयम् ।
अतोऽत्यन्तनिषेधेन न क्वचिद्वारि वार्य्यते ॥
हारीतश्च । तृष्णा गरीयसी घोरा सद्यः प्राणविनाशिनी ।
तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम् ॥
तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति ।
अतः सर्वावस्थासु न क्वचिद्वारि वर्जयेत् ॥

प्रशस्तं जलम् ।

अगन्धमव्यक्तरसं सुशीतं तर्षनाशनम् ।
अच्छं लघु च हृद्यञ्च तोयं गुणवदुच्यते ॥

निन्दितजलम् ।

पिच्छिलं क्रिमिलं क्लिन्नं पर्णशैवालकर्दमैः ।
विवर्णं विरसं सान्द्रं दुर्गन्धं न हितं जलम् ॥
कलुषं क्षत्रमञ्जोजपर्णनीलीतृणादिभिः ।
दुर्दैवजमसंस्पृष्टं सौरचान्द्रमरीचिभिः ॥
अनार्त्तवं वार्षिकन्तु प्रथमं तच्च भूमिगम् ।
व्यापन्नं परिहर्त्तव्यं सर्वदोषप्रकोपनम् ॥
तत् कुर्य्यात् क्षानपानाभ्यां तृष्णाध्मानोदरज्वरान् ।
कासाग्निमान्द्याभिषन्द्यकण्डूगण्डादिकं तथा ॥

दुष्टजलस्य निर्दोषीकरणोपायः ।
निन्दितञ्चापि पानीयं कथितं सूर्यतापितम् ।
सुवर्णं रजत लौह पाषाण सिकतामपि ॥
अग्र सन्ताप्य निर्वाप्य सप्तधा साधित तथा ।
कर्पूरजातिपूगमपाटलादि सुवासितम् ।
शुचिसान्द्रपटस्रावि क्षुद्रजन्तुविवर्जितम् ॥

पीतस्य जलस्य पाककालः ।

आम जलं जीर्यति यामयुग्मात्
यामैकमात्रात् श्रृतशीतलञ्च ।
तदर्द्धमात्रेण श्रृत कदुष्ण
मयःप्रपाके त्रय एव कालाः ॥

अष्टत्रिंशोऽध्यायः ।

अथ तैलवर्गः ।

तैलम् ।

तिलादिस्निग्धवस्तूना स्नेहस्तैलमुदाहृतम् ।
तत्तु वातहरं सर्वं विशेषात् तिलसम्भवम् ॥

तिलतैलम् ।

तिलतैलं गुरु स्थैर्यबलवर्णकरं सरम् ।
हृद्यं विकाशि विपदं मधुर रसपाकयोः ॥

सूक्ष्मं कषायानुरसं तिक्तं वातकफापहम् ।
वीर्य्येणोष्णं हिमं स्पर्शे बृंहणं रक्तपित्तकृत् ॥
लेखनं बद्धविण्मूत्रं गर्भाशयविशोधनम् ।
दीपनं पुष्टिदं मेध्यं व्यवायि व्रणमेहनुत् ॥
श्रोत्रयोनिशिरःशूलनाशनं लघुताकरम् ।
त्वचं केशञ्च चक्षुष्यमभ्यङ्गे भोजनेऽन्यथा ॥
क्षिप्तभिन्नच्युतोत्पिष्टमथितं क्षतपिण्डिते ।
भग्नस्फुटितविद्राग्निदग्धविश्लिष्टदारिते ॥
तथाभिहतनिर्भुग्ने मृगव्याघ्रादिविक्षते ।
वस्तौ पानेऽन्नसंस्कारे नस्ये कर्णाक्षिपूरणे ।
सेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते ॥
ननु बृंहणलेखनयोः सामानाधिकरण्यमित्याहुः ।
रूक्षादिदुष्टः पवनः स्रोतः सङ्कोचयेद्यदा ।
रसोऽसम्यक् वहन् काय्यं कुर्याद्रूक्षाद्यवर्द्धनम् ॥
तेषु प्रवेष्टुं सरता सौक्ष्म्यात्स्निग्धत्वमार्दवैः ।
तैलं चमू रसं नेतुं क्षयाणां तेन बृंहणम् ॥
व्यवायि सूक्ष्म तीक्ष्णोष्णसरत्वैर्मेदसः क्षयम् ।
यत्नैः प्रकुरुते तैल तेन लेखनमीरितम् ॥
द्रुतं पुरीषं बध्नाति स्खलितं तत् प्रवर्त्तयेत् ।
ग्राहक सारकञ्चापि तेन तैलमुदीरितम् ॥

सर्षपतैलम् ।

दीपनं सार्षपं तैलं कटूपाकरसं लघु ।
लेखनं स्पर्शवीर्य्योष्णं तीक्ष्णं पित्तास्रदूषकम् ॥
कफमेदोऽनिलार्शोघ्नं शिरःकर्णामयापहम् ।

कण्डूकुष्ठक्रिमिश्वित्रकोठदुष्टव्रणप्रणुत् ।
तद्वद्राजिकयोस्तैलं विशेषान्मूत्रकृच्छ्रकृत् ॥

तुवरीतैलम् ।

तीक्ष्णोष्णं तुवरीतैलं लघु ग्राहि कफास्रजित् ।
वह्निकृद्विषहृत् कण्डूकुष्ठकोठक्रिमिप्रणुत् ।
मेदोदोषापहच्चापि व्रणशोथहरं परम् ॥

अतसीतैलम् ।

अतसीतैलमाग्नेयं स्निग्धोष्णं कफपित्तकृत् ।
कटुपाकमचक्षुष्यं बल्यं वातहरं गुरु ॥
मलकृद्रसतः स्वादु ग्राहि स्वग्दोषहृद्धनम् ।
वस्तौ पाने तथाभ्यङ्गे नस्ये कर्णस्य पूरणे ।
अनुपानविधौ चापि प्रयोज्यं वातशान्तये ॥

कुसुम्भतैलम् ।

कुसुम्भतैलमम्लं स्यादुष्णं गुरु विदाहि च ।
चक्षुर्ष्यमहितं बल्यं रक्तपित्तकफप्रदम् ॥

खसबीजतैलम् ।

तैलं तु खसबीजानां बल्यं हृद्यं गुरु स्मृतम् ।
वातहृत् कफहृच्छीतं स्वादुपाकरसं च तत् ॥

एरण्डतैलम् ।

एरण्डतैलं तीक्ष्णोष्णं दीपनं पिच्छिलं गुरु ।
हृद्यं त्वच्यं वयस्यञ्च मेधाकान्तिबलप्रदम् ॥
कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनम् ।
विस्रं स्वादु रसे पाके सतिक्तं कटुकं सरम् ॥
विषमज्वरहृद्रोगपृष्ठगुह्यादिशूलनुत् ।

हन्ति वातोदरानाहगुल्माष्ठीलाकटिग्रहान् ॥
वातशोणितविड्बन्धब्रध्नशोथामविद्रधीन् ।
आमवातगजेन्द्रस्य शरीरवनचारिणः ॥
एक एव निहन्त्यग्रमेरण्डस्तेजकेशरी ॥

रालतैलम् ।

तैलं सज्जरसोद्भूतं विस्फोटव्रणनाशनम् ।
कुष्ठपामाक्रिमिहरं वातश्लेष्मामयापहम् ॥

शीताशुतैलम् ।

कर्पूरतैलं हैपेयं सौगन्धिकमथैलकम् ।
शीताशुतैलं पर्णीत्थं स्रावतैलमपि स्मृतम् ॥
शीतांशुतैलमाक्षेपशमनं वायुनाशनम् ।
श्वेदन शूलहृच्छीघ्रं ज्वरघ्नं कफनुत् परम् ॥
आमवाते तथाध्माने ज्वरे च शिरसो गदे ।
दन्तरोगे च भग्ने च हैपेयं परियुज्यते ॥

मात्रा ३ विन्दवः ।

यष्टद्रुमतैलम् ।

यष्टद्रुतैलं चतहृत् कुष्ठामयविनाशनम् ।
कफघ्नं लेखन कण्डूहरं जन्तुविषापहम् ॥

अस्य मात्रा ८ विन्दवः ।

वातादतैलम् ।

वातादतैल मृदु रेचन स्यात्
वाजीकर मूत्रगदप्रहन्तृ ।
पित्तानिलघ्न खलु दाहनाशि

लावण्यदं मेहहरं सुशीतम् ॥

मात्रा २ माषकौ ।

नारिकेलतैलम् ।

नारिकेलफलोद्भूतं तैलं वाजीकरं गुरु ।
पोषणं क्षीणधातूनां वातपित्तप्रणाशनम् ॥
शुक्रे नष्टे प्रमेहे च श्वासे कासे च यक्ष्मणि ।
मेधालोपे च हितदं चेतान्तकरणं तथा ॥

मात्रा २ माषकौ।

करञ्जतैलम् ।

करञ्जतैलं तीक्ष्णोष्णं क्रिमिहृद्रक्तपित्तजित् ।
नवनामयवातार्त्तिकुष्ठकण्डूव्रणप्रणुत् ।
वायुनुत् पित्तजित् किञ्चिल्लेपनाच्चर्म्मदोषहृत् ॥

मात्रा ५ बिन्दवः ।

पाटलीतैलम् ।

वामनं पाटलीतैलं कुष्ठकण्डूविमर्दनम् ।
व्रणवक्त्रप्रद चर्म्मदोषहन्तृ रसायनम् ॥

मात्रा १० बिन्दवः ।

जातीफलतैलम् ।

तैलं जातीफलोद्भूतं मसुरे जनमग्निदम् ।
जीर्णातिसारग्रमनमाध्मानाजीर्णशूलहृत् ।
आमवातहरं बल्यं दन्तवेष्टव्रणार्त्तिनुत् ॥

मात्रा ५ बिन्दवः ।

लवङ्गतैलम् ।

देवपुष्पभव तैलमग्निक्षुद्वातनाशनम् ।

दन्तवेष्टचलार्त्तिघ्नं गर्भिण्या वमनापहम् ॥

मात्रा ५ विन्दवः।

त्वाचतैलम्।

वह्निसादानिलहरमाध्मानाक्षेपनाशनम्।
वान्त्युत्क्लेशप्रशमनं संग्राहि दशनार्त्तिहृत्।
त्वाचं तैलं रज स्रावि तोये क्षिप्तं निमज्जति ॥

मात्रा ५ विन्दवः।

दीप्यकतैलम्।

दीप्यात्तैलमाग्नेयं शूलाक्षेपानिलान्तकृत्।
आध्मानाजीर्णदुर्नामग्रहणीदोषनाशनम् ॥

मिषितैलम्।

तैलं मैषेयमाग्नेय शूलाध्मानानिलप्रणुत् ॥

मात्रा ५ विन्दवः।

जीरकतैलम्।

मिषितैलगुणं ज्ञेयं तैलं जीरकसम्भवम् ॥

मात्रा ५ विन्दवः।

शृगालकण्टकतैलम्।

शृगालकण्टकोद्भूतं तैलं भग्नव्रणापहम्।
आमवातप्रशमनं निर्य्यासोऽस्याक्षिरोगहृत्॥

निकुम्भतैलम्।

तैलं निकुम्भबीजोत्थमत्युग्रं रेचनं परम्।
आनाहमुदरं हन्ति संन्यासञ्च शिरोगदम् ॥
धनुःस्तम्भं तथोन्मादं गदमेकाङ्गसंज्ञकम्।

आमवातश्च शोथश्च मर्दनात् कासमातनम् ॥

मात्रा १ विन्दुः ।

सर्वतैलगुणाः ।

तैलं स्वयोनिगुणजद्रव्याम्भटैनाखिल मतम् ।

अतः शेषस्य तैलस्य गुणा ज्ञेयाः स्वयोनिवत् ॥

अष्टत्रिंशोऽध्यायः ।

अथ मूत्रवर्गः ।

गोमूत्रम् ।

गोमूत्रं कटु तीक्ष्णोष्णं क्षारं तिक्तं कषायकम् ।
लघ्वग्निदीपनं मेध्यं पित्तकृत् कफवातहृत् ॥
शूलगुल्मोदरानाहकण्डूच्छिसुखरोगजित् ।
किलासगदवातामवस्तिरुक्कुष्ठनाशनम् ।
कासश्वासापहं शोथकामलापाण्डुरोगहृत् ॥

अन्यच्च कण्डूकिलासगदशूल मुखाक्षिरोगान्
गुल्मातिसारमरुतदामयमूत्ररोधान् ।
कास सकुष्ठजठरक्रिमिपाण्डुरोगान्
गोमूत्रमेकमपि पीतमपाकरोति ॥

सर्वेष्वपि च मूत्रेषु गोमूत्रं गुणतोऽधिकम् ।
अतोऽविशेषात् कथने मूत्रं गोमूत्रमुच्यते ॥

पुनरुक्तं ।

प्लीहोदरश्वासकासशोथवर्चोग्रहापहम् ।

शूलगुल्मरुजानाहकामलापाण्डुरोगहृत् ।
कषाय तिक्ततीक्ष्णञ्च पूरणात् कर्णशूलनुत् ॥

मेषमूत्रम् ।

अविमूत्रं सतिक्तं स्यात् स्निग्धं पित्ताविरोधि च ॥

छागमूत्रम् ।

आज कषायमधुर पथ्य दोषत्रिहन्ति च ॥

माहिषमूत्रम् ।

अर्शःश्लीपदरघ्नन्तु सचारं माहिषं सरम् ॥

हस्तिमूत्रम् ।

हास्तिकं लवणं मूत्र हितन्तु क्रिमिकुष्ठिनाम् ।
प्रशस्त बन्धविन्मूत्रविषघ्ने क्षामयार्शसाम् ॥

उष्ट्रमूत्रम् ।

सतिक्त श्वासकासघ्नमर्शोघ्नं चौष्ट्रमुच्यते ॥

अश्वमूत्रम् ।

वाजिना तिक्तकटुकं कुष्ठव्रणविषापहम् ॥

गर्दभमूत्रम् ।

खरमूत्रमपस्मारोन्मादग्रहविनाशनम् ॥

नरमूत्रम् ।

नरमूत्रं गरं हन्ति सेवितन्तद्रसायनम् ।
रक्तपामाहर तीक्ष्णं सचारलवण स्मृतम् ॥
गोऽजाविमहिषीणा तु स्त्रीणा मूत्र प्रशस्यते ।
खरोष्ट्रेभनराश्वाना पुंसां मूत्रं हित स्मृतम् ॥

अनचत्वारिंशोऽध्यायः ।

अथ लवणचतुष्कवर्गः ।

सैन्धवम् ।

सैन्धवोऽम्लो मौतिश्च माणिमन्थश्च सिन्धुजम् ॥
सैन्धवं लवणं स्वादु दीपनं पाचन लघु ।
स्निग्धं रुच्यं हिमं हृद्यं सूक्ष्मं नेत्रं त्रिदोषहृत् ॥
इदं पञ्चनदेशीये पर्वतखनौ लभ्यम् ।

सौवर्चलम् ।

सौवर्चलं स्वादुलवणमम्लं पाक्यञ्च तन्मतम् ।
रुचकं रोचनभेदि दीपनम्माचनम्परम् ॥
सुस्नेह वातनुन्नातिपित्तल विशदं लघु ।
उद्गारशुद्धिद सूक्ष्म विबन्धानाहशूलजित ॥

विड्म् ।

विडं पाकञ्च कतक तथा द्राविडमासुरम् ।
विड्ं सचारमूर्द्धाधः कफवातानुलोमनम् ॥
दीपन लघु तीक्ष्णोष्णं रूक्ष रुच्यं व्यवायि च ।
विबन्धानाहविष्टम्भहृद्गौरवशूलनुत् ॥

सामुद्रलवणम् ।

